शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदं[9] तु वैकृताः ।
ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते ॥७७॥

इन्द्रियस्यैव संस्कारः शब्दस्यैवोभयस्य[10] च ।
क्रियते ध्वनिभिर्वादास्त्रयोभिव्यक्तिवादिनाम् ॥७८॥

इन्द्रियस्यैव संस्कारः समाधानाञ्जनादिभिः ।
विषयस्य तु संस्कारस्तद्गन्धप्रतिपत्तये ॥७९॥

---

१ ब. सूत्रग्राह्याम्. २ अ. जातिप्रत्यर्थिता व्यक्तिः प्रदेशेषु प्रतिष्ठते । ३ अ. आ. ओ. श्लोकार्धमिदं न पठ्यते. ४ ब. पदे भेदेपि. ५ आ. च. न वर्णव्यतिरेकेण पदमन्यच्च विद्यते । ६ ब. अवयवा इव; ओ. अवयवा न वा. ७ ब. अ. तत्रैतेषां. ८ च. उपचर्यते इत्यस्यानन्तरं- ' वर्णस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते । स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते ॥ ' इत्येषा कारिका टीकायामुपलभ्यते । आदर्शहस्तालिखितेषु तु सा मूलकारिकास्वेव पठ्यते. ९ अ. वृत्तेर्भेदं; ओ. वृत्तिभेदे; आ. वृत्तिभेदात् १० ओ. च. ब. उभयस्य वा.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

चक्षुषः प्राप्यकारित्वे तेजसा तु द्वयोरपि ।
विषयेन्द्रिययोरिष्टः संस्कारः स क्रमो ध्वनेः ॥८०॥

स्फोटरूपाविभागेन ध्वनेर्ग्रहणमिष्यते ।
कैश्चिद् ध्वनिरसंवेद्यः स्वतन्त्रोऽन्यैः प्रकाशितैः[2] ॥८१॥

यथानुवाकः श्लोको वा सोढत्व[3]मुपगच्छति ।
आवृत्त्या न तु स ग्रन्थः[4] प्रत्या[5]वृत्ति निरूप्यते ॥८२॥

प्रत्ययैरनुपाख्येयैर्ग्रहणानुगुणैस्तथा ।
ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते ॥८३॥

नादैराहितबीजायामन्त्येन ध्वनिना सह ।
आवृत्तपरिपाकायां बुद्धौ शब्दोवधार्यते ॥ ८४ ॥

असतश्चान्तराले याञ्छब्दा[6]नस्तीति मन्यते ।
प्रतिपत्तुरशक्तिः सा ग्रहणोपाय एव सः ॥८५॥

भेदानुकारो ज्ञानस्य वाच[7]श्चोपप्लवो ध्रुवः ।
क्रमोपसृष्टरूपा वाग् ज्ञानं ज्ञेयव्यपाश्रयम्[8] ॥८६॥

यथाद्यसंख्याग्रहणमुपायः प्रतिपत्तये ।
संख्यान्तराणां भेदेपि तथा शब्दान्तरश्रुतिः ॥८७॥

प्रत्येकं व्यञ्जका भिन्ना वर्णवाक्यपदेषु ये ।
तेषामत्यन्तभेदेपि प्र[10]कीर्णा इव शक्तयः ॥८८॥

यथैव दर्शनैः पूर्वैर्दूरात्संतमसेपि वा ।
[11]अन्यथाकृत्य विषयमन्[12]यथैव व्यवस्यति ॥८९॥

---

१ ओ. द्वयोर्ग्रहणं २ च. प्रकल्पितः; ब. प्रकाशकः ३ आ. स्फोटत्वमुप. ४ आ. संग्रन्थः । ५ अ प्रत्यावृत्ति न विद्यते; ब प्रत्यावृत्त्या निरूप्यते. ६ आ. शब्दो नास्तीति; अ. शब्दान्नास्तीति; आ. शब्दोनास्तीति. ७ अ. वाचकोपप्लवः. ८ ब. स. रूपाया ज्ञानं । ९ च. ब. 'व्यपाश्रयम्' इत्यस्यानन्तरम्—'ज्ञेयेन न विना ज्ञानं व्यवहारे प्रतिष्ठते । नालब्धक्रमया वाचा कश्चिदर्थोभिधीयते ॥' इतीयं कारिका टीकायां समुपलभ्यते । हस्तलिखितादर्शेषु तु मूलकारिकापाठे एव पठ्यते । प्रतिष्ठते इत्यस्य स्थाने अवतिष्ठते इति च पाठो दृश्यते । १० च. ब. संकीर्णा इव. ११ ओ. व्यज्यमानैस्तथा वाक्यैः. १२ ओ. च. ब. स. अन्यथैवाध्यवस्यति ।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

व्यज्यमाने तथा वाक्ये वाक्याभिव्यक्तिहेतुभिः ।
भावावग्रहरूपेण[1] पूर्वं बुद्धिः प्रवर्तते ॥९०॥

यथानुपूर्वीनियमो विकारे क्षीरबीजयोः ।
तथैव प्रतिपत्तॄणां नियतो बुद्धिषु क्रमः ॥९१॥

भागवत्स्वपि तेष्वेवं[2] रूपभेदो ध्वनेः क्रमात् ।
निर्भागेष्वभ्युपायो[3] वा भागभेदप्रकल्पना[4] ॥९२॥

अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता ।
कैश्चिद्[5]व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ॥९३॥

अविकारस्य शब्दस्य निमित्तैर्विकृतो ध्वनिः ।
उपलब्धौ निमित्तत्वमुपयाति प्रकाशवत् ॥९४॥

न चानित्येष्वभिव्यक्तिर्नियमेन व्यवस्थिता ।
आश्रयैरपि नित्यानां जातीनां व्यक्तिरिष्यते ॥९५॥

देशादिभिश्च संबन्धो दृष्टः कायवर्ता[6]मिह ।
देशभेदविकल्पेपि न भेदो ध्वनिशब्दयोः ॥९६॥

ग्रहणग्राह्ययोः सिद्धा योग्यता नियता यथा ।
व्यङ्ग्यव्यञ्जकभावेन तथैव स्फोटनादयोः ॥९७॥

स[7]दृशग्रहणानां च गन्धादीनां प्रकाशकम् ।
निमित्तं नियतं लोके प्रतिद्रव्यमवस्थितम् ॥९८॥
प्रकाशकानां भेदांश्च[8] प्रकाश्योर्थोनुवर्तते ।
तैलोदकादिभेदे तत्[9]प्रत्यक्षं प्रतिबिम्बके ॥९९॥

विरुद्धपरिमाणेषु वज्रादर्शतलादिषु[10] ।
पर्वतादिसरूपाणां भावानां नास्ति संभवः ॥१००॥

तस्मादभिन्नकालेषु वर्णवाक्यपदादिषु ।
वृत्तिकालः स्वकालश्च नादभेदाद्विभज्यते[11] ॥१०१॥

---

१ च. ब. भागावग्रह० ओ. भावाग्रहणरूपेण. २ ब. एवं रूपभेदो. ३ अ. ब. अप्युपायो वा. ४ च. ब. स. प्रकल्पनम्. ५ अ. केचिद्व्यक्तयः. ६ अ. च. कायवतामपि । ७ अ. सदृशग्रहणानीव. ८ आ. भेदानां प्रकाश्योर्थों. ९ भेदेन प्रत्यक्षं. १० आ. नखादिषु; प. जलादिषु. ११ आ. विभिद्यते; प. विभाव्यते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

यः संयोगविभागाभ्यां करणैरुपजन्यते ।
स स्फोटः शब्दजाः शब्दा ध्वनयोन्यैरुदाहृताः ॥१०२॥

अल्पे महति वा शब्दे स्फोटकालो न भिद्यते ।
परस्तु शब्दसंतानः[1] प्रचयापचयात्मकः[2] ॥१०३॥

दूरात् प्रभेव दीपस्य ध्वनिमात्रं तु लक्ष्यते ।
घण्टादीनां च शब्देषु व्यक्तो भेदः स दृश्यते ॥१०४॥

द्रव्याभिघातात् प्रचितौ भिन्नौ दीर्घप्लुतावपि ।
कम्प[3]रूपेण ते जाता नादा वृत्तेर्विशेषकाः[4] ॥१०५॥

अनवस्थितकम्पेपि करणे[5] ध्वनयोपि ते ।
स्फोटादेवोपजायन्ते ज्वाला ज्वालान्तरादिव ॥१०६॥

वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते ।
कैश्चिद्दर्शनभेदो हि प्रवादेष्वनवस्थितः ॥१०७॥

लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना ।
स्थानेष्व[6]भिहतो वायुः शब्दत्वं प्रतिपद्यते ॥१०८॥

तस्य कारणसामर्थ्याद्वेगप्रचय[7]धर्मणः ।
संनिपाताद्विभज्यन्ते सारवत्योपि मूर्तयः ॥१०९॥

अणवः सर्वशक्तित्वाद्भेदसंसर्गवृत्तयः ।
छायातपतमः[8]शब्दभावेन परिणामिनः ॥११०॥

स्वशक्तौ व्यज्यमानायां प्रयत्नेन समीरिताः ।
अभ्राणीव प्रचीयन्ते शब्दाख्याः परमाणवः ॥१११॥

अथायमान्तरो[9] जातः सूक्ष्मो वागात्मनि स्थितः ।
व्यक्तये[10] स्वस्य रूपस्य शब्दत्वेन विवर्तते[11] ॥११२॥

---

१ अ. शब्दसंघातान्. २ आ. प्रचयोपप्लवात्मकः. ३ ओ. च. ब. कम्पे तूपरते जाताः. ४ अ. विशेषतः. ५ अ. करणे ध्वनयोपरे. ६ अ. ओ. स्थानेष्वपिहितः. ७ आ. ब. प्रचयधर्मिणः. ८ अ. नभःशब्द. ९ आ. च. आन्तरो ज्ञाता; ब. अथेदमान्तरं ज्ञानं सूक्ष्मवागात्मना स्थितम् । व्यजने स्वस्य रूपस्य; आ. अथायमान्तरो ज्ञाता सूक्ष्मरागात्मनि स्थितः । व्यक्तो यस्तस्य. १० अ. ओ. व्यक्तो व्यक्तस्य रूपस्य, ११ ब. निवर्तते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

स मनोभावमापद्य तेजसा पाकमागतः ।
वायुमाविशति प्राणमथासौ समुदीर्यते ॥११३॥

अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः ।
तद्धर्मेण समाविष्टस्तेजसैव विवर्तते ॥११४॥

विभजन् स्वात्मनो ग्रन्थीन् श्रुतिरूपैः पृथग्विधैः ।
प्राणो वर्णानभिव्यज्य वर्णेष्वेवोपलीयते ॥११५॥

अजस्रवृत्तिर्यः शब्दः सूक्ष्मत्वान्नोपलभ्यते ।
व्यजनाद्वायुरिव स स्वनिमित्तात्प्रतीयते ॥११६॥

तस्य प्राणे च या शक्तिर्या च बुद्धौ व्यवस्थिता ।
विवर्तमाना स्थानेषु सैषा भेदं प्रपद्यते ॥११७॥

शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनम् ।
यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते ॥११८॥

षड्जादिभेदः शब्देन व्याख्यातो रूप्यते यतः ।
तस्मादर्थविधाः सर्वाः शब्दमात्रासु निश्रिताः ॥११९॥

शब्दस्य परिणामोयमित्याम्नायविदो विदुः ।
छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्तत ॥१२०॥

इतिकर्तव्यता लोके सर्वा शब्दव्यपाश्रया ।
यां पूर्वाहितसंस्कारो बालोपि प्रतिपद्यते ॥१२१॥

आद्यः करणविन्यासः प्राणस्योर्ध्वं समीरणम् ।
स्थानानामभिघातश्च न विना शब्दभावनाम् ॥१२२॥

---

१ आ. ओ. स मनोभावमित्यारभ्य द्वौ श्लोकौ न पठ्येते; अ. समताभावमापाद्य. २ च. ब. विभज्य. ३ ब. सूक्ष्मत्वाच्चोपलभ्यते. ४ अ. निबन्धनी. ५ अ. आ. ओ. यत्ने तु प्रतिभात्मायं. ६ ब. शब्दमात्राः सुनिश्चिताः ७ अ. निश्चिताः. ८ अ. छन्दमास्यपरिणामोयमित्याश्रयाविदो विदुः । ओ. छन्दस्य परि०. ९ च. ब. 'व्यवर्तत' इत्यस्यानन्तरम् 'विभज्य बहुधात्मानं स च्छन्दस्यः प्रजापतिः । छन्दोमयीभिर्मात्राभिर्बहुधैव विवेश तम् । साध्वी वाग्भूयसी येषु पुरुषेषु व्यवस्थिता । अधिकं वर्तते तेषु पुण्यरूपं प्रजापतेः ॥ प्राजापत्यं महत्तेजस्तत् पात्रैरिव संवृतम् । शरीरभेदे विदुषां स्वां योनिमुपधावति ॥ यदेतन्मण्डलं भास्वद्धाम चित्रस्य राधसः । तद्भावमभिसंभूय विद्यायां प्रविलीयते ॥' इति कारिकाचतुष्टयमेतट्टीकायां समुपलभ्यते । हस्तलिखितादर्शेषु तु मूलकारिकापाठ एव पठ्यते । १० अ. ऊर्ध्वसमीरणम्.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥१२३॥

वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती ।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥१२४॥

[1]सा सर्वविद्याशिल्पानां कलानां चोपबन्धनी ।
तद्[2]वशादपि निष्पन्नं सर्वं वस्तु विभज्यते ॥१२५॥

सैषा संसारिणां संज्ञा बहिरन्तश्च वर्तते ।
[3]तन्मात्राम[4]नतिक्रान्तं चैतन्यं [5]सर्वजातिषु ॥ १२६ ॥

अर्थक्रियासु वाक् [6]सर्वान् समीहयति देहिनः ।
तदुत्क्रान्तौ विसंज्ञोयं[7] दृश्यते काष्ठकुड्यवत्[8] ॥ १२७ ॥

[9]प्रविभागे यथा कर्ता [10]तया कार्ये प्रवर्तते ।
अविभागे तथा सैव कार्यत्वेनावतिष्ठते ॥ १२८ ॥

स्वमात्रा परमात्रा वा श्रुत्या [11]प्रक्रम्यते यथा ।
तथैव रूढतामेति तया [12]ह्यर्थो विधीयते ॥ १२९ ॥

अत्यन्तमतथाभूते निमित्ते [13]श्रुत्युपाश्रयात् ।
[14]दृश्यतेऽलातचक्रादौ वस्त्वाकारनिरूपणा ॥ १३० ॥

---

१ अ. ओ. या सर्व०. २ ओ. च. अभिनिष्पन्नं; ब. अभिनिष्पत्तौ. ३ च. ब. तन्मात्रामप्यति०. ४ ब. अतिक्रान्ते. ५ ब. सर्वजन्तुषु. ६ ओ. ब. सर्वा समीहयति. ७ अ. विसंज्ञेयं. ८ च. ब. काष्ठकुड्यवदित्यस्यानन्तरं —'भेदोद्ग्राहविवर्तेन लब्धाकारपरिग्रहा । आम्नाता सर्वविद्यासु वागेव प्रकृतिः परा ॥ एकत्वमनतिक्रान्ता वाङ्नेत्रा वाङ्निबन्धनाः । पृथग्वदवभासन्ते वाग्विभागा गवादयः ॥ षड्द्वारां षडधिष्ठानां षट्प्रबोधां षडव्ययाम् । ते मृत्युमतिवर्तन्ते ये वै वाचमुपासते ॥' इति श्लोकत्रयं, 'अवतिष्ठते' इत्यस्यानन्तरं 'प्रविभज्यात्मनात्मानं सृष्ट्वा भावान् पृथग्विधान् । सर्वेश्वरः सर्वमयः स्वप्ने भोक्ता प्रवर्तते ॥' इति श्लोकः, तथा च 'अमृतमश्नुते' इत्यस्यानन्तरं 'प्राणवृत्तिमतिक्रान्ते वाचस्तत्त्वे व्यवस्थितः । क्रमसंहार–(कूर्मसंहार ?) योगेन संहृत्यात्मानमात्मनि ॥ वाचः संस्कारमाधाय वाचं ज्ञाने निवेश्य च । विभज्य बन्धनान्यस्याः कृत्वा तां छिन्नबन्धनाम् ॥ ज्योतिरान्तरमासाद्य छिन्नग्रन्थिपरिग्रहः । कारणज्योतिषैकत्वंछित्त्वा ग्रन्थीन् प्रपद्यते ॥' इति श्लोकत्रयं टीकायां समुपलभ्यन्ते । हस्तलिखितादर्शेषु तु मूलकारिकास्वेवैते श्लोकाः पठयन्ते. ९ अ. ओ. अविभागे यथा कर्ता. १० ब. तथा कार्ये. ११ अ. आ. प्रक्रमते. १२ अ. अर्थे विधीयते. १३ अ. भूत्युपाश्रयात्; ब. श्रुत्यपाश्रयात् । १४ अ. ओ. दृश्यते वातचक्रादौ.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् ।
प्राहुर्महान्तमृषभं येन [1]सायुज्यमश्नुते ॥ १३१ ॥

तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः ।
तस्य [2]प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते ॥ १३२ ॥

न जात्वकर्तृकं [3]कश्चिदागमं प्रतिपद्यते ।
बीजं सर्वागमापाये [4]त्रय्येवातो व्यवस्थिता ॥ १३३ ॥

अस्तं यातेषु वादेषु कर्तृष्वन्येषु [5]सत्स्वपि ।
[6]श्रुतिस्मृतिगतं धर्मं लोको न व्यतिवर्तते ॥ १३४ ॥

ज्ञाने स्वाभाविके [7]नार्थः शास्त्रैः कश्चन विद्यते ।
धर्मो ज्ञानस्य हेतुश्चेत्तस्याम्नायो निबन्धनम् ॥ १३५ ॥

वेदशास्त्राविरोधी च तर्कश्चक्षुरपश्यताम् ।
रूपमात्राद्धि वाक्यार्थः केवलान्नावतिष्ठते ॥ १३६ ॥

[9]सतोऽविवक्षा [10]पारार्थ्यं व्यक्तिरर्थस्य लैङ्गिकी ।
इति न्यायो बहुविधस्तर्केण प्रविभज्यते ॥ १३७ ॥

शब्दानामेव सा [11]शक्तिस्तर्को यः पुरुषाश्रयः ।
[12]स शब्दानुगतो न्यायो नागमेष्वनिबन्ध[13]नः ॥ १३८ ॥

रूपादयो यथा दृष्टाः प्रत्यर्थं यतशक्तयः ।
शब्दास्तथैव दृश्यन्ते विषापहरणादिषु ॥ १३९ ॥

यथैषां तत्र सामर्थ्यं धर्मेप्येवं [14]प्रतीयते ।
साधूनां साधुभिस्तस्माद्वाच्यमभ्यु[15]दयार्थिनाम् ॥ १४० ॥

---

१ च. ब. सायुज्यमिष्यते. २ च. ब. प्रकृतितत्त्वज्ञः. ३ ब. कंचित्. ४ ओ. ब. त्रय्येवादौ. ५ च. ब. अन्येष्वसत्स्वपि. ६ च. श्रुतिस्मृत्युदितं. ७ अ. ओ. कोर्थः. ८ अ. तस्यास्त्रय्या निबन्धनम्; ब. तत्राम्नायो निब्रन्धनम्. ९ अ. यतोऽविवक्षा. १० अ. वागर्था व्यक्ति० ११ अ. शक्तिर्यत्कार्यः. १२ च. शब्दाननुगतो न्यायो नागमेष्वनिबन्धनः. १३ च. ब. 'अनिबन्धनः' इत्यस्यानन्तरं 'यदुदुम्बरवर्णानां घटीनां मण्डलं महत् । पीतं न गमयेत् स्वर्गं किं तत् क्रतुगतं नयेत्' इति भ्राजश्लोको महाभाष्ये उद्धृतष्टीकायां परिदृश्यते; हस्तलिखितादर्शेषु तु मूलपाठ एव पठ्यते. १४ च. प्रतीयताम्. १५ ब. अभ्युदयार्थिभिः.

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

सर्वोऽदृष्टफलानर्थानागमात् प्रतिपद्यते ।
विपरीतं च सर्वत्र शक्यते [1]वक्तुमागमे ॥ १४१ ॥

साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः ।
अविच्छेदेन शिष्टा[2]नामिदं स्मृतिनिबन्धनम् ॥ १४२ ॥

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम्[3] ॥ १४३ ॥

तद्विभागाविभागाभ्यां क्रियमाणमवस्थितम् ।
स्वभावज्ञैश्च भावानां दृश्यन्ते शब्दशक्तयः ॥१४४॥

अनादिमव्यवच्छिन्नां श्रुतिमाहुरकर्तृकाम् ।
शिष्टैर्निबध्यमाना तु न व्यवच्छिद्यते स्मृतिः ॥१४५॥

[4]अविभागाद्विवृत्तानामभिख्या स्वप्नवच्छ्रुतौ ।
भावतत्त्वं तु विज्ञाय लिङ्गेभ्यो विहिता स्मृतिः ॥१४६॥

कायवाग्बुद्धिविषया ये मलाः समवस्थिताः ।
चिकित्सालक्षणाध्यात्मशास्त्रैस्तेषां विशुद्धयः ॥१४७॥

शब्दः संस्कारहीनो यो गौरिति प्रयुयुक्षिते ।
तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशिनम् ॥१४८॥

---

१ अ. वक्तुमागते. २ अ. इदं व्याकरणं धनम्. ३ च. ब. परं पदमित्यस्यानन्तरम् — " गौरिव प्रक्षरत्येका रसमुत्तमशालिनी । दिव्यादिव्येन रूपेण भारती गौः शुचिस्मिता ॥ एतयोरन्तरं पश्य सूक्ष्मयोः स्पन्दमानयोः । प्राणापानान्तरे नित्यमेका सर्वस्य तिष्ठति ॥ अन्या त्वापूर्यमाणैव विना प्राणेन वर्तते । जायते हि ततः प्राणो वाचमाप्याययन् पुनः ॥ प्राणेनाप्यायिता सेयं व्यवहारनिबन्धना । सर्वस्योच्छ्वासमासाद्य न वाग्वदति कर्हिचित् ॥ घोषिणी जातनिर्घोषा अघोषा च प्रवर्तते । तयोरपि च घोषिण्योर्निर्घोषैव गरीयसी ॥ स्थानेषु विधृते वायौ कृतवर्णपरिग्रहा । वैखरी वाक् प्रयोक्तॄणां प्रणवाग्निनिबन्धिनी ॥ केवलं बुद्ध्युपादाना क्रमरूपानुपातिनी । प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ॥ अविभागात्तु पश्यन्ती सर्वतः संहृतक्रमा । स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनुयायिनी ॥ सेयमाकीर्यमाणापि नित्यमागन्तुभिर्मलैः । अन्त्या कलेव सोमस्य नात्यन्तमभिभूयते ॥ तस्यां दृष्टस्वरूपायामधिकारो निवर्तते । पुरुषे षोडशकले तामाहुरमृतां कलाम् ॥ प्राप्तोपरागरूपा सा विप्लवैरनुषङ्गिभिः । वैखरी सत्त्वमात्रैव गुणैर्न व्यवकीर्यते ॥ " इत्येकादश श्लोकाष्टीकायां दृश्यन्ते, हस्तलिखितादर्शेषु तु मूलश्लोकपाठ एव पठ्यन्ते । ४ अ. ओ. ब. अविघातात्.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

[1]अस्वगोण्यादयः शब्दाः साधवो विषयान्तरे ।
निमित्तभेदात्सर्वत्र साधुत्वं च व्यवस्थितम् ॥१४९॥

ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः ।
तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः ॥१५०॥

न[2] शिष्टैरनुगम्यन्ते पर्याया इव साधवः ।
न[3] यतः स्मृतिशास्त्रेण तस्मात्साक्षादवाचकाः ॥१५१॥

अम्बाम्बेति यथा बालः शिक्ष[4]माणोऽपभाषते ।
अव्यक्तं तद्विदां तेन [5]व्यक्ते भवति निश्चयः ॥१५२॥

एवं साधौ प्रयोक्तव्ये यो[6]ऽपभ्रंशः प्रयुज्यते ।
तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते ॥१५३॥

पारम्पर्यादप[7]भ्रंशा वि[8]गुणेष्वभिधातृषु ।
प्र[9]सिद्धिमागता ये[10]न तेषां साधुरवाचकः ॥१५४॥

दैवी वाग्[11]व्यवकीर्णेयमशक्तैरभिधातृभिः ।
अनित्यदर्शिनां त्वस्मिन् वादे बुद्धिविपर्ययः ॥१५५॥

उभयेषाम[12]विच्छेदेऽप्यन्यशब्दविवक्षया ।
योऽन्यः प्रयुज्यते शब्दो न सोऽर्थस्याभिधायकः ॥१५६॥

इति श्रीमन्महोपाध्यायभर्तृहरिकृते वाक्य[13]पदीये आगमसमुच्चयः प्रथम[14]ः काण्डः ॥

---

१ अ. अथ गोण्यादयः; ओ. यथा गोण्यादयः. २ अ. विशिष्टैः; आ. ते शिष्टैः. ३ च. ते यतः. ४ अ. च. शिक्षमाणः प्रभाषते; ओ. न व्यक्तं. ५ अ. व्यक्तो भवति; ओ. व्यक्तेर्भवति. ६ ब. योपशब्दः. ७ अ. अपभ्रंशो. ८ ब. निर्गुणेष्वाभिधातृषु. ९ अ. प्रसिद्धिमागतो. १० आ. येषां; ओ. च. येषु; ब. ये तु. ११ च. व्यतिकीर्णेयम्. १२ च. अविच्छेदादन्य. १३ अ. वाक्यप्रदीपे. १४ च. ब. प्रथमं काण्डम् ॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

द्वितीयं काण्डम्

आख्यातशब्दः संघातो जातिः संघातवर्तिनी ।
एकोनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः[1] ॥१॥

पदमाद्यं पृथक्सर्वं[2] पदं साकाङ्क्षमित्यपि ।
वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायवादिनाम् ॥२॥

निघातादिव्यवस्थार्थं शास्त्रे यत्परिभाषितम् ।
साकाङ्क्षावयवं[3] तेन न सर्वं तुल्यलक्षणम् ॥३॥

साकाङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम् ।
कर्मप्रधानं गुणवदेकार्थं वाक्यमिष्यते[4] ॥४॥

संबोधनपदं यच्च तत् क्रियाया विशेषकम्[5] ।
व्रजानि देवदत्तेति निघातोत्र तथा सति ॥५॥

यथानेकमपि क्त्वान्तं[6] तिङन्तस्य विशेषकम् ।
तथा तिङन्तं तत्राहुस्[7]तिङन्तस्य विशेषकम् ॥६॥

यथैक एव सर्वार्थः[8] प्रकाशः प्रविभज्यते ।
दृश्यभेदानुकारेण वाक्यार्थानुगमस्तथा ॥७॥

चित्रस्यैकस्वरूपस्य[9] यथा भेदनिदर्शनैः[10] ।
नीलादिभिः समाख्यानं क्रियते भिन्नलक्षणैः ॥८॥

तथैवैकस्य वाक्यस्य निराकाङ्क्षस्य सर्वतः ।
शब्दान्तरैः समाख्यानं[11] साकाङ्क्षैरनुगम्यते ॥९॥

यथा पदे विभज्यन्ते प्रकृतिप्रत्ययादयः ।
अपोद्धारस्तथा वाक्ये पदानामुपवर्ण्यते ॥१०॥

---

१ अ. बुद्ध्यानुसंहृतिः. २ इ. पर्वपदं; पु. सर्वपदं. ३ पु. साक्षाद्बहुविधानेन. ४ प. वाक्यमुच्यते. ५ पु. विशेषणम्. ६ इ. उ. क्तान्तं. ७ प. अत्राहुः; उ. तिङन्तमप्याहुः. ८ इ. सर्वार्थप्रकाशः; ब. सर्वार्थप्रत्ययः. ९ उ. प. चित्रस्यैकस्य रूपस्य. १० स्व. निदर्शनं. ११ इ. समाख्यातं.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

वर्णान्तरस[1]रूपत्वं [2]वर्णभागेषु दृश्यते ।
पदान्तरसरूपाश्च पदे[3]भागा अवस्थिताः ॥११॥

भागैरनर्थकैर्युक्ता वृषभोदकयावकाः ।
अन्वयव्य[4]तिरेकौ तु व्यवहारनिबन्धनम् ॥१२॥

शब्दस्य न विभागोस्ति कुतोर्थस्य भविष्यति ।
विभागैः प्रक्रियाभेद[5]मविद्वान् प्रतिपद्यते ॥१३॥

ब्राह्मणार्थो यथा नास्ति कश्चिद् ब्राह्मणकम्बले ।
देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः ॥१४॥

सामान्यार्थस्तिरोभूतो न विशेषेवतिष्ठते ।
उपात्तस्य कुतस्त्यागो निवृत्तः क्वावतिष्ठताम् ॥१५॥

अशब्दो यदि वाक्यार्थः पदार्थोपि तथा भवेत् ।
एवं च सति संबन्धः शब्दस्यार्थेन हीयते ॥१६॥

विशेषशब्दाः केषांचित् सामान्यप्रतिरूपकाः ।
शब्दान्तराभिसंबन्धाद् व्यज्यन्ते प्रतिपत्तृषु ॥१७॥

तेषां तु कृत्स्नो वाक्यार्थः प्रतिभेदं समाप्यते ।
व्यक्तोपव्यञ्जना सिद्धिरर्थस्य प्रतिपत्तृषु ॥१८॥

अ[6]व्यक्तः क्रमवान् शब्द उ[7]पांश्वयमधीयते ।
अक्रमस्तु वितर्त्ये[8]व बुद्धिर्यत्रावतिष्ठते ॥१९॥

यथाक्षेपविशेषेपि कर्मभेदो न गृह्यते ।
आवृत्तौ व्यज्यते जातिः कर्मभिर्भ्रमणादिभिः ॥२०॥

वर्णवाक्यपदेष्वेवं तुल्यो[9]पव्यञ्जना श्रुतिः ।
अत्यन्तभेदे तत्त्वस्य स[10]रूपेव प्रतीयते ॥२१॥

नि[11]त्येषु तु कुतः पूर्वं परं वा परमार्थतः ।
एकस्यैव तु सा शक्तिर्यदे[12]वैमवभासते ॥२२॥

---

१ स्व. सरूपं च. २ इ. वर्णभागे तु. ३ इ. पदे भागाः. ४ प. व्यतिरेकौ च । ५ इ. भेदं न विद्वान्. ६ इ. अथ कः क्रमवान्. ७ पु. उपांशु समधीयते; स्व. उपांशु यदधीयते. ८ स्व. वितन्येव. ९ उ. तुल्येयं व्यञ्जना. १० इ. स्वरूपेव. ११ अ. नित्येष्विति तथा चिरं क्षिप्रमिति च द्वौ श्लोकौ सवृत्तिकौ भ्रष्टौ दृश्येते. १२ स्व. यदैकमवभासते.

वा. ३

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

चिरं क्षिप्रमिति ज्ञाने[1] कालभेदादृते यथा ।
भिन्नकाले प्रकाशेते स धर्मो ह्रस्वदीर्घयोः ॥२३॥

न नित्यः परमात्राभिः कालो भेदमिहार्हति[2] ।
व्यावर्तिनीनां मात्राणामभावे कीदृशः क्रमः ॥२४॥

ताभ्यो या जायते बुद्धिरेकासौ[3] भाववर्जिता ।
सा हि स्वशक्त्या भिन्नेव क्रम[4]प्रत्ययमर्शिनी ॥२५॥

क्रमोल्लेखानुषङ्गेण तस्यां यद् बीजमाहितम् ।
तत्त्वनानात्वयोस्तस्य निरुक्तिर्नावतिष्ठते ॥२६॥

भावनासमये[5] त्वेतत्[6] क्रमसामर्थ्यमक्रमम् ।
व्यावृत्तभेदो येनार्थो भेदवानुपलभ्यते ॥२७॥

पदानि वाक्ये तान्येव वर्णास्ते च पदे यदि ।
वर्णेषु वर्णभागानां भेदः स्यात् परमाणुवत् ॥२८॥

भागानामनुपश्लेषान्न वर्णो न पदं भवेत् ।
तेषामव्यपदेश्यत्वात् किमन्यदपदिश्यताम्[7] ॥२९॥

यदन्तःशब्दतत्त्वं[8] तु नादैरेकं[9] प्रकाशितम् ।
तदाहुरपरे शब्दं तस्य वाक्ये तथैकता[10] ॥३०॥

अर्थभागैस्तथा तेषामान्तरोर्थः प्रकाश्यते[11] ।
एकस्यैवात्मनो भेदौ शब्दार्थावपृथक्स्थितौ ॥३१॥

प्रकाशकप्रकाश्यत्वं कार्यकारणरूपता ।
अन्तर्मात्रात्मनस्तस्य शब्दतत्त्वस्य सर्वदा ॥३२॥

तस्यैवास्तित्वनास्तित्वसामर्थ्ये समवस्थिते ।
अक्रमे क्रमनिर्भासे[12] व्यवहारनिबन्धने ॥३३॥

संप्रत्ययप्रमाणत्वात् पदार्थास्तित्वकल्पने ।
पदार्थाभ्युच्चये त्यागादानर्थक्यं प्रसज्यते ॥३४॥

---

१ इ. ज्ञानकालभेदादृते यथा । भिन्नकाले प्रकाशो यत्स. २ स्व. भेदमिव. ३ इ. एकासौ भागवर्जिता; उ. ख. एका सा भागवर्जिता; ब. एका सा भागवर्तिनी. ४ इ. क्रमप्रत्ययमर्शनी. ५ स्व. समयं. ६ इ. चैतत् क्रम० ७ स्व. किमन्यद् व्यपदिश्यताम्. ८ स्व. तत्त्वं हि. ९ प. भागैरेकं. १० प. तथैकताम् । ११ स्व. प्रकाशते. १२ इ. क्रमनिर्भासो व्यवहार०

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

राजशब्देन राजार्थो भिन्नरूपेण गम्यते ।
वृत्तावाख्यातसदृशं पदमन्यत्[1] प्रयुज्यते ॥३५॥

यथाश्वकर्ण इत्युक्ते विनैवाश्वेन गम्यते ।
कश्चिदेव विशिष्टोर्थः[2] सर्वेषु प्रत्ययस्तथा ॥३६॥

वाक्ये त्वर्थान्तरगतैः[3] सादृश्यपरिकल्पने ।
केषांचिद्रूढिशब्दत्वं शास्त्र एवानुगम्यते ॥३७॥

उपादायापि ये हेयास्तानुपायान् प्रचक्षते[4] ।
उपायानां च नियमो नावश्यमवतिष्ठते ॥३८॥

अर्थं कथंचित् पुरुषः कंचित् संप्रतिपद्यते ।
संसृष्टा वा विभक्ता वा भेदा वाक्यनिबन्धनाः[5] ॥३९॥

सोयमित्यभिसंबन्धो बुद्ध्या प्रक्रम्यते यदा ।
वाक्यार्थस्य तदैकोपि वर्णः प्रत्यायकः क्वचित् ॥४०॥

केवलेन पदेनार्थो यावानेवाभिधीयते ।
वाक्यस्थं तावतोर्थस्य तदाहुरभिधायकम् ॥४१॥

संबन्धे सति यत्त्वन्यदाधिक्यमुपजायते[6] ।
वाक्यार्थमेव तं प्राहुरनेकपदसंश्रयम् ॥४२॥

स त्वनेकपदस्थोपि प्रतिभेदं समाप्यते ।
जातिवत् समुदायेपि संख्यावत् कल्प्यते परैः ॥४३॥

सर्वभेदानुगुण्यं तु सामान्यमपरे विदुः ।
तदर्थान्तरसंसर्गाद्[7] भजते भेदरूपताम् ॥४४॥

भेदानाकाङ्क्षतस्तस्य या परिप्लवमानता ।
अवच्छिनत्ति संबन्धस्तां[8] विशेषे निवेशयन्[9] ॥४५॥

कार्यानुमेयः संबन्धो रूपं[10] तस्य न दृश्यते ।
असत्त्वभूतमत्यन्तमतस्तं[11] प्रतिजानते ॥४६॥

---

१ ब. ख. अन्यत्र युज्यते. २ ब. विशिष्टार्थः. ३ ख. ०गते सादृश्य० ४ अ. प्रवक्ष्यते. ५ इ. यदा वाक्यनिबन्धनाः; उ. भेदा वाच्यनिबन्धनाः. ६ इ. यत्त्वन्यपदाधिक्य. ७ अ. तदर्थांतर० ८ ख. तान् विशेषे. ९ उ. निवेशयेत्. १० इ. रूपमस्य. ११ इ. असत्त्वभूतमन्येयं तमत०; उ. अत्यन्तमजस्रं.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

नियतं साधने साध्यं क्रिया नियतसाधना ।
स संनिधानमात्रेण नियमः सन् प्रकाशते ॥४७॥

गुणभावेन साकाङ्क्षं तत्र नाम प्रवर्तते ।
साध्यत्वेन निमित्तानि क्रियापदमपेक्षते ॥४८॥

सन्त[1] एव विशेषा ये पदार्थेषु व्यवस्थिताः ।
ते क्रमादनुगम्यन्ते न वाक्यमभिधायकम् ॥४९॥

शब्दानां क्रममात्रे च नान्यः शब्दोस्ति वाचकः ।
क्रमो हि धर्मः कालस्य तेन वाक्यं न विद्यते ॥५०॥

ये च[2] संभविनो[3] भेदाः पदार्थेष्वविभाविताः[4] ।
ते संनिधाने व्यज्यन्ते न तु वर्णेष्वयं क्रमः ॥५१॥

वर्णानां[5] च पदानां च क्रममात्रनिवेशिनी ।
पदाख्या वाक्यसंज्ञा च शब्दत्वं[6] नेष्यते तयोः ॥५२॥

समानेपि[7] तु शब्दत्वे दृष्टः स[8] प्रत्ययः पदात् ।
प्रतिवर्णं त्वसौ नास्ति पदस्यार्थमतो विदुः ॥५३॥

यथा सावयवा वर्णा विना वाच्येन केनचित् ।
अर्थवन्तः समुदिता वाक्यमप्येवमिष्यते ॥५४॥

अनर्थकान्युपायत्वात् पदार्थेनार्थवन्ति वा ।
क्रमेणोच्चारितान्याहुर्वाक्यार्थं भिन्नलक्षणम् ॥५५॥

नित्यत्वे[9] समुदायानां जातेर्वा परिकल्पने ।
एकस्यैवार्थतामाहुर्वाक्यस्याव्यभिचारिणीम् ॥५६॥

अभेदपूर्वका भेदाः कल्पिता वाक्यवादिभिः ।
भेदपूर्वानभेदांस्तु मन्यन्ते पददर्शिनः ॥५७॥

पदप्रकृतिभावश्च वृत्तिभेदेन वर्ण्यते ।
पदानां संहिता योनिः संहिता वा पदाश्रया ॥५८॥

---

१ इ. उ. सत एव. २ अ. पश्च संभविनः. ३ स्व. संभाविनः. ४ स्व. अविभागिताः. ५ इ. वाक्यानां च पदानां च. ६ इ. शब्दत्वे नेष्यते. ७ इ. उ. समानेपि त्वशब्दत्वे. ८ इ. ब. संप्रत्ययः. ९ अ. नित्यत्वे समुदायानामित्यादिश्लोकः तथा च अभेदपूर्वका भेदाः कल्पिता वाक्यवादिभिरितिश्लोकार्धं सटीकं लुप्तं लेखकप्रमादाद् दृश्यते ।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

पदाम्नायश्च यद्यन्यः संहिताया निदर्शकः ।
नित्यस्तत्र कथं कार्यं पदं[1] लक्षणदर्शनात् ॥५९॥

प्रतिवर्णमसंवेद्यः पदार्थप्रत्ययो यथा ।
पदेष्वेवमसंवेद्यं वाक्यार्थस्य निरूपणम् ॥६०॥

वाक्यार्थः संनिविशते पदेषु सहवृत्तिषु ।
यथा तथैव वर्णेषु पदार्थः[2] सहवृत्तिषु ॥६१॥

सूक्ष्मं ग्राह्यं यथान्येन संसृष्टं[3] सह गृह्यते ।
वर्णोऽप्यन्येन वर्णेन संबद्धो[4] वाचकस्तथा ॥६२॥

पदस्योच्चारणादर्थो यथा कश्चिन्निरूप्यते ।
वर्णानामपि सांनिध्यात्तथा सोर्थः प्रतीयते ॥६३॥

प्राप्तस्य यस्य सामर्थ्यान्नियमार्था पुनः[5] श्रुतिः ।
तेनात्यन्त[6]विशेषेण सामान्यं यदि बाध्यते ॥६४॥

यजेतेति यदा[7] द्रव्यं प्राप्तं सामर्थ्यलक्षणम् ।
व्रीहिश्रुत्या निवर्तेत न स्यात् प्रतिनिधि[8]स्तदा ॥६५॥

तस्माद् व्रीहित्वमधिकं व्रीहिशब्दः प्रकल्पयन्[9] ।
द्रव्यत्वमविरुद्धत्वात् प्राप्त्यर्थः सन्न बाधते ॥६६॥

तेन चापि व्यवच्छिन्ने द्रव्यत्वे सहचारिणि ।
असंभवाद्विशेषाणां[10] तत्रान्येषामदर्शनम् ॥६७॥

न च सामान्यवत् सर्वे क्रियाशब्देन लक्षिताः ।
विशेषा न हि सर्वेषां सतां शब्दोभिधायकः ॥६८॥

शुक्लादयो गुणाः सन्तो यथा तत्रा[11]विवक्षिताः ।
तथाऽविवक्षा भेदानां द्रव्यत्वसहचारिणाम् ॥६९॥

असंनिधौ प्रतिनिधिर्मा भून्नित्यस्य कर्मणः ।
काम्यस्य वा प्रवृत्तस्य लोप इत्युपदिश्यते[12] ॥७०॥

---

१ इ. स्व. पदलक्षणदर्शनात्. २ इ. पदार्थसहवृत्तिषु. ३ इ. संसृष्टश्च स गृह्यते. ४ उ. संबुद्धौ वाचक० ५ ब. यतः श्रुतिः. ६ ब. तेनात्यन्तं विशेषेण. ७ स्व. ततो द्रव्यं; इ. यदा प्रोक्तं प्राप्तं. ८ इ. उ. प्रतिनिधिस्तथा. ९ प. प्रकल्पयेत्. १० इ. असंभवाद्विशेषेण. ११ इ. तत्रान्यवक्षिताः. १२ स्व. इत्युपपद्यते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

विशिष्टैव क्रिया येन वाक्यार्थः[1] परिकल्प्यते ।
द्रव्याभावे प्रतिनिधौ तस्य तत् स्यात्[2] क्रियान्तरम् ॥७१॥

विज्ञातार्थं[3] पदं यच्च तदर्थे प्रतिपादिते ।
पिकादि[4] यदविज्ञातं तत् किमित्यनुयुज्यते ॥७२॥

सामर्थ्यप्रापितं यच्च व्यक्त्यर्थमनुषज्यते[5] ।
श्रुतिरेवानुषङ्गे सा बाधिका लिङ्गवाक्ययोः ॥७३॥

अप्राप्तो यस्तु शुक्लादिः संनिधानेन गम्यते ।
स[6] यत्नप्रापितो वाक्ये श्रुतिधर्मविलक्षणः ॥७४॥

अभिन्नमेव वाक्यं तु यद्यभिन्नार्थमिष्यते ।
तत् सर्वं श्रुतिभूतत्वान्न श्रुत्यैव विरोत्स्यते ॥७५॥

वाक्यानां समुदायश्च य एकार्थप्रसिद्धये ।
साकाङ्क्षावयवस्तत्र वाक्यार्थोऽपि न विद्यते ॥७६॥

प्रासङ्गिकमिदं कार्यमिदं तन्त्रेण लभ्यते ।
इदमावृत्तिभेदाभ्यामत्र बाधासमुच्चयौ[7] ॥७७॥

ऊहोऽस्मिन् विषये न्याय्यः संबन्धोऽस्य न बाध्यते[8] ।
सामान्यस्यातिदेशोऽयं विशेषोऽत्राति[9]दिश्यते ॥७८॥

अर्थित्व[10]मत्र सामर्थ्यमस्मिन्नर्थो न भिद्यते ।
शास्त्रात् प्राप्ताधिकारोऽयं व्युदासोऽस्य क्रियान्तरे ॥७९॥

इयं श्रुत्या[11] क्रमप्राप्तिरियमुच्चारणादिभिः ।
क्रमोऽयमत्र बलवानस्मिंस्तु न विवक्षितः ॥८०॥

इदं परा[12]ङ्गैः संबद्ध[13]मङ्गानामप्रयोजकम् ।
प्रयोजकमिदं तेषां[14]मत्रेदं नान्तरीयकम् ॥८१॥

---

१ इ. वाक्यार्थो यदि कल्प्यते. २ स्व. न स्यात्. ३ इ. स्व. विज्ञानार्थे. ४ इ. उ. पिकादिपदविज्ञानं; स्व. पिकादि यदपि ज्ञातं. ५ अ. इ. व्यक्त्यर्थमनुयुज्यते । श्रुतिरेवानुषङ्गेण बाधिका. ६ इ. स यत्र प्रापितो वाक्यैः; उ. स यत्र प्रापितो वाक्ये. ७ स्व. बाधसमुच्चयौ. ८ स्व. न विद्यते. ९ इ. विशेषो नातिदिश्यते. १० स्व. अर्थित्वादस्य सामर्थ्यमस्मिन्नर्थे न भिद्यते । ११. स्तुत्या क्रम० १२ स्व. पराङ्गसंबद्ध० १३ इ. ब. पराङ्गैः संबन्ध० १४ स्व. इदं त्वेषामत्रेदं.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

इदं प्रधानं शेषोयं विनियोग[1]क्रमस्त्वयम् ।
साक्षादस्योपकारीदमिदमाराद्विशेषकम् ॥८२॥

शक्ति[2]व्यापारभेदोस्मिन् फलमत्र तु भिद्यते ।
संब[3]न्धाज्जातभेदोयं भेदस्तत्राविवक्षितः ॥८३॥

प्रसज्यप्रतिषेधोयं पर्युदासोयमत्र तु ।
इदं गौणमिदं मुख्यं [4]व्यापीदं गुरुलघ्विदम् ॥८४॥

भेदेनाङ्गाङ्गिभावोस्य बहुभेदं विकल्प्यते ।
इदं नियम्यतेस्यात्र योग्यत्वमुपजायते ॥८५॥

अस्य वाक्यान्तरे [5]दृष्टाल्लिङ्गाद् भेदोनुमीयते ।
अयं शब्दादपोद्धृत्य पदार्थः प्रविभज्यते ॥८६॥

इति वाक्येषु ये धर्माः पदार्थो[6]पनिबन्धनाः ।
सर्वे ते न [7]प्रकल्पेरन् पदं चेत् स्यादवाचकम् ॥८७॥

अविभक्तेपि वाक्यार्थे शक्तिभेदादपोद्धृते ।
वाक्यान्तरविभागेन यथोक्तं न विरुध्यते ॥८८॥

यथैवैकस्य गन्धस्य भेदेन परिकल्पना ।
पुष्पादिषु तथा वाक्येप्यर्थभेदोभिधीयते ॥८९॥

गवये नरसिंहे वाप्येकज्ञानावृते यथा ।
भागं जात्य[8]न्तरस्यैवं सदृशं प्रतिपद्यते ॥९०॥

अप्रसिद्धं तु यद्भागमदृष्टमनुपश्यति ।
तावत्त्वसंविदं मूढः सर्वत्र प्रतिपद्यते ॥९१॥

तथा पिकादियोगेन वाक्येत्यन्तविलक्षणे ।
सदृशस्येव संज्ञानमसतोर्थ[9]स्य मन्यते ॥९२॥

[10]एकस्य भागे सादृश्यं भागे भेदश्च लक्ष्यते ।
निर्भागस्य प्रकाशस्य निर्भागेनैव चेतसा ॥९३॥

---

१ अ. इति योगक्रम० २ इ. व्यापारवत्यस्मिन्. ३ स्व. संबद्धज्ञानभेदोयं. ४ अ. व्यापारं. ५ इ. दृष्टो लिङ्गाद्भेदोनुमीयते. ६ अ. पदार्थोपनिर्वचनाः. ७ अ. न कल्पेरन्. ८ इ. उ. ब. जात्यन्तरस्यैव. ९ इ. असत्तार्थस्य. १० अ. एकभागे सादृश्यं.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

तथैव भागे सादृश्यं भागे भेदोवसीयते ।
भागाभावेपि वाक्यानामत्यन्तं भिन्नधर्मणाम् ॥९४॥

रूपनाशे पदानां स्यात् कथं चावधिकल्पना ।
अगृहीतावधौ शब्दे कथमर्थो विविच्यते ॥९५॥

संसर्ग इव रूपाणां शब्दोन्यत्र[1] व्यवस्थितः ।
नानारूपेषु तद्रूपं तन्त्रेणापरमिष्यते ॥९६॥

तस्मिन्नभेदे भेदानां संसर्ग इव वर्तते ।
रूपं रूपान्तरात्तस्मादनन्यत् प्रविभज्यते ॥९७॥

शास्त्रे प्रत्यायकस्यापि क्वचिदेकत्वमाश्रितम् ।
प्रत्यार्य्येन[2] क्वचिद्भेदो ग्राह्यग्रहणयोः स्मृतः ॥९८॥

ऊ इत्यभेदमाश्रित्य यथासंख्यं प्रकल्पितम् ।
लृङ्लृटोर्ग्रहणे भेदो ग्राह्याभ्यां परिकल्पितः ॥९९॥

यस्येत्येतदणो रूपं संज्ञिनामभिधायकम् ।
न हि प्रतीयमानेन ग्रहणस्यास्ति संभवः ॥१००॥

ऊ इत्येतदभिन्नं च भिन्नवाक्यनिबन्धनम् ।
भेदेन ग्रहणं चास्य पररूपमिव द्वयोः ॥१०१॥

प्लुतस्याङ्गविवृद्धिं च समाहारमचोस्तथा[3] ।
व्यवस्यता[4] पुनर्भेदः शब्देष्वत्यन्तमाश्रितः ॥१०२॥

अर्धर्चादिषु शब्देषु रूपभेदः क्रमाद्यथा ।
तन्त्रात्तथैकशब्दत्वे भिन्नानां श्रुतिरन्यथा ॥१०३॥

संहिताविषये वर्णाः स्वरूपेणाविकारिणः ।
शब्दान्तरत्वं यान्तीव शक्त्यन्तरपरिग्रहात् ॥१०४॥

इन्द्रियादिविकारेण दृष्टं ग्राह्येषु वस्तुषु ।
आत्मत्यागादृते भिन्नं[5] ग्रहणं स क्रमः श्रुतौ ॥१०५॥

---

१ अ. उ. शब्देन्यत्र. २ ब. प्रत्याय्ये तु. ३ इ. अचां तथा. ४ पु. व्युदस्यता.
५ इ. भिन्नग्रहणं संक्रमः.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

अभिधानक्रिया[1]योगाच्छब्देष्वविकृतेष्वपि ।
रूपमत्यन्तभेदेन [2]तदेवैकं प्रकाशते ॥ १०६ ॥

ऋचो वा गीतिमात्रं वा साम द्रव्यान्तरं न तु ।
गीतिभेदाद् विगृह्यन्ते ता एव विकृता ऋचः ॥ १०७ ॥

उपायाच्छ्रुतिसंहारे भिन्नानामेकशेषिणाम् ।
तन्त्रेणोच्चारणे तेषां शास्त्रे साधुत्वमिष्यते ॥ १०८ ॥

परिलभ्य [3]श्रुतिं चैकां रूपभेदवतामपि ।
तन्त्रेणोच्चारणं कार्यमन्यथा ते न साधवः ॥ १०९ ॥

सरूपाणां च वाक्यानां शास्त्रेण प्रतिपादितम् ।
तन्त्रेणोच्चारणादेकं रूपं साधूपलभ्यते ॥ ११० ॥

एकस्यानेकरूपत्वं [4]नालिकादिपरिग्रहात् ।
यथा तथैव तन्त्रात् [5]स्याद् बहूनामेकरूपता ॥ १११ ॥

य[6]था पदसरूपाणां वाक्यानां संभवः पृथक् ।
तथा वाक्यान्तराभावे स्यादेषां पृथगर्थता ॥ ११२ ॥

अभिधेयः पदस्यार्थो [7]वाक्यस्यार्थः प्रयोजनम् ।
यस्य तस्य न संबन्धो वाक्यानामुपपद्यते ॥ ११३ ॥

तत्र क्रियापदान्येव व्यपेक्षन्ते परस्परम् ।
क्रियापदानुषक्तश्च संबन्धोऽतः प्रतीयते ॥ ११४ ॥

आवृत्तिरनुवादो वा पदार्थव्यक्तिकल्पने ।
प्रत्येकं तु समाप्तोऽर्थः सहभूतेषु वर्तते ॥ ११५ ॥

अविकल्पेपि वाक्यार्थे विकल्पा भाव[8]नाश्रयाः ।
अत्राधिकरणे वादाः पूर्वेषां बहुधा गता[9]ः ॥ ११६ ॥

अभ्यासात् प्रतिभाहेतुः शब्दः सर्वोऽपरैः स्मृतः ।
बालानां च तिरश्चां च यथार्थप्रतिपादने ॥ ११७ ॥

---

१ उ. ब. क्रियाभेदाच्छब्देषु. २ ब. तदैवैकं. ३ अ. उ. ब. श्रुतिं चैकं रूपं भेद० ४ इ. नलिकादि० ५ इ. तन्त्राद्धि वाक्यानामेकरूपता; उ. तत्र स्याद् बहूनामेके. ६ ब. तथा पदं सरूपाणां. ७ इ. वाक्यस्यार्थप्रयोजनम्. ८ इ. भावनाश्रया. ९ इ. बहुधा मताः.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

अनागमश्च सोऽभ्यासः समयः कैश्चिदिष्यते ।
अनन्तरमिदं कार्यमस्मादित्युपदर्शनम् ।। ११८ ।।

अस्त्यर्थः सर्वशब्दानामिति प्रत्याय्यलक्षणम् ।
अपूर्वदेवतास्वर्गैः सममाहुर्गवादिषु ।। ११९ ।।

प्रयोगदर्शनाभ्यासादाकारावग्रहस्तु यः ।
न स शब्दस्य विषयः स हि यत्नान्तराश्रयः ।। १२० ।।

केचिद्भेदाः प्रकाश्यन्ते शब्दैस्तदभिधायिभिः ।
अनुनिष्पादिनः कांश्चिच्छब्दार्थ इति मन्यते ।। १२१ ।।

जातिप्रत्यायके शब्दे या व्यक्तिरनुषङ्गिणी ।
[1]न तान् व्यक्तिगतान् भेदान् जातिशब्दोऽवलम्बते ।। १२२ ।।

घटादीनां न चाकारान् प्रत्याययति वाचकः ।
वस्तुमात्रनिवेशित्वात् तद्गतिर्नान्तरीयकी ।। १२३ ।।

क्रिया विना प्रयोगेण न दृष्टा शब्दचोदिता ।
प्रयोगस्त्वनुनिष्पादी शब्दार्थ इति मन्यते ।। १२४ ।।

नियतास्तु प्रयोगा ये नियतं यच्च साधनम् ।
तेषां शब्दाभिधेयत्वमपरैरनुगम्यते ।। १२५ ।।

[2]समुदायोऽभिधेयः स्यादविकल्पसमुच्चयः ।
[3]असत्यो वाऽपि संसर्गः शब्दार्थः कैश्चिदिष्यते ।। १२६ ।।

असत्योपाधि यत् सत्यं तद्वा शब्दनिबन्धनम् ।
शब्दो [4]वाप्यभिजल्पत्वमागतो याति वाच्यताम् ।। १२७ ।।

सोऽयमित्यभिसंबन्धाद्रू[5]पमेकीकृतं यदा ।
[6]शब्दस्यार्थेन तं शब्दमभिजल्पं प्रचक्षते ।। १२८ ।।

तयोरपृथगर्थत्वे रूढेरव्यभिचारिणि ।
किंचिदेव क्वचिद्रू[7]पं प्राधान्येनावतिष्ठते ।। १२९ ।।

---

१ अ. न तद्व्यक्तिगतान्. २ इ. समुदायाभिधेयः. ३ अ. असत्यो वाधिसंसर्गः शब्दार्थः; इ. असत्यो वापि संसर्गशब्दार्थः. ४ इ. वागधिजल्पत्वम्; ब. वाप्यभिजन्यत्वम्. ५ इ. अभिसंबन्धाद्द्वयमेकीकृतं. ६ अ. शब्दस्यार्थेन शब्दमभिजल्पं प्रचक्ष्यते. ७ ब. क्वचिद् द्रव्यं प्राधान्येन.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

लोकेऽर्थरूपतां[1] शब्दः प्रतिपन्नः प्रवर्तते ।
शास्त्रे तूभयरूपत्वं प्रविभक्तं विवक्षया ॥ १३० ॥

अशक्तेः[2] सर्वशक्तेर्वा शब्दैरेव प्रकल्पिता ।
एकस्यार्थस्य नियता क्रियादिपरिकल्पना ॥ १३१ ॥

यो वार्थो बुद्धिविषयो[3] बाह्यवस्तुनिबन्धनः ।
स बाह्यवस्त्विति ज्ञातः शब्दार्थः कैश्चिदिष्यते ॥ १३२ ॥

आकारवन्तः संवेद्या व्यक्तस्मृतिनिबन्धनाः ।
ये ते प्रत्यवभासन्ते संविन्मात्रं त्वतोऽन्यथा[4] ॥ १३३ ॥

यथेन्द्रियं[5] संनिपतद्वैचित्र्येणोपदर्शकम् ।
तथैव शब्दादर्थस्य[6] प्रतिपत्तिरनेकधा ॥ १३४ ॥

वक्त्राऽन्यथैव प्रक्रान्तो भिन्नेषु प्रतिपत्तृषु ।
स्वप्रत्ययानुकारेण शब्दार्थः प्रविभज्यते ॥ १३५ ॥

एकस्मिन्नपि दृश्येऽर्थे दर्शनं भिद्यते पृथक् ।
कालान्तरेण वैकोऽपि[7] तं पश्यत्यन्यथा पुनः ॥ १३६ ॥

एकस्यापि च शब्दस्य निमित्तैरव्यवस्थितैः ।
एकेन बहुभिश्चार्थो बहुधा परिकल्प्यते ॥ १३७ ॥

तस्माददृष्टतत्त्वानां सापराधं बहुच्छलम् ।
दर्शनं वचनं चापि[8] नित्यमेवानवस्थितम् ॥ १३८ ॥

ऋषीणां दर्शनं यच्च तत्त्वे किंचिदवस्थितम् ।
न तेन व्यवहारोऽस्ति न तच्छब्दनिबन्धनम् ॥ १३९ ॥

तलवद् दृश्यते व्योम खद्योतो हव्यवाडिव ।
न चैवास्ति[9] तलं व्योम्नि न खद्योते हुताशनः ॥ १४० ॥

तस्मात् प्रत्यक्षमप्यर्थं विद्वानीक्षेत युक्तितः[10] ।
न दर्शनस्य प्रामाण्याद् दृश्यमर्थं प्रकल्पयेत् ॥ १४१ ॥

---

१ इ. ०रूपताशब्दः. २ इ. अशक्तेरेव शक्तेर्वा. ३ इ. बुद्धिविषये. ४ अ. ततोन्यथा. ५ इ. यथेन्द्रियसंनिपातात्. ६ इ. शब्दस्यार्थस्य. ७ अ. चैकोपि. ८ इ. वापि नित्यमेवा० ९ ब. न चेन्नास्ति तलं व्योम्नि. १० ई. युक्तिभिः.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

असमाख्येयतत्त्वानामर्थानां लौकिकैर्यथा ।
व्यवहारे समाख्यानं तत् प्राज्ञो न विकल्पयेत् ॥ १४२ ॥

विच्छेदग्रहणेऽर्थानां प्रतिभाऽन्यैव जायते ।
वाक्यार्थ इति तामाहुः पदार्थैरुपपादिताम् ॥ १४३ ॥

इदं तदिति साऽन्येषामनाख्येया कथंचन ।
[1]प्रत्यात्मवृत्ति सिद्धा सा कर्त्राऽपि न निरूप्यते ॥ १४४ ॥

उपश्लेषमिवार्थानां सा करोत्यविचारिता ।
सार्वरूप्यमिवापन्ना विषयत्वेन वर्तते ॥ १४५ ॥

साक्षाच्छब्देन जनितां[2] भावनानुगमेन वा ।
इतिकर्तव्यतायां तां न कश्चिदतिवर्तते ॥ १४६ ॥

प्रमाणत्वेन तां लोकः सर्वः समनुपश्यति ।
समारम्भाः प्रतीयन्ते तिरश्चामपि तद्वशात् ॥ १४७ ॥

यथा द्रव्यविशेषाणां परिपाकैरयत्नजाः ।
[3]मन्दादिशक्तयो दृष्टाः प्रतिभास्तद्वतां तथा ॥ १४८ ॥

स्वरवृत्तिं विकु[4]रुते मधौ पुंस्कोकिलस्य कः ।
जन्त्वादयः कुलायादिकरणे केन शिक्षिताः ॥ १४९ ॥

आहारप्रीत्यभिद्वेषप्लवनादिक्रियासु कः ।
जात्यन्वयप्रसिद्धासु प्रयोक्ता मृगपक्षिणाम् ॥ १५० ॥

भावनानुगतादेतदागमादेव जायते ।
आसत्तिविप्रकर्षाभ्यामागमस्तु विशिष्यते ॥ १५१ ॥

स्वभावचरणाभ्यासयोगाद् दृष्टोपपादितां[5] ।
विशिष्टोपहिता चेति प्रतिभां षड्विधां विदुः ॥ १५२ ॥

[6]यथा संयोगिभिर्द्रव्यैर्लक्षितेऽर्थे प्रयुज्यते ।
गोशब्दो न त्वसौ तेषां विशेषाणां[7] प्रकाशकः ॥ १५३ ॥

---

१ इ. 'प्रत्यात्मवृत्ति...करोत्यविचारिता' इतीदं लेखकप्रमादाद् भ्रष्टमेव दृश्यते टीकापठनतः । २ अ. ब. जनितां. ३ इ. मदादि० ४ इ. हि कुरुते. ५ स्व. दृष्टोपपादिताम् । विशिष्टोपहितां. ६ अ. यथा संयोगिनिर्द्रव्यैः ; स्व. संयोगिभिः. ७ इ. विशेष्याणां प्रकाशकः.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

आकारवर्णावयवैः संसृष्टेषु गवादिषु ।
शब्दः प्रवर्तमानोऽपि न तानङ्गीकरोत्यसौ ॥ १५४ ॥

संस्थानवर्णावयवैर्विशिष्टे[1] यः प्रयुज्यते ।
शब्दो न तस्यावयवे प्रवृत्तिरुपलभ्यते ॥ १५५ ॥

दुर्लभं कस्यचिल्लोके[2] सर्वावयवदर्शनम्[3] ।
कैश्चित्त्ववयवैर्दृष्टैरर्थः कृत्स्नो[4]ऽनुमीयते ॥ १५६ ॥

यथा जात्युत्पलादीनां गन्धेन सहचारिणाम्[5] ।
नित्यसंबन्धिनां दृष्टं गुणानामवधारणम्[6] ॥ १५७ ॥

संख्याप्रमाणसंस्थाननिरपेक्षः प्रवर्तते ।
बिन्दौ च समुदाये च वाचकः सलिलादिषु ॥ १५८ ॥

संस्कारादिपरिच्छिन्ने तैलादौ यो व्यवस्थितः[7] ।
आहैकदेशं तत्त्वेन तस्यावयववर्तिता ॥ १५९ ॥

येनार्थेनाभिसंबद्धमभिधानं[8] प्रयुज्यते ।
तदर्थापगमे तस्य प्रयोगो[9] विनिवर्तते ॥ १६० ॥

यांस्तु संभविनो धर्मानन्तर्णीय[10][11] प्रयुज्यते ।
शब्दस्तेषां न सांनिध्यं नियमेन व्यपेक्षते ॥ १६१ ॥

यथा रोमशफादीनां व्यभिचारेऽपि दृश्यते ।
गोशब्दो न तथा जातेर्विप्रयोगे प्रवर्तते ॥ १६२ ॥

तस्मात् संभविनोऽर्थस्य शब्दात् संप्रत्यये सति ।
अदृष्टविप्रयोगोऽर्थः संबन्धित्वेन वर्तते[12] ॥ १६३ ॥

वाचिका द्योतिका वा स्युर्द्वित्वादीनां विभक्तयः ।
स्याद्वा संख्यावतोऽर्थस्य समुदायोऽभिधायकः ॥ १६४ ॥

---

१ स्व. विशेषे यः. २ स्व. कर्हिचिल्लोके. ३ इ. सर्वावयवदर्शने. ४ स्व. अर्थः कुत्र न नीयते । ५ स्व. सहचारिणा; अ. इ. सहचारिणाम्. ६ दुर्लभमित्यादिकौ द्वौ श्लोकौ स्वोपज्ञटीकायामग्रे यथा रोमशफादीनामिति श्लोकस्यानन्तरं पठ्येते । ७ स्व. या व्यवस्थिता । आहैकदेशतत्त्वेन तस्यावयववर्तिना ॥ ८ इ. स्व. अभिसंबन्धमभिधानं. ९ स्व. प्रयोगोपि निवर्तकः. १० इ. यांस्तु संभाविनो धर्मान्नान्तरीयः. ११ ब. अन्तर्नीय. स्व. अन्तर्णीय. १२ स्व. गम्यते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

विना संख्याभिधानाद्वा [1]संख्याभेदसमन्वितान् ।
अर्थान् स्वरूपभेदेन कांश्चिदाहुर्गवादयः ॥ १६५ ॥

ये शब्दा नित्यसंबन्धा विवेके [2]ज्ञातशक्तयः ।
अन्वयव्यतिरेकाभ्यां तेषामर्थो विभज्यते ॥ १६६ ॥

यत्र चाव्यभिचारेण तयोः [3]शक्यं प्रकल्पनम् ।
नियमस्तत्र [4]न त्वेवं [5]नियमो नुट्शबादिषु ॥ १६७ ॥

संभवे [6]वाभिधानस्य [7]लक्षणं तु न कल्प्यते ।
[8]आपेक्षिभ्यो हि संसर्गे नियताः शब्दशक्तयः ॥ १६८ ॥

न[9] कूपसूपयूपानामन्वयोऽर्थस्य दृश्यते ।
अतोऽर्थान्तरवाचित्वं संघातस्यैव गम्यते ॥ १६९ ॥

अन्वाख्यानानि भिद्यन्ते शब्दव्युत्पत्तिकर्मसु ।
बहूनां संभवेऽर्थानां निमित्तं किंचिदुच्यते ॥ १७० ॥

वैरवासिष्ठगिरिशास्तथैकागारिकादयः ।
कैश्चित् कथंचिदाख्याता निमित्तावधिसंकरैः ॥ १७१ ॥

[10]यथा पथः समाख्यानं वृक्ष[11]वल्मीकपर्वतैः ।
अविरुद्धं गवादीनां [12]भिन्नैश्च सहचारिभिः ॥ १७२ ॥

अन्यथा च समाख्यानमवस्थाभेददर्शिभिः ।
क्रियते [13]किंशुकादीनामेकदेशेऽवधारणात् ॥ १७३ ॥

कैश्चिन्निर्वचनं भिन्नं गिरतेर्गर्जतेर्गमेः ।
[14]गुवतेर्गदतेर्वापि गौरित्यत्रानुदर्शितम् ॥ १७४ ॥

गौरित्येव [15]स्वरूपाद्वा गोशब्दो गोषु वर्तते ।
व्युत्पाद्यते [16]न वा सर्वं कैश्चिचो[17]भयथेष्यते ॥ १७५ ॥

---

१ स्व. संख्याभेदान्. २ स्व. विवेकज्ञात०; अ. विवेके ज्ञान. ३ स्व. वाक्यप्रकल्पनम्. ४ स्व. न त्वेव. ५ इ. नियमो नु गवादिषु. ६ स्व. चाभिधानस्य. ७ स्व. लक्षणत्वं न कल्पते. ८ स्व. अपेक्षिण्यो हि संसर्गे यास्ताः शब्दस्य शक्तयः । ९ इ. श्लोकस्यास्य चरणत्रयं लेखकप्रमादात् पतितं, चरम एव चरणः पठ्यते. १० इ. ए. यथा यथा समाख्यानं; स्व. यथा पथां; ११ स्व. वल्मीक०, १२ इ. भिन्नैः स्वसहचारिभिः । १३ इ. किंशुकादीनामेवावस्थावधारणाम्; स्व. एकदेशावधारणात्. १४ अ. च. गवतेर्गदतेर्वापि. १५ इ. स्वरूपाद्वि. १६ स्व. न वा सर्वः १७ ब. पु. उभयमिष्यते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

सामान्येनोपदेशश्च शास्त्रे लघ्वर्थमाश्रितः ।
[1]जात्यन्तरवदस्यापि विशेषाः प्रतिपादकाः ॥ १७६ ॥

अर्थान्तरे [2]च यद् वृत्तं तत् प्रकृत्यन्तरं विदुः ।
तुल्यरूपं च तद्रूढावन्यस्मिन्ननुषज्यते ॥ १७७ ॥

भिन्नाविजियजी धातू नियतौ विषयान्तरे ।
कैश्चित् कथंचिदुद्दिष्टौ चित्रं हि प्रतिपादनम् ॥ १७८ ॥

एवं च वालवायादि जित्वरीव[3]दुपाचरेत् ।
भेदाभेदाभ्युपगमे न विरोधोऽस्ति कश्चन ॥ १७९ ॥

अडादीनां व्यवस्थार्थं पृथक्त्वेन विकल्पनम् ।
[4]धातूपसर्गयोः शास्त्रे धातुरेव तु तादृशः ॥ १८० ॥

तथा हि संग्रामयतेः सोपसर्गाद्विधिः स्मृतः ।
क्रियाविशेषाः संघातैः प्रक्रम्यन्ते तथाविधाः ॥ १८१ ॥

कार्याणामन्तरङ्गत्व[5]मेवं धातूपसर्गयोः ।
साधनैर्याति संबन्धं तथाभूतैव सा क्रिया ॥ १८२ ॥

प्रयोगार्हेषु सिद्धः सन् भेत्तव्योऽर्थो विशिष्यते ।
प्राक् च साधनसंबन्धात् क्रिया नैवोप[6]जायते ॥ १८३ ॥

धातोः साधनयोगस्य भाविनः प्रक्रमाद्यथा ।
धातुत्वं कर्मभावश्च तथाऽन्यदपि दृश्यताम् ॥ १८४ ॥

बीजकालेषु संबद्धा यथा लाक्षारसादयः ।
[7]वर्णादिपरिणामेन फलानामुपकुर्वते ॥ १८५ ॥

बुद्धिस्थादभिसंबन्धात्तथा धातूपसर्गयोः ।
[8]अभ्यन्तरीकृतो भेदः पदकाले [9]प्रकाशते ॥ १८६ ॥

क्वचित् संभविनो भेदाः केवलै[10]र्निदर्शिताः ।
उपसर्गेण संबन्धे व्यज्यन्ते [11]प्रपरादिना ॥ १८७ ॥

---

१ स्व. जात्यन्तरवदन्यस्य. २ स्व. न यद् वृत्तं. ३ इ. उपाचरन्. ४ स्व. धातूपदेश० ५ ब. एव धातूपसर्गयोः । ६ इ. नैषोपजायते. ७ इ. वर्णादिपरिमाणेन. ८ स्व. अभ्यन्तराकृतान्. ९ इ. ए. श्लोकार्धमिदं लेखकप्रमादात् पतितम्. १० ब. पु. अभिदर्शिताः. ११ स्व. प्रानिरादिना.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

स वाचको विशेषाणां संभवाद् द्योतकोऽपि वा ।
शक्त्याधानाय धातोर्वा सहकारी प्रयुज्यते ॥ १८८ ॥

स्थादिभिः केवलैर्यच्च [1]गमनादि न गम्यते ।
तत्रानुमानाद् द्विविधात्तद्धर्मा प्रादिरुच्यते ॥ १८९ ॥

अप्रयोगेऽधिपर्योश्च यावद् दृष्टं क्रियान्तरम् ।
तस्याभिधायको धातुः सह ताभ्यामन[2]र्थकः ॥ १९० ॥

तथैव स्वार्थिकाः केचित् संघातान्तरवृत्तयः ।
अनर्थकेन संसृष्टाः प्रकृत्यर्थानुवादिनः ॥ १९१ ॥

निपाता द्योतकाः केचित् [3]पृथगर्थाभिधायिनः ।
आगमा इव केऽपि स्युः सं[4]भूयार्थस्य वाचकाः ॥ १९२ ॥

उपरिष्टात् पुरस्ताद्वा द्योतकत्वं न भिद्यते ।
तेषु प्रयुज्यमानेषु भिन्नार्थेष्वपि सर्वथा ॥ १९३ ॥

चादयो न प्रयुज्यन्ते पदत्वे सति केवलाः ।
प्रत्ययो वाचकत्वेऽपि केवलो न प्रयुज्यते ॥ १९४ ॥

समुच्चिताभि[5]धानेऽपि व्यतिरेको न विद्यते ।
[6]असत्त्वभूतो भावश्च क्रियाऽन्ये[7]नाभिधीयते ॥ १९५ ॥

समुच्चिताभिधानेऽपि विशिष्टार्थाभिधायिनाम् ।
गुणैः पदानां संबन्धः परतन्त्रास्तु चादयः ॥ १९६ ॥

जनयित्वा [8]क्रियां कांचित् संबन्धो विनिवर्तते ।
श्रूयमाणे क्रियाशब्दे संबन्धो जायते क्वचित् ॥ १९७ ॥

तत्र षष्ठी प्रातिपदं समासस्य निवृत्तये ।
विहिता दर्शनार्थं तु कारकं प्रत्युदाहृतम् ॥ १९८ ॥

[9]स चोपजातः संबन्धो विनिवृत्ते क्रियापदे ।
कर्मप्रवचनीयेन तत्र तत्र नियम्यते ॥ १९९ ॥

---

१ ब. पु. गमनादि तु गम्यते; स्व. न गम्यते. २ इ. अनर्थकम्. ३ स्व. पृथगर्थप्रकल्पने. ४ इ. संभूयार्थस्य याचकाः; स्व. साधकाः; इ. याचकाः. ५ स्व. ०धाने तु. ६ इ. असत्त्वभावभूतश्च; ७ इ. क्रियात्वेनाभिधीयते. स्व. तिङ्पदेनाभिधीयते. ८ अ. क्रिया काचित् संबन्धं; ९ इ. स चोपजातसबन्धो; उ. अयं श्लोकः शोधत्वेन पृष्ठस्योपरिभागे लिखितः.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

येन क्रियापदाक्षेपः स कारकविभक्तिभिः ।
युज्यते विर्यथा तस्य लिखावनु[1]पसर्गता ॥ २०० ॥

तिष्ठतेरुपयोगश्च [2]दृष्टोऽप्रत्यजयन्निति ।
सु[3]न्वन्तीत्याभिमुख्येऽभिः केवलोऽपि प्रयुज्यते ॥ २०१ ॥

कर्मप्रवचनीयत्वं क्रियायोगे विधीयते ।
[4]षत्वादिविनि[5]वृत्त्यर्थं स्वत्यादीनां विधर्मणाम् ॥२०२॥

हेतुहेतुमतोर्योगपरिच्छेदेऽनुना कृते ।
आरम्भाद्बाध्यते प्राप्ता तृतीया हेतुलक्षणा ॥२०३॥

क्रियाया द्योतको नायं संबन्धस्य न वाचकः ।
नापि क्रियापदाक्षेपी संबन्धस्य तु भेदकः ॥२०४॥

अनर्थकानां संघातः सार्थकोऽनर्थकस्तथा ।
वर्णानां पदमर्थेन युक्तं नावयवाः पदे ॥२०५॥

पदानामर्थयुक्तानां संघातो भिद्यते पुनः ।
अर्थान्तरावरोधेन संबन्धविगमेन च ॥२०६॥

सार्थकानर्थकौ भेदे[6] संबन्धं नाधिगच्छतः ।
अधिगच्छत इत्येके कुटीरादिनिदर्शनात् ॥२०७॥

अर्थवद्भ्यो विशिष्टै[7]र्थैः संघात उपजायते ।
नोपजायत इत्येके समासस्वार्थिकादिषु ॥२०८॥

केचि[8]त्तु यु[9]तसिद्धार्था भेदे निर्ज्ञात[10]शक्तयः ।
अन्वयव्यतिरेकाभ्यां केचित् कल्पितशक्तयः ॥२०९॥

शास्त्रार्थ एव वर्णाना[11]मर्थवत्त्वे प्रदर्शितः ।
धात्वादीनां वि[12]शुद्धानां लौकिकोऽर्थो न विद्यते ॥२१०॥

कृत्तद्धितानामर्थश्च केवला[13]नामलौकिकः ।
प्राग्विभक्तेस्तदन्तस्य तथैवार्थो न विद्यते ॥२११॥

---

१ इ. अनुपसर्गतः. २ इ. दृष्टोऽप्रत्यक्षयन्निति. ३ इ. पु. सुन्वतीत्याभिमुख्योऽभिः. ४ उ. स्वत्वादि. ५ अ. विनिवृत्त्यर्थे. ६ स्व. भेदसंबन्धं. ७ स्व. विशिष्टोर्थः. ८ स्व. केचिद्धि. ९ अ. यतसिद्धार्था. १० स्व. भेदनिर्ज्ञात० ११ अ. उ. अर्थतत्त्वे; इ. अर्थकत्वं प्रदर्शितम्. १२ स्व. हि शुद्धानां. १३ उ. केवलागम०

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

अभिव्यक्ततरो योऽर्थः प्रत्ययान्तेषु लक्ष्यते ।
अर्थवत्ताप्रकरणादाश्रितः[1] स तथाविधः ॥२१२॥

आत्मभेदो न चेत् कश्चिद्वर्णेभ्यः पदवाक्ययोः ।
अन्योन्यापेक्षया शक्त्या वर्णः स्यादभिधायकः ॥२१३॥

[2]वर्णेन केनचिन्न्यूनः संघातो योऽभिधायकः[3] ।
न चेच्छब्दान्तरमसावन्यूनस्तेन गम्यते ॥२१४॥

स तस्मिन् वाचके शब्दे निमित्तात् स्मृतिमादधत् ।
साक्षादिव[4] व्यवहितं[5] शब्देनार्थमुपोहते[6] ॥२१५॥

पदवाच्यो यथा नार्थः कश्चिद्गौरखरादिषु ।
सत्यपि प्रत्ययेऽत्यन्तं समुदाये[7] न गम्यते ॥२१६॥

समन्वित इवार्थात्मा पदार्थैर्यः[8] प्रतीयते ।
पदार्थदर्शनं तत्र तथैवानुपकारकम् ॥२१७॥

समुदायावयवयोर्भिन्नार्थत्वे च वृत्तिषु ।
युगपद्भेदसंसर्गौ विरुद्धावनुषङ्गिणौ ॥२१८॥

[9]कश्च साधनमात्रार्थानध्यादीन् परिकल्पयेत् ।
अप्रयुक्तपदश्चार्थो[10] बहुव्रीहौ कथं भवेत् ॥२१९॥

प्रभुसंख्याद्यवयवैर्न चास्त्यर्थावधारणम् ।
तस्मात् संघात एवैको विशिष्टार्थनिबन्धनम्[11] ॥२२०॥

गर्गा इत्येक एवायं बहुष्वर्थेषु वर्तते ।
द्वन्द्वसंज्ञोऽपि संघातो बहूनामभिधायकः ॥२२१॥

[12]यथैकदेशे भुज्यादिः प्रत्येकमवतिष्ठते ।
क्रियैवं[13] द्वन्द्ववाच्येऽर्थे प्रत्येकं प्रविभज्यते ॥२२२॥

यच्च द्वन्द्वपदार्थस्य तच्छब्देन व्यपेक्षणम्[14] ।
साऽपि व्यावृत्तरूपेऽर्थे[15] सर्वनामसरूपता ॥२२३॥

---

१ स्व. आश्रितस्य. २ अ. श्लोकार्धमिदं न पठ्यते. ३ स्व. नाभिधायकः. ४ इ. साक्षाद्वापि. ५ स्व. व्यवहितः. ६ अ. अपोहते. ७ स्व. समुदायोऽनुगम्यते. ८ अ. पदार्थे यः. ९ इ. कश्च साधनवान्नार्थो नध्यदिन्परिकल्पयेत् । १० इ. पदस्यार्थो. ११ स्व. ०निबन्धनः. १२ स्व. यथैकशेषे. १३ स्व. क्रियैव. १४ पु. व्यपेक्षणा. १५ स्व. व्यावृत्तभेदेऽर्थे.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

यथा च खदिरच्छेदे भागेषु क्रमवान् छिदिः ।
तथा द्वन्द्वपदार्थस्य भागेषु क्रमदर्शनम् ॥२२४॥

संघैकदेशे प्रक्रान्तान् यथा संघानुपातिनः ।
क्रियाविशेषान् मन्यन्ते स द्वन्द्वावयवे क्रमः ॥२२५॥

प्रतिपादयता वृत्तिमबुधान् वाक्य[1]पूर्विकाम् ।
वृत्तौ पदार्थभेदेन प्राधान्यमुपदर्शितम् ॥२२६॥

अभेदादभिधेयस्य नञ्समासे विकल्पितम् ।
प्राधान्यं बहुधा भाष्ये दोषास्तु प्रक्रियागताः ॥२२७॥

जहत्स्वार्थविकल्पे च सर्वार्थत्यागमिच्छता ।
बहुव्रीहिपदार्थस्य त्यागः [2]सर्वस्य दर्शितः ॥२२८॥

शास्त्रे क्वचित् प्रकृत्यर्थः प्रत्ययेनाभिधीयते ।
प्रकृतौ विनिवृत्तायां प्रत्ययार्थश्च धातुभिः ॥२२९॥

यमर्थमाहतुर्भिन्नौ प्रत्ययावेक एव तम् ।
क्वचिदाह पचन्तीति धातुस्ताभ्यां विना क्वचित् ॥२३०॥

अन्वाख्यान[3]स्मृतौ ये च प्रत्यय[4]ार्था निबन्धनम् ।
निर्दिष्टा[5]स्ते प्रकृत्यर्थाः स्मृत्यन्तर उदाहृताः ॥२३१॥

प्रसिद्धेरुद्वमिकरी[6]त्येवं शास्त्रेऽभिधीयते ।
व्यवहाराय मन्यन्ते शास्त्रार्थप्रक्रिया यतः ॥२३२॥

शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते ।
[7]अनागमविकल्पा तु स्वयं विद्योपवर्तते ॥२३३॥

अनिबद्धं निमित्तेषु निरुपाख्यं फलं यथा ।
तथा विद्याऽप्यनाख्येया [8]शास्त्रोपायेव लक्ष्यते ॥२३४॥

[9]यथाभ्यासं [10]हि वागर्थे प्रतिपत्तिं समीहते ।
स्वभाव [11]इव चानादिर्मिथ्याभ्यासो व्यवस्थितः ॥२३५॥

---

१ अ. ब. वाच्य० २ स्व. सर्वत्र. ३ स्व. ०स्मृतेर्ये च. ४ स्व. प्रत्ययार्थनिबन्धनम्. ५ ब. निर्दिष्टार्थप्रकृत्यर्थाः. ६ ब. °त्येव शास्त्रे; इ. °त्येवं शास्त्रमभिधीयते. ७ अ. लेखकप्रमादादिदं श्लोकार्धं पुरतः पश्चाच्च कतिपयटीकाभागेन सहितं पतितं दृश्यते. ८ प. शास्त्राण्युपाया. ९ ब. अथाभ्यासं; उ. तथाभ्यासं. १० इ. हि मात्रार्थे. ११ इ. इव वचनादि०

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

उत्प्रेक्षते सावयवं परमाणुमपण्डितः ।
तथाऽवयविनं युक्तमन्यैरवयवैः पुनः ॥२३६॥

घटादिदर्शनाल्लोकः परिच्छिन्नोऽवसीयते ।
समारम्भाच्च भावानामनादि[1] ब्रह्म शाश्वतम् ॥२३७॥

उपायाः शिक्षमाणानां बालानामपलापनाः[2] ।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते ॥२३८॥

अन्यथा प्रतिपद्यार्थं पदग्रहणपूर्वकम् ।
पुनर्वाक्ये तमेवार्थमन्यथा प्रतिपद्यते ॥२३९॥

उपात्ता बहवोऽप्यर्था येष्वन्ते प्रतिषेधनम् ।
क्रियते ते निवर्तन्ते तस्मात्तांस्तत्र नाश्रयेत् ॥२४०॥

वृक्षो नास्तीति वाक्यं च विशिष्टाभावलक्षणम् ।
[3]नार्थेन बुद्धौ संबन्धो निवृत्तेरवतिष्ठते ॥२४१॥

विच्छेदप्रतिपत्तौ च यद्यस्तीत्यवधार्यते ।
अशब्दवाच्या सा बुद्धिर्निवर्तेत स्थिता कथम् ॥२४२॥

[4]अथ यज्ज्ञानमुत्पन्नं तन्मिथ्येति नञा कृतम् ।
नञो व्यापारभेदेऽस्मिन्नभावाव[5]गतिः कथम् ॥२४३॥

निराधारप्रवृत्तौ च वाक्य[6]वृत्तिर्नञो भवेत् ।
अथाधारः स ए[7]वास्य नियमार्थां श्रुतिर्भवेत् ॥२४४॥

नियमद्योतनार्थो वा अनुवादोऽथवा भवेत् ।
कश्चिदेवार्थवांस्तत्र शब्दः शेषास्त्वनर्थकाः ॥२४५॥

विरुद्धं चाभिसंबन्धमुदहार्यादिभिः कृतम् ।
वाक्ये समाप्ते वाक्यार्थमन्यथा प्रतिपद्यते ॥२४६॥

स्तुतिनिन्दाप्रधानेषु [8]वाक्येष्वर्थो न तादृशः ।
पदानां प्र[9]विभागेन यादृशः परिकल्प्यते ॥२४७॥

---

१ अ. उ. ब. आदिमद् ब्रह्म शाश्वतम्. २ स्व. उपलालनाः. ३ स्व. नार्थे तु. ४ स्व. यथा. ५ स्व. ०अवधृतिः. ६ स्व. प्राग्वा वृत्ति०; इ. वाक्यवृत्ति० ७ उ. एवात्र. ८ ब. वाच्येषु. ९ स्व. प्रविवेकेन.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

अथासंसृष्ट एवार्थः पदेषु समवस्थितः ।
वाक्यार्थस्याभ्युपायोऽसावेकस्य प्रतिपादने ॥२४८॥

पूर्वं पदेष्वसंसृष्टो यः क्रमादुपचीयते ।
छिन्नग्रथितकल्पत्वान्न विशिष्टतरं विदुः ॥२४९॥

एकमाहुरनेकार्थं शब्दमन्ये परीक्षकाः ।
निमित्तभेदादेकस्य सार्वार्थ्यं तस्य भिद्यते ॥२५०॥

यौगपद्यमति[1]क्रम्य पर्याये व्यवतिष्ठते ।
अर्थप्रकरणाभ्यां वा योगाच्छब्दान्तरेण वा[2] ॥२५१॥

यथा सास्नादिमान् पिण्डो गोशब्देनाभिधीयते ।
तथा स एव गोशब्दो वाहीकेऽपि व्यवस्थितः ॥२५२॥

सर्वशक्तेस्तु तस्यैव शब्दस्यानेकधर्मणः ।
प्रसिद्धिभेदाद्गौणत्वं मुख्यत्वं चोपवर्ण्यते ॥२५३॥

एको मन्त्रस्तथाऽध्यात्ममधिदैवमधिक्रतु ।
असंकरेण सर्वार्थो भिन्नशक्तिर्व्य[3]वस्थितः ॥२५४॥

गोत्वानुषङ्गो वाहीके निमित्तात् कैश्चिदिष्यते ।
अर्थमात्रं विपर्यस्तं [4]शब्दः स्वार्थे व्यवस्थितः ॥२५५॥

तथा स्वरूपं शब्दानां सर्वार्थेष्वनुषज्यते ।
अर्थमात्रं विपर्यस्तं स्वरूपे तु[5] स्थितिः स्थिरा ॥२५६॥

[6]एकत्वं तु स्वरूपत्वाच्छब्दयोर्गौणमुख्ययोः ।
प्राहुरत्यन्तभेदेऽपि भेदमार्गानुदर्शिनः ॥२५७॥

सामिधेन्यन्तरं चैवमावृत्तावनुषज्यते ।
मन्त्राश्च विनियोगेन लभन्ते भेदमूहवत् ॥२५८॥

तान्याम्नायान्तराण्येव [7]पठ्यते कश्चिदेव तु ।
अनर्थकानां पाठो वा शेषस्त्वन्यः प्रतीयते ॥२५९॥

---

१ अ. अतिव्रज्य. २ उ. श्लोकस्यास्यार्धौ विपर्यासेन लिखितौ. ३ स्व. अवस्थितः. ४ स्व. शब्दार्थे. ५ स्व. तु श्रुतिः स्थिता. ६ अ. एकत्वं तु सरूपत्वात्. ७ स्व. पठ्यन्ते किंचिदेव तु; अ. पठ्येते.

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri
Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

शब्दस्वरूपमर्थस्तु [1]पाठोऽन्यैरुपवर्ण्यते ।
अत्यन्तभेदः सर्वेषां तत्संबन्धात्तु तद्वताम् ॥२६०॥

अन्या संस्कारसावित्री कर्मण्[2]येन्या प्रयुज्यते ।
अन्या जपप्र[3]बन्धेषु सा त्वेकैव प्रतीयते ॥२६१॥

अर्थस्वरूपे शब्दानां [4]स्वरूपाद् वृत्तिरिष्यते ।
वाक्यरूपस्य [5]वाक्यार्थे वृत्तिरन्यानपेक्षया ॥२६२॥

अनेकार्थत्वमेकस्य यैः शब्दस्यानुगम्यते ।
सिद्ध्यसिद्धिकृता तेषां गौणमुख्यप्रकल्पना ॥२६३॥

अर्थप्रकरणापेक्षो यो वा शब्दान्तरैः सह ।
युक्तः प्रत्याययत्यर्थं तं गौणमपरे विदुः ॥२६४॥

शुद्धस्यो[6]च्चारणे स्वार्थः प्रसिद्धो यस्य गम्यते ।
स मुख्य इति विज्ञेयो रूपमात्रनिबन्धनः ॥२६५॥

यस्त्वन्यस्य प्रयोगेण यत्नादिव नियुज्यते ।
तमप्रसिद्धं मन्यन्ते गौणा[7]र्थाभिनिवेशिनम् ॥२६६॥

[8]स्वार्थे प्रवर्तमानस्य यस्यार्थं योऽवलम्बते ।
निमित्तं तत्र मुख्यं स्यात् निमित्ती गौण इष्यते ॥२६७॥

पुराऽऽरादिति भिन्नेऽर्थे [9]यौ वर्तेते विरोधिनि ।
अर्थप्रकरणापेक्षं तयोरप्यवधारणम् ॥ २६८॥

वाक्य[10]स्यार्थात् पदार्थानामपोद्धारे प्रकल्पिते ।
शब्दान्तरेण संबन्धः कस्यैकस्योपपद्यते ॥२६९॥

यच्चाप्येकं पदं दृष्टं चरितास्तिक्रियं क्वचित् ।
तद् वाक्यान्तरमेवाहुर्न तदन्येन युज्यते ॥२७०॥

यच्च कोऽयमिति प्रश्ने गौरश्व [11]इति चोच्यते ।
प्रश्न एव क्रिया तत्र प्रक्रान्ता दर्शनादिका ॥२७१॥

---

१ अ. उ. पाठेऽन्यैरुप० २ इ. कर्मणाऽन्या. ३ इ. जयप्रबन्धेषु. ४ स्व. स्वरूपावृत्तिमिच्छतः. ५ इ. वाक्यार्थो वृत्ति० ६ स्व. उच्चारणस्यार्थः. ७ अ. गौणार्थाभिनिवेशितम्. ८ स्व. स्वार्थे प्रवर्तमानोऽपि. ९ इ. यो वर्तेत निरोधिनि. १० इ. वाक्यस्यार्थपदार्थानाम्. ११ स्व. इति वोच्यते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishraji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

नैवाधिकत्वं धर्माणां न्यूनता वा प्रयोजिका ।
आधिक्यमपि मन्यन्ते प्रसिद्धेर्न्यूनतां क्वचित् ॥२७२॥

जातिशब्दोऽन्तरेणापि जातिं यत्र प्रयुज्यते ।
संबन्धिसदृशाद्धर्मात्तं गौणमपरे विदुः ॥२७३॥

विपर्यासादिवार्थस्य यत्रार्थान्तरतामिव ।
मन्यन्ते स गवादिस्तु गौण इत्युच्यते क्वचित् ॥२७४॥

नियताः साधनत्वेन रूपशक्तिसमन्विताः ।
यथा कर्मसु गम्यन्ते सीरा[1]सिमुसलादयः ॥२७५॥

क्रियान्तरेण चैतेषां भवन्ति न हि शक्तयः ।
रूपादेव तु तादर्थ्यं निय[2]मेन प्रतीयते ॥२७६॥

तथैव रूपशक्तिभ्यामुत्पत्त्या समवस्थितः ।
शब्दो नियततादर्थ्यः शक्त्याऽन्यत्र प्रयुज्यते ॥२७७॥

श्रुतिमात्रेण यत्रास्य तादर्थ्यमवसीयते ।
तं [3]मुख्यमर्थं मन्यन्ते गौणं [4]यत्नोपपादितम् ॥२७८॥

गोयुष्मन्महतां च्व्यर्थे स्वार्थादर्थान्तरे स्थितौ ।
अर्थान्तरस्य तद्भावस्तत्र [5]मुख्येऽपि दृश्यते[6] ॥२७९॥

महत्त्वं शुक्ल[7]भावं च प्रकृतिः प्रतिपद्यते ।
भेदे नापेक्षिता सा तु गौणत्वस्य [8]प्रयोजिका ॥२८०॥

[9]अग्निसोमादयः शब्दा ये स्वरू[10]पनिबन्धनाः ।
संज्ञिभिः संप्रयुज्यन्ते प्रसिद्धेस्तेषु गौणता ॥२८१॥

अग्निदत्तस्तु योऽग्निः स्यात्तत्र स्वार्थोपसर्जनः ।
शब्दो दत्तार्थवृत्तित्वाद् गौणत्वं प्रतिपद्यते ॥२८२॥

निमित्तभेदात् प्रक्रान्ते शब्दव्युत्पत्तिकर्मणि ।
हरिश्चन्द्रादिषु सुटो भावाभावौ व्यवस्थितौ ॥२८३॥

---

१. अ. सोरासिमुसलादयः. २ उ. ब. निधनेन प्रतीयते. ३ इ. न मुख्यमर्थे; ब. मुख्यं तमर्थे. ४ स्व. गौणं यत्रोपपादितम्. ५ अ. मुख्योऽपि दृश्यते. ६ इ. इत उत्तरं वृद्ध्यादीनां च शास्त्रेऽस्मिन्नित्यारभ्य श्लोकपञ्चकं (२६६–२७०) सवृत्तिकमत्र लेखकप्रमादाल्लिखितमनावश्यकं वर्तते। ७ इ. शुक्लभावत्वं. ८ स्व. प्रसाधिकाः. ९ इ. अग्नीषोमादयः शब्दाः. १० स्व. स्वरूपपदार्थकाः.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

ऋष्यादौ प्राप्तसंस्कारो यः शब्दोऽन्येन युज्यते ।
तत्रान्तरङ्गः संस्कारो बाह्येऽर्थे न निवर्तते ॥ २८४ ॥

अत्यन्तविपरीतोऽपि [1]यदा योऽर्थोऽवधार्यते ।
[2]यथासंप्रत्ययं शब्दस्तत्र मुख्यः [3]प्रवर्तते ॥ २८५ ॥

यद्यपि प्रत्ययाधीनमर्थतत्त्वावधारणम् ।
न सर्वः प्रत्ययस्तस्मिन् [4]प्रसिद्ध इव जायते ॥ २८६ ॥

दर्शनं सलिले तुल्यं मृगतृष्णादिदर्शनैः ।
[5]तुल्यत्वे दर्शनादीनां न जलं मृगतृष्णिका ॥ २८७ ॥

यदसाधारणं कार्यं प्रसिद्धं रज्जुसर्पयोः ।
तेन भेदः परिच्छेद्यस्तयोस्तुल्येऽपि दर्शने ॥ २८८ ॥

[6]प्रसिद्धार्थविपर्यासनिमित्तं यच्च दृश्यते ।
यस्तस्माल्लक्ष्यते भेदस्तमसत्यं प्रचक्षते ॥२८९॥

यच्च निम्नो[7]न्नतं चित्रं सरूपं पर्वतादिभिः ।
न तत्र प्रतिघातादि कार्यं तद्वत् प्रवर्तते ॥२९०॥

[8]स्पर्शप्रबन्धो हस्तेन यथा चक्रस्य संततः ।
[9]न तथाऽलातचक्रस्य विच्छिन्नं [10]स्पृश्यते हि तत् ॥२९१॥

वप्रप्राकार[11]कल्पैश्च स्पर्शना[12]वरणे यथा ।
नगरेषु न ते तद्वद्गन्धर्वनगरेष्वपि ॥२९२॥

मृगपश्वादिभिर्यावान्मुख्यैरर्थः प्रसा[13]ध्यते ।
तावान्न [14]मृन्मयेऽप्यस्ति तस्मात्ते विषयः कुतः ॥२९३॥

महानाव्रियते देशः प्रसिद्धैः पर्वतादिभिः ।
अल्पदेशान्तरावस्थं प्रतिबिम्बं तु दृश्यते ॥२९४॥

---

१ स्व. यथा. २ स्व. तथा संप्रत्ययः. ३ स्व. प्रयुज्यते. ४ ब. असिद्ध इव. ५ स्व. भेदास्तु स्पर्शनादीनां. ६ स्व. सादृश्यार्थविपर्यासे. ७ ब. निम्नोन्नते चित्रे; स्व. निम्नोन्नतं चित्रे. ८ इ. स्पर्शप्रबोधो हस्तेन; उ. स्पृशेर्यशबन्धो. ९ उ. न तथालीनचक्रस्य. १० इ. दृश्यते हि तत्; उ. साध्यते हि तत्. ११ अ. ब. तल्पैश्च. १२ अ. स्पर्शनावरणे तथा. १३ उ. प्रसिध्यते. १४ इ. मृन्मयेष्वस्ति.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

मरणादिनिमित्तं च यथा मुख्या विषादयः ।
न ते स्वप्नादिषु स्वस्य तद्वदर्थस्य साधकाः ॥२९५॥

देशकालेन्द्रियगतैर्भेदैर्यद् दृश्यतेऽन्यथा ।
यथा प्रसिद्धिर्लोकस्य तथा तदवसीयते ॥२९६॥

यच्चोपघातजं ज्ञानं यच्च ज्ञानमलौकिकम् ।
न ताभ्यां व्यवहारोऽस्ति शब्दा लोकनिबन्धनाः ॥२९७॥

घटादिषु यथा दीपो येनार्थेन प्रयुज्यते ।
ततोऽन्यस्यापि सान्निध्यात् स करोति प्रकाशनम् ॥२९८॥

संसर्गिषु तथाऽर्थेषु शब्दो येन प्रयुज्यते ।
तस्मात् प्रयोजकादन्यानपि प्रत्याययत्यसौ ॥२९९॥

निर्मन्थनं यथाऽरण्योरग्न्यर्थमुपपादितम् ।
[1]धूममप्यनभिप्रेतं जनयत्येकसाधनम् ॥३००॥

यथा[2] शब्दोऽपि कस्मिंश्चित् प्रत्याय्ये[3]ऽर्थे विवक्षिते ।
अविवक्षितमप्य[4]र्थं प्रकाशयति संनिधेः ॥३०१॥

यथैवात्यन्तसंसृष्टस्त्यक्तुमर्थो न शक्यते ।
तथा शब्दोऽपि संबन्धी प्रविवेक्तुं न शक्यते ॥३०२॥

अर्थानां संनिधानेऽपि सति चैषां प्रकाशने[5] ।
प्रयोजकोऽर्थः शब्दस्य रूप[6]भेदेऽपि शस्यते ॥३०३॥

क्वचिद्गुणप्रधानत्वमर्थानामविवक्षितम्[7] ।
क्वचित् सांनिध्य[8]मेतेषां प्रतिपत्तावकारणम् ॥३०४॥

[9]यच्चानुपात्तं शब्देन तत् कस्मिंश्चित् प्रतीयते ।
क्वचित् प्रधानमेवार्थो भवत्यन्यस्य लक्षणम् ॥३०५॥

आख्यातं तद्धितार्थस्य यत् किञ्चिदु[10]पदर्शकम् ।
गुणप्रधानभावस्य तत्र दृष्टो विपर्ययः ॥३०६॥

---

१ स्व. पूतिमपि. २ अ. इ. तथा शब्दोऽपि. ३ स्व. प्रत्ययार्थे; ब. प्रत्याय्यार्थो. ४ ब. अत्यर्थे. ५ ब. चैषां प्रकाशते. ६ स्व. रूपभेदे. ७ इ. अर्थानां विवक्षितम्. ८ ब. सांनिध्यमप्येषां. ९ इ. उ. यच्चानुपात्तमित्ययं श्लोको नैव पठ्यते. १० अ. यत् किञ्चिद्रूपदर्शकम् ।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

निर्देशे लिङ्गसंख्यानां संनिधानमकारणम् ।
प्रमाणम्[1]अर्धह्रस्वादावनुपात्तं प्रतीयते ॥३०७॥

ह्रस्वस्यार्धं च यद् दृष्टं तत्तस्यासंनिधावपि ।
ह्रस्वस्य लक्षणार्थत्वात्तद्वदेवाभिधीयते ॥३०८॥

दीर्घप्लु[2]ताभ्यां तस्य स्यात् मात्रया वा विशेषणम् ।
जातेर्वा लक्षणा यस्मात् सर्वथा सप्तपर्णवत् ॥३०९॥

गन्तव्यं दृश्यतां सूर्य इति कालस्य लक्षणे ।
ज्ञायतां काल इत्येतत् सोपायमभिधीयते ॥३१०॥

विध्यत्यधनुषेत्यत्र विशेषेण[3] निदर्श्यते ।
सामान्यमाश्रयः शक्तेर्यः कश्चित् प्रतिपादकः ॥३११॥

काकेभ्यो रक्ष्यतां सर्पिरिति बालोऽपि चोदितः ।
उपघातपरे वाक्ये न श्वादिभ्यो न रक्षति ॥३१२॥

प्रक्षालनं शरावाणां स्थालीनां[4] मार्जनं तथा ।
अनुक्तमपि रूपेण भुज्यङ्गत्वात् प्रतीयते ॥३१३॥

वाक्यात् प्रकरणादर्थादौचित्याद्देशकालतः ।
शब्दार्थाः प्रविभज्यन्ते न रूपादेव केवलात् ॥३१४॥

संसर्गो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः ॥३१५॥

[5]सामर्थ्यमौचिती देशः कालो व्यक्तिः[6] स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥३१६॥

भेद[7]पक्षेऽपि सारूप्याद् भिन्ना[8]र्थाः प्रतिपत्तिषु ।
नियता यान्त्यभिव्यक्तिं शब्दाः प्रकरणादिभिः ॥३१७॥

नामाख्यातसरूपा ये कार्या[9]न्तरनिबन्धनाः ।
शब्दा[10] वाच्याश्च तेष्वर्थो न रूपादधिगम्यते ॥३१८॥

---

१ उ. ब. प्रमाणमेव ह्रस्वादौ. २ अ. दीर्घप्लुताभ्यां तस्य स्यात् । इति श्लोकचरणो लेखकप्रमादाद् भ्रष्टः. ३ इ. विशेषेण निदर्शने; स्व. विश्लेषेण. ४ अ. स्थलानां मार्जनं; उ. स्थालानां; स्व. स्थालीसंमार्जनं. ५ अ. ब. अयं श्लोको न पठितो दृश्यते. ६ इ. उ. ब. व्यक्ति-स्वरादयः. ७ स्व. भेदपक्षे तु. ८ इ. भिन्नार्थां प्रतिपत्तिपु. ९ स्व. कार्योत्साह० १० अ. शब्दवाच्यश्च-

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

या प्रवृत्तिनिवृत्त्यर्था स्तुतिनिन्दाप्रकल्पना ।
[1]कुशलः प्रतिपत्ता तामयथार्थां प्रतीयते ॥३१९॥

विधीयमानं यत् कर्म दृष्टादृष्टप्रयोजनम् ।
[2]स्तूयते सा स्तुतिस्तस्य कर्तुरेव प्रयोजिका ॥३२०॥

व्याघ्रादिव्यपदेशेन यथा बालो निवर्त्यते ।
असत्योऽपि तथा कश्चित् प्रत्यवायो विधीयते ॥३२१॥

न संविधानं कृत्वाऽपि प्रत्यवाये तथाविधे ।
शास्त्रेण प्रतिषिद्धेऽर्थे विद्वान् कश्चित् प्रवर्तते ॥३२२॥

सर्पेषु संविधायापि सिद्धैर्मन्त्रौषधादिभिः ।
नान्यथा प्रतिपत्तव्यं न दतो गमयेदिति ॥३२३॥

क्वचित् तत्त्वसमाख्यानं क्रियते स्तुतिनिन्दयोः ।
तत्रापि च प्रवृत्तिश्च निवृत्तिश्चोपदिश्यते ॥३२४॥

रूपं सर्वपदार्थानां वाक्यार्थोपनिबन्धनम् ।
सापेक्षा ये तु वाक्यार्थाः पदार्थैरेव ते समाः ॥३२५॥

वाक्यं तदपि मन्यन्ते यत् पदं चरितक्रियम् ।
[3]अन्तरेण क्रियाशब्दं वाक्यादेव द्विदर्शनात् ॥३२६॥

आख्यातशब्दे नियतं साधनं यत्र गम्यते ।
तदप्येकं [4]समासार्थवाक्यमित्यभिधीयते ॥३२७॥

शब्दव्यवहिता बुद्धिरप्रयुक्तपदाश्रया ।
अनुमानात् तदर्थस्य प्रत्यये हेतुरुच्यते ॥३२८॥

यस्मिंस्तूच्चरिते शब्दे यदा योऽर्थः प्रतीयते ।
तमाहुरर्थं तस्यैव नान्यदर्थस्य लक्षणम् ॥३२९॥

क्रियार्थोपपदेष्वेवं[5] स्थानिनां गम्यते क्रिया ।
वृत्तौ निरादिभिश्चैव क्रान्ताद्यर्थोऽवगम्यते ॥३३०॥

---

१ ख. कुशलप्रतिपत्तीनामयथार्था समीहते। २ ख. श्रूयते सा श्रुतिस्तस्य. ३ अ. ब. श्लोकार्धमिदं न पठ्यते. ४ इ. उ. ब. समासार्थे वाक्य० ५ इ. उ. एव स्थानीनां.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

तानि शब्दान्तराण्येव पर्याया इव लौकिकाः ।
अर्थप्रकरणाभ्यां तु [1]तेषां स्वार्थो नियम्यते ॥३३१॥

प्रतिबोधाभ्युपायास्तु ये तं तं पुरुषं प्रति ।
नावश्यं तेऽ[2]भिसंबद्धाः शब्दा ज्ञेयेन वस्तुना ॥३३२॥

[3]असत्यां प्रतिपत्तौ च मिथ्या वा प्रतिपादने ।
स्वैरर्थैर्नित्यसंबद्धास्ते ते शब्दा व्यवस्थिताः ॥३३३॥

यथाप्रकरणं द्वारमित्यस्यां [4]कर्मणः श्रुतौ ।
बधान देहि वेत्येतदुपायादधिगम्यते ॥३३४॥

[5]यत्र साधनवृत्तिर्यः शब्दः सत्त्वनिबन्धनः ।
न स प्रधानभूतस्य साध्यस्यार्थस्य वाचकः ॥३३५॥

स्वार्थमात्रं प्रकाश्यासौ [6]साकाङ्क्षो विनिवर्तते ।
अर्थस्तु तस्य संबन्धी [7]प्रकाशयति संनिधिम् ॥३३६॥

[8]पारार्थ्यस्याविशिष्टत्वात् न शब्दाच्छब्द[9]संनिधिः ।
नार्थाच्छब्दस्य सांनिध्यं न शब्दादर्थसंनिधिः ॥३३७॥

नष्टरूपमिवा[10]ख्यातमाक्षिप्तं कर्मवादिना[11] ।
यदि प्राप्तं [12]प्रधानत्वं युगपद्भावसत्त्वयोः ॥३३८॥

तैस्तु नामसरूपत्वमाख्यातस्योपवर्ण्यते ।
अन्वयव्यतिरेकाभ्यां व्यवहारो विभज्यते[13] ॥३३९॥

न चापि [14]रूपात् संदेहे वाचकत्वं निवर्तते ।
अर्धं [15]पशोरिव यथा सामर्थ्यात् तद्विकल्प्यते ॥३४०॥

सर्वं सत्त्वपदं शुद्धं यदि भावनिबन्धनम् ।
संसर्गे च वि[16]भक्तोऽस्य त[17]स्यार्थो न पृथग् यदि ॥३४१॥

---

१ इ. तेषां सोऽर्थो नियम्यते. २ स्व. तेऽपि संबद्धाः; इ. तेऽभिसंबद्धः शब्दोऽक्षयेन वस्तुना. ३ इ. श्लोकोऽयं सवृत्तिको लेखकप्रमादात् पतितः. ४ अ. यथाप्रकरणद्वारमित्यस्यां कर्मणः श्रुतौ. ५ अ. स्व. तत्र साधन०; ब. यत्र साधन० ६ स्व. सापेक्षो. ७ स्व. प्रकल्पयति. ८ इ. परार्थस्याविशिष्टत्वात्. ९ इ. संनिधः. १० इ. इति ख्यातं. ११ स्व. कर्मवाचिनाम्. १२ अ. प्रधानं च. १३ स्व. श्लोकोयं न पठ्यते. १४ स्व. रूपासंदेहे. १५ स्व. पशोरिति. १६ स्व. विभक्तस्य. १७ स्व. इ. तथार्थो न पृथग् हृदि.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

क्रियाप्रधानमाख्यातं नाम्नां[1] सत्त्वप्रधानता ।
चत्वारि पदजातानि सर्वमेतद्विरुध्यते[2] ॥३४२॥

वाक्यस्य बुद्धौ नित्यत्वमर्थयोगं च लौकिकम् ।
दृष्ट्वा चतुष्ट्वं नास्तीति वार्ताक्षौदुम्बरायणौ[3] ॥३४३॥

व्याप्तिमांश्च लघुश्चैव व्यवहारः[4] पदाश्रयः ।
लोके शास्त्रे च कार्यार्थं विभागेनैव कल्पितः ॥३४४॥

न लोके प्रतिपत्तॄणामर्थयोगात् प्रसिद्धयः ।
तस्मादलौकिको वाक्यादन्यः[5] कश्चिन्न विद्यते ॥३४५॥

अन्यत्र श्रूयमाणैश्च लिङ्गैर्वाक्येषु[6] सूचिताः ।
स्वार्था एव प्रतीयन्ते रूपाभेदादलक्षिताः ॥३४६॥

उत्सर्गवाक्ये यत्त्यक्तमशब्दमिव शब्दवत् ।
तद्बाधकेषु वाक्येषु श्रुतमन्यत्र गम्यते ॥३४७॥

ब्राह्मणानां श्रुतिर्दध्नि प्रकान्ता माठरं[7] विना ।
माठरस्तत्र[8]संबन्धात्तत्राचष्टे यथार्थताम् ॥३४८॥

अनेकाख्यातयोगेऽपि वाक्यं न्याया[9]पवादयोः ।
एकमेवेष्यते कैश्चिद् भिन्नरूपमिव स्थितम् ॥३४९॥

नियमः प्रतिषेधश्च विधिशेषस्तथा सति ।
द्वितीये यो लुगाख्यातस्तच्छेषमलुकं विदुः ॥३५०॥

निराकाङ्क्षाणि निर्वृत्तौ प्रधानानि परस्परम् ।
तेषामनुपकारित्वात् कथं स्यादेकवाक्यता ॥३५१॥

विशेषविधिना[10]ऽर्थित्वाद्वाक्यशेषोऽनुमीयते ।
विशेषैवन्निवर्त्येऽर्थे[11] तस्मात्तुल्यं व्यपेक्षणम् ॥३५२॥

संज्ञाशब्दैकदेशो यस्तस्य लोपो न विद्यते ।
विशिष्टरूपा सा संज्ञा कृतौ[12] च न निवर्तते ॥३५३॥

---

१ अ. इ. नाम्ना सत्त्व० २ अ. एतद्विते; इ. एतद्विमुच्यते. ३ इ. वार्ताख्यौदुम्बरायणौ. ४ इ. व्यवहारपदाश्रयः. ५ इ. वाक्यादत्र. ६ इ. वाक्येष्वसूचितः । ७ स्व. माठरादिना. ८ इ. तत्र संबन्धात्. ९ ब. न्याय्यापवादयोः. १० स्व. विधिनाऽर्थत्वात्. ११ स्व. विधेयवन्निवर्त्येऽर्थे. १२ स्व. कृतया न.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

संज्ञान्तराच्च दत्तादेर्नान्या संज्ञा प्रतीयते ।
संज्ञिनं देवदत्ताख्यं दत्तशब्दः कथं वदेत् ॥३५४॥

सर्वैरवयवैस्तुल्यं संबन्धं समुदायवत् ।
केचिच्छब्दस्वरूपाणां मन्यन्ते सर्वसंज्ञिभिः ॥३५५॥

वर्णानामर्थवत्त्वं तु संज्ञानां[1] संज्ञिभिर्भवेत् ।
संबद्धोऽवयवः[2] संज्ञाप्रविवेकेन कल्प्यते[3] ॥३५६॥

सर्वस्वरूपर्युगपत् संबन्धे सति संज्ञिनः ।
नैकदेशसरूपेभ्यस्तत्प्रत्यायनसंभवः ॥३५७॥

एकदेशात्तु संघाते केषांचिज्जायते स्मृतिः ।
स्मृतेस्तु विषयाच्छब्दात् संघातार्थः प्रतीयते ॥३५८॥

एकदेशात् स्मृतिर्भिन्ने संघाते जायते[4] कथम् ।
कथं प्रतीयमानः स्याच्छब्दोऽर्थस्याभिधायकः ॥३५९॥

एकदेशस्वरूपास्तु[5] तैस्तैर्लिङ्गैः[6] समन्विताः ।
अनुनिष्पादिनः शब्दाः संज्ञासु समवस्थिताः ॥३६०॥

साधारणत्वात् संदिग्धाः सामर्थ्यान्नियताश्रयाः[7] ।
तेषां ये साधवस्तेषु शास्त्रे[8] लोपादि शिष्यते ॥३६१॥

तुल्यायामनुनिष्पत्तौ ज्ये द्रा घा इत्यसाधवः[9] ।
न ह्यन्वाख्यायके शास्त्रे तेषु दत्तादिवत् स्मृतिः ॥३६२॥

कृतणत्वाश्च[10] ये शब्दा नित्यं खरणसादयः ।
एकद्रव्योपदेशित्वात्तान्[11] साधून् संप्रचक्षते ॥३६३॥

गोत्राण्येव तु तान्याहुः संज्ञाशक्तिसमन्वयात् ।
निमित्तापेक्षणं तेषु स्वार्थेनावश्यमिष्यते[12] ॥३६४॥

---

१ स्व. संज्ञानां संज्ञिना. २ ब. संबन्धोऽवयवः. ३ स्व. कल्पते. ४ स्व. नियता. ५इ. ब. एकदेशसरूपास्तु. ६ स्व. तैस्तैर्भेदैः. ७ इ. नियताश्रयाः । तेषामसाधवस्तेषु. ८ स्व. शास्त्राल्लोपादि. ९ इ. येप्वाख्यापीत्यसाधवः. १० ब. णत्वाश्रये. ११ °त्वादेतान् साधून् प्रचक्षते. १२ अ. चार्थेनावश्यमिष्यते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

व्यवहाराय नियमः संज्ञानां संज्ञिनि क्वचित् ।
नित्य एव तु संबन्धो डित्थादिषु गवादिवत् ॥३६५॥

[2]वृद्ध्यादीनां च शास्त्रेऽस्मिन् शक्त्यवच्छेदलक्षणः ।
[3]अकृत्रिमोऽभिसंबन्धो विशेषणविशेष्यवत् ॥३६६॥

[4]संज्ञास्वरूपमाश्रित्य निमित्ते सति लौकिकी ।
काचित् प्रवर्तते काचिन्निमित्तासंनिधावपि ॥३६७॥

शास्त्रे तु महती संज्ञा स्वरूपोपनिबन्धना ।
अनुमानं निमित्तस्य संनिधाने प्रतीयते ॥३६८॥

आवृत्तेरनुमानं वा सारूप्यात्तत्र गम्यते ।
शब्दभेदानुमानं वा शक्तिभेदस्य वा गतिः ॥३६९॥

क्वचिद्विषयभेदेन कृत्रिमा व्यवतिष्ठते ।
संख्यायामेकविषयं व्यवस्थानं द्वयोरपि ॥३७०॥

वि[6]षयं कृत्रिमस्यापि लौकिकः क्वचिदुच्चरन् ।
व्याप्नोति दूरात्संबुद्धौ तथाहि [7]ग्रहणं तयोः ॥३७१॥

संघै[8]कशेषद्वन्द्वेषु केचित् सामर्थ्यलक्षणम् ।
प्रत्याश्रयमवस्थानं क्रियाणां प्रतिजानते ॥३७२॥

भोजनं फलरूपाभ्यामेकैकस्मिन् समाप्यते ।
अन्यथा हि व्यवस्थाने न तदर्थः [9]प्रकल्प्यते ॥३७३॥

[10]अन्नादानादि[11]रूपां च सर्वे तृप्तिफलां भुजिम् ।
[12]प्रत्येकं प्रतिपद्यन्ते न[13] तु नाट्यक्रियामिव ॥३७४॥

---

१ श्लोकादस्मादनन्तरं पठ्यते ' आ ' इति संज्ञिते आदर्शे " कृतकत्वादनित्यत्वं संबन्धस्योपपद्यते । संज्ञायां सा हि पुरुषैर्यथाकामं नियुज्यते ॥ यथाहि पांसुरेखाणां बालकैर्मधुरादयः । संज्ञाः क्रियन्ते सर्वासु संज्ञास्वेषैव कल्पना ॥ "; स्वोपज्ञटीकायामेतौ श्लोकौ केचिदाहुः इत्युपक्रम्य लिख्येते. २ इ. वृद्ध्यादीनां चेत्यादयश्चत्वारः श्लोकाः सवृत्तिकाः पूर्वमेव गोयुष्मन्महतां च्व्यर्थ (२७९) इत्यस्य श्लोकस्यानंतरं लेखकेन प्रमादाल्लिखिताः. ३ स्व. अकृत्रिमो हि संबन्धो. ४ अ. संज्ञास्वरूपमाश्रित्येत्यादिरयं श्लोको लेखकप्रमादात्पतितः; तट्टीका तु लिखितैव वर्तते. ५ अ. प्रवर्तते. ६ स्व. विषयः. ७ इ. ग्रहणं द्वयोः; अ. श्लोकोयं लेखकप्रमादात्पतितः. ८ इ. संघैकदेश० ९ स्व. प्रकल्पते. १० इ. अन्नदानादि. ११ स्व. रूपं च सर्वे तृप्तिफलं. १२ स्व. भेदेन. १३ स्व. न नाट्यादिक्रियादिवत्.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

पाद्यवत् सा विभागेन सामर्थ्याद्‌वतिष्ठते ।
भुजिः करोति भुज्यर्थं न तन्त्रेण प्रदीपवत् ॥३७५॥

[1]दृश्यादिस्तु क्रियैकाऽपि तथाभूतेषु कर्मसु ।
आवृत्तिमन्तरेणापि समुदायाश्रया भवेत् ॥३७६॥

भिन्नव्यापाररूपाणां व्यवहारादिदर्शने ।
कर्तृणां दर्शनं भिन्नं संभूयार्थस्य साधकम् ॥३७७॥

[2]लक्ष्यस्य लोकसिद्धत्वाच्छास्त्रे लिङ्गस्य दर्शनात् ।
आर्थित्वादैक्षु[3] भेदेन वृद्धिसंज्ञा समाप्यते ॥३७८॥

[4]शतादाने प्रधानत्वाद् दण्डने शतकर्मके ।
अर्थिनां गुणभेदेऽपि संख्येयोऽर्थो न भिद्यते ॥३७९॥

संघस्यैव विधेयत्वात् कार्यवत्प्रतिपादने ।
तत्र तन्त्रेण संबन्धः समासाभ्यस्तसंज्ञयोः ॥३८०॥

लक्षणार्था [5]स्तुतिर्येषां कांचिदेव क्रियां प्रति ।
तैर्व्यस्तैश्च समस्तैश्च स धर्म उपलक्ष्यते ॥३८१॥

वृषलैर्न प्रवेष्टव्यमित्येत[6]स्मिन् गृहे यथा ।
प्रत्येकं संहतानां च प्रवेशः प्रतिषिध्यते ॥३८२॥

संभूय त्वर्थलिप्सादिप्रतिषेधोप[7]पादने ।
पृथगप्रतिषिद्धत्वात् प्रवृत्तिर्न विरुध्यते ॥३८३॥

व्यवायलक्षणार्थत्वादट्कुप्वाङादिभिस्तथा ।
प्रत्येकं वा समस्तैर्वा णत्वं न प्रतिषिध्यते ॥३८४॥

[8]अनुग्रहार्थं भोक्तृणां भुजिरारभ्यते यदा ।
देशकालाद्यभेदेन नानुगृह्णाति तानसौ ॥३८५॥

पात्रादिभेदान्नानात्वं यस्यैकस्योपदिश्यते ।
विपर्यये वा भिन्नस्य तस्यैकत्वं प्रकल्प्यते ॥३८६॥

---

१ स्व. दृशादिस्तु क्रियैवापि. २ लोके लक्ष्यप्रसिद्धत्वात्. ३ अ. ऐक्ष्वभेदेन; स्व. अर्थिप्वादैक्षु भेदेन. ४ स्व. शतादानप्रधानत्वात्. ५ स्व. श्रुतिर्येषां. ६ स्व. एकस्मिन् गृहे. ७ स्व. प्रतिषेधोपदेशने. ८ स्व. अनुग्रहार्थो भोक्तृणां.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

संहत्यापि च कुर्वाणा भेदेन प्रतिपादिताः ।
स्वं स्वं भोज्यं विभागेन प्राप्तं संभूय भुञ्जते ॥३८७॥

वीप्साया विषयाभावाद् विरोधादन्यसंख्यया ।
द्विधा समाप्त्ययोगाच्च शतं संघेऽवतिष्ठते ॥३८८॥

भुजिर्द्वन्द्वैकशेषाभ्यां यत्रान्यैः सह शिष्यते ।
तत्रापि लक्षणार्थत्वाद् द्विधा वाक्यं समाप्यते ॥३८९॥

वाक्यान्तराणां प्रत्येकं समाप्तिः कैश्चिदि[1]ष्यते ।
रूपान्तरेण युक्तानां वाक्यानां तेन संग्रहः ॥३९०॥

न वाक्यस्याभिधेयानि भेदवाक्यानि कानिचित् ।
तस्मिंस्तूच्चरिते भेदांस्तथाऽन्यान् प्रतिपद्यते ॥३९१॥

येषां समस्तो वाक्यार्थः प्रतिभेदं समाप्यते ।
तेषां तदानीं भिन्नस्य किं पदार्थस्य सत्तया ॥३९२॥

अथ तैरेव जनितः सोऽर्थो भिन्नेषु वर्तते ।
पूर्वस्यार्थस्य तेन स्याद्विरोधः सह वा स्थितिः ॥३९३॥

सह स्थितौ विरोधित्वं स्याद्विशिष्टाविशिष्टयोः ।
व्यभिचारी तु संबन्धस्त्यागेऽर्थस्य प्रसज्यते ॥३९४॥

एकः साधारणो वाच्यः [2]प्रतिशब्दमवस्थितः ।
संघे संघिषु [3]चार्थात्मा संनिधाननिदर्शकः ॥३९५॥

यथा साधारणे स्वत्वं त्यागस्य च फलं धने ।
प्रीतिश्चाविकला तद्वत् संबन्धोऽर्थेन [4]तद्वता ॥३९६॥

वर्णानामर्थवत्तायां तेनैवार्थेन तद्वति ।
समुदायेन चैकत्वं भेदेन व्यवतिष्ठते ॥३९७॥

एकेनैव प्रदीपेन [5]सर्वे साधारणं धनम् ।
पश्यन्ति तद्वदेकेन सुपा संख्याऽभिधीयते ॥३९८॥

---

१ ख. कैश्चिदुच्यते. २. ख. प्रतिशब्द उपस्थितः. ३ अ. चार्थात्मसंनिधान०; इ. चार्थात्मानसंनिधान०. ४ ख. तद्वताम्. ५ इ. सर्वसाधारणं.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

नार्थवत्ता पदे वर्णे वाक्ये चैवं विशिष्यते ।
अभ्यासात् प्रक्रमोऽन्यस्तु विरुद्ध इव दृश्यते ॥३९९॥

विनियोगादृते शब्दो न स्वार्थस्य प्रकाशकः ।
अर्थाभिधानसंबन्धमुक्तिद्वारं प्रचक्षते ॥४००॥

यथा प्रणिहितं चक्षुर्दर्शनायोपकल्पते ।
तथाऽभिसंहितः शब्दो भवत्यर्थस्य वाचकः ॥४०१॥

क्रिया[1]व्यपेतः संबन्धो दृष्टः करणकर्मणोः ।
अभिधानियमस्तस्मादभिधानाभिधेययोः ॥४०२॥

बहुष्वेकाभिधानेषु सर्वेष्वेकार्थकारिषु ।
यत् प्रयोक्ताऽभिसंधत्ते शब्दस्तत्रावतिष्ठते ॥४०३॥

आम्नायशब्दानभ्यासे केचिदाहुरर्थकान् ।
[2]स्वरूपमात्रवृत्तींश्च परेषां प्रतिपादने ॥४०४॥

अभिधानक्रिया[3]भेदादर्थस्य प्रतिपाद[4]कान् ।
नियोगभेदान्मन्यन्ते [5]तानेवैकत्वदर्शिनः ॥४०५॥

तेषामत्यन्तनानात्वं नानात्वव्यवहारिणः ।
[6]अक्षादीनामिव प्राहुरेकजातिसमन्वयात् ॥४०६॥

प्रयोगा[7]दभिसंधानमन्यदेषु न विद्यते ।
विषये यतशक्तित्वात् स तु तत्र व्यवस्थितः ॥४०७॥

[8]नानात्वस्यैव [9]संज्ञानमर्थप्रकरणादिभिः ।
न जात्वर्थान्तरे वृत्तिरन्यार्थानां कथंचन ॥४०८॥

पदरूपं तु यद्वाक्यमस्तित्वोपनिबन्धनम् ।
कामं विमर्शस्तत्रायं न वाक्यावयवे पदे ॥४०९॥

यथैवानर्थकैर्वर्णैर्विशिष्टार्थोऽभिधीयते ।
पदै[10]रनर्थकैरेवं विशिष्टार्थोऽभिधीयते ॥४१०॥

---

१ अ. ब. क्रियाव्यवेतः. २ अ. इ. स्वरूपमात्रवृत्तीश्च; स्व. सरूपमात्र० ३ इ. ०क्रिया-योगादर्थस्य. ४ ब. प्रतिपादकात्. ५ स्व. तेनैवैकत्वदार्शिनः. ६ अ. अक्ष्यादीनामिव; इ. स्व. अश्वादीनामिव प्राहुरेकजातिसमन्वयम्. ७ ब. अभिसंधानमत्पदेषु; अभिसंधानमन्यभेदेन. ८ इ. नानार्थ० ९ स्व. संज्ञानामर्थ० १० इ. पदैरनर्थकैरितीदं श्लोकार्धं लेखकप्रमादात्पतितम्.

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

यदन्तराले ज्ञानं तु [1]पदार्थेषूपजायते ।
प्रतिपत्तेरुपायोऽसौ [2]प्रक्रमानवधारणात् ॥४११॥

पूर्वैरर्थैर[3]नुगतो यथाऽर्थात्मा परः परः ।
संसर्ग एव प्रक्रान्तस्[4]तथाऽन्येष्वर्थवस्तुषु ॥ ४१२॥

अङ्गीकृते तु केषांचित् साध्येनार्थेन साधने ।
आधार[5]नियमार्थैव साधनानां पुनःश्रुतिः ॥४१३॥

[6]आधारनियमाभावात्[7]तदाक्षेपो न विद्यते ।
सामर्थ्यात् संभवस्तस्य श्रुतिस्त्वन्यनिवृत्तये ॥४१४॥

क्रिया क्रियान्तराद्भिन्ना नियताधारसाधना ।
प्रक्रान्ता प्रतिपत्तॄणां [8]भेदाः संबोधहेतवः ॥४१५॥

[9]अविभागं तु शब्देभ्यः क्रमवद्भ्योऽपदक्रमम् ।
प्रकाशते तदन्येषां वाक्यं वाक्यार्थ [10]एव च ॥४१६॥

स्वरूपं विद्यते यस्य [11]तस्यात्मा न निरूप्यते ।
नास्ति यस्य स्वरूपं तु तस्यैवात्मा निरूप्यते ॥४१७॥

अशब्दमपरेऽर्थस्य रूपनिर्धारणं विदुः ।
अर्थावभासरूपा हि शब्देभ्यो जायते स्मृतिः ॥४१८॥

अन्यथैवाग्निसंबन्धाद्दाहं दग्धोऽभिमन्यते ।
अन्यथा दाहशब्देन [12]दाहाद्यर्थः प्रतीयते ॥४१९॥

पृथङ्निविष्टतत्त्वानां [13]पृथगर्थानुपातिनाम् ।
इन्द्रियाणां यथा [14]कार्यमृते देहान्न कल्पते ॥४२०॥

तथा पदानां सर्वेषां [15]पृथगर्थनिवेशिनाम् ।
वाक्येभ्यः प्रविभक्तानामर्थवत्ता न विद्यते ॥४२१॥

---

१ स्व. पदार्थेषूपयुज्यते. २ इ. प्रक्रमानवधारणम्. ३ इ. सर्वैरर्थैरनुगतो; आ. पूर्वैर्वर्णैरनुगतो यथा वर्णः परः परः । ४ इ. तथाद्येष्वर्थ० ५ इ. ०नियमार्थेव. ६ इ. स्व. आधारे. ७ अ. तदा दोषो न. ८ स्व. भेदात् संबोधहेतुका. ९ स्व. प्रतिभागं. १० प. एव वा. ११ स्व. न तस्यात्मा निरूप्यते. १२ स्व. दाहार्थः संप्रतीयते. १३ स्व. पृथगर्थाभिवादिनाम्. १४ इ. कृते भेदान्न कल्पते. १५ इ. स्व. पृथगर्थाभिवेशिनाम्.

डा० विद्या निवास मिश्र
प्राध्यापक, भाषा विज्ञान
निजी पुस्तकालय

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

सं[1]सर्गरूपं संसृष्टेष्वर्थवस्तुषु गृह्यते ।
नात्रोपाख्यायते तत्त्वमपदार्थस्य दर्शनात् ॥४२२॥

दर्शनस्यापि यत्सत्यं न तथा दर्शनं स्थितम् ।
वस्तुसंसर्गरूपेण तद्रूपं निरूप्यते ॥४२३॥

अस्तित्वेनानुषक्तो वा निवृत्त्याऽऽत्मनि वा स्थितः ।
अर्थोऽभिधीयते यस्मादतो वाक्यं प्रयुज्यते ॥४२४॥

क्रियानुषङ्गेण विना न पदार्थः प्रतीयते ।
सत्यो वा विपरीतो वा [2]व्यवहारे न सोऽस्त्यतः ॥४२५॥

[3]सदित्येव तु यद्वाक्यं तद्भूदस्ति नेति वा ।
क्रियाभिधानसंबन्धमन्तरेण [4]न मन्यते ॥४२६॥

आख्यातपदवाच्येऽर्थे साधनोपनिबन्धने ।
विना सत्त्वाभिधानेन नाकाङ्क्षा विनिवर्तते ॥४२७॥

[5]प्राधान्यात्तु क्रिया पूर्वमर्थस्य प्रविभज्यते ।
[6]साध्यप्रयुक्तान्यङ्गानि फलं तस्[7]याः प्रयोजकम् ॥४२८॥

प्रयोक्तैवाभिसंधत्ते साध्यसाधनरूपताम् ।
[8]अर्थस्य वाऽभिसंबन्धकल्पनां प्रसमीहते ॥४२९॥

[9]पचिक्रियां करोतीति [10]कर्मत्वेनाभिधीयते ।
पक्तिः करणरूपं तु साध्यत्वेन प्रतीयते ॥४३०॥

योऽसौ[11] येनोप[12]कारेण प्रयोक्तॄणां विवक्षितः ।
[13]अर्थस्य सर्वशक्तित्वात् स तथैव व्यवस्थितः ॥४३१॥

आराद् वृत्तिषु संबन्धः कदाचिदभिधीयते ।
[14]आश्लिष्टो योऽनुपश्लिष्टः स कदाचित् प्रतीयते ॥४३२॥

---

१ इ. संसर्गरूपः. २ स्व. व्यवहारो न; इ. व्यवहारेण सोऽस्त्वतः. ३ स्व. सदित्येतत्तु. ४ स्व. न गम्यते. ५ स्व. प्राधान्यं तु क्रियारूपं. ६ स्व. सोऽस्य. ७ स्व. तस्याप्रयोजकम्. ८ स्व. अर्थस्यैवाभिसंबन्ध०; अर्थस्य चाभिसंबन्धः. ९ इ. ब. पचिक्रिया करोमीति. १० इ. कर्मत्वं नोभिधीयते. ११ स्व. योंऽशो येनोपकारेण. १२इ. येन प्रकारेण. १३ प. सर्वस्य सर्व० १४ इ. आश्लिष्टे सोऽनुपश्लिष्टः.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

संसृष्टानां विविक्तत्वं[1] संसर्गश्च विवेकिनाम् ।
नानात्मकानामेकत्वं नानात्वं च विपर्यये ॥४३३॥

सर्वात्मकत्वादर्थस्य नैरात्म्याद्वा[2] व्यवस्थितम् ।
अत्यन्तयतशक्तित्वाच्छब्द[3] एव निबन्धनम् ॥४३४॥

वस्तूपलक्षणं[4] शब्दो नोपकारस्य वाचकः ।
न स्वशक्तिः पदार्थानां संस्प्रष्टुं तेन शक्यते ॥४३५॥

संबन्धिधर्मा संयोगः[5] स्वशब्देनाभिधीयते ।
संबन्धः[6] समवायश्च संबन्धित्वेन[7] गम्यते ॥ ४३६॥

लक्षणाद् व्यवतिष्ठन्ते पदार्था न तु वस्तुतः ।
उपकारात् स एवार्थः कथंचिदनुगम्यते ॥ ४३७॥

वाक्यार्थे योऽभिसंबन्धो न तस्यात्मा क्वचित् स्थितः ।
व्यवहारे[8] पदार्थानां तमात्मानं प्रचक्षते ॥४३८॥

पदार्थे[9] समुदाये वा समाप्तो[10] नैव वा क्वचित् ।
पदार्थरूपभेदेन[11] तस्यात्मा प्रविभज्यते ॥४३९॥

अन्वाख्यानाय यो भेदः प्रतिपत्तिनिबन्धनम्[12] ।
साकाङ्क्षावयवं[13] भेदे तेनान्यदुपवर्ण्यते ॥४४०॥

अनेकशक्तेरेकस्य[14] प्रविभागोऽनुगम्यते ।
एकार्थत्वं हि वाक्यस्य मात्रयाऽपि प्रतीयते ॥४४१॥

संप्रत्ययार्थाद्[15] बाह्योऽर्थः[16] सन्नसन् वा विभज्यते ।
बाह्यीकृत्य[17] विभागस्तु शक्त्यपोद्धारलक्षणः ॥४४२॥

प्रत्ययार्थात्मनियताः[18] शक्तयो न व्यवस्थिताः ।
अन्यत्र च ततो रूपं न तासामुपलभ्यते ॥४४३॥

---

१ ब. विवेकत्वं; स्व. विभक्तत्वं संसर्गाश्च. २ स्व. नैकार्थ्याद्वा. ३ स्व. शब्दभाग० ४ स्व. वस्तूपलक्षणः. ५ इ. संबन्धः स्वशब्देन. ६ स्व. संबन्धिसमवायस्तु. ७ स्व. संबन्धत्वेन गम्यते. ८ स्व. व्यवहारपदार्थानां तदात्मत्वं. ९ स्व. पदार्थः. १० अ. समाप्तौ. ११ स्व. पदार्थभेदरूपेण. १२ इ. °निबन्धनः. १३ स्व. साकाङ्क्षावयवे. १४ इ. अनेकशक्तेरिति श्लोकः लेखकप्रमादात्पतितः, वृत्तिस्तु लिखिता संदृश्यते. १५ स्व. संप्रत्ययार्थे. १६ इ. बाह्यार्थः सन्नसत्वाद्विभज्यते. १७ स्व. वाक्ये त्वर्थ० १८ श्लोकोऽयं 'आ'संज्ञिते आदर्शे उपलभ्यते । ईषद्भिन्नः सटीकः स्वोपज्ञटीकादर्शे समुपलभ्यते ।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

बहुष्वपि तिङन्तेषु साकाङ्क्षेष्वेकवाक्यता ।
तिङन्तेभ्यो[1] निघातस्य पर्युदासस्तथाऽर्थवान् ॥४४४॥

एकतिङ् यस्य वाक्यं तु शास्त्रे नियतलक्षणम् ।
तस्य[2] तिङ्ग्रहणेनार्थो वाक्यभेदान्न विद्यते ॥४४५॥

तिङन्तान्तर[3]युक्तेषु युक्तयुक्तेषु वा पुनः ।
मृगः पश्यत यातीति भेदाभेदौ न तिष्ठतः ॥४४६॥

इतिकर्तव्यताऽर्थस्य सामर्थ्याद्य[4]स्य काङ्क्ष्यते ।
अशब्दलक्षणा[5]काङ्क्षं समाप्ता[6]र्थं तदुच्यते ॥४४७॥

तत्त्वान्वाख्यानमात्रे तु यावानर्थोऽनुषज्यते ।
विनाऽपि तत्[7]प्रयोगेण श्रुतेर्वाक्यं समाप्यते ॥४४८॥

चङ्क्रम्यमाणोऽधीष्वात्र जपंश्चङ्क्रमणं कुरु ।
तादर्थ्यस्याविशेषेऽपि शब्दाद् भेदः प्रतीयते ॥४४९॥

फलवन्तः क्रियाभेदाः क्रियान्तरनिबन्धनाः ।
असंख्याताः क्रमोद्देशैरेकाख्यातनिर्दर्शनाः ॥४५०॥

निवृत्तभेदा सर्वैव क्रियाऽऽख्यातेऽभिधीयते ।
श्रुतेरशक्या भेदानां प्रविभागप्रकल्पना ॥४५१॥

अश्व[9]मेधेन यक्ष्यन्ते राजानः सत्त्रमासते ।
ब्राह्मणा इति ना[10]ख्यातरूपाद्भेदः प्रतीयते ॥४५२॥

सकृच्छ्रुता सप्तदशं[11]स्वनावृत्ताऽपि या क्रिया ।
प्राजापत्येषु सामर्थ्यात् सा भेदं प्रतिपद्यते ॥४५३॥

देवदत्तादिषु भुजिः प्रत्येकमवतिष्ठते ।
प्रतिस्वतन्त्रं वाक्यं वा भेदेन प्रविभज्यते ॥४५४॥

उच्चारणे तु वाक्यानामन्यद्[12]रूपं निगृह्यते ।
प्रतिपत्तौ तु भिन्नानामन्यद्रूपं प्रतीयते ॥४५५॥

---

१ इ. स्व. तिङतिङ्भ्यो निघातस्य. २ स्व. तस्यातिङ्०. ३ इ. तिङन्तान्तरयुक्तयुक्तेषु. ४ स्व. यत्र. ५ स्व. ०लक्षणाकाङ्क्षा. ६ इ. संप्राप्त्यर्थं तदुच्यते. ७ इ. तत्प्रयोगेन क्षते वाक्यं. ८ स्व. निदर्शिताः ९ इ. अश्वभेदेन. १० इ. चाख्यातरूपात्. ११ स्व. सप्तदशास्वनभ्यस्तापि. १२ स्व. रूपं न गृह्यते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

[1]एकं ग्रहणकं वाक्यं सामान्येनाभिधीयते ।
[2]कर्तरीति यथा तच्च पश्वादिषु विभज्यते ॥४५६॥

यद्याकाङ्क्षा निवर्तेत [3]तद्भूतस्य सकृच्छ्रुतौ ।
[4]नैवान्येना[5]भिसंबन्धं तदुपेयात् कथंचन ॥४५७॥

एकरूपमनेकार्थं तस्[6]मादुपनिबन्धनम् ।
योनिर्विभागवाक्यानां तेभ्योऽनन्यदिव स्थितम् ॥४५८॥

क्वचित् क्रिया व्यक्तिभागैरुपकारे प्रवर्तते ।
सामान्यभाग एवास्याः क्वचिदर्थस्य साधकः ॥४५९॥

कालभिन्नाश्च भेदा ये ये चाप्युष्ट्रासिकादिषु ।
[7]प्रक्रमे जातिभागस्य शब्दात्मा तैर्न भिद्यते ॥४६०॥

एकसंख्येषु भेदेषु भिन्ना जात्यादिभिः क्रिया[8]ः ।
भेदेन विनि[9]युज्यन्ते तच्छब्दस्य क्वचि[10]च्छ्रुतौ ॥४६१॥

अक्षादिषु यथा भिन्ना भक्षिभक्षिदिविक्रियाः ।
[11]प्रयोगकालाभेदेऽपि प्रतिभेदं पृथक् स्थिताः ॥४६२॥

अक्षाणां तन्त्रिणां तन्त्रमुपायस्तुल्यरूपता ।
एषां [12]क्रमो विभक्तानां तन्नि[13]बद्धा सकृच्छ्रुतिः ॥४६३॥
[14]द्वावप्युपायौ शब्दानां प्रयोगे समवस्थितौ ।
क्रमो वा यौगपद्यं वा यौ लोको नातिवर्तते ॥४६४॥

क्रमे विभि[15]द्यते रूपं यौगपद्ये न भिद्यते ।
क्रिया तु यौगपद्येऽपि क्रमरूपानुपातिनी ॥४६५॥

भेदसंसर्गशक्ती द्वे शब्दाद्भिन्ने इव स्थिते ।
यौगपद्येऽप्यनेकेन प्रयोगे भिद्यते श्रुतिः ॥४६६॥

अभिन्नो भेदरूपेण य एकोऽर्थो विवक्षितः ।
तत्रावयवधर्मेण समुदायोऽनुगृह्यते ॥४६७॥

---

१ स्व. एकं ग्रहणवाक्यं च. २ कर्तृश्रुतिर्यथा तस्य. ३ इ. तद्रूपस्य. ४ स्व. नैवान्येन तु. ५ इ. अभिसंबन्धात्. ६ स्व. तदुपाधि० ७ इ. प्रक्रमो जातिभागस्य. ८ इ. क्रिया. ९ इ. विनियुज्यते. १० ब. सकृच्छ्रुतौ. ११ स्व. प्रयोगकाले भेदेऽपि. १२ स्व. क्रमे. १३ ब. तन्त्रिबद्धा. १४ स्व. द्वावप्युपायौ. १५ स्व. विभज्यते

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

भेदनिर्वचने त्वस्य प्रत्येकं वा समाप्यते ।
श्रुतिर्वचनभिन्ना वा वाक्यभेदेऽवतिष्ठते ॥४६८॥

तत्रैकवचनान्तो वा सोऽक्षशब्दः प्रयुज्यते ।
प्रत्येकं वा बहुत्वेन प्रविभागो यथाश्रुति ॥४६९॥

द्विष्ठानि यानि वाक्यानि तेष्वप्येकत्वदर्शिनाम् ।
अनेकशक्तेरेकस्य स्वशक्तिः प्रविभज्यते ॥४७०॥

अत्यन्तभिन्नयोर्वा स्यात् प्रयोगस्तन्त्र[1]लक्षणः[2] ।
उपायस्तत्र संसर्गः प्रतिपत्तृषु भिद्यते[3] ॥४७१॥

भेदेनावगतौ[4] पूर्वं शब्दौ तुल्यश्रुती पुनः ।
तन्त्रेण प्रतिपत्तारः प्रयोक्त्रा प्रतिपादिताः ॥४७२॥

एकस्यापि[5] विवक्षायामनुनिष्पद्यते परः[6] ।
विनाऽभिसंधिना शब्दः शक्तिरूपः प्रकाशते ॥४७३॥

अनेकशक्तिरेकस्य[7] युगपच्छ्रीयते[8] क्वचित् ।
अग्निः प्रकाशदाहाभ्यामेकत्रापि नियुज्यते[9] ॥४७४॥

आवृत्तिशक्तिभिन्नार्थे[10] वाक्ये सकृदपि श्रुते ।
लिङ्गाद्वा तन्त्रे[11]धर्माद्वा विभागेनावतिष्ठते ॥४७५॥

संप्रसारणसंज्ञायां[12] लिङ्गाभ्यां वर्णवाक्ययोः ।
प्रविभागस्तत्र सूत्र एकस्मिन्नेव कल्पते[13] ॥४७६॥

तथा द्विर्वचनेऽचीति तन्त्रोपायादिलक्षणः ।
एकशेषेण निर्देशो भाष्य एवोपवर्णितः ॥४७७॥

प्रायेण संक्षेपरुचीनल्पविद्यापरिग्रहान् ।
संप्राप्य वैयाकरणान् संग्रहेऽस्तमुपागते ॥४७८॥

---

१ इ. प्रयोगे. २ स्त्र. लक्षणम्. ३ इ. विद्यते. ४ स्व. अधिगतौ. ५ स्व. एकस्यां तु. ६ इ. परम्. ७ स्व. अनेका शक्तिरेकस्य. ८ स्व. इ. युगपच्छूयते. ९ इ. एकत्र विनियुज्यते. १० स्व. आवृत्तशक्ति० ११ इ. तत्र धर्माद्वा. १२ अ. संप्रसारणसंज्ञायामित्यादिश्लोकानन्तरमत्यन्तभिनयोर्वेत्यादिश्लोकत्रयं (४७१, ४७२, ४७३) प्रमादात् सवृत्तिकं लिखितम्. १३. स्व. कल्पितः.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना ।
सर्वेषां न्यायबीजानां महाभाष्ये[1] निबन्धने ॥४७९॥

अलब्धगाधे गाम्भीर्यादुत्तान इव सौष्ठवात् ।
तस्मिन्नकृतबुद्धीनां नैवावा[2]स्थित निश्चयः ॥४८०॥

बैजिसौभवहर्यक्षैः शुष्कतर्कानुसारिभिः ।
आर्षे विप्लाविते ग्रन्थे संग्रह[3]प्रतिकञ्चुके ॥४८१॥

यः पतञ्जलिशिष्येभ्यो भ्रष्टो व्याकरणागमः ।
काले स दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितः ॥४८२॥

पर्वतादागमं लब्ध्वा भाष्यबीजानुसारिभिः ।
स नीतो बहुशाखत्वं चन्द्रा[4]चार्यादिभिः पुनः ॥४८३॥

न्यायप्रस्थानमार्गास्तानभ्यस्य स्वं च दर्शनम् ।
प्रणीतो गुरुणाऽस्माकमयमागमसंग्रहः ॥४८४॥

[5]वर्त्मनामत्र केषांचिद्वस्तुमात्रमुदाहृतम् ।
काण्डे तृतीये न्यक्षेण भविष्यति विचारणा ॥४८५॥

प्रज्ञा विवेकं लभते भिन्नैरागमदर्शनैः ।
कियद्वा शक्यमुन्नेतुं स्वतर्कमनुधावता ॥४८६॥

तत्तदुत्प्रेक्षमाणानां पुराणैरागमैर्विना ।
अनुपासितवृद्धानां विद्या नातिप्रसीदति[6] ॥४८७॥

इति श्रीभर्तृहरिविरचिते वाक्यपदीये द्वितीयं काण्डं समाप्तम् ॥

---

१ इ. महाभाष्ये निबन्धनः. २ इ. नैवावस्थितिनिश्चयः. ३ इ. संग्रहे प्रातिकञ्चुके. ४ आ. चंडाचार्यादिभिः. ५ ख. वर्त्मनामत्रेति श्लोकत्रयं न पठ्यते. ६ इ. चरमश्लोकस्यान्ते ४८० इति संख्या दर्शिता । वस्तुतः श्लोकसंख्यासमानत्वेऽपि लेखकप्रमादादेवाङ्कभेदलेखनं संदृश्यते ॥ अ. श्लोकक्रमो न संख्याङ्कैर्निर्दिष्टः । सर्वे श्लोकाः सवृत्तिकाः सम्यग्लिखिताः । लेखकप्रमादा नैव बहवो वर्तन्ते परंतु त्रिषु स्थलेषु प्रमादात्पश्चात्तनो ग्रन्थः सवृत्तिको द्वित्रश्लोकात्मकः पूर्वं लिखितो दृश्यते ॥ आ. विद्या नातिप्रसीदति ॥४९०॥ इति भर्तृहरिकृते वाक्यपदीये द्वितीयं काण्डम् ॥ समाप्ता च वाक्यप्रदीपकारिका ॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

तृतीयं काण्डम्

१ जातिसमुद्देशः

द्विधा कैश्चित् पदं भिन्नं चतुर्धा पञ्चधाऽपि वा
अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत् ॥१॥

पदार्थानामपोद्धारे जातिर्वा द्रव्यमेव वा ।
पदार्थौ सर्वशब्दानां नित्यावेवोपवर्णितौ ॥२॥

केषांचित् साहचर्येण जातिः शक्त्युपलक्षणम्[1] ।
खदिरादिष्वशक्तेषु शक्तः प्रतिनिधीयते ॥३॥

अस्वातन्त्र्यफलो बन्धिः प्रमाणादीव शिष्यते ।
अतो जात्यभिधानेऽपि शक्तिहीनं न गृह्यते ॥४॥

संश्लेषमात्रं बध्नातिर्यदि स्यात्तु विवक्षितः ।
शक्त्याश्रये ततो लिङ्गं प्रमाणाद्यनुशासनम् ॥५॥

सर्वा जातिः प्रथमं शब्दैः सर्वैरेवाभिधीयते ।
ततोऽर्थजातिरूपेषु तदध्यारोपकल्पना ॥६॥

यथा रक्ते गुणे तत्त्वं कषाये व्यपदिश्यते ।
संयोगिसंनिकर्षाच्च[2] वस्त्रादिष्वपि गृह्यते ॥७॥

तथा शब्दार्थसंबन्धाच्छब्दे जातिरवस्थिता ।
व्यपदेशेऽर्थजातीनां जातिकार्याय कल्पते ॥८॥

जातिशब्दैकशेषे सा जातीनां जातिरिष्यते ।
शब्दजातय इत्यत्र तज्जातिः शब्दजातिषु ॥९॥

या शब्दजातिः शब्देषु शब्देभ्यो भिन्नलक्षणा[3] ।
जातिः सा शब्दजातित्वमप्यतिक्रम्य वर्तते ॥१०॥

अर्थजात्यभिधानेऽपि सर्वे[4] जात्यभिधायिनः ।
व्यापारलक्षणा यस्मात् पदार्थाः समवस्थिताः ॥११॥

---

१ औ. प्रमाणादौ वशिष्यते। २ औ. संयोगिसत्रिकत्वाच्च. ३ औ. 'भिन्नलक्षणा' इति लेखकप्रमादात्पतितम्. ४ व शब्द.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

जातौ पदार्थे जातिर्वा विशेषो वाऽपि जातिवत् ।
शब्दैरपेक्ष्यते यस्मादतस्ते जातिवाचिनः ॥१२॥

द्रव्यधर्मा¹ पदार्थे तु द्रव्ये सर्वोऽर्थ उच्यते ।
द्रव्यधर्माश्रयाद् द्रव्यमतः सर्वोऽर्थ इष्यते ॥१३॥

अनुप्रवृत्तिधर्मो² वा जातिः स्यात् सर्वजातिषु ।
व्यावृत्तिधर्मसामान्यं विशेषे जातिरिष्यते ॥१४॥

संयोगिधर्मभेदेन देशे च परिकल्पिते ।
तेषु देशेषु सामान्यमाकाशस्यापि विद्यते ॥१५॥

अदेशानां घटादीनां देशाः संबन्धिनो यथा ।
आकाशस्याप्यदेशस्य देशाः संबन्धिनस्तथा³ ॥१६॥

भिन्नवस्त्वाश्रया बुद्धिः संयोगिष्वनुवर्तते⁴ ।
समवायिषु भेदस्य ग्रहणं विनिवर्तते ॥१७॥

अतः संयोगिदेशानां गौणत्वं परिकल्प्यते ।
अविवेकात् प्रदेशेभ्यो मुख्यत्वं समवायिनाम् ॥१८॥

अनुप्रवृत्तिरूपां यां प्रख्यातामाकृतिं विदुः ।
केचिद् व्यावृत्तिरूपां तु द्रव्यत्वेन प्रचक्षते ॥१९॥

भिन्ना इति परोपाधिरभिन्ना इति वा पुनः ।
भावात्मसु प्रपञ्चोऽयं संसृष्टेष्वेव जायते ॥२०॥

नैकत्वं नापि नानात्वं न सत्त्वं न च नास्तिता ।
आत्मतत्त्वेषु भावानामसंसृष्टेषु विद्यते ॥२१॥

सर्वशक्त्यात्मभूतत्वमेकस्यैवेति निर्णयः ।
भावानामात्मभेदस्य कल्पना स्यादनर्थिका ॥२२॥

तस्माद् द्रव्यादयः सर्वाः शक्तयो भिन्नलक्षणाः ।
संसृष्टाः पुरुषार्थस्य साधिका न तु केवलाः ॥२३॥
यथैव चेन्द्रियादीनामात्मभूता समग्रता ।
तथा संबन्धिसंबन्धसंसर्गेऽपि प्रतीयते ॥२४॥

---

१ औ. द्रव्यधर्मपदार्थे तु. २ औ. अनुप्रवृत्तिधर्मा वा. ३ ओ. ब. संयोगिनः.
४ ओ. ब. संयोगिन्यनु०

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

न तदुत्पद्यते किञ्चिद्यस्य जातिर्न विद्यते ।
आत्माभिव्यक्तये जातिः कारणानां प्रयोजिका ॥२५॥

कारणेषु पदं कृत्वा नित्यानित्येषु जातयः ।
क्वचित् कार्येष्वभिव्यक्तिमुपयान्ति पुनः पुनः ॥२६॥

निर्वर्त्यमानं यत् कर्म जातिस्तत्रापि साधनम् ।
स्वाश्रयस्याभिनिष्पत्तौ सा क्रियाणां प्रयोजिका ॥२७॥

विधौ वा प्रतिषेधे वा ब्राह्मणत्वादि साधनम् ।
व्यक्त्याश्रिताश्रिता जातेः संख्याजातिर्विशेषिका ॥२८॥

यथा जलादिभिर्व्यक्तं मुखमेवाभिधीयते ।
तथा द्रव्यैरभिव्यक्ता जातिरेवाभिधीयते ॥२९॥

यथेन्द्रियगतो भेद इन्द्रियग्रहणादृते ।
इन्द्रियार्थेष्वदृष्टोऽपि ज्ञानभेदाय कल्पते ॥३०॥

तथाऽऽत्मरूपग्रहणात् केषांचिद्व्यक्तयो विना ।
सामान्यज्ञानभेदानामुपयान्ति निमित्तताम् ॥३१॥

सत्यासत्यौ तु यौ भावौ प्रतिभावं व्यवस्थितौ ।
सत्यं यत्तत्र सा जातिरसत्या व्यक्तयः स्मृताः ॥३२॥

संबन्धिभेदात् सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥३३॥

तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ॥३४॥

प्राप्तक्रमा[1] विशेषेषु क्रिया सैवाभिधीयते ।
क्रमरूपस्य संहारे तत् सत्त्वमिति कथ्यते ॥३५॥

सैव भावविकारेषु षडवस्थाः प्रपद्यते ।
क्रमेण शक्तिभिः[2] स्वाभिरेवं प्रत्यवभासते ॥३६॥

आत्मभूतः क्रमोऽप्यस्या यत्रेदं कालदर्शनम् ।
पौर्वापर्यादिरूपेण प्रविभक्तमिव स्थितम् ॥३७॥

---

१ ओ. प्राप्तक्रमविशेषेषु. २ औ. ब. शक्तिभिस्ताभिः.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

तिरोभावाभ्युपगमे भावानां सैव नास्तिता ।
लब्धक्रमे तिरोभावे नश्यतीति प्रतीयते ॥३८॥

पूर्वस्मात् प्रच्युता धर्मादप्राप्ता चोत्तरं पदम् ।
तदन्तराले भेदानामाश्रयाज्जन्म कथ्यते ॥३९॥

आश्रयः स्वात्ममात्रा वा भावा वा व्यतिरेकिणः ।
स्वशक्तयो वा सत्ताया भेददर्शनहेतवः ॥४०॥

पृथिव्यादिष्वभिव्यक्तौ न संस्थानमपेक्षते ।
अनुच्छिन्नाश्रयाज्जातिरनित्येऽप्याश्रये स्थिता ॥४१॥[1]

अनुच्छेद्याश्रयामेके सर्वां जातिं प्रचक्षते ।
न यौगपद्यं प्रलये सर्वस्येति व्यवस्थिताः ॥४२॥

प्रकृतौ प्रविलीनेषु भेदेष्वेकत्वदर्शिनाम् ।
द्रव्यसत्त्वं प्रपद्यन्ते स्वाश्रया एव जातयः ॥४३॥

ब्राह्मणत्वादयो भावाः सर्वप्राणिष्ववस्थिताः ।
अभिव्यक्ताः स्वकार्याणां साधका इत्यपि स्मृतिः ॥४४॥

चित्रादिष्वप्यभिव्यक्तिर्जातीनां कैश्चिदिष्यते ।
प्राण्याश्रितास्तु ताः प्राप्तौ निमित्तं पुण्यपापयोः[2] ॥४५॥

[3]ज्ञानं त्वस्मद्विशिष्टानां तासु सर्वेन्द्रियं विदुः ।
अभ्यासान्मणिरूप्यादिविशेषेष्विव तद्विदाम् ॥४६॥

जात्युत्पलादिगन्धादौ भेदतत्त्वं यदाश्रितम् ।
तद्भावप्रत्ययैर्लोकेऽनित्यत्वान्नाभिधीयते ॥४७॥

अस्वशब्दाभिधानास्तु नरसिंहादिजातयः ।
सरूपावयवेवान्या तासु श्रुतिरवस्थिता ॥४८॥

जात्यवस्थापरिच्छेदे संख्या संख्यात्वमेव वा ।
विप्रकर्षेऽपि संसर्गादुपकाराय कल्पते ॥४९॥

लक्षणा शब्दसंस्कारे व्यापारः कार्यसिद्धये ।
संख्याकर्मादिशक्तीनां श्रुतिसाम्येऽपि दृश्यते ॥५०॥

---

१ ओ. औ. °श्रया जातिः. २ औ. पापपुण्ययोः. ३ औ. ज्ञानमस्मद्विशिष्टानां.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

न विना संख्यया कश्चित् सत्त्वभूतोऽर्थ उच्यते ।
अतः सर्वस्य निर्देशे[1] संख्या स्याद्‌विवक्षिता ॥५१॥

एकत्वं वा बहुत्वं वा केषांचिदविवक्षितम् ।
तद्धि जात्यभिधानाय द्वित्वं तु स्याद्विवक्षितम् ॥५२॥

यद्येतौ व्याधितौ स्यातां देयं स्यादिदमौषधम् ।
इत्येवं लक्षणेऽर्थस्य द्वित्वं स्यादविवक्षितम् ॥५३॥

एकादिशब्दवाच्यायाः कर्मण्यङ्गत्वमिष्यते ।
संख्यायाः खनति द्वाभ्यामिति रूपाद्धि साऽऽश्रिता ॥५४॥

यजेत पशुनेत्यत्र संस्कारस्यापि संभवे ।
यथा जातिस्तथैकत्वं साधनत्वेन गम्यते ॥५५॥

लिङ्गात्तु स्याद् द्वितीयादेस्तदेकत्वं विवक्षितम् ।
एकार्थविषयत्वे च तल्लिङ्गं जातिसंख्ययोः ॥५६॥

अन्यत्राविहितस्यैव स विधिः प्रथमं पशोः ।
क्रियायामङ्गभावश्च[2] त[3]च्चैतस्माद्विवक्षितम् ॥५७॥

ग्रहास्त्वन्यत्र विहिता भिन्नसंख्याः पृथक् पृथक् ।
प्राजापत्या नवेत्येवमादिभेदसमन्विताः ॥५८॥

अङ्गत्वेन प्रतीतानां संमार्गे त्वङ्गिनां पुनः ।
निर्देशं प्रति या संख्या सा कथं स्याद्विवक्षिता ॥५९॥

नान्यत्र विधिरस्तीति संस्कारो नापि चाङ्गिता ।
हेतुः संख्याविवक्षायां यत्नात् सा हि विवक्षिता ॥६०॥

संमार्जने विशेषश्च न ग्रहे क्वचिदाश्रितः ।
विहितास्ते च संस्कार्याः सर्वेषामाश्रयस्ततः ॥६१॥

प्रत्याश्रयं समाप्तायां जातावेकेन चेत् क्रिया ।
पशुना न प्रकल्पेत तत् स्यादेव प्रकल्पनम् ॥६२॥

---

१ औ. निर्देशः संख्या. २ हे. 'अङ्गभावस्य' 'अत्र केचित् क्रियायामङ्गभावस्य इति पठन्तः' हेलाराजटीका. ३ तश्चैतत्स्यात्.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

एकेन चेत् प्रसिद्धायां क्रियायां यदि संभवात् ।
पश्वन्तरमुपादेयमुपादानमनर्थकम् ॥६३॥

यथैवाहितगर्भायां गर्भाधानमनर्थकम् ।
तथैकेन प्रसिद्धायां पश्वन्तरमनर्थकम् ॥६४॥

तावताऽर्थस्य सिद्धत्वात् [1]एकत्वस्याव्यतिक्रमम् ।
केचिदिच्छन्ति न त्वत्र संख्याङ्गत्वेन गृह्यते ॥६५॥

द्वितीयादिषु यल्लिङ्गमुक्तं न्यायानुवादि तत् ।
न संख्या साधनत्वेन जातिवत् तेन गम्यते ॥६६॥

अन्वयव्यतिरेकाभ्यां संख्याभ्युपगमे सति ।
युक्तं यत् साधनत्वं स्यान्न त्वन्यार्थोपलक्षणम् ॥६७॥

साधनत्वे पदार्थस्य सामर्थ्यं न [2]प्रहीयते ।
संख्या व्यापारधर्मोऽतस्तेन लिङ्गेन गम्यते ॥६८॥

अपूर्वस्य विधेयत्वात् प्राधान्यमवसीयते ।
विहितस्य परार्थत्वाच्छेषभावः प्रतीयते ॥६९॥

संमार्गस्य विधेयत्वादन्यत्र विहिते ग्रहे ।
विधिवाक्ये श्रुता संख्या लक्षणायां न बाध्यते ॥७०॥

विधिवाक्यान्तरे संख्या पशोर्नास्ति विरोधिनी ।
तस्मात् सगुण एवासौ [3]सहैकत्वेन गम्यते ॥७१॥

निर्ज्ञातद्रव्यसंबन्धे यः कर्मण्युपदिश्यते ।
गुणस्तेनार्थिता तस्य द्रव्येणेव प्रतीयते ॥७२॥

कश्चिदेव गुणो द्रव्ये यथा सामर्थ्यलक्षणः ।
आधारोऽपि गुणस्यैवं प्राप्तः सामर्थ्यलक्षणः ॥७३॥

तयोस्तु पृथ[4]गार्थित्वे संबन्धो यः प्रतीयते ।
न तस्मिन्नुपघातोऽस्ति कल्प्यमन्य[5]न्न चाश्रुतम् ॥७४॥

---

१ एकस्याप्यनतिक्रमम्, एकत्वस्याप्यतिक्रमम्. २ प्रदीयते. ३ सदैकत्वेन. ४ ब. अर्थित्व-संबन्धो. ५ ब. अन्यत्र.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

क्रियया योऽभिसंबन्धः स श्रुतिप्रापितस्तयोः ।
आश्रयाश्रयिणोर्वाक्यान्नियमस्त्ववतिष्ठते ॥७५॥

तत्र द्रव्यगुणाभावे प्रत्येकं स्याद्विकल्पनम् ।
श्रुतिप्राप्तो हि संबन्धो बलवान् वाक्यलक्षणात् ॥७६॥

यदा तु जातिः शक्तिर्वा क्रियां प्रत्युपदिश्यते ।
सामर्थ्यात् संनिधीयेते तत्र द्रव्यगुणौ तदा ॥७७॥

जातीनां च गुणानां च तुल्येऽङ्गत्वे क्रियां प्रति ।
गुणाः प्रतिनिधीयन्ते छागादीनां न जातयः ॥७८॥

व्यक्तिशक्तेः समासन्ना जातयो न तथा गुणाः ।
साक्षाद् द्रव्यं क्रियायोगि गुणस्तस्माद्विकल्पते ॥७९॥

साम्येनान्यतराभावे विकल्पः कैश्चिदिष्यते ।
अतद्गुणोऽतश्छागः स्यान्मेषो वा तद्गुणो भवेत् ॥८०॥

जातेराश्रितसंख्यायाः प्रवृत्तिरुपलभ्यते ।
संख्याविशेषमुत्सृज्य क्वचित् सैव प्रवर्तते ॥८१॥

पराङ्गभूतं सामान्यं युज्यते द्रव्यसंख्यया ।
स्वार्थे प्रवर्तमानं तु न संख्यामवलम्बते ॥८२॥

यजेत पशुनेत्यत्र यज्यर्थायां पशुश्रुतौ ।
कृतार्थैकेन पशुना प्रधानं भवति क्रिया ॥८३॥

यावतां संभवो यस्य स कुर्यात्तावतां यदि ।
आलम्भनं गुणैस्तेन प्रधानं स्यात् प्रयोजितम् ॥८४॥

संमृज्यमानतन्त्रे तु ग्रहे यत्र क्रियाश्रुतिः ।
संख्याविशेषग्रहणं नैव तत्रादृियामहे ॥८५॥

शिष्यमाणपरे वाक्ये यदेकग्रहणं कृतम् ।
शेषे विशिष्टसंख्येऽपि व्यक्तं तल्लिङ्गदर्शनम् ॥८६॥

समासप्रत्ययविधौ यथा निपतिता श्रुतिः ।
गुणानां परतन्त्राणां न्यायेनैवोपपद्यते ॥८७॥

१ ब. श्रवणं. २ ब. सा तथैवोपपद्यते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

गुणेऽपि नाङ्गीक्रियते प्रधानान्तरसिद्धये ।
संख्या कर्ता तथा कर्मण्यविशिष्टः प्रतीयते ॥८८॥

यस्यान्यस्य प्रसक्तस्य नियमार्था पुनःश्रुतिः ।
निवृत्तौ चरितार्थत्वात् संख्या तत्राविवक्षिता ॥८९॥

सरूपसमुदायात्तु विभक्तिर्या विधीयते ।
एकस्तत्रार्थवान् सिद्धः समुदायस्य वाचकः ॥९०॥

प्रत्ययस्य प्रधानस्य समासस्यापि वा विधौ ।
सिद्धः संख्याविवक्षायां सर्वथाऽनुग्रहो गुणे ॥९१॥

अभेदरूपं सादृश्यमात्मभूताश्च शक्तयः ।
जातिपर्यायवाचित्वमेषामप्युपवर्ण्यते ॥९२॥

दण्डोपादित्सया दण्डं यद्यपि प्र[1]तिपद्यते ।
न तस्मादेव सामर्थ्यात् स दण्डीति प्रतीयते ॥९३॥

ने[2]च्छानिमित्तादिच्छावान् इति ज्ञानं प्रवर्तते ।
तस्मात् सत्यपि सामर्थ्ये बुद्धिरर्थान्तराश्रया ॥९४॥
स्वभावोऽव्यपदेश्यो वा सामर्थ्यं वाऽवतिष्ठते ।
सर्वस्यान्ते यतस्तस्माद् व्यवहारो न कल्पते ॥९५॥

यदा भेदान् परित्यज्य बुद्ध्यैक इव गृह्यते ।
व्यक्त्यात्मैव तदा तत्र बुद्धिरेका प्रवर्तते ॥९६॥

भेदरूपैरनुस्यूतं य[3]दैकमिव मन्यते ।
समूहावग्रहा बुद्धिर्बहुभ्यो जायते तदा[4] ॥९७॥

सकृत् प्रवृत्तावेकत्वमावृत्तौ सदृशात्मताम् ।
भिन्नात्मिकानां व्यक्तीनां भेदापोहात् प्रप[5]द्यते ॥९८॥

अनुप्रवृत्तेति यथा[6]ऽभिन्ना बुद्धिः प्रतीयते ।
अर्थो व्यावृत्तरूपोऽपि तथा तत्त्वेन गृह्यते ॥९९॥

---

१ औ. प्रतिपत्तये. २ औ. तत्रानिमित्ताद्दिदक्षावान्. ३ औ. यदेकमिव. ४ औ. तदा इत्यस्यानन्तरं 'तदा सहविवक्षायामेकबुद्धिनिबन्धनम् । बद्धावयवविच्छेदसमुदायोऽभिधीयते ॥९८॥ प्रतिक्रियं: समासत्वादेको· भेदसमन्वितः। द्वन्द्वे धीत्यादिभेदेन तदावत्त्वेन गम्यते ॥ ९९ ॥'. ५ औ. प्रवर्तते. ६ ब. यदा भिन्ना.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

सरूपाणां च सर्वेषां न भेदोपनिपातिनः ।
विद्यन्ते वाचकाः शब्दा नापि भेदोऽवधार्यते ॥१००॥

ज्ञानशब्दार्थविषया विशेषा ये व्यवस्थिताः ।
तेषां दुरवधारत्वाज्ज्ञानाद्येकत्वदर्शनम् ॥१०१॥

ज्ञानेष्वपि यथाऽर्थेषु तथा सर्वेषु जातयः ।
संसर्गदर्शने सन्ति ताश्चार्थस्य प्रसाधिकाः ॥१०२॥

ज्ञेयस्थमेव सामान्यं ज्ञानानामुपकारकम्[1] ।
न जातु ज्ञेयवज्ज्ञानं पररूपेण रूप्यते ॥१०३॥

यथा ज्योतिः प्रकाशेन नान्येनाभिप्रकाश्यते ।
ज्ञानाकारस्तथाऽन्येन न ज्ञानेनोपगृह्यते[2] ॥१०४॥

घटज्ञानमिति ज्ञानं घटज्ञानविलक्षणम् ।
घट इत्यपि यज्ज्ञानं विषयोपनिपाति तत् ॥१०५॥

यतो विषयरूपेण ज्ञानरूपं न गृह्यते ।
अर्थरूपविविक्तं च स्वरूपं नावधार्यते ॥१०६॥

॥ इति जातिसमुद्देशः ॥

२ द्रव्यसमुद्देशः

आत्मा वस्तु स्वभावश्च शरीरं तत्त्वमित्यपि ।
द्रव्यमित्यस्य पर्यायास्तच्च नित्यमिति स्मृतम् ॥१॥

सत्यं वस्तु तदाकारैरसत्यैरवधार्यते ।
असत्योपाधिभिः शब्दैः सत्यमेवाभिधीयते ॥२॥

अध्रुवेण निमित्तेन देवदत्तगृहं यथा ।
गृहीतं गृहशब्देन शुद्धमेवाभिधीयते ॥३॥

सुवर्णादि यथा भिन्नं स्वैराकारैरपायिभिः ।
रुचकाद्यभिधानानां शुद्धमेवैति[3] वाच्यताम् ॥४॥

---

१ भावानामुपकारकम्. २ औ. न ज्ञानेनोपगृह्यते इत्यस्यानन्तरं 'न चान्यसमवेतस्य सामान्यस्यावधारणे । ज्ञानशक्तिसमर्थः स्यादतस्यावस्तुनः क्वचित् ॥१०५॥ आयौगपद्ये ज्ञानानामस्येत्यग्रहणेन च । यथा घटस्य स्मरणमुपलब्धे च जायते ॥१०६॥'. ३ त. ध्रुवं.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

आकारैश्च व्यवच्छेदात् सार्वार्थ्यमवरुध्यते[1] ।
यथैव चक्षुरादीनां सामर्थ्यं नाडिकादिभिः ॥५॥

तेष्वाकारेषु यः शब्दस्तथाभूतेषु वर्तते ।
तत्त्वात्मकत्वात्तेनापि नित्यमेवाभिधीयते ॥६॥

न तत्त्वातत्त्वयोर्भेद इति वृद्धेभ्य आगमः ।
अतत्त्वमिति मन्यन्ते तत्त्वमेवाविचारितम् ॥७॥

विकल्परूपं भजते तत्त्वमेवाविकल्पितम् ।
न चात्र कालभेदोऽस्ति कालभेदश्च गृह्यते ॥८॥

यथा विषयधर्माणां ज्ञानेऽत्यन्तमसंभवः ।
तदात्मेव च तत् सिद्धमत्यन्तमतदात्मकम् ॥९॥

तथा विकाररूपाणां तत्त्वेऽत्यन्तमसंभवः ।
तदात्मेव च तत्तत्त्वमत्यन्तमतदात्मकम् ॥१०॥

सत्यमाकृतिसंहारे यदन्ते व्यवतिष्ठते ।
तन्नित्यं शब्दवाच्यं तच्छब्दतत्त्वं न भिद्यते ॥११॥

न तदस्ति न तन्नास्ति न तदेकं न तत् पृथक् ।
न संसृष्टं विभक्तं वा विकृतं न च नान्यथा ॥१२॥

तन्नास्ति विद्यते तच्च तदेकं तत् पृथक् पृथक् ।
संसृष्टं च विभक्तं च विकृतं तत्तदन्यथा ॥१३॥

तस्य शब्दार्थसंबन्धरूपमेकस्य दृश्यते ।
तद् दृश्यं दर्शनं द्रष्टा दर्शने च प्रयोजनम् ॥१४॥

विकारापगमे सत्यं सुवर्णं कुण्डले यथा ।
विकारापगमे सत्यां तथाऽऽहुः प्रकृतिं पराम् ॥१५॥

[2]वाच्या सा सर्वशब्दानां शब्दाश्च न पृथक् ततः ।
अपृथक्त्वे च संबन्धस्तयोर्नानात्मनोरिव ॥१६॥

आत्मा परः प्रियो द्वेष्यो वक्ता वाच्यं प्रयोजनम् ।
विरुद्धानि यथैकस्य स्वप्ने रूपाणि चेतसः ॥१७॥

१ ब. अनुरुध्यते. २.ब. विद्या सा.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

अजन्मनि तथा नित्ये पौर्वापर्यविवर्जिते ।
तत्त्वे जन्मादिरूपत्वं विरुद्धमुपलभ्यते ॥१८॥

॥ इति द्रव्यसमुद्देशः ॥

३ संबन्धसमुद्देशः

ज्ञानं प्रयोक्तुर्बाह्योऽर्थः स्वरूपं च प्रतीयते ।
शब्दैरुच्चरितैस्तेषां संबन्धः समवस्थितः ॥१॥

प्रतिपत्तिर्भवत्यर्थे ज्ञाने[१] वा संशयः क्वचित् ।
स्वरूपेषूपलब्धेषु व्यभिचारो न[२] लभ्यते ॥२॥

अस्यायं वाचको वाच्य इति षष्ठ्या प्रतीयते ।
योगः शब्दार्थयोस्तत्त्वमित्यतो[३] व्यपदिश्यते ॥३॥

नाभिधानं स्वधर्मेण संबन्धस्यास्ति वाचकम् ।
अत्यन्तपरतन्त्रत्वाद्रूपं नास्यापदिश्यते ॥४॥

उपकारात्[४] स यत्रास्ति धर्मस्तत्रानुगम्यते ।
शक्तीनामपि सा शक्तिर्गुणानामप्यसौ गुणः ॥५॥

तद्धर्मणोस्तु ताच्छब्द्यं संयोगसमवाययोः ।
तयोरप्युपकारार्था नियतास्तदुपाधयः ॥६॥

काचिदेव हि साऽवस्था कार्यप्रसवसूचिता ।
कस्यचित् केनचिद्यस्यां संयोग उपजायते ॥७॥

निरात्मकानामुत्पत्तौ नियमः क्वचिदेव यः ।
तेनैवाप्यपवर्गश्च प्राप्त्यभेदे स यत्कृतः ॥८॥

आत्मान्तरस्य येनात्मा तदात्मेवावधार्यते ।
यतश्चैकस्य नानात्वं तत्त्वं नाध्यवसीयते ॥९॥

तां शक्तिं समवायाख्यां शक्तीनामुपकारिणीम् ।
भेदाभेदावतिक्रान्तामन्यथैव व्यवस्थिताम् ॥१०॥

---

१ औ. ज्ञाते वा. २ औ. ब. न विद्यते. ३ ब. ०मप्यतो. ४. ब. उपकारः स.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

धर्मं[1] सर्वपदार्थानामतीतः सर्वलक्षणः ।
अनुगृह्णाति संबन्ध इति पूर्वेभ्य आगमः ॥११॥

पदार्थीकृत एवान्यैः सर्वत्राभ्युपगम्यते ।
संबन्धस्तेन शब्दार्थः प्रविभक्तुं न शक्यते ॥१२॥

[2]समवायात् स्व आधारः स्वा च जातिः प्रतीयते ।
एकार्थसमवायात्तु गुणः[3] स्वाधार एव ये ॥१३॥

द्रव्यत्वसत्तासंयोगाः स्वान्याधारोपबन्धनाः[4] ।
तत्प्रदेशविभागाश्च[5] गुणा द्वित्वादयश्च ये ॥१४॥

केचित्[6] स्वाश्रयसंयुक्ताः केचित्तत्समवायिनः[7] ।
संयुक्तसमवेतेषु समवेतास्तथाऽपरे ॥१५॥

स्वाश्रयेण तु संयुक्तैः संयुक्तं विभु गम्यते ।
समवायस्य संबन्धो नापरस्तत्र दृश्यते ॥१६॥

संबन्धस्याविशिष्टत्वान्न चात्र नियमो भवेत् ।
तस्माच्छब्दार्थयोर्नैव संबन्धः परिकल्पते ॥१७॥

अदृष्टवृत्तिलाभेन यथा संयोग आत्मनः ।
क्वचित् स्वस्वामियोर्योगाख्योऽभेदेऽन्यत्रापि स क्रमः[8] ॥१८॥

प्राप्तिं तु समवायाख्यां वाच्यधर्मातिवर्तिनीम् ।
प्रयोक्ता प्रतिपत्ता वा न शब्दैरनुगच्छति ॥१९॥

अवाच्यमिति यद्वाच्यं तदवाच्यतया यदा ।
वाच्यमित्यवसीयेत वाच्यमेव तदा भवेत् ॥२०॥

अथाप्यवाच्यमित्येवं न तद् वाच्यं प्रतीयते ।
विवक्षिताऽस्य याऽवस्था सैवं[9] नाध्यवसीयते ॥२१॥

तथाऽन्यथा[10] सर्वथा च यस्यावाच्यत्वमुच्यते ।
तत्रापि नैव साऽवस्था तैः शब्दैः प्रतिषिध्यते ॥२२॥

न हि संशयरूपेऽर्थे शेषत्वेन व्यवस्थिते ।
अव्युदासे स्वरूपस्य संशयोऽन्यः प्रवर्तते ॥२३॥

---

१ ब. धर्मः. २ ब. श्लोकोऽयं टीकायां लिखितो लभ्यते. ३ ब. गुणाः स्वाधार एव ते. ४ ब. स्वाधारोपनिबन्धनाः. ५ ब. तत्प्रदेशविभागश्च. ६ ब. श्लोकोऽयं टीकायां लिखितो लभ्यते. ७ ब. केच्चिच समवायिनः. ८ ब. ०योगाख्यो भेदेऽन्यत्रापि संक्रमः. ९ ब. सेयं. १० ब. अथान्यथा.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

यदा च निर्णयज्ञाने निर्णयत्वे न निर्णयः ।
प्रक्रम्यते तदा ज्ञानं स्वधर्मेणावतिष्ठते ॥२४॥

सर्वं मिथ्या ब्रवीमीति नैतद्वाक्यं विवक्ष्यते ।
तस्य मिथ्याभिधाने हि प्रक्रान्तोऽर्थो न गम्यते ॥२५॥

न च वाचकरूपेण प्रवृत्तस्यास्ति वाच्यता ।
प्रतिपाद्यं न तत्तत्र येनान्यत् प्रतिपाद्यते ॥२६॥

असाधिका प्रतिज्ञेति नेयमेवाभिधीयते ।
यथा तथाऽस्य धर्मोऽपि नैव कश्चित् प्रतीयते ॥२७॥

व्यापारस्यापरो यस्मान्न व्यापारोऽस्ति कश्चन ।
विरोधमनवस्थां वा तस्मात् सर्वत्र नाश्रयेत् ॥२८॥

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।
अनादिरर्थैः शब्दानां संबन्धो योग्यता तथा ॥२९॥

असाधुरनुमानेन वाचकः कैश्चिदिष्यते ।
वाचकत्वाविशेषे वा नियमः पुण्यपापयोः ॥३०॥

संबन्धशब्दे संबन्धो योग्यतां प्रति योग्यता ।
समयाद्योग्यता[1] संविन्मातापुत्रादियोगवत् ॥३१॥

शब्दः कारणमर्थस्य स हि तेनोपजन्यते ।
तथा च बुद्धिविषयादर्थाच्छब्दः प्रतीयते ॥३२॥

भोजनाद्यपि[2] मन्यन्ते बुद्ध्यर्थे[3] यदसंभवि ।
बुद्ध्यर्थादेव बुद्ध्यर्थे जाते तदपि दृश्यते ॥३३॥

अनित्येष्वपि नित्यत्वमभिधेयात्मना स्थितम् ।
अनित्यत्वं स्वशक्तिर्वा सा च नित्यान्न भिद्यते ॥३४॥

शब्देनार्थस्य संस्कारो दृष्टादृष्टप्रयोजनः ।
क्रियते सोऽभिसंबन्धमन्तरेण कथं भवेत् ॥३५॥

नावश्यमभिधेयेषु संस्कारः स तथाविधः ।
दृश्यते न च संबन्धस्तथाभूतो विवक्षितः ॥३६॥

---

१ डे. योग्यतासंविन्माता० २ ब. भोजनाद्यभिमन्यन्ते. ३ औ. बुद्ध्यर्थवदसंभवि.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

सति प्रत्ययहेतुत्वं[1] संबन्ध उपपद्यते ।
शब्दस्यार्थे यतस्तत्र संबन्धोऽस्तीति गम्यते ॥३७॥

नित्येऽनित्येऽपि वाच्येऽर्थे[2] पुरुषेण कथंचन ।
संबन्धोऽकृतसंबन्धैः शब्दैः कर्तुं[3] न पार्यते ॥३८॥

व्यपदेशे पदार्थानामन्या सत्तौपचारिकी ।
सर्वावस्थासु सर्वेषामात्मरूपस्य दर्शिका ॥३९॥

[4]स्फटिकादि यथा द्रव्यं भिन्नरूपैरुपाश्रयैः ।
स्वशक्तियोगात् संबन्धं ताद्रूप्येणोपगच्छति[5] ॥४०॥

तद्वच्छब्दोऽपि सत्तायामस्यां पूर्वं व्यवस्थितः ।
धर्मैरुपैति संबन्धमविरोधिविरोधिभिः ॥४१॥

एवं च प्रतिषेध्येषु प्रतिषेधप्रक्लृप्तये ।
आश्रितेषूपचारेण प्रतिषेधः प्रवर्तते ॥४२॥

आत्मलाभस्य जन्माख्या सत्ता लभ्यं[6] च लभ्यते ।
यदि सज्जायते कस्मादथासज्जायते कथम् ॥४३॥

सतो हि गन्तुर्गमनं सति गम्ये प्रवर्तते ।
गन्तृवच्चेन्न जन्मार्थो न चेत्तद्वन्न जायते ॥४४॥

उपचर्य तु कर्तारमभिधानप्रवृत्तये ।
पुनश्च [7]कर्मभावेन तां क्रियां च तदाश्रयाम् ॥४५॥

अथोपचारसत्त्वैवं विधेयास्[8]तत्र लादयः ।
जन्मना तु विरोधित्वात् मुख्या सत्ता न विद्यते ॥४६॥

आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते ।
अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मकः ॥४७॥

प्राक् च सत्ताभिसंबन्धात् मुख्या सत्ता कथं भवेत् ।
असंश्च नास्तेः कर्ता स्यादुपचारस्तु पूर्ववत् ॥४८॥

---

१ ब. प्रत्ययहेतुत्वे. २ ब. बाह्येऽर्थे. ३ ब. कर्तुं न शक्यते. ४ स्फटिकादि यथेत्यस्य श्लोकस्य स्थाने हेलाराजैर्दृष्टोऽपरः पाठो वर्ण्यते स्वटीकायां यथा—"स्फटिकं विमलं द्रव्यैर्यथा युक्तं पृथक्पृथक् । नीललोहितपीताद्यैस्तद्वर्णमुपलभ्यते इत्यपरोऽत्रागमपाठः ॥" ५ ब. ताद्रूप्यमुपगच्छति. ६ ब. लभ्या. ७ कर्मभावेन तं क्रियां च (हेलाराजः—'तमिति क्वचित् पाठः'). ८ ब. विधेयास्त्वतलादयः.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

तस्माद्भिन्नेषु धर्मेषु विरोधिष्वविरोधिनीम् ।
विरोधिख्यापनायैव शब्दैस्तैस्तैरुपाश्रिताम् ॥४९॥

अभिन्नकालामर्थेषु भिन्नकालेष्ववस्थिताम् ।
प्रवृत्तिहेतुं सर्वेषां शब्दानामौपचारिकीम् ॥५०॥

एतां सत्तां पदार्थो हि न कश्चिदतिवर्तते ।
सा च संप्रतिसत्तायाः पृथग्भाष्ये निदर्शिता ॥५१॥

प्रदेशस्यैकदेशं वा परतो वा निरूपणम् ।
विपर्ययमभावं वा व्यवहारोऽनुवर्तते ॥५२॥

यथेन्द्रियस्य वैगुण्यात् सत्ताध्यारोपवानिव ।
जायते प्रत्ययोऽर्थेभ्यस्तथैवोद्देशजा मतिः ॥५३॥

अकृत्स्नविषयाभासं शब्दः प्रत्ययमाश्रितः ।
[1]अर्थमाहान्यरूपेण स्वरूपेणानिरूपितम् ॥५४॥

रूपणव्यपदेशाभ्यां लौकिके वर्त्मनि स्थितौ ।
ज्ञानं प्रत्यभिलापं च सदृशौ बालपण्डितौ ॥५५॥

सर्वार्थरूपता शुद्धिर्ज्ञानस्य निरुपाश्रया ।
ततोऽप्यस्य परां शुद्धिमेके प्राहुररूपिकाम् ॥५६॥

उपप्लवो हि ज्ञानस्य बाह्याकारानुपातिता ।
कालुष्यमिव [2]तत्तस्य संसर्गे व्यतिभेदजम् ॥५७॥

यथा च ज्ञानमालेखादशुद्धौ व्यवतिष्ठते ।
तथोपाश्रयवानर्थः स्वरूपाद्विप्रकृष्यते ॥५८॥

एवमर्थस्य शब्दस्य ज्ञानस्य च विपर्यये ।
भावाभावावभेदेन व्यवहारानुपातिनौ ॥५९॥

[3]यथा भावमुपाश्रित्य तदभावोऽनुगम्यते ।
तथाऽभावमुपाश्रित्य तद्भावोऽप्यनुगम्यते ॥६०॥

नाभावो जायते भावो नैति भावोऽनुपाख्यताम् ।
एकस्मादात्मनोऽनन्यौ भावाभावौ विकल्पितौ ॥६१॥

---

१ ब. अर्थमाहात्म्य० २ ब. तत्रास्य. ३ ब. पुस्तके अयं श्लोको न लिखितः श्लोकार्धं तु हेलाराजटीकायामुपलभ्यते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

अभावस्यानुपाख्यत्वात् कारणं न प्रसाधकम् ।
सोपाख्यस्य तु भावस्य कारणं किं करिष्यति ॥६२॥

तस्मात् सर्वमभावो वा भावो वा सर्वमिष्यते ।
न त्ववस्थान्तरं किंचित् एकस्मात् सत्यतः स्थितम् ॥६३॥

तस्मान्नाभावमिच्छन्ति ये लोके भाववादिनः ।
अभाववादिनो वाऽपि न भावं तत्त्वलक्षणम् ॥६४॥

अद्वये चैव सर्वस्मिन् स्वभावादेकलक्षणे ।
परिकल्पेषु मर्यादा विचित्रैवोपलभ्यते ॥६५॥

चतस्रो[1] हि यथाऽवस्था निरुपाख्ये प्रकल्पिताः ।
एवं द्वैविध्यमप्येतत् भावाभावव्यपाश्रयम् ॥६६॥

अविरोधी विरोधी वा सन्नसन् वाऽपि युक्तितः[2] ।
क्रमवानक्रमो वाऽपि नाभाव उपपद्यते ॥६७॥

अविरोधी विरोधी वा सन्नसन्नपि तत्त्वतः ।
क्रमवानक्रमो वाऽपि तेन भावो न विद्यते ॥६८॥

अभावे त्रिषु कालेषु न भेदस्यास्ति संभवः ।
तस्मिन्नसति भावेऽपि त्रैकाल्यं नावतिष्ठते ॥६९॥

आत्मतत्त्वपरित्यागः परतो नोपपद्यते ।
आत्मतत्त्वं तु परतः स्वतो वा नोपकल्पते ॥७०॥

तत्त्वे विरोधे[3] नानात्व उपकारो न कश्चन ।
तत्त्वान्यत्वपरित्यागे व्यवहारो निवर्तते ॥७१॥

यत्र द्रष्टा च दृश्यं च दर्शनं वा विकल्पितम् ।
तस्यैवार्थस्य सत्यत्वं श्रितास्त्रय्यन्तवेदिनः ॥७२॥

सामान्यं वा विशेषं वा यस्मादाहुर्विशेषवत् ।
शब्दास्तस्मादसत्येषु भेदेष्वेव व्यवस्थिताः ॥७३॥

न ह्यभावस्य सद्भावे भावस्यात्मा प्रहीयते ।
न[4] चाभावस्य नास्तित्वे भावस्यात्मा प्रसूयते ॥७४॥

---

१ ब. चतस्रोऽपि. २ ब. तत्त्वतः. ३ ब. विरोधनानात्वे. ४ ब. न वाऽभावस्य.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

न शाबलेयस्यास्तित्वं बाहुलेयस्य बाधकम् ।
न शाबलेयो नास्तीति बाहुलेयः प्रकल्पते[1] ॥७५॥

अभावो यदि वस्तु स्यात् तत्रेयं स्याद्विचारणा ।
ततश्च तदभावेऽपि स्याद्विचार्यमिदं पुनः ॥७६॥

अवस्तुत्वादतीतं यद् व्यवहारस्य गोचरम् ।
तत्र वस्तुगतो भेदो न निर्वचनमर्हति ॥७७॥

अपदेऽर्थे पदन्यासः कारणस्य न विद्यते ।
अथ च प्रागसद्भावः कारणे सति दृश्यते ॥७८॥

का तस्य प्रागवस्थेति वस्त्वाश्रितमिदं पुनः ।
प्रागवस्थेति न ह्येतत् द्वयमप्यस्त्यवस्तुनि ॥७९॥

न चोर्ध्वमस्ति नास्तीति वचनायानिबन्धनम् ।
अलं स्यादपदस्थानमेतद्वाचः प्रचक्षते ॥८०॥

अत्यद्भुता त्वियं वृत्तिर्यदभागं यदक्रमम् ।
भावानां प्रागभूतानामात्मतत्त्वं प्रकाशते ॥८१॥

विकल्पोत्थापितेनैव सर्वो भावेन लौकिकः ।
मुख्येनेव पदार्थेन व्यवहारो विधीयते ॥८२॥

भावशक्तिमतश्चैनां मन्यन्ते नित्यवादिनः ।
भावमेव क्रमं प्राहुर्न भावादपरः क्रमः ॥८३॥

क्रमान्न यौगपद्यस्य कश्चिद् भेदोऽस्ति तत्त्वतः ।
यथैव भावान्नाभावः कश्चिदन्योऽवसीयते ॥८४॥

कालस्याप्यपरं कालं निर्दिशन्त्येव लौकिकाः ।
न च निर्देशमात्रेण व्यतिरेकोऽनुगम्यते ॥८५॥

आधारं कल्पयन् बुद्ध्या नाभावे व्यवतिष्ठते ।
अवस्तुष्वपि नोत्प्रेक्षा कस्यचित् प्रतिबध्यते ॥८६॥

तस्माच्छक्तिविभागेन नित्यः सदसदात्मकः ।
एकोऽर्थः शब्दवाच्यत्वे बहुरूपः प्रकाशते ॥८७॥

---

१ ब. प्रकल्प्यते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

व्यवहारश्च लोकस्य पदार्थैः परिकल्पितैः ।
शास्त्रे पदार्थः कार्यार्थं लौकिकः प्रविभज्यते ॥८८॥

॥ इति संबन्धसमुद्देशः ॥

४ भूयोद्रव्यसमुद्देशः

संसर्गरूपात् संभूताः संविद्रूपादपोद्धृताः ।
शास्त्रे विभक्ता वाक्यार्थात् प्रकृतिप्रत्ययार्थवत् ॥१॥

निमित्तभूताः साधुत्वे शास्त्रादनुमितात्मकाः ।
केचित् पदार्था वक्ष्यन्ते संक्षेपेण यथागमम् ॥२॥

वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते ।
द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः ॥३॥

॥ इति भूयोद्रव्यसमुद्देशः ॥

५ गुणसमुद्देशः

संसर्गि भेदकं यद्यत् सव्यापारं प्रतीयते ।
गुणत्वं परतन्त्रत्वात् तस्य शास्त्र उदाहृतम् ॥१॥

द्रव्यस्याव्यपदेशस्य य उपादीयते गुणः ।
भेदको व्यपदेशाय तत्प्रकर्षोऽभिधीयते ॥२॥

सर्वस्यैव प्रधानस्य न विना भेदहेतुना ।
प्रकर्षो विद्यते नापि शब्दस्योपैति वाच्यताम् ॥३॥

विद्यमानाः प्रधानेषु न सर्वे भेदहेतवः ।
विशेषशब्दैरुच्यन्ते व्यावृत्तार्थाभिधायिभिः ॥४॥

वस्तूपलक्षणे तत्र विशेषो व्यापृतो यदि ।
प्रकर्षो नियमाभावात् स्याद[1]विज्ञातहेतुकः ॥५॥

सर्वं च सर्वतोऽवश्यं नियमेन प्रकृष्यते ।
संसर्गिणा निमित्तेन निकृष्टेनाधिकेन वा ॥६॥

---

१ ब. अविज्ञानहेतुकः.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

नापेक्षते निमित्तं च प्रकर्षे व्यापृतं यदि ।
द्रव्यस्य स्यादुपादानं प्रकर्षं प्रत्यनर्थकम् ॥७॥

सव्यापारो गुणस्तस्मात् स्वप्रकर्षनिबन्धनः ।
द्रव्यात्मानं भिनत्त्येव स्वप्रकर्षे निवेशयन् ॥८॥

अरूपं [1]पररूपेण द्रव्यमाख्यायते यथा ।
अप्रकर्षं प्रकर्षेण गुणस्याविश्यते तथा ॥९॥

॥ इति गुणसमुद्देशः ॥

६ दिक्समुद्देशः

दिक् साधनं क्रिया काल इति वस्त्वभिधायिनः ।
शक्तिरूपे पदार्थानामत्यन्तमनवस्थिताः ॥१॥

व्यतिरेकस्य यो हेतुरवधिप्रतिपाद्ययोः ।
ऋज्वित्येव यतोऽन्येन विना बुद्धिः प्रवर्तते ॥२॥

कर्मणो जातिभेदानामभिव्यक्तिर्यदाश्रया ।
सा स्वैरुपाधिभिर्भिन्ना शक्तिर्दिगिति कथ्यते ॥३॥

परापरत्वे मूर्तानां देशभेदनिबन्धने ।
तत एव [2]प्रकल्पेते क्रमरूपे तु कालतः ॥४॥

आकाशस्य प्रदेशेन भागैश्चान्यैः पृथक् पृथक् ।
सा संयोगविभागानामुपाधित्वाय कल्पते ॥५॥

दिशो व्यवस्था देशानां दिग्व्यवस्था न विद्यते ।
शक्तयः खलु भावानामुपकारप्रभाविताः ॥६॥

प्रत्यस्तरूपा भावेषु दिक् पूर्वेत्यभिधीयते ।
पूर्वबुद्धिर्यतो दिक् सा समाख्यामात्रमन्यथा ॥७॥

स्वाङ्गाद्व्यवस्था या लोके न तस्यां नियता दिशः ।
प्रत्यङ्मुखस्य यत् पश्चात् तत् पुरस्ताद्विपर्यये ॥८॥

---

१ ब. गुणरूपेण. २ ब. प्रकल्प्येते क्रमरूपेऽनुकल्पतः.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

देशव्यवस्थानियमो दिक्षु न व्यवतिष्ठते ।
रूढमप्यपरत्वेन पूर्वमित्यभिधीयते ॥९॥

अतो भाषितपुंस्कत्वात् पुंवद्भावो न सिध्यति ।
अस्मिन्नर्थे न शब्देन प्रसवः क्वचिदुच्यते ॥१०॥

दिक्शक्तेरभि[1]धाने तु नियतं दिशि दर्शनम् ।
पूर्वादीनां यथा षष्ठेर्जीवितस्यावधारणे ॥११॥

छायाभाभ्यां नगादीनां भागभेदः [2]प्रकल्पते ।
अतद्धर्मस्वभावेषु भागभेदो न कल्पते ॥१२॥

परमाणोरभागस्य दिशा भागो विधीयते ।
भागप्रकल्पनाशक्तिं प्रथमां तां प्रचक्षते ॥१३॥

अदेशाश्चाप्यभागाश्च निष्क्रमा निरुपाश्रयाः ।
भावाः संसर्गिरूपात्तु शक्तिभेदः प्रकल्पते ॥१४॥

निर्भागात्मकता तुल्या परमाणोर्घटस्य च ।
भागः शक्त्यन्तरं तत्र परिमाणं च यत्तयोः ॥१५॥

यतः प्रकल्पते भेदो भेदस्तत्रापि दृश्यते ।
अदृष्टोपरतिं भेदमतोऽयुक्ततरं विदुः ॥१६॥

सर्वत्र तस्य कार्यस्य दर्शनाद्विभुरिष्यते ।
विभुत्वमेतदेवाहुरन्यः कार्यवतां विधिः ॥१७॥

चैतन्यवत् स्थिता लोके दिक्कालपरिकल्पना ।
प्रकृतिं प्राणिनां तां हि कोऽन्यथा स्थापयिष्यति ॥१८॥

संकरो व्यवहाराणां प्रकृतेः स्याद्विपर्यये ।
तस्मात्त्यजन्निमान् भावान् पुनरेवावलम्बते ॥१९॥

तस्यास्तु शक्तेः [3]पूर्वादिभेदो भावान्तराश्रयः ।
भिन्ना दिक् तेन भेदेन भेदायैवोपकल्पते ॥२०॥

अवधित्वेन [4]चापेक्षायोगे दिग्लक्षणो विधिः ।
पूर्वमस्येति षष्ठ्येव दृष्टा धर्मान्तराश्रये ॥२१॥

---

१ ब. अभिधानेन नियतं. २ ब. प्रकल्प्यते. ३ ब. पूर्वादिर्भेदो. ४ ब. वापेक्षायोगे.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

पूर्वादीनां विपर्यासोऽदृष्टश्चावध्यसंकरे[1] ।
ऋज्वेतदस्येत्येतच्च लिङ्गं न व्यतिकीर्यते ॥२२॥

अन्तःकरणधर्मो वा बहिरेवं प्रकाशते ।
अस्यां त्वन्तर्बहिर्भावः प्रक्रियायां न विद्यते ॥२३॥

एकत्वमासां शक्तीनां नानात्वं वेति कल्पने ।
अवस्तुपतिते ज्ञात्वा सत्यतो न परामृशेत् ॥२४॥

विकल्पातीततत्त्वेषु संकेतोपनिबन्धनाः ।
भावेषु व्यवहारा ये लोकस्तत्रानुगम्यते ॥२५॥

नैकत्वमस्त्यनानात्वं[2] विनैकत्वेन नेतरत् ।
परमार्थे तयोरेष भेदोऽत्यन्तं न विद्यते ॥२६॥

न शक्तीनां तथा भेदो यथा शक्तिमतां स्थितिः ।
न च लौकिकमेकत्वं तासामात्मसु विद्यते ॥२७॥

नैकत्वं व्यवतिष्ठेत नानात्वं चेन्न कल्पयेत् ।
नानात्वं चावहीयेत यद्येकत्वं न कल्पयेत् ॥२८॥

॥ इति दिक्समुद्देशः ॥

७ साधनसमुद्देशः

स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे ।
क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः ॥१॥

[3]शक्तिमात्रासमूहस्य विश्वस्यानेकधर्मणः ।
सर्वदा सर्वथा भावात् क्वचित् किंचिद्विवक्ष्यते ॥२॥

साधनव्यवहारश्च बुद्ध्यवस्थानिबन्धनः ।
सन्नसन्[4] वाऽर्थरूपेषु भेदो बुद्ध्या प्रकल्प्यते ॥३॥

बुद्ध्या समाहितैकत्वान् पञ्चालान् कुरुभिर्यदा[5] ।
पुनर्विभजते वक्ता तदाऽपायः प्रतीयते ॥४॥

---

१ ब. विपर्यासो दृष्टः. २ ब. अस्ति नानात्वं. ३ औ. शक्तिमात्रसमूहस्य विश्वस्यानेकधर्मिणः. ४ औ. सन्नसत्त्वार्थ०...प्रकल्पते. ५ औ. कुरुभिर्यथा । पुनर्विभज्यते वक्ता.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

शब्दोपहितरूपांश्च बुद्धेर्विषयतां गतान् ।
प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते ॥५॥

बुद्धिप्रवृत्तिरूपं च समारोप्याभिधातृभिः ।
अर्थेषु शक्तिभेदानां[1] क्रियते परिकल्पना ॥६॥

व्यक्तौ पदार्थे शब्दादेर्जन्यमानस्य कर्मणः ।
साधनत्वं तथा सिद्धं बुद्धिरूपप्रकल्पितम्[2] ॥७॥

स्वतन्त्रपरतन्त्रत्वे क्रमरूपं च दर्शितम् ।
निरीहेष्वपि भावेषु कल्पनोपनिबन्धनम् ॥८॥

शक्तयः शक्तिमन्तश्च सर्वे संसर्गवादिनाम्[3] ।
भावास्तेष्वस्वशब्देषु साधनत्वं[4] निरूप्यते ॥९॥

घटस्य दृशिकर्मत्वे महत्त्वादीनि[5] साधनम् ।
रूपस्य दृशिकर्मत्वे रूपत्वादीनि साधनम् ॥१०॥

स्वैः सामान्यविशेषैश्च शक्तिमन्तो रसादयः ।
नियतग्रहणा[6] लोके शक्तयस्तास्तथाश्रयैः ॥११॥

इन्द्रियार्थमनःकर्तृसंबन्धः साधनं क्वचित् ।
यद्यदा यदनुग्राहि तत्तदा तत्र[7] साधनम् ॥१२॥

स्वशब्दैरभिधाने तु स धर्मो नाभिधीयते ।
विभक्त्यादिभिरेवासावुपकारः प्रतीयते ॥१३॥

निमित्तभावो भावानामुपकारार्थमाश्रितः ।
[8]नतिरावर्जनेत्येवं सिद्धः साधनमिष्यते ॥१४॥

स तेभ्यो व्यतिरिक्तो वा तेषामात्मैव वा तथा ।
व्यतिरेकमुपाश्रित्य[9] साधनत्वेन कल्प्यते ॥१५॥

संदर्शनं[10] प्रार्थनायां व्यवसाये त्वनन्तरा ।
व्यवसायस्तथाऽऽरम्भे साधनत्वाय कल्पते ॥१६॥

---

१ ब. शक्तेर्भेदानां. २ औ. बुद्धिरूपाप्रकल्पितम्. ३ औ. संसर्गवादिना । ४ औ. साधनं तु. ५ औ. महदादीनि. ६ औ. नियतग्रहणाल्लोके. ७ ब. तस्य साधनम्. ८ औ. नतिरावर्तनेत्येवं सिद्धसाधनमिष्यते. ९ ब. व्यतिरिक्तं. १० औ. संदर्शनप्रार्थनया व्यवहारे त्वनन्तरा.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

पूर्वस्मिन् या क्रिया सैव परस्मिन् साधनं मता ।
संदर्शने तु चैतन्यं विशिष्टं साधनं विदुः ॥१७॥

निष्पत्तिमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके ।
व्यापारभेदापेक्षायां [1]करणादित्वसंभवः ॥१८॥

पुत्रस्य जन्मनि यथा पित्रोः कर्तृत्वमुच्यते ।
[2]अयमस्यामियं त्वस्मादिति भेदो विवक्षया ॥१९॥

गुणक्रियाणां कर्तारः [3]कर्त्रा न्यक्कृतशक्तयः ।
न्यक्तायामपि संपूर्णैः स्वैर्व्यापारैः समान्विताः ॥२०॥

करणत्वादिभिर्ज्ञातै[4]ः क्रियाभेदानुपातिभिः ।
स्वातन्त्र्यमुत्तरं लब्ध्वा प्रधाने [5]यान्ति कर्तृताम् ॥२१॥

यथा राज्ञा नियुक्तेषु योद्धृत्वं योद्धृषु स्थितम् ।
तेषु वृत्तौ तु लभते राजा जयपराजयौ ॥२२॥

[6]तथा [7]कर्त्रा नियुक्तेषु सर्वेष्वेकार्थकारिषु ।
कर्तृत्वं [8]करणादित्वैरुत्तरं न विरुध्यते ॥२३॥

अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्यते ।
आश्रितावधिभावं तु लक्षणे लक्षणं विदुः ॥२४॥

द्रव्यादिविषयो हेतुः कारकं नियतक्रियम् ।
[9]कर्ता कर्त्रन्तरापेक्षः क्रियायां हेतुरिष्यते ॥२५॥

क्रियायै करणं तस्य दृष्टः प्रतिनिधिस्तथा ।
हेत्वर्था तु क्रिया तस्मा[10]न्न स प्रतिनिधीयते[11] ॥२६॥

प्रातिलोम्यानु[12]लोम्याभ्यां हेतुरर्थस्य [13]साधकः ।
तादर्थ्यमानुलोम्येन हेतुत्वानुगतं तु तत् ॥२७॥

सर्वत्र सहजा शक्तिर्यावद्द्रव्यमवस्थिता ।
क्रियाकाले त्वभिव्यक्तेराश्रयादुपकारिणी ॥२८॥

---

१ औ. कारणत्वस्य संभवः. २ औ. अयमस्मादियं त्वस्मात्. ३ औ. कर्मण्यद्भुतशक्तयः। त्यक्तायामपि. ४ औ. ०ज्ञाता. ५ औ. याति कर्तृताम्. ६ औ. यथा. ७ ब. कर्तृनियुक्तेषु. ८ औ. करणादित्वेनोत्तरं. ९ ब. कर्त्रा. १० औ. न सा. ११ ब. प्रतिविधीयते. १२ ब. आनुकूल्याभ्यां. १३ ब. साधकम्.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

कुड्यस्यावरणे[1] शक्तिरस्यादीनां[2] विदारणे ।
सर्वदा स तु सन् धर्मः क्रियाकाले निरूप्यते ॥२९॥

स्वाङ्गसंयोगिनः पाशा दैत्यानां वारुणा[3] यथा ।
व्यज्यन्ते विजिगीषूणां द्रव्याणां शक्तयस्तथा ॥३०॥

तैक्ष्ण्यगौरवकाठिन्यसंस्थानैः स्वैरसिर्यदा ।
छेद्यं प्रति व्याप्रियते शक्तिमान् गृह्यते तदा ॥३१॥

प्राङ् निमित्तान्तरोद्भूतं क्रियायाः[4] कैश्चिदिष्यते ।
साधनं सहजं कैश्चित् क्रियाऽन्यैः पूर्वमिष्यते ॥३२॥

प्रवृत्तिरेव प्रथमं क्वचिदप्यनपाश्रिता ।
शक्तिरेकाधिकरणे स्रोतोवदपकर्षति ॥३३॥

अपूर्वं कालशक्तिं वा क्रियां वा कालमेव वा ।
तमेवंलक्षणं[5] भावं केचिदाहुः कथंचन ॥३४॥

नित्याः षट् शक्तयोऽन्येषां भेदाभेदसमन्विताः ।
क्रियासंसिद्धयेऽर्थेषु जातिवत् समवस्थिताः ॥३५॥

द्रव्याकारादिभेदेन ताश्चापरिमिता इव ।
दृश्यन्ते तत्त्वमासां तु षट्[6] शक्तीर्नातिवर्तते ॥३६॥

निमित्तभेदादेकैव भिन्ना शक्तिः प्रतीयते ।
षोढा कर्तृत्वमेवाहुस्तत् प्रवृत्तेर्निबन्धनम् ॥३७॥

तत्त्वे वा व्यतिरेके वा व्यतिरिक्तं तदुच्यते ।
शब्दप्रमाणको लोकः स शास्त्रेणानुगम्यते ॥३८॥

परमार्थे तु नैकत्वं पृथक्त्वाद्भिन्नलक्षणम् ।
पृथक्त्वैकत्वरूपेण तत्त्वमेव प्रकाशते ॥३९॥

यत् पृथक्त्वमसंदिग्धं तदेकत्वान्न भिद्यते ।
यदेकत्वमसंदिग्धं तत् पृथक्त्वान्न भिद्यते ॥४०॥

---

१ औ. वद्ध्र्यस्यावरणे. २ ब. अस्त्रादीनां. ३ औ. वारुणी. ४ औ. क्रियाऽन्यैः कैश्चिदिष्यते. ५ ब. तमेव लक्षणं. ६ औ. षट्शक्तिर्नातिवर्तते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

द्यौः क्षमा वायुरादित्यः सागराः सरितो दिशः ।
अन्तःकरणतत्त्वस्य भागा बहिरवस्थिताः ॥४१॥

कालविच्छेदरूपेण तदेवैकमवस्थितम् ।
स[1] ह्यपूर्वापरो भागः पररूपेण लक्ष्यते ॥४२॥

दृष्टो ह्यव्यतिरेकेऽपि व्यतिरेकोऽन्वयेऽसति[2] ।
वृक्षाद्यर्थान्वयस्तस्मात् विभक्त्यर्थोऽन्य इष्यते ॥४३॥

सामान्यं कारकं[3] तस्य सप्ताद्या भेदयोनयः ।
षट् कर्माख्यादिभेदेन शेषभेदस्तु सप्तमी ॥४४॥

निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम् ।
तत्रेप्सिततमं कर्म चतुर्धाऽन्यत्तु कल्पितम् ॥४५॥

औदासीन्येन यत् प्राप्यं यच्च कर्तुरनीप्सितम् ।
संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम् ॥४६॥

सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी ।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते ॥४७॥

प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा ।
निर्वर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितम् ॥४८॥

यदसज्जायते सद्वा जन्मना यत् प्रकाश्यते ।
तन्निर्वर्त्यं विकार्यं च कर्म द्वेधा व्यवस्थितम् ॥४९॥

प्रकृत्युच्छेदसंभूतं किंचित् काष्ठादिभस्मवत् ।
किंचिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ॥५०॥

क्रियागत[4]विशेषाणां सिद्धिर्यत्र न गम्यते ।
दर्शनादनुमानाद्वा तत् प्राप्यमिति कथ्यते ॥५१॥

विशेषलाभः सर्वत्र विद्यते दर्शनादिभिः ।
केषांचित्तदभिव्यक्तिसिद्धिर्दृष्टौ[5] विषादिषु ॥५२॥

---

१ औ. स स्वपूर्वापरो भागः क्रमरूपेण. २ ब. अन्वये सति. ३ औ. कारणं तस्य. ४ ब. क्रियाकृत० ५ ब. दृष्टिर्विषादिषु.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

आभासोपगमो व्यक्तिः सोढत्वमिति कर्मणः ।
विशेषाः प्राप्यमाणस्य क्रियासिद्धौ व्यवस्थिताः ॥५३॥

निर्वर्त्यादिषु तत् पूर्वमनुभूय स्वतन्त्रताम् ।
कर्त्रन्तराणां व्यापारे कर्म संपद्यते ततः ॥५४॥

तद्व्यापारविवेकेऽपि स्वव्यापारे व्यवस्थितम् ।
कर्मोपदिष्टान् लभते क्वचिच्छास्त्राश्रयान् विधीन् ॥५५॥

निवृत्तप्रेषणं कर्म स्वक्रियावयवे स्थितम् ।
निवर्तमाने कर्मत्वे स्वे कर्तृत्वेऽवतिष्ठते ॥५६॥

तानि धात्वन्तराण्येव पचिसिध्यतिवद् विदुः ।
भेदेऽपि तुल्यरूपत्वात् एकत्वपरिकल्पना ॥५७॥

एकदेशे समूहे च व्यापाराणां पचादयः ।
स्वभावतः प्रवर्तन्ते तुल्यरूपसमन्विताः ॥५८॥

न्यग्भावना न्यग्भवनं रुहौ शुद्धे प्रतीयते ।
न्यग्भावनान्यग्भवनं ण्यन्तेऽपि प्रतिपद्यते[1] ॥५९॥

अवस्थां पञ्चमीमाहुर्ण्यन्ते तां कर्मकर्तरि ।
निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजुच्यते ॥६०॥

ब्रवीति पचतेरर्थं सिध्यतिर्न विना णिचम् ।
स ण्यन्तः पचतेरर्थः[2] प्रकृते व्यवतिष्ठते ॥६१॥

केषांचिद्देवदत्तादेर्[3]व्यापारो यः सकर्मके ।
स[4] विना देवदत्तादेः कटादिषु विवक्ष्यते ॥६२॥

निवृत्तप्रेषणं कर्म स्वस्य कर्तुः प्रयोजकम् ।
प्रेषणान्तरसंबन्धे ण्यन्ते[5] लेनाभिधीयते ॥६३॥

सदृशादिषु यत् कर्म कर्तृत्वं प्रतिपद्यते ।
आपत्त्यापादने तत्र विषयत्वं प्रतिक्रिये ॥६४॥

---

१ ब. प्रतिपाद्यते. २ ब. ओ. अर्थे प्रकृते; आ. अर्थोऽ प्रकृते. ३ ब. देवदत्तादौ व्यापारो.
४ ब. स यदा. ५ ब. ण्यन्तत्वेन.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

कुतश्चिदाहृत्य पदमेवं च परिकल्पने ।
कर्मस्थभावकत्वं स्यात् दर्शनाद्यभिधायिनाम् ॥६५॥

विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता ।
क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकाश्यते ॥६६॥

कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः ।
सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते ॥६७॥

आधारत्वमिव प्राप्तास्ते पुनर्द्रव्यकर्मसु ।
कालादयो भिन्नकक्ष्यं यान्ति कर्मत्वमुत्तरम् ॥६८॥

अतस्तैः कर्मभिर्धातुर्युक्तोऽद्रव्यैरकर्मकः ।
लस्य कर्मणि भावे च निमित्तत्वाय कल्पते ॥६९॥

सर्वं वाऽकथितं कर्म भिन्नकक्ष्यं प्रतीयते ।
धात्वर्थोद्देशभेदेन तन्नेप्सिततमं किल ॥७०॥

प्रधानकर्म कथितं यत् क्रियायाः प्रयोजकम् ।
तत्सिद्धये क्रियायुक्तमन्यत्त्वकथितं स्मृतम् ॥७१॥

दुह्यादिवन्नयत्यादौ कर्मत्वमकथाश्रयम् ।
आख्यातानुपयोगे[1] तु नियमाच्छेष इष्यते ॥७२॥

अन्तर्भूतणिजर्थानां दुह्यादीनां णिजन्तवत् ।
सिद्धं पूर्वेण कर्मत्वं णिजन्तं[2] नियमस्तथा ॥७३॥

करणस्य स्वकक्ष्यायां[3] न प्रकर्षाश्रयो यथा ।
कर्मणोऽपि स्वकक्ष्यायां[3] न स्यादतिशयस्तथा ॥७४॥

कर्मणस्त्वाप्तुमिष्टत्व आश्रितेऽतिशयो यतः ।
आश्रीयते ततोऽत्यन्तं[4] भेदः पूर्वेण कर्मणा ॥७५॥

णिजन्ते च यथा कर्ता सक्रियः सन्[5] प्रयुज्यते ।
नयत्यादौ तथा कर्ता निष्क्रियोऽपि प्रयुज्यते ॥७६॥

---

१ ब. आख्यातमुपयोगे. २ ब. णिजन्तनियमास्तथा. ३ ब. स्वकक्षायां. ४ ब. ततोऽत्यन्तभेदं ५ ब. संप्रयुज्यते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

भेदवाक्यं तु यत् ण्यन्ते नीदुहिप्रकृतौ च यत् ।
शब्दान्तरत्वान्नैवास्ति संस्पर्शस्तस्य धातुना ॥७७॥

यथैवैकमपादानं शास्त्रे भेदेन दर्शितम् ।
तथैकमेव कर्मापि भेदेन प्रतिपादितम् ॥७८॥

निर्वर्त्यो वा विकार्यो वा प्राप्यो वा साधनाश्रयः ।
क्रियाणामेव साध्यत्वात् सिद्धरूपोऽभिधीयते ॥७९॥

अहितेषु यथा लौल्यात् कर्तुरिच्छोपजायते ।
विषादिषु भयादिभ्यस्तथैवासौ प्रवर्तते ॥८०॥

प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् ।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते ॥८१॥

प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते ।
यदा गुणे तदा तद्वदनुक्ताऽपि प्रकाशते ॥८२॥

पचावनुक्तं यत् कर्म क्त्वान्ते भावाभिधायिनि ।
भुजौ शक्त्यन्तरेऽप्युक्ते तत्तद्धर्मः प्रकाशते ॥८३॥

इषेश्च गमिसंस्पर्शाद् ग्रामे यो लो विधीयते ।
तत्रेषिणैव निर्भोगः क्रियते गमिकर्मणः ॥८४॥

पक्त्वा भुज्यत इत्यत्र केषांचिन्न व्यपेक्षते ।
ओदनं पचतिः सोऽसावनुमानात् प्रतीयते ॥८५॥

तत्राभिनिविशौ कर्म यत्तिङन्तेऽभिधीयते ।
क्त्वान्तेऽधिकरणत्वेऽपि न तत्रेच्छन्ति सप्तमीम् ॥८६॥

यन्निर्वृत्ताश्रयं कर्म प्राप्तेरप्रचितं पुनः ।
भक्ष्यादिविषयापत्त्या भिद्यमानं तदीप्सितम् ॥८७॥

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥८८॥

---

१ ब. यथा चैकमपादानं. २ ओ. यो लोऽभिधीयते. ३ ओ. गतिकर्मणः. ४ ब तथाभिनिविशौ.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

भेदा य एते चत्वारः सामान्येन प्रदर्शिताः ।
ते निमित्तादिभेदेन भिद्यन्ते बहुधा पुनः ॥८९॥

॥ इति साधनसमुद्देशे कर्माधिकारः ॥

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा तत्र करणत्वं तदा स्मृतम् ॥९०॥

वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम् ।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः ॥९१॥

करणेषु तु संस्कारमारभन्ते पुनः पुनः ।
विनियोगविशेषांश्च प्रधानस्य प्रसिद्धये ॥९२॥

स्वकक्ष्यासु प्रकर्षश्च करणानां न विद्यते ।
आश्रितातिशयत्वं तु परतस्तत्र लक्षणम् ॥९३॥

स्वातन्त्र्येऽपि प्रयोक्तारमारादेवोपकुर्वते[1] ।
करणेन हि सर्वेषां व्यापारो व्यवधीयते ॥९४॥

क्रियासिद्धौ प्रकर्षो वा न्यग्भावस्त्वेव कर्तरि ।
सिद्धौ सत्यां हि सामान्यं साधकत्वं प्रकृष्यते ॥९५॥

अस्यादीनां तु कर्तृत्वे तैक्ष्ण्यादि करणं विदुः ।
तैक्ष्ण्यादीनां स्वतन्त्रत्वे द्वेधाऽऽत्मा[2] व्यवतिष्ठते ॥९६॥

आत्मभेदेऽपि सत्येवमेकोऽर्थः प्राप्यते[3] यदा ।
तदाश्रयत्वाद् भेदेऽपि कर्तृत्वं बाधकं ततः ॥९७॥

यथा च संनिधानेन करणत्वं प्रतीयते ।
तथैवासंनिधानेऽपि क्रियासिद्धिः[4] प्रतीयते ॥९८॥

स्तोकस्य वाऽभिनिर्वृत्तेरनिवृत्तेश्च तस्य वा ।
प्रसिद्धिं करणत्वस्य स्तोकादीनां प्रचक्षते ॥९९॥

धर्माणां तद्वता भेदादभेदाच्च विशिष्यते ।
क्रियाऽवधेरवच्छेदविशेषाद् भिद्यते यथा ॥१००॥

॥ इति साधनसमुद्देशे करणाधिकारः ॥

---

१ ओ. प्रयोक्तार आरादेव. २ ओ. द्वैधात्मा. ३ डे. स तथा स्थिताः. ४ ओ. क्रिया सिद्धेः.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

प्रागन्यतः शक्तिलाभात् न्यग्भावापादनादपि ।
तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्तनात् ॥१०१॥

अदृष्टत्वात् प्रतिनिधेः प्रविवेके च दर्शनात् ।
आरादप्युपकारित्वे स्वातन्त्र्यं कर्तुरुच्यते ॥१०२॥

धर्मैरभ्युदितैः शब्दे नियमो न तु वस्तुनि ।
कर्तुर्धर्मविवक्षायां शब्दात् कर्ता प्रतीयते ॥१०३॥

एकस्य बुद्धयवस्थाभिर्भेदे च परिकल्पिते ।
कर्मत्वं [1]करणत्वं वा कर्तृत्वं वोपजायते ॥१०४॥

उत्पत्तेः प्रागसद्भावो बुद्धयवस्थानिबन्धनः ।
अविशिष्टः सताऽन्येन कर्ता भवति जन्मनः ॥१०५॥

कारणं कार्यभावेन यथा वा व्यवतिष्ठते ।
कार्यशब्दं तदा लब्ध्वा कार्यत्वेनाथ जायते ॥१०६॥

यथाऽहेः कुण्डलीभावो व्यग्राणां च समग्रता ।
तथैव जन्मरूपत्वं सतामेके प्रचक्षते ॥१०७॥

विभक्तयोनि [2]यत् क्वापि कारणेभ्यः प्रवर्तते ।
स्वा जातिर्व्यक्तिरूपेण तस्यापि व्यवतिष्ठते ॥१०८॥

भावेष्वेव पदन्यासः प्रज्ञाया वाच एव वा ।
नास्तीत्यप्यपदे नास्ति न चासद्भिर्[3]विद्यते ततः ॥१०९॥

बुद्धिशब्दौ प्रवर्तेते यथा भूतेषु वस्तुषु ।
तेषामन्येन तत्त्वेन व्यवहारो न विद्यते ॥११०॥

आकाशस्य यथा भेदश्छायायाश्चलनं यथा ।
जन्मनाशावभेदेऽपि तथा कैश्चित् प्रकल्पितौ ॥१११॥

यथैवाकाशनास्तित्वमसन्मूर्तिनिरूपितम् ।
तथैव मूर्तिनास्तित्वमसदाकाशनि[4]श्रयम् ॥११२॥

---

१ ओ. करणत्वं च कर्तृत्वं चोपजायते. २ ओ. यत्कार्यं. ३ ब. विद्यते. ४ ब. ०निश्चयम्.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

यथा तदर्थैर्व्यापारैः क्रियात्मा व्यपदिश्यते ।
अभेद[1]ग्रहणादेष कार्यकारणयोः क्रमः ॥११३॥

विकारो जन्मनः कर्ता प्रकृतिर्वेति संशये ।
भिद्यते प्रतिपत्तॄणां दर्शनं लिङ्गदर्शनैः ॥११४॥

क्लृपि संपद्यमाने या चतुर्थी सा विकारतः ।
सुवर्णपि[2]ण्डे प्रकृतौ वचनं कुण्डलाश्रयम् ॥११५॥

वाक्ये संपद्यतेः कर्ता संघच्व्यन्तस्य कथ्यते ।
वृत्तौ संघीभवन्तीति ब्राह्मणानां स्वतन्त्रता ॥११६॥

[3]अत्वं संपद्यते यस्त्वं न तस्मिन् युष्मदाश्रया ।
प्रकृतिः पुरुषस्यास्ति [4]प्राकृतः स विधीयते ॥११७॥

पूर्वामवस्थामजहत् संस्पृशन् धर्ममुत्तरम् ।
संमूर्च्छित इवार्थात्मा जायमानोऽभिधीयते ॥११८॥

सव्यापारतरः कश्चित् क्वचिद् धर्मः प्रतीयते ।
संसृज्यन्ते च भावानां भेदवत्योऽपि शक्तयः ११९ ॥

विपरीतार्थवृत्तित्वं पुरुषस्य विपर्यये ।
गम्येत साधनं ह्यत्र सव्यापारं प्रतीयते ॥१२०॥

त्वमन्यो भवसीत्येषा तत्र स्यात् परिकल्पना ।
[5]राज्ञि भृत्यत्वमापन्ने यथा तद्वद्गतिर्भवेत् ॥१२१॥

सं[6]भावनात् क्रियासिद्धौ कर्तृत्वेन समाश्रितः ।
क्रियायामात्मसाध्यायां साधनानां प्रयोजकः ॥१२२॥

प्रयोगमात्रे न्यग्भावं स्वातन्त्र्यादेव निश्रितः ।
अविशिष्टो भवत्यन्यैः स्वतन्त्रैर्मुक्तसंशयैः ॥१२३॥

निमित्तेभ्यः प्रवर्तन्ते सर्व एव स्वभूतये ।
[7]अभिप्रायानुरोधोऽपि स्वार्थस्यैव प्रसिद्धये ॥१२४॥

॥ इति साधनसमुद्देशे कर्त्रधिकारः ॥

---

१ ब. ग्रहणादेव. २ ब. पिण्डप्रकृतौ. ३ ब. स त्वं. ४ ब. प्रकृतेः. ५ ब. राज्ञो. ६ ब. संभावना. ७ ब. अभिप्रायानुरोधेऽपि.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

प्रेषणाध्येषणे कुर्वंस्तत्समर्थानि चाचरन्[1] ।
कर्तैव विहितां शास्त्रे हेतुसंज्ञां प्रपद्यते ॥१२५॥

द्रव्यमात्रस्य तु प्रैषे पृच्छयादेर्लोड् विधीयते ।
सक्रियस्य प्रयोगस्तु यदा स विषयो णिचः ॥१२६॥

गुणक्रियायां स्वातन्त्र्यात् प्रेषणे कर्मतां गतः ।
नियमात् कर्मसंज्ञायाः स्वधर्मेणाभिधीयते ॥१२७॥

क्रियायाः प्रेरकं कर्म हेतुः कर्तुः प्रयोजकः ।
कर्मार्था च क्रियोत्पत्तिः संस्कारप्रतिपत्तिभिः ॥१२८॥

॥ इति साधनसमुद्देशे हेत्वधिकारः ॥

अनिराकरणात् कर्तुस्त्यागाङ्गं कर्मणेप्सितम् ।
प्रेरणानुमतिभ्यां वा लभते संप्रदानताम् ॥१२९॥

हेतुत्वे कर्मसंज्ञायां शेषत्वे वाऽपि कारकम् ।
रुच्यर्थादिषु शास्त्रेण संप्रदानाख्यमुच्यते ॥१३०॥

भेदस्य च विवक्षायां पूर्वां पूर्वां क्रियां प्रति ।
परस्याङ्गस्य कर्मत्वान्न क्रियाग्रहणं कृतम् ॥१३१॥

क्रियाणां समुदाये तु यदैकत्वं विवक्षितम् ।
तदा कर्म क्रियायोगात् स्वाख्ययैवोपचर्यते ॥१३२॥

भेदाभेदविवक्षा च स्वभावेन व्यवस्थिता ।
तस्माद्वृत्त्यर्थकर्मत्वे व्यभिचारो न दृश्यते ॥१३३॥

विकल्पेनैव सर्वत्र संज्ञे स्यातामुभे यदि ।
आरम्भेण न योगस्य प्रत्याख्यानं समं भवेत् ॥१३४॥

त्यागरूपं प्रहातव्ये प्राप्ये संसर्गदर्शनम् ।
आस्थितं कर्म यत्तत्र द्वैरूप्यं भजते क्रिया ॥१३५॥

॥ इति साधनसमुद्देशे संप्रदानाधिकारः ॥

---

१ ब. वाचरन्.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

निर्दिष्टविषयं किंचित् उपात्तविषयं तथा ।
अपेक्षितक्रियं चेति त्रिधाऽपादानमुच्यते ॥१३६॥

संयोगिभेदाद् भिन्नात्मा गमिरेव भ्रमिर्यथा ।
ध्रुवावधिरपायोऽपि समवेतस्तथा[1]ऽध्रुवे ॥१३७॥

द्रव्य[2]स्त्वभावो न ध्रौव्यमिति सूत्रे प्रतीयते ।
अपायविषयं ध्रौव्यं यत्तु तावद्विवक्षितम् ॥१३८॥

सरणे देवदत्तस्य ध्रौव्यं पा[3]ते तु वाजिनः ।
आविष्टं यदपायेन तस्याध्रौव्यं प्रचक्षते ॥१३९॥

उभावप्य[4]ध्रुवौ मेषौ यद्यप्युभयकर्मजे ।
विभागे प्रविभक्ते तु क्रिये तत्र विवक्षिते ॥१४०॥

मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक् ।
मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक् ॥१४१॥

अभेदेन क्रियैका तु द्विसाध्या चेद्विवक्षिता ।
मेषावपाये कर्तारौ यद्यन्यो विद्यतेऽवधिः ॥१४२॥

गतिर्विना त्ववधिना नापाय इति गम्यते ।
वृक्षस्य पर्णं पततीत्येवं भाष्ये निदर्शितम् ॥१४३॥

भेदाभेदौ पृथग्भावः स्थितिश्चेति विरोधिनः ।
युगपन्न विवक्ष्यन्ते सर्वे धर्मा बलाहके ॥१४४॥

धनुषा विध्यतीत्यत्र विनाऽपायविवक्षया ।
करणत्वं यतो नास्ति तस्मात्तदुभयं सह ॥१४५॥

एकैव सा सती शक्तिर्द्विरूपा व्यवतिष्ठते ।
निमि[5]त्तं संज्ञयोस्तत्र परया बाध्यतेऽपरा ॥१४६॥

निर्धारणे विभक्ते यो भीत्र्[6]आदीनां च यो विधिः ।
उपात्तापेक्षितापायः सोऽबुधप्रतिपत्तये ॥१४७॥

॥ इति साधनसमुद्देशेऽपादानाधिकारः ॥

---

१ ब. तथा ध्रुवम्. २ ब. द्रव्यस्वभावो. ३ ब. ध्रौव्ये पाते. ४ ब. अध्रुवो मेषौ.
५ ब. निमित्तसंज्ञयोस्तत्र. ६ ब. भीत्रार्थानां च.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

कर्तृकर्मव्यवहितामसाक्षाद्धारयत् क्रियाम् ।
उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ॥१४८॥

उपश्लेषस्य चाभेदस्तिलाकाशकटादिषु ।
उपकारास्तु भिद्यन्ते संयोगिसमवायिनाम् ॥१४९॥

अविनाशो गुरुत्वस्य प्रतिबन्धे स्वतन्त्रता ।
दिग्विशेषादवच्छेद इत्याद्या भेदहेतवः ॥१५०॥

आकाशमेव[1] केषांचिद्देशभेदप्रकल्पनात् ।
आधारशक्तिः प्रथमा सर्वसंयोगिनां मता ॥१५१॥

इदमत्रेति भावानामभावान्न प्रकल्पते ।
व्यपदेशस्तमाकाशनिमित्तं संप्रचक्षते ॥१५२॥

कालात् क्रिया विभज्यन्ते आकाशात् सर्वमूर्तयः ।
एतावांश्चैव भेदोऽयमभेदोपनिबन्धनः ॥१५३॥

यद्यप्युपवसिर्देशविशेषमनुरुध्यते ।
शब्दप्रवृत्तिधर्मात्तु कालमेवावलम्बते ॥१५४॥

[2]वसतावप्रयुक्तेऽपि देशोऽधिकरणं ततः ।
अप्रयुक्तं त्रिरात्रादि कर्म[3] चोपवसौ स्मृतम् ॥१५५॥

॥ इति साधनसमुद्देशेऽधिकरणाधिकारः ॥

संबन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः ।
श्रुतायामश्रुतायां वा क्रियायां सोऽभिधीयते ॥१५६॥

द्विष्ठोऽप्यसौ परार्थत्वाद् गुणेषु व्यतिरिच्यते ।
[4]तत्राभिधीयमानः सन् प्रधानेऽप्युपभुज्यते[5] ॥१५७॥

निमित्तनियमः शब्दात् संबन्धस्य न गृह्यते ।
कर्मप्रवचनीयैस्तु स विशेषेऽवरुध्यते[6] ॥१५८॥

साधनैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः ।
प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये ॥१५९॥

---

१ ब. आकाशमिव. २ ब. वसतौ च प्रयुक्तेऽपि. ३ ब. कर्मोपवसतौ. ४ ब. तत्राभिधीयमानश्च. ५ ओ. उपयुज्यते. ६ ब. विशेषेऽनुरुध्यते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

निष्ठायां कर्मविषया ष[1]ष्ठी न प्रतिषिध्यते ।
शेषलक्षणया षष्ठ्या समासस्तत्र नेष्यते ॥१६०॥

अन्येन व्यपदिष्टस्य यस्यान्यत्रोपजायते ।
व्यतिरेकः स धर्मौ द्वौ लभते विषयान्तरे ॥१६१॥

प्राधान्यं स्वगुणे लब्ध्वा प्रधाने याति शेषताम् ।
सहयोगे स्वे[2]योगेऽतः प्रधानत्वं न हीयते ॥१६२॥

॥ इति साधनसमुद्देशे शेषाधिकारः ॥

सिद्धस्याभिमुखीभावमात्रं संबोधनं विदुः ।
प्राप्ताभिमुख्यो ह्यर्थात्मा क्रियासु विनियुज्यते ॥१६३॥

संबोधनं न वाक्यार्थ इति वृद्धेभ्य आगमः ।
उद्देशेन विभक्त्यर्था वाक्यार्थात् समपो[3]द्धृताः ॥१६४॥

विभक्त्यर्थेऽव्ययीभाववचनादवसीयताम् ।
अन्यो द्रव्याद् विभक्त्यर्थः सोऽव्ययेनाभिधीयते ॥१६५॥

द्रव्यं तु यद्यथाभूतं त[4]दन्यन्न तथा भवेत् ।
क्रियाभेदेऽपि तस्यासौ द्रव्यात्मा नापहीयते ॥१६६॥

तस्माद्यत् करणं द्रव्यं न[5] तत् कर्म पुनर्भवेत् ।
स[6]र्वस्यैवान्यथाभावः तस्य द्रव्यात्मनो भवेत् ॥१६७॥

॥ इति साधनसमुद्देशः ॥

८ क्रियासमुद्देशः

यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात् तत्[7] क्रियेत्यभिधीयते ॥१॥

कार्यकारणभावेन ध्वनतीत्याश्रितक्रमः ।
ध्वनिः क्रमनिवृत्तौ तु ध्वनिरित्स्येव कथ्यते ॥२॥

---

१ ब. षष्ठी च प्रति० २ व. ततस्तस्य. ३ ब. समुपोद्धृताः. ४ त. तद्त्यन्तं. ५ त. तत् कर्म न. ६ त सर्वस्य चान्यथाभावः ७ ब. सा क्रियेति प्रतीयते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

श्वेते श्वेतत [1]इत्येतच्छ्वेतत्वेन प्रकाशते ।
आश्रितक्रमरूपत्वात् अभिधानं प्रवर्तते ॥३॥

गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।
बुद्धया प्रकल्पिताभेदः क्रियेति व्यपदिश्यते ॥४॥

समूहः स तथाभूतः प्रतिभेदं समूहिषु ।
समाप्यते ततो भेदे कालभेदस्य संभवः ॥५॥

[2]क्रमात् संभविनां तेषामात्मानो न समूहिनाम् ।
सद्वस्तुविषयैर्यान्ति संबन्धं चक्षुरादिभिः ॥६॥

यथा गौरिति संघातः सर्वो नेन्द्रियगोचरः ।
भागशस्तूपलब्धस्य बुद्धौ रूपं निरूप्यते ॥७॥

इन्द्रियैरन्यथाप्राप्तौ भेदांशोपनिपातिभिः ।
अलातचक्रवद्रूपं क्रियाणां परिकल्प्यते ॥८॥

यथा च भागाः पचतेरुदकासेचनादयः ।
उदकासेचनादीनां ज्ञेया भागास्तथा[3]ऽपरे ॥९॥

यश्चापकर्षपर्यन्तमनुप्राप्तः प्रतीयते ।
तत्रैकस्मिन् क्रियाशब्दः केवले न प्रयुज्यते ॥१०॥

पूर्वोत्तरैस्तथा[4] भागैः समवस्थापितक्रमः ।
एकः सोऽप्यसदध्यासात् आख्यातैरभिधीयते ॥११॥

कालानुपाति यद्रूपं त[5]दस्तीति प्रतीयते ।
परितस्तु परिच्छिन्नं भाव इत्येव कथ्यते ॥१२॥

व्यवहारस्य सिद्धत्वात् न चेयं गुणकल्पना ।
उपचारो हि मुख्यस्य संभवा[6]दवतिष्ठते ॥१३॥

आहितोत्तरशक्तित्वात् प्रत्येकं वा समूहिनः ।
अनेकरूपा लक्ष्यन्ते क्रमवन्त इवाक्रमाः ॥१४॥

---

१ त. श्वेतते श्वेत इत्येतत्. २ त. क्रमात् सदसतां. ३ ब. तथा परे. ४ त. तदा भागैः.
५ ब. तदस्तीत्यनुगम्यते. ६ त. संभवादपदिश्यते; त. अयं श्लोको नास्मिनादर्शे पठितः.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

अनन्तरं फलं यस्याः कल्पते तां क्रियां विदुः ।
प्रधानभूतां तादर्थ्यादन्यासां तु तदाख्यता ॥१५॥

क्रिंयाप्रवृत्तौ[1] यो हेतुस्तदर्थं यद्विचेष्टितम् ।
अनपेक्ष्य प्रयुञ्जीत गच्छतीत्यवधारयन् ॥१६॥

सत्सु प्रत्ययरूपोऽसौ भावो यावन्न जायते ।
तावत् परेषां रूपेण साध्यः सन्नभिधीयते ॥१७॥

सिद्धे तु साधनाकाङ्क्षा कृतार्थत्वान्निवर्तते ।
न क्रियावाचिनां तस्मात् प्रयोगस्तत्र विद्यते ॥१८॥

[2]स च पूर्वापरीभूत एकत्वाद[3]क्रियात्मकः ।
पूर्वापराणां धर्मेण तदर्थेनानुगम्यते ॥१९॥

असन्निवर्तते तस्माद्यत्[4] सत्तदुपलभ्यते ।
तयोः सदसतोश्चासावात्मैक इव गृह्यते ॥२०॥

जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्तिनीम् ।
असाध्या व्यक्तिरूपेण सा[5] साध्येवोपलभ्यते ॥२१॥

[6]अन्ते या वा क्रियाभागे जातिः सैव क्रिया स्मृता ।
सा व्यक्तेरनुनिष्पादे जायमानेव गम्यते ॥२२॥

[7]स्वव्यापारविशिष्टानां सत्ता वा कर्तृकर्मणाम् ।
क्रिया व्यापारभेदेषु सत्ता वा समवायिनी ॥२३॥

[8]अन्तरात्मनि या सत्ता सा क्रिया कैश्चिदिष्यते ।
भाव एव हि धात्वर्थ इत्यविच्छिन्न आगमः ॥२४॥

[9]बुद्धिं तज्जातिमन्ये तु बुद्धिसत्तामथापरे ।
प्रत्ययस्तरूपां भावेषु क्रियेति प्रतिजानते ॥२५॥

आविर्भावतिरोभावौ जन्मनाशौ तथा[10] परे ।
षट्सु भावविकारेषु कल्पितौ व्यावहारिकौ ॥२६॥

---

१ त. श्लोकोयं न पठ्यते हेलाराजैरपि न व्याख्यानं कृतम् । २ त. स चापूर्वापरीभूतः. ३ त. अक्रमात्मकः. ४ ब. यस्माद्यत् सत उपलभ्यते. ५ ब. ससाध्येवोलभ्यते. ६ अन्ते यस्याः क्रिया. ७ ब. सव्यापार० ८ त. अन्त्येवात्मनि या. ९ ब. बुद्धितज्जातिमन्ये. १० त. तथापरैः.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

ताभ्यां सर्वप्रवृत्तीनामभेदेनोपसंग्रहः ।
जन्मैवाश्रितसारूप्यं स्थितिरित्यभिधीयते ॥२७॥

जायमानान्न जन्मान्यत् विनाशेऽप्यपदार्थता ।
अतो भावविकारेषु सत्तैका व्यवतिष्ठते ॥२८॥

[1]पूर्वभावस्तु यज्जातात् [2]तज्जन्म व्यपदिश्यते ।
आश्रितक्रमरूपेण निमित्तत्वे विवक्षिते ॥२९॥

आख्यातशब्दैरर्थोऽसावेवंभूतोऽभिधीयते ।
नामशब्दाः प्रवर्तन्ते संहरन्त इव[3] क्रमम् ॥३०॥

फलं फलापदेशो वा वस्तु वा तद्विरोधि यत् ।
[4]तदन्यदेव पूर्वेषां नाश [5]इत्यपदिश्यते ॥३१॥

नैवास्ति नैव नास्तीति वस्तुनो ग्रहणाद्विना ।
कल्पते पररूपेण वस्त्वन्यदनुगम्यते ॥३२॥

भावाभावौ घटादीनामस्पृशन्नपि पाणिना ।
[6]कश्चिद्भेदाप्रकाशेऽपि [7]प्रकाशे तत एव वा ॥३३॥

व्यापि सौक्ष्म्यात्[8] क्वचिद्याति क्वचित् संहन्यते पुनः ।
अकुर्वाणोऽथवा किंचित् स्वशक्त्यैवं[9] प्रकाशते ॥३४॥

सर्वरूपस्य [10]तत्त्वस्य यत् क्रमेणेव दर्शनम् ।
भागैरिव प्रक्लृप्तिश्च तां क्रियामपरे विदुः ॥३५॥

सत्ता स्वशक्तियोगेन सर्वरूपा व्यवस्थिता ।
साध्या च साधनं चैव फलं भोक्ता फलस्य च ॥३६॥

क्रियामन्ये तु मन्यन्ते क्वचिदप्यनपाश्रिताम् ।
साधनैकार्थकारित्वे प्रवृत्तिमनपायिनीम् ॥३७॥

सामान्यभूता सा पूर्वं भागशः प्रविभज्यते ।
ततो व्यापाररूपेण साध्ये च व्यवतिष्ठते ॥३८॥

---

१ ओ. ब. 'पूर्वभावस्तु'० इत्ययं श्लोको न पठ्यते मूलकारिकासु । हेलाराजटीकायामुपलभ्यते । २ ब. तज्जन्मेत्यपदिश्यते. ३ ब. इव क्रमाः. ४ त. तदन्य एव. ५ ब. इत्यभिधीयते. ६ ब. कश्चिद्भेदाप्रकाशेऽपि ७ ब. प्रकाशेत स एव वा. ८ त. सौक्ष्म्यं क्वचित्. ९ त. ब. एवं प्रकाशते. १० ब. न त्वस्य.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

प्रकृतिः साधनानां सा प्रथमं [1]तच्च कारकम् ।
व्यापाराणां ततोऽन्यत्व[2]मपरैरुपवर्ण्यते ॥३९॥

बहूनां संभवेर्थानां केचिदेवोपकारिणः ।
संसर्गे [3]कैश्चिदेषां तु प्राधान्येन प्रतीयते ॥४०॥

साध्यत्वात्तत्र चाख्यातैर्व्यापाराः सिद्धसाधनाः ।
प्राधान्येनाभिधीयन्ते फलेनापि प्रवर्तिताः ॥४१॥

एकत्व[4]ावृत्तिभेदाभ्यां भेदाभेदसमन्वये ।
संख्यास्तत्रोपलभ्यन्ते संख्येयावयवक्रिया[5]ः ॥४२॥

सिद्धस्यार्थस्य पाकादेः कथं साधनयोगिता ।
साध्यत्वे वा तिङन्तेन कृतां भेदो न कश्चन ॥४३॥

तत्र कारकयोगाया यद्याख्यातं निबन्धनम् ।
षष्ठ्याः सा लेन संबन्धे व्युदस्ता कर्तृकर्मणोः ॥४४॥

एकाभिधान [6]एकोऽर्थो युगपच्च द्विधर्मभाक् ।
न संभवति सिद्धत्वे स साध्यः स्यात् कथं पुनः ॥४५॥

एतावत् साधनं साध्यमेतावदिति कल्पना ।
शास्त्र एव न वाक्येऽस्ति विभागः परमार्थतः ॥४६॥

आख्यातशब्दे भागाभ्यां साध्यसाधनवर्तिता ।
प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः ॥४७॥

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना ।
[7]सत्त्वभावस्तु यस्तस्याः स घञादिनिबन्धनः ॥४८॥

बन्धुता भेदरूपेण बन्धुशब्दे व्यवस्थिता ।
समूहो बन्ध्ववस्था तु प्रत्ययेनाभिधीयते ॥४९॥

तत्र यं प्रति साध्यत्वमसिद्धा तं प्रति क्रिया ।
सिद्धा तु यस्मिन् साध्यत्वं न तमेव पुनः प्रति ॥५०॥

---

१ ब. तत्र. २ ब. अपरे उपचर्यते. ३ ब. कश्चिदेवं तु. ४ ब. आवृत्तिभावाभ्यां. ५ ब. क्रिया. ६ ब. एकार्थो. ७ त. सत्त्वभागस्तु.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

राज्ञः पुत्रस्य नप्तेति न[1] राज्ञि व्यतिरिच्यते ।
पुत्रस्यार्थः प्रधानत्वं न चास्य विनिवर्तते ॥५१॥

मृगो धावति पश्येति साध्यसाधनरूपता ।
तथा विषयभेदेन सरणस्योपपद्यते ॥५२॥

लकृत्यक्तखलर्थानां तथाऽव्ययकृतामपि ।
रूढिनिष्ठाघञादीनां धातुः साध्यस्य वाचकः ॥५३॥

साध्यस्यापरिनिष्पत्तेः सोऽयमित्यनुपग्रहः ।
तिङन्तैरन्तरेणैवमुपमानं ततो न तैः ॥५४॥

साधनत्वं प्रसिद्धं च तिङ्[2]क्षु संबन्धिनां यतः ।
तेनाध्यारोप एव स्यादुपमा तु न विद्यते ॥५५॥

न्यूनेषु च समानार्थमुपमानं विधीयते ।
क्रिया चैवाश्रये सर्वा तत्र तत्र समाप्यते ॥५६॥

येनैव हेतुना हंसः पततीत्यभिधीयते ।
आतौ तस्य समाप्तत्वादुपमार्थो न विद्यते ॥५७॥

क्रियाणां जातिभिन्नानां सादृश्यं नावधार्यते ।
सिद्धेश्च प्रक्रमे साध्यमुपमातुं न शक्यते ॥५८॥

वनं वृक्षा इति यथा भेदाभेदव्यपाश्रयात् ।
अर्थात्मा भिद्यते भावे स बाह्याभ्यन्तरे क्रमः ॥५९॥

सामा[3]न्ये भाव इत्यत्र यल्लिङ्गमुपलभ्यते ।
भेदा[4]नामुपमेयत्वं न तत्त्वेषु विवक्ष्यते ॥६०॥

निर्देशे चरितार्थत्वाल्लिङ्गं भावे विवक्षितम् ।
[6]उपमासविधत्वाच्च भावादन्यत् पचादिषु ॥६१॥

भवतौ यत् पचादीनां ता[7]वदत्रोपदिश्यते ।
न च लिङ्गं पचादीनां भवतौ समवस्थितम् ॥६२॥

---

१ ब. न राज्ञो. २ ब. भिक्षुसंबन्धिनां. ३ ब. सामान्यं भाव. ४ ब. भेदानामुपमेयत्वं न तत्त्वेषु प्रतीयते. ५ त. भावेऽविवक्षितम्. ६ ब. उपमाने विधित्वाच्च., ७ ब. तावत्तत्रोपदिश्यते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

एकश्च सोऽर्थः सत्ताख्यः कथंचित् कैश्चिदुच्यते ।
लिङ्गानि चा[1]स्या भिद्यन्ते पचिरूपादिभेदवत् ॥६३॥

आचार्यो मातुलश्चेति यथैको व्यपदिश्यते ।
संबन्धिभेदादर्थात्मा स विधिः पक्तिभावयोः ॥६४॥

॥ इति क्रियासमुद्देशोऽष्टमः ॥

कालसमुद्देशः

व्यापारव्यतिरेकेण कालमेके प्रचक्षते ।
नित्यमेकं विभु द्रव्यं परिमाणं क्रियावताम् ॥१॥

दिष्टिप्रस्थसुवर्णादि मू[2]र्तिभेदाय कल्पते ।
क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका ॥२॥

उत्पत्तौ च स्थितौ चापि विनाशे चापि तद्वताम् ।
निमित्तं कालमेवाहुर्विभक्तेनात्मना स्थितम् ॥३॥

तमस्य लोकयन्त्रस्य सूत्रधारं प्रचक्षते ।
प्रतिबन्धाभ्यनुज्ञाभ्यां तेन विश्वं विभज्यते ॥४॥

यदि न प्रतिबध्नीयात् [3]प्रतिबन्धं च नोत्सृजेत् ।
अवस्था व्यतिकीर्येरन् पौर्वापर्यविना[4]कृताः ॥५॥

तस्यात्मा बहुधा भिन्नो भेदैर्धर्मान्तराश्रयैः ।
न हि भिन्नमभिन्नं वा वस्तु किंचन विद्यते ॥६॥

नैको न चाप्यनेकोऽस्ति न शुक्लो नापि चासितः ।
द्रव्यात्मा स तु संसर्गादेवंरूपः प्रकाशते ॥७॥

संसर्गिणां तु ये भेदा[5] विशेषास्तस्य ते मताः ।
सं[6]भिन्नैस्तैरवस्थानां कालो भेदाय कल्पते ॥८॥

विशिष्टकालसंबन्धा[7]त् वृत्तिलाभः प्रकल्पते ।
शक्तीनां स प्रयोग[8]स्य हेतुत्वेनावतिष्ठते ॥९॥

---

१ त. चास्य भिद्यन्ते. २ ब. मूर्तभेदाय. ३ ब. प्रतिबद्धं च. ४ ब. पौर्वापर्ये विनाकृताः. ५ ब. यो भेदो ६ त. स भिन्नस्तैर्व्यवस्थानां. ७ ब. संबन्धो वृत्तिलाभाय कल्पते. ८ ब. संप्रयोगस्य.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

जन्माभिव्यक्तिनियमाः प्रयोगोपनिबन्धनाः ।
नित्याधीनस्थितित्वाच्च स्थितिर्नियमपूर्विका ॥१०॥

स्थितस्यानुग्रहस्तैस्तैर्धर्मैः संसार्गिभिस्ततः ।
प्रतिबन्धस्तिरोभावः प्रहाणमिति चात्मनः ॥११॥

प्रत्यवस्थं तु कालस्य व्यापारो[1]ऽत्र व्यवस्थितः ।
काल[2] एव हि विश्वात्मा व्यापार इति कथ्यते ॥१२॥

मूर्तीनां तेन भिन्नानामाचयापचयाः पृथक् ।
लक्ष्यन्ते परिणामेन सर्वासां भेदयोगिना ॥१३॥

जलयन्त्रभ्रमावेशसदृशीभिः प्रवृत्तिभिः ।
स कलाः [3]कलयन्सर्वाः कालाख्यां लभते विभुः ॥१४॥

प्रतिबद्धाश्च यास्तेन चित्रा विश्वस्य वृत्तयः ।
ताः स एवानुजानाति यथा तन्तुः [4]शकुन्तिनः ॥१५॥

विशिष्टकालसंबधाल्लब्धपाकासु शक्तिषु ।
क्रियाऽभिव्यज्यते नित्या प्रयोगाख्येन कर्मणा ॥१६॥

जातिप्रयुक्ता तस्यां तु फलव्यक्तिः [5]प्रतायते ।
कुतोऽप्यद्भुतया वृत्त्या शक्तिभिः सा नियम्यते ॥१७॥

ततस्तु समवायाख्या [6]शक्तिर्भेदस्य बाधिका ।
एकत्वमिव ता व्यक्तीरापादयति कारणैः ॥१८॥

अथास्मान्नियमादूर्ध्वं जातयो याः प्रयोजिकाः ।
ताः सर्वा व्यक्तिमायान्ति स्वच्छे छाया इवाम्भसि ॥१९॥

कारणानुविधायित्वादथ कारणपूर्वकाः ।
गुणास्तत्रोपलभ्यन्ते स्वजातिव्यक्तिहेतवः ॥२०॥

आश्रयाणां [7]त्वनित्यत्वमाश्रितानां च नित्यता ।
ता व्यक्तीरनुगृह्णाति स्थितिस्तेन प्रकल्पते ॥२१॥

---

१ ब. व्यवहारो व्यवस्थितः. २ ब. काल एव च. ३ त. कालयन् सर्वाः ४ त. शकुन्तिकाः ५ ब. प्रजायते. ६ ब. शक्तिभेदस्य साधिका. ७ त. च नित्यत्वं.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

अनित्यंस्य यथोत्पादे पारतन्त्र्यं तथा स्थितौ ।
विनाशायैव तं[1]त् सृष्टमस्वाधीनस्थितिं विदुः ॥२२॥

स्थितः संसर्गिभिर्भावैः स क्रियास्वनुगृह्यते ।
नैषां सत्ता[2]मनुद्गृह्य वृत्तिर्जन्मवतां स्मृता ॥२३॥

जराख्या कालशक्तिर्या शक्त्यन्तरविरोधिनी ।
सा [3]शक्तीः प्रतिबध्नाति जायन्ते च विरोधिनः ॥२४॥

प्रयोजकास्तु ये भावाः स्थितिभागस्य हेतवः ।
तिरोभवन्ति ते सर्वे यत आत्मा प्रहीयते ॥२५॥

यथैवाद्भुतया वृत्त्या निष्क्रमं निर्निबन्धनम् ।
अपदं जायते सर्वं तथाऽस्यात्मा प्रहीयते ॥२६॥

क्रिययोरपवर्गिण्योर्नानार्थसमवेतयोः ।
संबन्धिना विनैकेन परिच्छेदः कथं भवेत् ॥२७॥

यथा तुलायां हस्ते वा नाना[4]द्रव्यव्यवस्थितम् ।
गुरुत्वं परिमीयेत कालादेवं क्रियागतिः ॥२८॥

जहाति सहवृत्ताश्च क्रियाः स सम[5]वस्थितः ।
व्रीहिर्यथोदकं तेन हायनाख्यां प्रपद्यते ॥२९॥

प्रतिबन्धाभ्यनुज्ञाभ्यां वृत्तिर्या तस्य शाश्वती ।
तया विभज्यमानोऽसौ भजते क्रमरूपताम् ॥३०॥

कर्तृभेदात्तदर्थेषु [6]प्रचयापचयौ गतः ।
समत्वं विषमत्वं वा स एकः प्रतिपद्यते ॥३१॥

क्रियाभेदाद्यथैकस्मिन् तक्षाद्याख्या प्रवर्तते ।
क्रियाभेदात्तथैकस्मिन् ऋत्वाद्याख्योपजायते ॥३२॥

आरम्भश्च क्रिया चैव निष्ठा चेत्यभिधीयते ।
धर्मान्तराणामध्यासभेदात् सदसदात्मनः ॥३३॥

---

१ ब. तत्सृष्टमर्थाभावादिदं स्थितम् । २ ब. सत्तामनुग्राह्या. ३ त. शक्तिं प्रतिबध्नाति. ४ ब. नानाद्रव्यं व्यवस्थितम्. ५ त. समवस्थिताः. ६ त. प्रकर्षापचयौ.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

यावांश्च द्व्यणुकादीनां तावान् हिमवतोऽप्यसौ ।
न त्वात्मा कस्यचिद् भेत्तुं [1]प्रचेतुं वाऽपि शक्यते ॥३४॥

अन्यैस्तु भावैरन्येषां प्रचयः परिकल्प्यते ।
शनैरिदमिदं क्षिप्रमिति तेन प्रतीयते ॥३५॥

असतश्च क्रमो नास्ति स हि भेत्तुं न शक्यते ।
सतोऽपि चात्मतत्त्वं यत्तत्तथैवावतिष्ठते ॥३६॥

क्रियोपाधिश्च सन् भूतभविष्यद्[2]वर्तमानताः ।
एकादशभिराकारैर्[3]विभक्ताः प्रतिपद्यते ॥३७॥

भूतः [4]पञ्चविधस्तत्र भविष्यंस्तु चतुर्विधः ।
वर्तमानो द्विधा ख्यात [5]इत्येकादश कल्पनाः ॥३८॥

काले निधाय स्वं रूपं प्रज्ञया यन्निगृह्यते ।
भावास्ततो निवर्तन्ते तत्र संक्रान्तशक्तयः ॥३९॥

भाविनां चैव यद्रूपं तस्य च प्रतिबिम्बकम् ।
[6]सुनिर्मृष्ट इवादर्शे काल एवोपपद्यते ॥४०॥

तृणपर्णलतादीनि यथा स्रोतोऽनुकर्षति ।
प्रवर्तयति कालोऽपि मात्रा मात्रावतां तथा ॥४१॥

आविश्येवानुसंधत्ते यथा [7]गतिमतां गतीः ।
वायुस्तथैव कालात्मा विधत्ते क्रमरूपताम् ॥४२॥

अयनप्रविभागश्च गतिश्च ज्योतिषां ध्रुवा ।
निवृत्तिप्रभवाश्चैव भूतानां तन्निबन्धनाः ॥४३॥

मात्राणां परिणामा ये [8]कालवृत्त्यनुपातिनः ।
नक्षत्राख्याः पृथक् तेषु चिह्नमात्रं तु तारकाः ॥४४॥

रुतैर्मृगशकुन्तानां स्थावराणां च वृत्तिभिः ।
छायादिपरिणामैश्च ऋतुधामा निरूप्यते ॥४५॥

---

१ ब. हर्तुं प्रचेतुं वा. २ ब. वर्तमानताम्. ३ ब. विभक्ताम्. ४ ओ. ब. पञ्चविधस्तेषां.
५ इत्येकादशकल्पना. ६ ओ. अनिर्दिष्ट इवादर्शे. ७ ब. गतिमतां गतिः ८ त. अनुयायिनः

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

निर्भासोपगमो योऽयं क्रमवानिव दृश्यते ।
अक्रमस्यापि विश्वस्य तत् कालस्य विचेष्टितम् ॥४६॥

दूरान्तिकव्यवस्थानमध्वाधिकरणं यथा ।
चिरक्षिप्रव्यवस्थानं कालाधिकरणं[1] तथा ॥४७॥

तस्याभिन्नस्य कालस्य व्यवहारे क्रियाकृताः ।
भेदा इव त्रयः सिद्धा यांल्लोको नातिवर्तते ॥४८॥

एकस्य शक्तयस्तिस्रः कालस्य समवस्थिताः ।
यत्संबन्धेन भावानां दर्शनादर्शने सताम् ॥४९॥

द्वाभ्यां स किल शक्तिभ्यां भावानां वरणात्मकः ।
शक्तिस्तु वर्तमानाख्या भावरूपप्रकाशिनी ॥५०॥

अनागता जन्मशक्तेः शक्तिरप्रतिबन्धिका ।
अतीताख्या तु या शक्तिस्तया जन्म निरुध्यते[2] ॥५१॥

तमःप्रकाशवत्त्वेते त्रयोऽध्वानो व्यवस्थिताः ।
अक्रमास्तेषु भावानां क्रमः समुपलभ्यते ॥५२॥

द्वौ तु तत्र तमोरूपावेकस्यानेकवत्[3] स्थितिः ।
अतीतमपि केषांचित् पुनर्विपरिवर्तते ॥५३॥

युगपद्वर्तमानत्वं तद्धर्मा प्रतिपद्यते ।
केषांचिद्वर्तमानत्वात् चैति तद्वदतीतताम् ॥५४॥

हेतूपकारादाक्षिप्तो वर्तमानत्वमागतः ।
शान्तहेतूपकारः सँन् पुनर्नोपैति दर्शनम् ॥५५॥

द्वे एव कालस्य विभोः केषांचिच्छक्तिवर्त्मनी ।
करोति याभ्यां भावानामुन्मीलननिमीलने ॥५६॥

कलाभिः पृथगर्थाभिः प्रविभक्तं स्वभावतः ।
केचिद् बुद्ध्यनुसंहारलक्षणं तं प्रचक्षते ॥५७॥

---

१ ब. कालादिकरणं तथा. २ त. विरुध्यते. ३ त. एकस्यालोकवत्.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

ज्ञानानुगतशक्तिं वा बाह्यं वा सत्यतः स्थितम् ।
कालात्मानमनाश्रित्य व्यवहर्तुं न शक्यते ॥५८॥

तिस्रो[1]भावस्य भावस्य केषां चिद्धावशक्तयः ।
ताभिः स्वशक्तिभिः सर्वं सदैवास्ति च नास्ति च ॥५९॥

[2]सत्त्वादव्यतिरेकेण तास्तिस्रोपि व्यवस्थिताः ।
क्रमस्तास्तदभेदाच्च सदसत्त्वं न[3] भिद्यते ॥६०॥

[4]दर्शनादर्शनेनैकं दृष्टादृष्टं तदेव तु ।
अध्वनामेकता नास्ति न च किंचिन्निवर्तते ॥६१॥

शक्त्यात्मदेवता[5]पक्षैर्भिन्नं कालस्य दर्शनम् ।
प्रथमं तदविद्यायां यद्विद्यायां न विद्यते ॥६२॥

अभेदे यदि कालस्य ह्रस्वदीर्घप्लुतादिषु ।
दृश्यते भेदनिर्भासः स चिरक्षिप्रबुद्धिवत् ॥६३॥

ह्रस्वदीर्घप्लुतावृत्त्या नालिकासलिलादिषु ।
कथं प्र[6]चययोगः स्यात् कल्पनामात्रहेतुकः ॥६४॥

अभिव्यक्तिनिमित्तस्य प्रचयेन प्रचीयते ।
अभिन्नमपि शब्दस्य तत्त्वमप्रचयात्मकम् ॥६५॥

एवं मात्रातुरीयस्य भेदो दा[7]शतयस्य वा ।
परिमाणविकल्पेन शब्दात्मनि न विद्यते ॥६६॥

[8]अनुनिष्पादिकल्पेन येन्तराल इव स्थिताः ।
शब्दास्ते प्रतिपत्तॄणामुपायाः प्रतिपत्तये ॥६७॥

विशिष्टमवधिं तं तमुपादाय प्रकल्पते ।
कालः [9]कलावतामेकः क्षणमासर्तुभेदभाक् ॥६८॥

बुद्ध्यवग्रहभेदाच्च व्यवहारात्मनि स्थितैः[10] ।
तावानेव क्षणः कालो युगमन्वन्तराणि वा ॥६९॥

---

१ ब. तिस्रोऽभावस्य; ओ. तिस्रस्त्ववस्था भावस्य केषां चित् कालशक्तयः. २ ब. सत्त्वादिव्यतिरेकेण. ३ ओ. न विद्यते. ४ ब. दर्शनादर्शने नैकं. ५ त. देवतापक्षे भिन्नं. ६ त. प्रचययोग्यः स्यात्. ७ ब. भेदे दाशतयस्य. ८ ब. अनुनिष्पादितत्त्वेन. ९ ओ. कालवतामेकः. १० ब. स्थितेः

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

प्रतिबन्धाभ्यनुज्ञाभ्यां नालिकाविवराश्रिते ।
यदम्भसि प्रक्षरणं तत्कालस्यैव चेष्टितम् ॥७०॥

अल्पे महति वा छिद्रे तत्संबन्धे न भिद्यते ।
कालस्य वृत्तिरात्मापि तमेवास्यानुवर्तते ॥७१॥

आक्रीड इव कालस्य दृश्यते यः स्वशक्तिभिः ।
बहुरूपस्य भावेषु बहुधा तेन भिद्यते ॥७२॥

त्वचिसारस्य वा वृद्धिं तृणराजस्य वा दधत् ।
तावत् तद्वृद्धियोगेन कालतत्त्वं विकल्पते ॥७३॥

व्यतिक्रमेऽपि मात्राणां तस्य नास्ति व्यतिक्रमः ।
न गन्तृगतिभेदेन मार्गभेदोऽस्ति कश्चन ॥७४॥

उदयास्तमयावृत्त्या ज्योतिषां लोकसिद्धया ।
[1]कालस्याव्यतिपातेपि ताद्धर्म्यमिव लक्ष्यते ॥७५॥

आदित्यग्रहनक्षत्रपरिस्पन्दमथापरे ।
भिन्नमावृत्तिभेदेन कालं कालविदो विदुः ॥७६॥

क्रियान्तर[2]परिच्छेदे प्रवृत्ता या क्रियां प्रति ।
निर्ज्ञातपरिमाणा सा काल इत्यभिधीयते ॥७७॥

ज्ञाने रूपस्य संक्रान्तिर्ज्ञानेनैवानुसंहृतिः ।
अतः क्रियान्तराभावे सा क्रिया काल इष्यते ॥७८॥

भूतो घट इतीयं च सत्ताया एव भूतता ।
भूता सत्तेति सत्तायाः सत्ता भूताऽभिधीयते ॥७९॥

परतो भिद्यते सर्वमात्मा तु न विकल्प्य[3]ते ।
पर्वतादिस्थितिस्तस्मात् पररूपेण भिद्यते ॥८०॥

प्रसिद्धभेदा व्यापारा विरूपावयवक्रियाः ।
साहचर्येण भिद्यन्ते सरूपावयवक्रियाः ॥८१॥

व्यवधानमिवोपैति निवृत्त इव दृश्यते ।
क्रियासमूहो भुज्यादिरन्तरालप्रवृत्तिभिः ॥८२॥

---

१ ब. कालस्य व्यतिपातेपि. २ ब. परिच्छेदप्रवृत्ता. ३ ओ. ब. विकल्पते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

[1]न च विच्छिन्नरूपोऽपि सोऽविरामान्निवर्तते ।
सर्वैव हि क्रियाऽन्येन संकीर्णेवोपलभ्यते ॥८३॥

तदन्तरालदृष्टा वा सर्वैवावयवक्रिया ।
सादृश्यात् सति भेदे तु तदङ्गत्वेन गृह्यते ॥८४॥

सदसद् वाऽपि वस्तु स्यात् तृतीयं नास्ति किंचन ।
तेन भूतभविष्यन्तौ मुक्त्वा मध्यं न विद्यते ॥८५॥

निर्वृत्तिरूपमेकस्य भेदाभावान्न कल्पते ।
सदसद्वापि तेनैकं [2]क्रमरूपं कथं भवेत् ॥८६॥

बहूनां चानवस्थानात् एकमेवोपलभ्यते ।
यथोपलब्धि स्मरणं तत्र चाप्युपपद्यते ॥८७॥

सदसद्रूपमेकं स्यात् [3]सर्वत्रैकत्वकल्पने ।
निर्वृत्तिरूपं निर्वृत्तेः सामान्यमथवा भवेत् ॥८८॥

कार्योत्पत्तौ समर्थं वा स्वेन धर्मेण तत्तथा ।
आत्मतत्त्वेन गृह्येत सा चास्मिन् वर्तमानता ॥८९॥

क्रियाप्रबन्धरूपं यदध्यात्मं विनिगृह्यते ।
संक्रान्तबिम्बमेकत्र तामाहुर्वर्तमानताम् ॥९०॥

क्रियातिपत्तिरत्यन्तं क्रियानुत्पत्तिलक्षणा ।
[4]न च भूतमनुत्पन्नं न भविष्यत्तथाविधम् ॥९१॥

प्राग्विरुद्धक्रियोत्पादान्निवृत्ते [5]वा विरोधिनि ।
[6]व्यापारेऽवधिभेदेन विषयस्तत्र भिद्यते ॥९२॥

[7]व्यभिचारे निमित्तस्य साधुत्वं न प्रकल्पते ।
भाव्यासीदिति सूत्रेण तत् कालेन्यत्र शिष्यते ॥९३॥

स्वकाल एव साधुश्चेत्कालभेदे गतिः कथम् ।
वाक्यार्थादतदर्थेषु विशिष्टत्वं न सिध्यति ॥९४॥

---

१ ब. लेखकप्रमादाट्टीकायां दर्शितेयं कारिका तथैव मुद्रिता भाति. २ ब. कर्मरूपं. ३ ओ. सर्वस्यैकत्व. ४ ब. न चाभूतमनुत्पन्नं. ५ ओ. निवृत्तेर्वा. ६ ब. व्यापारे विधिभेदेन. ७ ब. व्यभिचारो निमित्तस्य साधुत्वे न प्रकल्पते ।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

तदर्थश्चेदवयवो भाविनो भूततागतिः ।
न स्यादत्यन्तभूतत्वमेवैकं तत्र संभवेत् ॥९५॥

विशिष्टकालता पूर्वं तथापि[1] तु विशेषणे ।
आश्रयात्सोऽन्तरङ्गत्वात्तत्र साधुर्भविष्यति ॥९६॥

आमिश्र एव प्रक्रान्तः स पदार्थस्तथा[2] विधिः ।
केवलस्य विमिश्रत्वं नित्येऽर्थे[3] नोपपद्यते ॥९७॥

शुद्धे च काले व्याख्यातमामिश्रे न प्रसिध्यति ।
साधुत्वमयथाकालस्[4]तत्सूत्रेणोपदिश्यते ॥९८॥

आख्यातपदवाच्येऽर्थे निर्वर्त्यत्वात् प्रधानता ।
विशेषणं तदाक्षेपात्तत्काले व्यवतिष्ठते ॥९९॥

संप्रत्ययानुकारो वा शब्दव्यापार एव वा ।
अध्यस्यते विरुद्धेऽर्थे न च तेन विरुध्यते ॥१००॥

भूतं भविष्यदित्येतौ प्रत्ययौ वर्तमानताम् ।
अत्यजन्तौ प्रपद्येते विरुद्धाश्रयरूपताम् ॥१०१॥

अध्वनो वर्तमानस्य यः शेषो य उपक्रमः ।
तद् वर्तमानसामीप्यं शास्त्रे भेदेन दर्शितम् ॥१०२॥

आशंसा वर्तमानाऽपि विषयेण भविष्यता ।
भाष्ये भविष्यत्कालेति कार्यार्थं व्यपदिश्यते ॥१०३॥

इच्छा चिकीर्षतीत्यत्र स्वकालमनुरुध्यते ।
भविष्यति प्रकृत्यर्थे तत्कालं नानुरुध्यते ॥१०४॥

आशंस्यमानतन्त्रत्वात् आशंसायां विपर्ययः ।
प्रयोक्तृधर्मः शब्दार्थे शब्दैरेवानुषज्यते ॥१०५॥

अप्शालिबीजसंयोगे वर्तते निष्पदिर्यदा ।
तत्रावयववृत्तित्वाद् भविष्यत्प्रतिषेधनम् ॥१०६॥

---

१ ब. तथापि न विशेषणे । २ ओ. ब तथाविधः. ३ ओ ब. नित्यत्वे नोपपद्यते.
४ ओ. अयथाकालं.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

फलप्रसवरूपे तु निष्पंदौ[1] भूतकालता ।
धर्मान्तरेषु तद्रूपमध्यस्य परिकल्प्यते ॥१०७॥

उपयुक्ते नियुक्तानां[2] व्यापारे फलसिद्धये ।
तत्र रूपं यदध्यस्तं तत्कालं तत् प्रतीयते ॥१०८॥

निष्पत्तावववधिः कश्चित् कश्चित् प्रतिविवक्षितः ।
हेतुजन्मव्यपेक्षातः फलजन्मेति चोच्यते ॥१०९॥

अन्यान्यसाधनाधीना[3] सिद्धिर्यत्र विवक्षिता ।
तत्[4] साधनान्तराभावात् सिद्धमित्युपदिश्यते ॥११०॥

तस्मादवधिभेदेन सिद्धा मुख्यैव भूतता ।
अनागतत्वमस्तित्वं हेतुधर्मव्यपेक्षणे ॥१११॥

सत्तामिन्द्रियसंबन्धात् सैव सत्ता विशिष्यते ।
भेदेन व्यवहारो हि वस्त्वन्तरनिबन्धनः ॥११२॥

अस्तित्वं वस्तुमात्रस्य बुद्ध्या तु परिगृह्यते ।
यः[5] समासादनाद् भेदः स तत्र न विवक्षितः ॥११३॥

योगाद्वा स्त्रीत्वपुंस्त्वाभ्यां न किंचिदवतिष्ठते ।
स्वस्मिन्नात्मनि तत्रान्यत् भूतं भावि च कथ्यते[6] ॥११४॥

॥ इति कालसमुद्देशो नवमः ॥

दशमः पुरुषसमुद्देशः

प्रत्यक्ता परभावश्चाप्युपाधी कर्तृकर्मणोः ।
तयोः श्रुतिविशेषेण वाचकौ मध्यमोत्तमौ ॥१॥

सदसद्वाऽपि चैतन्यमेताभ्यामेव गम्यते[7] ।
चैतन्यभागे पुरुषः प्रथमो न तु वर्तते ॥२॥

बुधिजानातिचितिभिः[8] प्रथमे पुरुषे सति ।
संज्ञानार्थैर्न चैतन्यस्योपयोगः प्रकाश्यते ॥३॥

---

१ ब. निष्पदो. २ ब. निमित्तानां. ३ ओ. त. अबहिस्साधनाधीना. ४ ब तत्साधनान्तराभावनिमित्ता व्यपदिश्यते. ५ ब. यः समासदनाद्भेदः. ६ ब. भावि च तन्यते. ७ ब. एताभ्यामवगम्यते. ८ ओ. ब. बुद्धिजानाति.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

संबोधनार्थः सर्वत्र मध्यमे कैश्चिदिष्यते ।
तथा संबोधने सर्वां प्रथमां युष्मदो विदुः ॥४॥

संबोधनं न लोकेऽस्ति विधातव्येन वस्तुना ।
स्वाहेन्द्रशत्रुर्वर्धस्व यथा राजा भवेति च ॥५॥

युष्मदः प्रथमान्तस्य परश्चेन्न पदादसौ ।
युष्मदर्थस्य सिद्धत्वान्नियता चाद्युदात्तता ॥६॥

गुणप्रधानताभेदः पुरुषादिविपर्ययः ।
निर्दिष्टस्यान्यथा शास्त्रे नित्यत्वान्न विरुध्यते ॥७॥

यथानिर्देशमर्थाः स्युस्तेषां शास्त्रं विधायकम् ।
किंचित्सामान्यमाश्रित्य स्थिते तु प्रतिपादनम् ॥८॥

योऽश्वे यः पीठ इत्यत्र भूतयोरश्वपीठयोः ।
यथोपलक्षणार्थत्वं तथाऽर्थेष्वनुशासनम् ॥९॥

॥ इति पुरुषसमुद्देशो दशमः ॥

॥ अथैकादशः संख्यासमुद्देशः ॥

संख्यावान् सत्त्वभूतोऽर्थः सर्व एवाभिधीयते ।
भेदाभेदविभागो हि लोके संख्यानिबन्धनः ॥१॥

स धर्मो व्यतिरिक्तो वा तेषामात्मैव वा तथा ।
भेदहेतुत्वमाश्रित्य संख्येति व्यपदिश्यते ॥२॥

समवेता परिच्छेद्ये क्वचिदन्यत्र सा स्थिता ।
प्रकल्पयति भावानां संख्याभेदं तथात्मनः ॥३॥

परत्वे चापरत्वे च भेदे तुल्या श्रुतिर्यथा ।
संख्याशब्दाभिधेयत्वं भेदहेतोस्तथा गुणे ॥४॥

अस्वतन्त्रे स्वतन्त्रत्वं परधर्मो यथा गुणे ।
अभेद्ये भेद्यभावोपि द्रव्यधर्मस्तथा गुणे ॥५॥

स्वबुद्ध्या तमपोद्धृत्य लोकोऽप्यागममाश्रितः ।
स्वधर्मादन्यधर्मेण व्याचष्टे प्रतिपत्तये ॥६॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

परोपकारतत्त्वानां स्वातन्त्र्येणाभिधायकः ।
शब्दः सर्वपदार्थानां स्वधर्माद्विप्रकृष्यते ॥७॥

यथैवाविषयं ज्ञानं न किंचिदवभासते ।
तथा भावोऽप्यसंसृष्टो न कश्चिदुपलभ्यते ॥८॥

भेदेन तु समाख्यानं यल्लोकोऽप्यनुवर्तते ।
आगमाच्छास्त्रसदृशो व्यवहारः स वर्ण्यते ॥९॥

बुद्धौ[1] स्थितेषु तेष्वेवमध्यारोपो न दुर्लभः ।
परधर्मस्य न ह्यत्र सदसत्त्वं प्रयोजकम् ॥१०॥

सामान्येष्वपि सामान्यं विशेषेषु विशिष्टता ।
संख्यासु संख्या लिङ्गेषु लिङ्गमेवं प्रकल्पते ॥११॥

अतो द्रव्याश्रितां संख्यामाहुः संसर्गवादिनः ।
भेदाभेदव्यतीतेषु भेदाभेदविधायिनीम्[2] ॥१२॥

आत्मान्तराणां येनात्मा तद्रूप[3] इव लक्ष्यते ।
अतद्रूपेण संसर्गात् सा निमित्तसरूपता[4] ॥१३॥

संसृष्टेष्वपि निर्भाग[5]भूतेष्वर्थक्रिया यथा ।
सत्त्वादिषु च मात्रासु सर्वास्वेवं प्रतीयते ॥१४॥

द्वित्वादियोनिरेकत्वं भेदास्तत्पूर्वका यतः ।
विना तेन न संख्यानामन्यासामस्ति संभवः ॥१५॥

एकत्वे बुद्धिसहिते निमित्तं द्वित्वजन्मनि ।
एकत्वाभ्यां समुत्पन्नमेवं वा तत् प्रतीयते ॥१६॥

एकत्वसमुदायो वा सापेक्षे वा पृथक्पृथक् ।
एकत्वे द्वित्वमित्येवं तयोर्द्विवचनं भवेत् ॥१७॥

एकोपि गुणभेदेन संघो भेदं प्रकल्पयेत् ।
आश्रयाश्रयिभेदो हि तदाश्रयनिबन्धनः ॥१८॥

---

१ त. बुद्ध्यास्थितेषु. २ ब. विधायिनाम्. ३ ब. तद्रूपं तूपलक्ष्यते. ४ ब. °स्वरूपता. ५ त. निर्भागे भूतेषु; ओ. निर्भासाभूतेषु.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

संख्येयसंघसंख्यानसंघः संख्येति कथ्यते ।
विंशत्यादिषु साऽन्यस्य द्रव्यसंघस्य भेदिका ॥१९॥

एकविंशतिसंख्यायां संख्यान्तरसरूपयोः ।
एकस्यां बुद्ध्यवचनावृत्त्या भागयोरिव कल्पना ॥२०॥

असंख्यासमुदायत्वात् संख्याकार्यं विधीयते ।
समूहत्वे तु तन्न स्यात् स्वाङ्गादिसमुदायवत् ॥२१॥

संख्येयान्तरतन्त्रासु या संख्यासु प्रवर्तते ।
आवृत्तिवर्ग[1]संख्येयां तां संख्यां तादृशीं विदुः ॥२२॥

न संख्यायां न संख्येये द्वौ दशेत्यस्ति संभवः ।
भेदाभावान्न संख्यायां[2] विरोधान्न तदाश्रये ॥२३॥

संख्यायेते दशद्वर्गौ द्विदशा इति संख्यया ।
तद्रूपे वाऽपि संख्येये आवृत्तिः [3]परिभण्यते ॥२४॥

संख्या नाम न संख्यास्ति संज्ञैषेति यथोच्यते ।
रूपं न[4] रूपमित्येवं संज्ञा सा हि सितादिषु ॥२५॥

संख्यात्व[5]जातियोगाच्च संख्या संख्येति कथ्यते ।
रूपत्वजातियोगाच्च रूपे रूपमिति स्मृतम् ॥२६॥

निमित्तमेक[6]मित्यत्र विभक्त्या नाभिधीयते ।
तद्वतस्तु यदेकत्वं विभक्तिस्तत्र वर्तते ॥२७॥

एकस्य प्रचयो दृष्टः समूहश्च द्वयोस्तथा ।
निमित्तव्यतिरेकेण संख्याऽन्या भेदिका ततः ॥२८॥

तदेकमपि चैकत्वं विभक्तिश्रवणादृते ।
नोच्यते तेन शब्देन विभक्त्या तु सहोच्यते ॥२९॥

अन्वयव्यतिरेकौ च[7] यदि स्याद्वचनान्तरम् ।
स्यातामसति तस्मिंश्च प्रकृत्यर्थो न कल्प्यते ॥३०॥

---

१ त. °संख्येया. २ ब. संख्याया. ३ परिगण्यते. ४ त. न रूपमप्येवं. ५ औ. संख्यातजातिः ६ त. एक इत्यत्र. ७ ब. न यदि स्यात्.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

एकत्वमेक इत्यत्र शुद्धद्रव्यविशेषणम् ।
सगुणस्तु प्रकृत्यर्थो विभक्त्यर्थेन भिद्यते ॥३१॥

द्व्येकयोरिति निर्देशात्संख्यामात्रेऽपि संभवः ।
एकादीनां प्र[1]सिद्ध्या तु संख्येयार्थत्वमुच्यते ॥३२॥

॥ इत्येकादशः संख्यासमुद्देशः ॥

द्वादश उपग्रहसमुद्देशः

य[2] आत्मनेपदाद्भेदः क्वचिदर्थस्य गम्यते ।
अन्यतश्चापि लादेशात् म[3]न्यन्ते तमुपग्रहम् ॥१॥

क्वचित्साधनमेवासौ क्वचित्तस्य विशेषणम् ।
साधनं तत्र कर्मादि [4]व्यक्तिवाचां विशेषणम् ॥२॥

क्रिया[5] विषयभेदेन जीविका[6]दिषु भिद्यते ।
लादेशैः स क्रियाभेदो वाक्येष्वपि नियम्यते ॥३॥

धात्वर्थस्तद्विशेषश्चाप्युक्तः क्वचिदुपग्रहः ।
धात्वर्थो गन्धनादिः स्यात् व्यतिहारो विशेषणम् ॥४॥

क्रि[7]याप्रवृत्तावाख्याता कैश्चित्स्वा[8]र्थपरार्थता ।
असती वा सती वाऽपि विवक्षितनिबन्धना ॥५॥

केषांचित्कर्त्रभिप्राये णिचा सह विकल्पते[9] ।
आत्मनेपदमन्येषां तदर्था प्रकृतिर्यथा ॥६॥

क्रीणीष्व वपते धत्ते चिनोति चिनुतेऽपि च ।
आप्तप्रयोगा दृश्यन्ते येषु ण्यर्थोऽभिधीयते ॥७॥

संविधानं पचादीनां क्वचिदर्थः प्रतीयते ।
तन्निमित्ता यथाऽन्याऽपि क्रियाऽधिश्रयणादिका ॥८॥

कर्त्रभिप्रायता सूत्रे क्रियाभेदोपलक्षणम् ।
तथाभूता क्रिया या हि तत्कर्ता फलभाग् यतः ॥९॥

---

१ त. प्रसिद्धा तु. २ ओ. यस्त्वात्मनेपदात्. ३ ब. मन्यते. ४ त. व्यक्तिवाचो विशेषणम्. ५ ब. क्रियाविषय० ६ ब. जीवितादिषु. ७ त. क्रिया प्रवृत्ता व्याख्याता. ८ ब. स्वार्था परार्थता. ९ ब. विकल्प्यते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

यथोपलक्ष्यते कालः तारकादर्शनादिभिः ।
तथा फलविशेषेण क्रियाभेदो निदर्श्यते ॥१०॥

क्रियाविशेषवचने सामर्थ्यमुपरुध्यते ।
केषांचिदन्ये तु कृताः स्वरितेतो ञितस्तथा ॥११॥

अनुबन्धश्च सिद्धेऽर्थे स्मृत्यर्थमनुषज्यते ।
तुल्यार्थेष्वपि चावश्यं न सर्वेष्वेकधर्मता ॥१२॥

दृशीक्ष्योः सदृशेऽप्यर्थे नाभेदः प्रतिपूर्वयोः ।
ण्यर्थोपादायिनस्तस्मात् न तुल्यार्थाः पचादिभिः ॥१३॥

उम्भ्यर्थे वर्तमानस्य करोतेर्भिन्नधर्मणः ।
ण्यर्थोपादायिता तस्मात् नियताः शब्दशक्तयः ॥१४॥

तथा ह्यनुप्रयोगस्य करोतेरात्मनेपदे ।
पूर्ववद् ग्रहणं प्राप्ते स्वरितं [1]समुपस्थितम् ॥१५॥

एकत्वेऽपि क्रियाऽऽख्याते साधनाश्रयसंख्यया ।
भिद्यते न तु लिङ्गाख्यो भेदस्तत्र तदाश्रितः ॥१६॥

तस्मादवस्थितेप्यर्थे कस्यचित्प्रतिवध्यते ।
शब्दस्य [2]शक्तिः स त्वेष शास्त्रेऽन्वाख्यायते विधिः ॥१७॥

यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः ।
तत् प्रधानं फलं तेषां न लाभादि [3]प्रयोजकम् ॥१८॥

[4]यदोभौ स्वामिदासौ तु प्रारभेते सह क्रियाम् ।
युगपद्धर्मभेदेन धातुस्तत्र न वर्तते ॥१९॥

यत्र प्रतिविधानार्थः पचिस्तत्रात्मनेपदम् ।
परस्मैपदमन्यत्र संस्काराद्यभिधायिनि ॥२०॥

संविधातुश्च सांनिध्याद् दासे धर्मोनुषज्यते ।
प्लक्षशब्दस्य सांन्निध्यान्न्यग्रोधे प्लक्षता यथा ॥२१॥

---

१ ब. सदुपस्थितम्. २ ब. शक्तिर्न त्वेष शास्त्रे. ३ त. प्रयोजनम्. ४ त. यत्रोभौ. ५. ब. सांनिध्याभावे धर्मः.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

पुरोडाशाभिधानं च धानादिषु यथा स्थितम् ।
छत्त्रिणा चाभिसंबन्धात् छत्त्रिशब्दाभिधेयता ॥२२॥

अर्थात्प्रतीतमन्योन्यं पारार्थ्यमविवक्षितम् ।
इत्ययं शेषविषयः कैश्चिदत्रानुवर्ण्यते[1] ॥२३॥

अथ प्रतिविधानाय[2] हलैः कृषति पञ्चभिः ।
भाष्ये नोदाहृतं कस्मात् प्राप्तं तत्रात्मनेपदम् ॥२४॥

प्रतीतत्वात्तदर्थस्य शेषत्वं यदि[3] कल्प्यते ।
न स्यात् प्राप्तविभाषाऽसौ स्वरितेतां[4] निवर्तिका ॥२५॥

शुद्धे तु संविधानार्थे कैश्चिदत्रेष्यते कृषिः ।
तद्धर्मा यजिरित्येवं न स्यात्तत्रात्मनेपदम् ॥२६॥

अत्र तूपपदेनायमर्थभेदः प्रतीयते ।
प्राप्ते विभाषा क्रियते तस्मान्नास्त्यात्मनेपदम् ॥२७॥

॥ इत्युपग्रहसमुद्देशो द्वादशः ॥

अथ त्रयोदशो लिङ्गसमुद्देशः

स्तनकेशादिसंबन्धो विशिष्टा वा स्तनादयः ।
तदुपव्यञ्जना जातिर्गुणावस्था गुणास्तथा ॥१॥
शब्दोपजनितोऽर्थात्मा शब्दसंस्कार इत्यपि ।
लिङ्गानां लिङ्गतत्त्वज्ञैर्विकल्पाः सप्त दर्शिताः ॥२॥

उपादानविकल्पाश्च लिङ्गानां सप्त वर्णिताः ।
विकल्पसंनियोगाभ्यां ये शब्देषु व्यवस्थिताः ॥३॥

तिस्रो जातय एवैताः केषांचित्समवस्थिताः ।
अविरुद्धा विरुद्धाभिर्गोमहिष्यादिजातिभिः ॥४॥

हस्तिन्यां वडवायां च स्त्रीतिबुद्धेः समन्वयः ।
अतस्तां जातिमिच्छन्ति द्रव्यादिसमवायिनीम् ॥५॥

---

१ ब. कश्चिदत्रानुवर्ण्यते. २ त. प्रतिविधाता यो. ३ ब. यदि कथ्यते. ४ ब. स्वरिते तन्निवर्तिका.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

परतन्त्रस्य यल्लिङ्गमपोद्धारे विव[1]क्षिते ।
तत्रासौ शब्दसंस्कारः शब्दैरेव व्य[2]वस्थितः ॥६॥

बुद्ध्या[3] कल्पितरूपेषु लिङ्गेष्वपि च संभवः ।
स्त्रीत्वादीनां व्यवस्था हि सा लिङ्गैर्व्यपदिश्यते ॥७॥

यथा सलिलनिर्भासो मृगतृष्णासु जायते ।
जलोपलब्ध्यनुगुणात् बीजाद् बुद्धिर्जलेऽसति ॥८॥

तथैवाव्यपदेश्येभ्यो हेतुभ्यस्तारकादिषु ।
मुख्येभ्य इव लिङ्गेभ्यो भेदा लोके व्यवस्थिताः ॥९॥

व्यक्तेषु व्यक्तरूपाणां स्तनादीनां तु दर्शनात् ।
[4]अव्यक्तव्यञ्जना व्यक्तेर्जातिर्न परिकल्प्यते ॥१०॥

अस्तित्वं च प्रतिज्ञाय य[5]दा दर्शनमिच्छतः ।
[6]अत्यन्तादर्शनेन स्यादसत्त्वं प्रति निश्चयः ॥११॥

न चालमनुमानाय शब्दो दर्शनपूर्वकः ।
सिद्धे हि दर्शने किं स्याद[7]नुमानप्रयोजनम् ॥१२॥

आविर्भावस्तिरोभावः स्थितिश्चेत्यनपायिनः ।
धर्मा मूर्तिषु सर्वासु लिङ्गत्वेनानुदर्शिताः ॥१३॥

सर्वमूर्त्यात्मभूतानां शब्दादीनां गुणे गुणे ।
त्रयः [8]सत्त्वादिधर्मास्ते सर्वत्र समवस्थिताः ॥१४॥

रूपस्य चात्ममात्राणां शुक्लादीनां प्रतिक्षणम् ।
[9]काचित् प्रचीयते काचित् कथंचिदपचीयते ॥१५॥

[10]क्वथितोदककल्पैषामनवास्थितवृत्तिता ।
अजस्रं सर्वभावानां भाष्य एवोपवर्णिता ॥१६॥

प्रवृत्तेरेकरूपत्वं साम्यं वा स्थितिरुच्यते ।
आविर्भावतिरोभावप्रवृत्त्या [11]व्यवतिष्ठते ॥१७॥

---

१ ब. विवक्ष्यते । तत्रादौ. २ ओ. त. व्यपाश्रितः. ३ ओ. बुद्धिकल्पित० ४ ओ. अव्यक्तव्यञ्जना व्यक्तेर्नीतिर्न. ५ त. सदादर्शनमिच्छतः. ६ ओ. अव्यक्तदर्शने न ... निर्णयः । ७ ओ. अनुमानप्रयोजकम्. ८ ब. शब्दादिधर्मास्ते. ९ ओ. त. काचित्प्रलीयते काचित् कथंचिदभिवर्धते । १० त. क्वथितोदकवच्चैषाम्. ११ त. वावतिष्ठते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

गुणा[1] इत्येव बुद्धेर्वा निमित्तत्वं स्थितिर्मता ।
स्थितेश्च सर्वलिङ्गानां सर्वनामत्वमुच्यते ॥१८॥

स्थितेषु[2] त्रिषु लिङ्गेषु विवक्षानियमाश्रयः ।
कस्यचिच्छब्दसंस्कारे व्यापारः क्वचिदिष्यते ॥१९॥

संनिधाने निमित्तानां किंचिदेव प्रवर्तकम् ।
यथा तक्षादिशब्दानां लिङ्गेषु नियमस्तथा ॥२०॥

भावतत्त्वदृशः शिष्टाः शब्दार्थेषु व्यवस्थिताः[3] ।
यद्यद्धर्मेऽङ्गतामेति लिङ्गं तत्तत् प्रचक्षते ॥२१॥

स्वरभेदाद्यथा शब्दाः साधवो विषयान्तरे ।
लिङ्गभेदात्तथा सिद्धात् साधुत्वमनुगम्यते ॥२२॥

प्रयोगो विप्रयोगश्च लोके यत्रोपलभ्यते ।
शास्त्रमारभ्यते तत्र न प्रयोगो[4] विपर्यये ॥२३॥

उपाधिभेदादर्थेषु गुणधर्मस्य कस्यचित् ।
निमित्तभावः साधुत्वे विवक्षा च व्यवस्थिता ॥२४॥

हिमारण्ये महत्त्वेन युक्ते स्त्रीत्वमवस्थितम् ।
ह्रस्वोपाधिविशिष्टायाः कुट्याः प्रसवयोगिता[5] ॥२५॥

शब्दान्तराणां भिन्नेऽर्थे उपायाः प्रतिपत्तये ।
एकतामिव निश्चित्य लघ्वर्थमुपदर्शिताः ॥२६॥

उत्पत्तिः प्रसवोऽन्येषां नाशः संस्त्यानमित्यपि ।
आत्मरूपं तु भावानां स्थितिरित्युपदिश्यते[6] ॥२७॥

दृष्टं निमित्तं केषांचित् जात्यादिवदवस्थितम् ।
दृष्टवच्छब्दसंस्कारमात्रं तु परिकल्पितम् ॥२८॥

यथा प्रसिद्धेऽप्येकत्वे नानात्वाभिनिवेशिनः ।
नानात्वं जनयन्तीव शब्दा[7] लिङ्गेऽपि स क्रमः ॥२९॥

---

१ ब. गुण इत्येव. २ त. स्थितेषु सर्वलिङ्गेषु. ३ ब. व्यवस्थितम् । ४ त. प्रयोगाविपर्यये. ५ ब. प्रसवयोग्यता. ६ ब. इत्युपदिश्यते. ७ त. शब्दो लिङ्गेपि.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

इदं वेयमयं वेति शब्दसंस्कारमात्रकम् ।
निमित्तदर्शनोदर्थः कैश्चित्सर्वत्र वर्ण्यते ॥३०॥

नावश्यं विषयत्वेन निमित्तं व्यवतिष्ठते ।
इन्द्रियादि यथादृष्टं भेदहेतुस्तदिष्यते ॥३१॥

॥ इति लिङ्गसमुद्देशस्त्रयोदशः ॥

चतुर्दशो वृत्तिसमुद्देशः

कुत्साप्रशंसातिशयैः समासार्थं तु युज्यते ।
पदं स्वार्थादयः सर्वे यस्मात् कुत्सादिहेतवः ॥१॥

देवदत्तादिकुत्सायां वर्तते कुत्सितश्रुतिः ।
कुत्सितस्था तु या कुत्सा तदर्थः को विधीयते ॥२॥

प्रकृष्ट इति शुक्लादिप्रकर्षस्याभिधायकः ।
प्रकृष्टस्य प्रकर्षे तु तरबादिर्विधीयते ॥३॥

कुत्सितत्त्वेन कुत्स्यो वा न सम्यग् वापि कुत्सितः ।
स्वशब्दाभिहिते केन विशिष्टोऽर्थः प्रतीयते ॥४॥

न च सांप्रतिकी कुत्सा भेदाभावात् प्रतीयते ।
पूज्यते कुत्सितत्वेन प्रशस्तत्वेन कुत्स्यते ॥५॥

विशेषणविशेष्यत्वं पदयोरुपजायते ।
न प्रातिपदिकार्थश्च तत्रैवं व्यतिरिच्यते ॥६॥

विशेष्यं स्यादनिर्ज्ञातं निर्ज्ञातोऽर्थो विशेषणम् ।
परार्थत्वेन शेषत्वं सर्वेषामुपकारिणाम् ॥७॥

विभक्तिभेदो नियमात् गुणगुण्यभिधायिनोः ।
सामानाधिकरण्यस्य प्रसिद्धिर्द्रव्यशब्दयोः ॥८॥

द्रव्येऽनिर्ज्ञातजातीये कृष्णशब्दः प्रयुज्यते ।
अनिर्ज्ञातगुणे चैव तिलशब्दः प्रवर्तते ॥९॥

---

१ ब. इदमियमयं वेति. २ त. दर्शनादर्थे. ३ ब. यथा दृष्टं. ४. ब. समासार्थः प्रयुज्यते. ५ ब. कुत्स्ये वा. ६ ओ. तत्रैन व्यति०; ब. तत्रैव ह्यति० ७ त. निर्ज्ञातार्थो ८ ब. भेदानियमात्. ९ त. द्रव्ये निर्ज्ञातजातीये.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

सामान्यानामसंबन्धात् तौ विशेषे व्यवस्थितौ।
रूपाभेदाद्विशेषं तमभिव्यङ्क्तुं न शक्नुतः ॥१०॥

तावेवं संनिपतितौ भेदेन प्रतिपादने।
अवच्छेदमिवाधाय संशयं व्यपकर्षतः ॥११॥

द्रव्यात्मा गुणसंसर्गभेदा[1]दाश्रीयते पृथक्।
जातिसंबन्धभेदाच्च द्वितीय इव गृह्यते ॥१२॥

निमित्तैरभिसंबन्धात् या निमित्त[2]सरूपता।
तयैकस्यापि नानात्वं [3]रूपाभेदात् प्रकल्पते ॥१३॥

द्रव्यावस्था तृतीया[4] तु यस्यां संसृज्यते द्वयम्।
तयोरवस्थयोर्भेदादाश्रयत्वे नियुज्यते ॥१४॥

बुद्ध्यैकं भिद्यते भिन्नमेकत्वं चोपगच्छति।
बुद्ध्यावस्था विभज्यन्ते सा ह्यर्थस्य विधायिका ॥१५॥

व्यपदेशिवदेकस्मिन् बुद्ध्या नाना[5]र्थकल्पना।
तया कल्पितभेदः सन्नर्थात्मा व्यपदिश्यते ॥१६॥

क्रियाभेदेन दृष्टानामश्मादीनां पुनः पुनः।
किंचिद्दर्शनमन्येन [6]दर्शनेनापदिश्यते ॥१७॥

प्रयोगभेदाद् धातूनां प्रकल्प्य बहुरूपताम्।
भेदाभेदावुपादाय क्वचिदेकात्त्वमुच्यते ॥१८॥

अन्वयव्यतिरेकाभ्यामर्थवान् परिकल्पितः।
एको धात्वर्थविगमाद्वर्णत्वेनोपचर्यते ॥१९॥

[7]द्रव्यात्मानस्त्रयस्तस्मात् बुद्धौ नाना व्यवस्थिताः।
आश्रयाश्रयिधर्मेणेत्ययं पूर्वेभ्य आगमः ॥२०॥

सामानाधिकरण्यं च शब्दयोः कैश्चिदिष्यते।
विशेषणविशेष्यत्वं संज्ञासंज्ञित्वमेव वा ॥२१॥

---

१ ओ. भेदेनाश्रीयते. २ ब. निमित्तस्वरूपता. ३ ब. रूपभेदात्. ४ ब. तृतीयं तु. ५ ब. नानात्वकल्पना. ६ ब. दर्शनेनापि दृश्यते. ७ ब. द्रव्यात्मगाः.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

केषांचिज्जातिगुणयोरेकार्थसमवेतयोः ।
वृत्तिः कृष्णतिलेष्विष्टा शब्दे द्रव्याभिधायिनि ॥२२॥

संस्तु रूपरसादीनामाश्रयो नाभिधीयते ।
द्रव्याभिधानेन विना ततस्ते द्वन्द्वभाविनः ॥२३॥

द्रव्याभिधायी कृष्णादिराकाङ्क्षावान् प्रवर्तते ।
निमित्तानुविधायित्वात् तत् तिलादौ न विद्यते ॥२४॥

एवं जातिमति द्रव्ये प्रत्यासन्ने क्रियां प्रति ।
गुणधर्मं[1] गुणाविष्टं द्रव्यं भेदाय कल्पते ॥२५॥

गुणमात्राभिधायित्वात् केचिदिच्छन्ति वृत्तिषु ।
अजाश्वादिषु संबन्धात् रूढीनामिव रूढिभिः ॥२६॥

तिले पूर्वमुपात्ते वा तत्रैव मतुबिष्यते ।
स च धर्मः समासेषु गुणस्तस्माद्विशेषणम् ॥२७॥

अनुस्यूतेव भेदाभ्यामेका प्रख्योपजायते ।
तदा सहविवक्षां तामाहुर्द्वन्द्वैकशेषयोः ॥२८॥

इतरेतरयोगस्तु भिन्नसंघाभिधायिनाम् ।
प्रत्येकं च समूहोसौ समूहिषू समाप्यते ॥२९॥

व्यापारसमुदायस्य यथाधिश्रयणादिषु ।
प्रत्येकं जातिवद् वृत्तिस्तथा द्वन्द्वपदेष्वपि ॥३०॥

शौण्डार्धर्चपुरोडाशच्छत्रिणोऽत्र निर्दर्शनम्[2] ।
ते विष्णुमित्रा इति च भिन्नेषु सहचारिषु ॥३१॥

अर्थान्तराभिधायित्वं तथाऽर्थान्तरवर्तिनाम्[3] ।
याभ्यां चैकमनेकार्थं ताभ्यामेवापरं पदम् ॥३२॥

समुदायान्तरत्वाच्च तादृशोऽर्थो न लौकिकः ।
अन्वयव्यतिरेकाभ्यां शास्त्रार्थोऽपि न दृश्यते ॥३३॥

दुःखा दुरुपपादा च तस्माद्भाष्येऽप्युदाहृता ।
युगपद्वाचिता सा तु व्यवहारार्थमाश्रिता ॥३४॥

---

१ ब. गुणधर्मगुणाविष्टं. २ ब. हि दर्शनम्. ३ ब. वर्तिना.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

समुदायमुपक्रम्य पदं तस्यां प्रयुज्यते ।
विभागेन समाख्याने ततस्तद् व्यर्थमुच्यते ॥३५॥

वाक्येपि नियता धर्माः केचिद् वृत्तौ द्वयोस्तथा ।
ते त्वभेदेन सामर्थ्यमात्र एवोपवर्णिताः ॥३६॥

वृत्तौ विशेषवृत्तित्वात् भेदे सामान्यवाचिता ।
उपमानसमासादौ श्यामादीनामुदाहृता ॥३७॥

वृत्तिरन्यपदार्थे या तस्या वाक्येष्वसंभवः ।
चार्थे द्वन्द्वपदानां च भेदे वृत्तिर्न विद्यते ॥३८॥

भेदे सति निरादीनां क्रान्ताद्यर्थेष्वसंभवः ।
प्राग्वृत्तेर्जातिवाचित्वं न च गौरखरादिषु ॥३९॥

क्रीडायां जीविकायां च वाक्येनावचनात्तथा ।
न नित्यग्रहणं युक्तं कौटिल्ये यङ्विधौ यथा ॥४०॥

निर्धारणादिविषये व्यपेक्षैव यतः स्थिता ।
समासप्रतिषेधानां ततो नास्ति प्रयोजनम् ॥४१॥

विधिभिः प्रतिषेधैश्च भेदाभेदनिदर्शनम् ।
कृतं द्वन्द्वैकवद्भावे संघवृत्त्युपदेशवत् ॥४२॥[1]

सामर्थ्यमविशेषोक्तमपि लोकव्यवस्थया ।
वृत्त्यवृत्त्योः प्रयोगज्ञैर्विभक्तं प्रतिपत्तृभिः ॥४३॥

अर्थस्य विनिवृत्तत्वाल्लुगादि न विरुध्यते ।
एकार्थीभाव एवातः समासाख्या विधीयते ॥४४॥[2]

व्यवस्थितविभाषा च सामान्ये कैश्चिदिष्यते ।
तथा वाक्यं व्यपेक्षायां समासोऽन्यत्र शिष्यते ॥४५॥

तुल्यश्रुतित्वात्तत्त्वेऽपि राजादीनामुपाश्रिते ।
वृत्तौ विशेषणाकाङ्क्षाऽगमकत्वान्निवर्तते ॥४६॥

संबन्धिशब्दः सापेक्षो नित्यं सर्वः प्रयुज्यते ।
स्वार्थवत्सा व्यपेक्षाऽस्य वृत्तावपि न हीयते ॥४७॥

---

१ ब. कृतद्वन्द्वैकवद्भावे. २ ब. समासाख्यो विधीयते; ओ॰ समासाख्योभिधीयते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

समुदायेन संबन्धो येषां गुरुकुलादिना ।
[1]संसृष्टयावयवांस्ते च युज्यन्ते तद्वता सह ॥४८॥

अबुधान् [2]प्रत्युपायाश्च विचित्राः प्रतिपत्तये ।
शब्दान्तरत्वा[3]दत्यन्तभेदो वाक्यसमासयोः ॥४९॥

असमासे समासे च गोरथादिष्वदर्शनात् ।
युक्तादीनां न शास्त्रेण [4]निवृत्त्यनुगमः कृतः ॥५०॥

शब्दान्तरत्वाद् युक्तादिः क्वचिद्वाक्ये प्रयुज्यते ।
प्रपर्णप्रपलाशादौ गतशब्दश्च वृत्तिषु ॥५१॥

विशेषणविशेष्यत्वं कैश्चिदेकस्तथाश्रयः ।
उपाये तत्त्वदर्शित्वात् इष्यते वृत्तिवाक्ययोः ॥५२॥

पदं यथैव वृक्षादि विशिष्टेऽर्थे व्यवस्थितम् ।
नीलोत्पलाद्यपि तथा भागाभ्यां वर्तते विना ॥५३॥

श्रोत्रियक्षेत्रियादीनां न च वासिष्ठगार्ग्यवत् ।
भेदेन प्रत्ययो लोके तुल्यरूपासमन्वयात् ॥५४॥

सप्तपर्णादिवद् भेदो न वृत्तौ [5]दृश्यते क्वचित् ।
रूढ्यरूढिविभागोऽपि क्रियते प्रतिपत्तये ॥५५॥

या सामान्याश्रया संज्ञा विशेषविषया च या ।
बहुलग्रहणान्नास्ति प्रवृत्तिरुभयोस्तयोः ॥५६॥

सुसूक्ष्मजटकेशादौ [6]समासोऽवयवे यदि ।
स्यात् स्यात् तत्रान्तरङ्गत्वाद् बाधकोऽवयवस्वरः ॥५७॥

समुदायस्य वृत्तौ च [7]नैकदेशो विभाष्यते ।
भेद एव [8]विभाषार्थो नियतो विषयो यतः ॥५८॥

[9]यतश्चाविषयः सोऽस्यास्तस्मान्नास्त्यकृतार्थता ।
अभेदप्रक्रमेऽत्यन्तं भेदानामपसारणात् ॥५९॥

---

१ ब. संस्पृश्यावयवास्ते च. २ ब. प्रत्युपायांश्च. ३ ब. अत्यन्तं भेदो. ४ ब. निवृत्त्यानुगमः. ५ ब. विद्यते. ६ ओ. समासावयवो यदि । न स्यात्तत्रान्तरङ्गत्वात्. ७ ओ. ब. नैकदेशे विभाष्यते. ८ विभाषायां नियतो. ९ ब. यतश्च विषयः.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

महाकष्टश्रिते[1] त्वेवं न स्याद् भेदः पदत्रये ।
वृत्ताववयवस्यात्त्वं यस्मान्न प्रतिपिध्यते ॥६०॥

महारण्यमतीते तु त्रिपदाद् भिद्यते स्वरः ।
यस्मात्तत्रान्तरङ्गत्वात् बाधकोऽवयवस्वरः ॥६१॥

सतिशिष्टबलीयस्त्वात् थाथादिस्वर एव तु ।
द्विपदे तेन युगपत् त्रितयं न समस्यते ॥६२॥

येषामपूज्यमानत्वं परार्थानुगमार्थके[2] ।
विशेषणविशेष्यत्वमपि तेषां न[3] कल्पते ॥६३॥

विशेषः श्रूयमाणोऽपि प्रधानेषु गुणेषु वा ।
शब्दान्तरत्वाद्वाक्ये तु वृत्तौ नित्यं न विद्यते ॥६४॥

विशेषकर्मसंबन्धे निर्युक्तेऽपि कृतादिभिः[4] ।
विशेषनिरपेक्षोऽन्यः कृतशब्दः प्रवर्तते ॥६५॥

अकर्मकत्वे सत्येवं क्तान्तं[5] भावाभिधायकम् ।
ततः क्रियावता कर्त्रा योगो भवति कर्मणाम् ॥६६॥

अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः ।
संबध्यते क्रिया तद्वत् कृतपूर्व्यादिषु स्थिता ॥६७॥

मुण्डिसूत्र्यादयोऽसद्भिर्भागैरनुगता इव ।
विभक्ताः कल्पितात्मानो धातवः कुट्टिचर्चिवत् ॥६८॥

पुत्रीयतौ न पुत्रोऽस्ति विशेषेच्छा तु तादृशी ।
विनैव पुत्रानुगमात् या पुत्रे व्यवतिष्ठते ॥६९॥

प्राणैर्विना यथा धारिर्जीवतौ प्राणकर्मकः ।
न चात्र धारिर्न प्राणा जीवतिस्तु क्रियान्तरम् ॥७०॥

तथा विनैषिपुत्राभ्यां पुत्रीयायां क्रियान्तरम् ।
अन्वाख्यानाय भेदात्तु[6] सदृशाः प्रतिपादकाः ॥७१॥

---

१ त. श्रितेत्येवं. २ व. परार्थानुगमात्मके. ३ व. न कल्प्यते. ४ व. कृतादिति.
५ त. क्तान्तं भावाभिधायि तत्; ओ. क्तान्ते भावाभिधायिनि । ६ त. भेदास्तु.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

आक्षेपाच्च प्रयोगेण वि[1]षयान्तरवार्तिना ।
सदपीच्छाक्यचः कर्म वाक्य एव प्रयुज्यते ॥७२॥

प्रसिद्धेन कृ[2]तः शब्दो भावगर्हाभिधायिना ।
अभ्यासे तुल्यरूपत्वान्न यङन्तः प्रयुज्यते ॥७३॥

शब्दा यथा विभज्यन्ते भागैरिव विकल्पितैः ।
अन्वाख्येयास्तथा शास्त्रमतिदूरे व्यवस्थितम् ॥७४॥

अर्थस्यानुगमं कंचित् दृष्ट्वैव परिकल्पितम् ।
[3]पदं वाक्ये पदे धातुर्धातौ भागश्च मुण्डिवत् ॥७५॥

[4]सामान्यार्थस्तिरोभूतो न विशेषेऽवतिष्ठते ।
उपात्तस्य कुतस्त्यागो निवृत्तः क्वावतिष्ठताम् ॥७६॥

अविप्रयोगः साधुत्वे व्युत्पत्तिरनवस्थिता ।
उपा[5]यान् प्रतिपत्तॄणां नाभिमन्येत स[6]त्यतः ॥७७॥

[7]शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते ।
अनागमविकल्पा तु स्वयं विद्योप[8]वर्ण्यते ॥७८॥

यथैव डित्थे डयतिः पाचके पचतिस्तथा ।
डयतिश्च पचिश्चैव द्वावप्येतावलौकिकौ ॥७९॥

प्रकृतिप्रत्ययावूह्यौ प[9]दात् ताभ्यां पदं तथा ।
अनुबन्धस्वरादिभ्यः शिष्टैः शास्त्रं न तान्प्रति ॥८०॥

शास्त्रदृष्टिस्तु शास्त्रस्य प्राप्तिमात्रेऽप्यनिश्चिते ।
युज्यते प्रत्यवायेन शास्त्रं चक्षुरपश्यताम् ॥८१॥

अर्थान्तराभिधानाच्च पौर्वापर्यं न भिद्यते ।
राजदन्ताहिताग्न्यादिराजाश्वादिषु सर्वथा ॥८२॥

विनैव प्रत्ययैर्वृत्तौ ये भिन्नार्थाभिधायिनः ।
गर्गादयो लुका तेषां साधु[10]त्वमनुगम्यते ॥८३॥

---

१ ओ. विशेषान्तरवर्तिना. २ त. वृतः शब्दो; ओ. हृतः शब्दो. ३ ब. पदे वाक्ये. ४ त. श्लोकोयं टीकायां पठ्यते. ५ ब. उपायात्. ६ ब. तत्त्वतः. ७ त. श्लोकोयं टीकायां पठ्यते. ओ. श्लोकोयं न पठ्यते. ८ त. विद्योपवर्तते. ९ ओ. पदार्थाभ्यां पदं तथा. १० ओ. साधुत्वमवगम्यते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

सोयमित्यमिसंबन्धात् प्रत्ययेन विना यदि ।
बभ्र्वादयः प्रयुज्येरन्नपत्ये नियमो भवेत् ॥८४॥

सोयमित्यभिसंबन्धे लिङ्गोपव्यञ्जनादृते ।
प्रष्ठादिषु न जायैव नियमेन प्रतीयते ॥८५॥

मानमेयाभिसंबन्धविशेषेऽङ्गीकृते तथा ।
प्रस्थादीनामसाधुत्वं तद्धितेन विना भवेत् ॥८६॥

तद्धितो योगभेदेन वाक्यं वा स्याद्विभाषितम् ।
परिमाणाधिके तत्र प्रथमा शिष्यते पुनः ॥८७॥

व्यतिरिक्तस्य साधुत्वे तदेव च निदर्शनम् ।
युज्यतेऽङ्गीकृताधिक्यं तत्सर्वाभिर्विभक्तिभिः ॥८८॥

शुक्लादिषु मतुब्लोपो व्यतिरेकस्य दर्शनात् ।
असाधुत्वनिवृत्त्यर्थं साधवस्ते बिदादिवत् ॥८९॥

विशेषणाद् विशेष्येऽर्थे तद्भावाभ्युच्चये सति ।
पुनश्च प्रतिसंहारे वृत्तिमेके प्रचक्षते ॥९०॥

निमित्ते प्रत्ययः पूर्वो नानुप्राप्तो निमित्तिना ।
निमित्तवति बुद्धेश्च न निमित्तसरूपता ॥९१॥

संस्कारसहिताज्ज्ञानात् नोपश्लेषः स्मृतेरपि ।
व्यापारे तन्निमित्तानां न ग्राह्यं स्यात्तथाविधम् ॥९२॥

अन्तःकरणवृत्तौ च व्यर्था बाह्यार्थकल्पना ।
तस्मादनुपकारो वा ग्राह्यं वा न तथा स्थितम् ॥९३॥

अनूस्यूतेव संसृष्टैरर्थे बुद्धिः प्रवर्तते ।
व्याख्यातारो विभज्यार्थं तां भेदेन प्रचक्षते ॥९४॥

तदात्मन्यविभक्ते च बुद्ध्यन्तरमुपाश्रिताः ।
विभागमिव मन्यन्ते विशेषणविशेष्ययोः ॥९५॥

---

१ ब. प्रयुज्येरन्नापत्ये. २ ब. मानमेयादिसंबन्ध. ३ ब. अनुस्यूतेन. ४ त. संसृष्टैरर्थे. ५ त. विभज्याथ.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

अबुधान् प्रति वृत्तिं च वर्तयन्तः प्रकल्पिताम् ।
आहुः परार्थवचने त्यागाभ्युच्चयधर्मताम् ॥९६॥

अन्वयाद् गम्यते सोऽर्थो विरोधी वा निवर्तते ।
द्व्यर्थमर्थान्तरे वाऽपि तत्राहुरुपसर्जनम् ॥९७॥

उपायमात्रं नानात्वं समूहस्त्वेक एव सः ।
विकल्पाभ्युच्चयाभ्यां वा भेदसंसर्गकल्पना ॥९८॥

वृत्तिं वर्तयतामेवमबुधप्रत्तिपत्तये ।
भिन्नाः संबोधनोपायाः पुरुषेष्वनवस्थिताः ॥९९॥

वाचिका द्योतिका वापि संख्यानां या विभक्तयः ।
तद्रूपेऽवयवे वृत्तौ संख्याभेदो निवर्तते ॥१००॥

अभेदैकत्वसंख्या वा तत्राऽन्यैवोपजायते ।
संसर्गरूपं संख्यानामविभक्तं तदुच्यते ॥१०१॥

यथौषधिरसाः सर्वे मधुन्याहितशक्तयः ।
अविभागेन वर्तन्ते तां संख्यां तादृशीं विदुः ॥१०२॥

भेदानां वा परित्यागात् संख्यात्मा स तथाविधः ।
व्यापाराज्जातिभागस्य भेदापोहेन वर्तते ॥१०३॥

अगृहीतविशेषेण यथा रूपेण रूपवान् ।
प्रख्यायते न शुक्लादिभेदरूपस्तु गृह्यते ॥१०४॥

भेदरूपसमावेशे तथा सत्यविवक्षिते ।
भागः प्रकाशितः कश्चित् शास्त्रेऽङ्गत्वेन गृह्यते ॥१०५॥

संख्यासामान्यरूपेण तदा सोंऽशः प्रतीयते ।
अर्थस्यानेकशक्तित्वे शब्दैर्नियतशक्तिभिः ॥१०६॥

अव्ययानां च यो धर्मो यश्च भेदवतां क्रमः ।
अभिन्नव्यपदेशार्हमन्तरालं तदेतयोः ॥१०७॥

अलुकश्चैकवद्भावस्तस्मिन् सति न शिष्यते ।
स च गोपुचरादीनां धर्मोऽस्ति वचनान्तरे ॥१०८॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

जातौ द्विवचनाभावात् तद्वृत्तिषु न विद्यते ।
प्रत्याख्याने तु योगस्य द्रव्ये गोपुचरादयः ॥१०९॥

आश्रयाद् भेदवत्तायाः सर्वभेदसमन्वयः ।
[1]द्रव्याभिधानपक्षोऽपि जात्याख्यायां न विद्यते ॥११०॥

सर्वद्रव्यगतिश्चैवमेकशेषश्च नोच्यते ।
प्रत्याख्यातेऽन्यथा सूत्रे भिन्नद्रव्यगतिर्भवेत् ॥१११॥

वृत्तौ यो युक्तवद्भावो [2]वरणादिषु शिष्यते ।
अभेदैकत्वसंख्यायां गोदौ तत्र न सिध्यति ॥११२॥

प्राग्वृत्तेर्युक्तवद्भावे षष्ठी भेदाश्रया भवेत् ।
वृत्तौ संख्याविशेषाणां त्यागाद् भेदो निवर्तते ॥११३॥

[3]विद्यमानासु संख्यासु केचित् संख्यान्तरं विदुः ।
अभेदाख्यमुपग्राहि वृत्तौ तच्चोपजायते ॥११४॥

व्यापारं याति भेदाख्यैस्तत्त्वैरवयवै[4]ः क्वचित् ।
आत्मा भेदानपेक्षोऽस्य क्वचिदेति निमित्तताम् ॥११५॥

दास्याः पतिरिति व्यक्तो गोदाविति च दृश्यते ।
व्यापारभेदः संख्यायास्तस्मादेवं [5]व्यवस्थितः ॥११६॥

द्व्यादीनां च द्विपुत्रादौ बाह्यो भेदो निवर्तते ।
विभक्तिवाच्यः स्वार्थत्वान्निमित्तं त्ववतिष्ठते ॥११७॥

द्वित्वोपसर्जने संघे द्विशब्दस्तत्र वर्तते ।
सोऽयमित्यभिसंबन्धात् उभशब्देन तत्तथा ॥११८॥

उभयस्तस्य तुल्यार्थो वृत्तौ नित्यं प्रयुज्यते ।
सूत्रेऽपि नित्यग्रहणं तदर्थमभिधीयते ॥११९॥

आपि के चापरार्थत्वान्नाभेद उपजायते ।
उभे इति ततः स्वार्थे भेदवृत्तिः प्रयुज्यते ॥१२०॥

---

१ ब. द्रव्याभिधानत्वमपि. २ ब. वारणादिषु. ३ ब. विद्यमानास्तु संख्यासु. ४ ब. तत्त्वैरवयवैः. ५ ब. एवं व्यवस्थिताः.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

स्त्रीत्वाभिधानपक्षेऽपि गुणभावविपर्ययः ।
स्वभावादपरार्थत्वात् तत्र भेदो न हीयते ॥१२१॥

तस्माद् द्विवचनाट्टापश्चोभयोऽन्यत्र दृश्यते ।
प्रत्ययं तयपं हित्वा नास्त्युत्तरपदे पुनः ॥१२२॥

प्राप्तिः प्रगृह्यसंज्ञाया न स्यात् प्रत्ययलक्षणात् ।
कुमार्यगारे न ह्यस्ति समासो वचनान्तरे ॥१२३॥

एक[1]द्वयोर्यञादीनां विभाषा लुङ् न कल्पते ।
यौष्माकस्तावकश्चेति भेदाभावान्न सिध्यति ॥१२४॥

दृष्टो गार्ग्यतरे भेदस्तथा गर्गतरा इति ।
[2]युष्मत्पिता त्वत्पितेति तथा[3]ऽऽदेशौ व्यवस्थितौ ॥१२५॥

उपाधिभूता या संख्या प्रकृतौ समवस्थिता ।
आदेशैः संज्ञया वाऽपि विभक्त्या व्यज्यते विना ॥१२६॥

शौर्पिके मासजाते च परिमाणं स्वभावतः ।
उपाधिभूतामाश्रित्य संख्यां भेदेन[4] वर्तते ॥१२७॥

[5]वयस्विनि परिच्छेदः क्रीते चापि न गम्यते ।
इष्टो भेदादृते तत्र परिमाणमनर्थकम् ॥१२८॥

भिन्नस्याभेदवचनात् प्रस्थादिभ्यः शसो विधिः ।
[6]तद्धर्मत्वादभेदात्तु घटादिभ्यो न दृश्यते ॥१२९॥

श्रूयते वचनं यत्र भावस्तत्र विशिष्यते ।
निवर्तते यद्वचनं तस्य भावो न विद्यते ॥१३०॥

कार्यं सत्ताश्रयं शास्त्रादप्रवृत्तिरदर्शनम् ।
वाक्ये दृष्टं यदत्यन्तमभावस्तस्य वृत्तिषु ॥१३१॥

संज्ञाविपयभेदार्थं प्रसक्तादर्शनं स्मृतम् ।
श्रूयमाणं तु वचनं विशिष्टमुपलभ्यते ॥१३२॥

---

१. ब. एकं द्वयोः. २ ब. युष्मत्पितास्मत्पितेति. ३ त. तथादेशा व्यवस्थिताः. ४ ओ. संख्या भेदेन. ५ ब. पयस्विनि. ६ ब. तद्धर्मत्वादिभेदात्तु.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

अभावो वा लुको यत्र रूपवान् वा विधीयते ।
व्यभिचारान्निमित्तस्य तत्रासाधुः प्रसज्यते ॥१३३॥

भेदः संख्याविशेषो वा व्याख्यातो वृत्तिवाक्ययोः ।
सर्वत्रैव विशेषस्तु नावश्यं तादृशो भवेत् ॥१३४॥

जातेश्च भेदहेतुत्वान्न लिङ्गेन विशेष्यते ।
[1]प्रधानं मृगदुग्धादौ गार्गीपुत्रे न[2] स क्रमः ॥१३५॥

अभेदे लिङ्गसंख्याभ्यां योगा[3]च्छुक्लं पटा इति ।
प्रसक्ते शास्त्रमारब्धं सिद्धये लिङ्गसंख्ययोः ॥१३६॥

परार्थं शेषभावं यो वृत्तिषु प्रतिपद्यते ।
गु[4]णो विशेषणत्वेन स सूत्रे व्यपदिश्यते ॥१३७॥

शब्दान्तरत्वाद्वाक्येषु विशेषा यद्यपि श्रुताः ।
वृत्तेरभिन्नरूपत्वात् तेषु वृत्तिर्न विद्यते ॥१३८॥

रूपाच्च शब्दसंस्कारः सामान्यविषयो यतः ।
तस्मात्तदाश्रयं लिङ्गं वचनं च प्रसज्यते ॥१३९॥

सलिङ्गं च ससंख्यं च ततो द्रव्याभिधायिना ।
संबध्यते पदं तत्र तयोर्भिन्ना श्रुतिर्भवेत् ॥१४०॥

भाविनो बहिरङ्गस्य वचनादाश्रयस्य ये ।
लिङ्गसंख्ये गुणानां ते सूत्रेण प्रतिपादिते ॥१४१॥

विशेषवृत्तेरपि च रूपाभेदादलक्षितः ।
यस्माद्विशेषस्तेनात्र भेदकार्यं न कल्पते ॥१४२॥

विशेष एव सामान्यं विशेषाद्भिद्यते यतः ।
अभेदो हि विशेषाणामाश्रितो विनिवर्तकः ॥१४३॥

यद्यदाश्रीयते तत्तदन्यस्य विनिवर्तकम् ।
भेदाभेदविभागस्तु सामान्येन निरूप्यते ॥१४४॥

अपोद्धारश्च सामान्यमिति तस्योपकारिणः ।
निमित्तावस्थमेवातस्तत्स्वधर्मेण गृह्यते ॥१४५॥

---

१ ब. प्रधानमृग. २ ओ. ब. न संक्रमः. ३ त. शुक्ल पटा ओ. शुक्लघटा इति. ४ ब. गुणा.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

अनिर्धारितधर्मत्वात् भेदा एव विकल्पिताः ।
निमित्तैर्व्यपदिश्यन्ते सामान्याख्याविशेषिताः ॥१४६॥

यदा तु व्यपदिश्येते लिङ्गसंख्ये स्वभावतः ।
प्रयोगेष्वेव साधुत्वं वाक्ये प्रक्रम्यते तदा ॥१४७॥

तत्र प्रयोगोऽनियतो गुणानामाश्रयैः सह ।
सामान्यं यत्तदत्यन्तं तत्रैव समवस्थितम् ॥१४८॥

न गोत्वं शाबलेयस्य गौरिति व्यपदिश्यते ।
शुक्लत्वं बाहुलेयस्य शुक्ल इत्यपदिश्यते ॥१४९॥

व्यतिरेके च सत्येवं मतुपः श्रवणं भवेत् ।
लुगन्वाख्यायते तस्मात् रसादिभ्यश्च नास्ति सः ॥१५०॥

यत्सोऽयमिति संबन्धात् रूपाभेदेन वर्तते ।
शुक्लादिवत्ततो लोपस्तद्रसादौ न विद्यते ॥१५१॥

आवेशो लिङ्गसंख्याभ्यां क्वचिन्मञ्चादिवत् स्थितः ।
सोऽयमित्यभिसंबन्धे स प्रष्ठादौ न विद्यते ॥१५२॥

लिङ्गं लिङ्ग[1]परित्यागे सूत्रे प्रत्ययशासनम् ।
सोऽयमित्यभिसंबन्धात् पुंशब्दे स्त्र्यभिधायिनि ॥१५३॥

आश्रये लिङ्गसंख्याभ्यामाश्रितं व्यपदिश्यते ।
विशेषणानां चाजातेरिति शास्त्रव्यवस्थया ॥१५४॥

निमित्तानुविधायित्वात् ये धर्मा भेदहेतुषु ।
त आश्रयेऽपि विद्यन्ते इति बुद्धिर्निवर्त्यते ॥१५५॥

आख्यायते च शास्त्रेण लोकरूढा स्वभावतः ।
निमित्ततुल्या गोदादौ प्रवृत्तिर्लिङ्गसंख्ययोः ॥१५६॥

हरीतक्यादिषु व्यक्तिः संख्या खलतिकादिषु ।
मनुष्यलुब्विशेषाणामभिधेयाश्रयं द्वयम् ॥१५७॥

जातिप्रयोगे जात्या चेत् संबन्धमुपगच्छति ।
विशेषणं ततो धर्माज्जातेस्तत् प्रतिपद्यते ॥१५८॥

---

१ ब. लिङ्गपरिज्ञाने.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

लुबन्ते संनिपतिते[1] जातेरन्यद्विशेषणम् ।
लुबन्तस्य प्रधानत्वात् तद्धर्मैर्व्यपदिश्यते ॥१५९॥

नञ्समासबहुव्रीहिद्वन्द्वरूप्यतिशयेषु ये ।
भेदा भाष्यानुसारेण वाच्यास्ते लिङ्गसंख्ययोः ॥१६०॥

यदि षष्ठीद्वितीयान्तात् निष्कृष्टात् तमबादयः ।
न्यक्कारिणि स्युरुत्कृष्टे प्रकृते स्याद्विलिङ्गता ॥१६१॥

काल्यां कालाद् द्वितीयान्तात् काले काल्यास्तरब् भवेत् ।
न्यक्कर्तरि तथा गार्ग्ये गर्गेभ्यः प्रत्ययो भवेत् ॥१६२॥

न्यक्कर्तृषु[2] तु गर्गेषु गार्ग्यात् स्यात् तच्च नेष्यते ।
कुमार्याः स्वार्थिके ङीप् स्यात् प्रकृत्यर्थो हि नाधिकः ॥१६३॥

षष्ठ्यन्तादधिके तस्माद् गुणे स्वाश्रयवर्तिनि ।
उत्कृष्टसमवेतायां क्रियायां वा विधीयते ॥१६४॥

उपात्तं च प्रकृत्यर्थो द्रव्यमेवाश्रयस्तयोः ।
सोऽयमित्यभिसंबन्धादभेदेन प्रतीयते ॥१६५॥

रूपाभेदाच्च तद् द्रव्यमाकाङ्क्षावत् प्रतीयते ।
विशेषैर्भिन्नरूपैस्तद् आश्रयैरिव युज्यते ॥१६६॥

भिन्नरूपेषु यल्लिङ्गं विशेषेषु व्यवस्थितम् ।
संख्या च ताभ्यां द्रव्यात्मा सोऽभिन्नो व्यपदिश्यते ॥१६७॥
आश्रयः समवायी च निमित्तं लिङ्गसंख्ययोः ।
कर्तृस्थभावकः शेतिरतो भाष्य उदाहृतः ॥१६८॥

निमित्तमाश्रयत्वेन गृह्येत[3] यदि साधनम् ।
कर्मापदिष्टयोः प्राप्तिस्तत्र स्याल्लिङ्गसंख्ययोः ॥१६९॥

शास्त्रे निमित्तभावेन समुदायादपोद्धृतः ।
स्त्र्यर्थस्तस्येच्छया योगः प्रकृत्या प्रत्ययेन वा ॥१७०॥
स्त्रीशब्दो गुणशब्दत्वात् तुल्यधर्मा सितादिभिः ।
गुणमात्रे प्रयुज्येत संस्त्यानवति वाऽऽश्रये ॥१७१॥

---

१ ओ. त. संनिपतितं. २ त. न्यक्कर्तृषु च. ३ ब. त. गृह्यते यदि साधनम्.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

स्त्र्यर्थः संस्त्यानवद् द्रव्यं प्रकृत्यर्थश्च यद्यसौ ।
द्रव्योपलक्षणार्थत्वं संस्त्यानस्य तथा सति ॥१७२॥

संस्त्यानेन क्वचिद् द्रव्यं दृष्टं यदुपलक्षिते[1] ।
अनङ्गीकृतसंस्त्यानात् तद्वृत्तेः प्रत्ययो भवेत् ॥१७३॥

भूतादयः षडाख्याश्च संस्त्यानेनोपलक्षिते ।
ब्राह्मण्यादौ यदा वृत्तास्तेभ्यः स्युः प्रत्ययास्तदा ॥१७४॥

तद्वन्तो हि प्रधानत्वात् प्रत्ययानां प्रयोजकाः ।
सामानाधिकरण्येऽपि तस्माट्टाबादिसंभवः ॥१७५॥

गुणमात्राभिधायित्वं स्त्रीशब्दे वर्ण्यते यदा ।
प्रकृत्यर्थश्च संस्त्यानं स्वार्थिकाः प्रत्ययास्तदा ॥१७६॥

संस्त्याने केवले वृत्तिः प्रकृतीनां न विद्यते ।
तदाविष्टे ततो द्रव्ये गृह्यन्ते समवस्थिताः ॥१७७॥

उपकारि च संस्त्यानं येषु शब्देष्वपेक्षितम् ।
तेभ्यष्टाबादयस्तच्च भूतादिष्वविवक्षितम् ॥१७८॥

संस्त्यानं प्रत्ययस्यार्थः शुद्धमाश्रीयते यदा ।
तदा द्विवचनानेकप्रत्ययत्वं न सिध्यति ॥१७९॥

जातिश्चेत् स्त्रीत्वमेवासौ भेदोऽन्यत्राविवक्षितः ।
तस्माद्भिन्नैरपि द्रव्यैस्तदेकं सद्विशिष्यते ॥१८०॥

मात्राणां हि तिरोभावे परिमाणं न विद्यते ।
कुमार्य इति तेन स्यात् कुमार्यां भेदसंभवात् ॥१८१॥

जातिसंख्यासमाहारैर्यथैव सहचारिणि ।
द्रव्ये क्रियाः प्रवर्तन्ते एकात्मत्वे[2] व्यपेक्षिते ॥१८२॥

मूर्तिभ्यो मूर्तिधर्माणां तथाऽभेदस्य दर्शनात् ।
सामानाधिकरण्यं च क्रियायोगश्च कल्पते ॥१८३॥

सामानाधिकरण्ये तु मतुब्लोपादपेक्षिते ।
लुक् तद्धितलुकीति स्याल्लुक् तत्राप्युपलक्षणम् ॥१८४॥

---

१ ब. यदुपलक्षितम्. २ त. एकात्मत्वेऽप्यपेक्षिते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

केषांचित् त्यक्तभेदेषु द्रव्येष्वेव विधीयते ।
संस्त्यानवत्सु टाबादिरभेदेन समन्वयात् ॥१८५॥

सामान्यभूतो द्रव्यात्मा परिच्छिन्नपरिग्रहः ।
क्रियाभिर्युज्यते भेदैर्भागशश्चावतिष्ठते ॥१८६॥

शुक्लादिष्वाश्रयद्रव्यं प्राधान्येनाभिधीयते ।
स्त्रीत्वं तु प्रत्ययार्थत्वादभिधाविषयो यतः ॥१८७॥

सोऽयमित्यभिसंबन्धादाश्रयं प्रतिपद्यते ।
स्त्रीत्वं स्वभावसिद्धो वा गुणभावविपर्ययः ॥१८८॥

साकाङ्क्षत्वाद् गुणत्वेन सामान्यं वोपदिश्यते ।
व्यक्तीनामात्मधर्मोऽसौ एकप्रख्यानिबन्धनः ॥१८९॥

एवंभूता च साऽवस्था भाग[1]भेदपरिग्रहे ।
कृते बुद्धचैव भेदानामाश्रयत्वेऽवकल्पिते ॥१९०॥

निष्कृष्टेष्वपि भेदेषु व्य[2]क्तिभेदाश्रये ततः ।
लिङ्गप्रत्यवमर्शेन लिङ्गसंख्ये प्रपद्यते ॥१९१॥

अन्तरेण चशब्दस्य प्रयोगं द्वन्द्वभाविनाम् ।
अविशिष्टार्थवृत्तित्वं रूपाभेदात् प्रतीयते ॥१९२॥

विकल्पवति वा वृत्तिर्नि[3]वर्त्ये च समुच्चिते ।
तेषामज्ञातशक्तीनां द्योतकेन नियम्यते ॥१९३॥

वृत्तौ विशिष्टरूपत्वाच्चशब्दो विनिवर्तते ।
अर्थभेदेऽपि सारूप्यात् तच्चार्थेनापदिश्यते ॥१९४॥

चस्य चासत्त्वभूतोऽर्थः स एवाश्रीयते यदि ।
तद्धर्मत्वं ततो द्वन्द्वे चादिष्वर्थकृतं हि तत् ॥१९५॥

चार्थः शब्दे क्वचिद्भेदात् कथंचित् समवस्थितः ।
द्योतकाश्चादयस्तस्य वक्ता द्वन्द्वस्तु तद्वताम् ॥१९६॥

विकल्पाद्यभिधेयस्य चार्थस्यान्यपदार्थता ।
द्योतकत्वान्न कल्पेत तस्मात् सदुपलक्ष्यते ॥१९७॥

---

१ ब. भागाभेदपरिग्रहे. २ त. व्यक्तिरूपाश्रये; ओ. भेदाश्रये यतः. ३ त. निवर्त्येऽथ.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

तत्र स्वाभाविकं लिङ्गं शब्दधर्मेऽप्यपेक्षिते[1] ।
शब्दः कश्चित्तमेवार्थं कथंचित् प्रतिपद्यते ॥१९८॥

शब्दादर्थाः प्रतार्यन्ते[2] स भेदानां विधायकः ।
अनुमानं विवक्षायाः शब्दादन्यन्न विद्यते ॥१९९॥

समुच्चितः स्याद् द्वन्द्वार्थो गुणभूतसमुच्चयः ।
समुच्चयो वाऽपि भवेत् गुणभूतसमुच्चितः ॥२००॥

समुच्चितस्य प्राधान्ये लिङ्गसंख्ये स्वभावतः ।
समुच्चयस्य प्राधान्ये शास्त्रं स्यात् प्रतिपादकम् ॥२०१॥

समुच्चयवतोऽर्थस्य प्राधान्येऽप्यपरे विदुः ।
निमित्तानुविधायित्वादसिद्धिं लिङ्गसंख्ययोः ॥२०२॥

समुच्चयो निमित्तं चेत् स्यान्निमित्तानुवर्तनम् ।
अन्वयव्यतिरेकाभ्यां चार्थो द्वन्द्वनिबन्धनः ॥२०३॥

समुच्चितनिमित्तत्वे चार्थस्यापगमेऽपि[3] वा ।
स्वभावसिद्धे द्वन्द्वस्य लिङ्गसंख्ये व्यवस्थिते ॥२०४॥

पदान्तरस्थस्यार्थस्य द्योतकत्वान्न युज्यते ।
निपातो लिङ्गसंख्याभ्यां द्वन्द्वस्त्वर्थस्य वाचकः ॥२०५॥

निमित्तानुविधाने च द्रव्यधर्मानपेक्षणात् ।
गुणप्रधानभावेन क्रियायोगो न कल्पते ॥२०६॥

यस्य[4] नास्ति क्रियायोगः स्वतन्त्रोऽसौ न विद्यते ।
अर्थो द्वन्द्वस्य तत्र स्यादुपादानमनर्थकम् ॥२०७॥

समुच्चयवतोऽर्थस्य वाचको नानुवर्तते ।
निमित्तमपि चास्यार्थः स्वधर्मैर्युज्यते ततः ॥२०८॥

बाह्ये[5] नास्त्याश्रयो द्वन्द्वे विशेषौ तत्र हि श्रुतौ ।
समुच्चयस्तदाधारस्तद्धर्मैर्व्यपदिश्यते ॥२०९॥

---

१ त. शब्दधर्मे व्यपेक्षिते. २ ब. प्रतीयन्ते. ३ ब. चार्थस्यावगमे. ४ ओ. यदि नास्ति ५ ब. अन्योन्यस्त्वाश्रयो; ओ. बाह्यो.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

यो वाऽवयवभेदाभ्यां भेदवद्भ्यामिवान्वितः ।
एकः समूहो धर्मात् स भागयोः प्रतिपद्यते ॥२१०॥

एकश्च द्व्यात्मकोऽर्थोऽसौ भेदाभेदसमन्वितः ।
यौ भेदावाश्रितस्तत्स्थे लिङ्गसंख्ये प्रपद्यते ॥२११॥

यथा स्वशब्दाभिहिते चैत्रार्थे न प्रयुज्यते ।
चैत्रशब्दो बहुव्रीहावप्रयोगस्तथा भवेत् ॥२१२॥

यथा गौरिति शुक्लादेरभिधानं न विद्यते ।
एवं यस्याभिसंबन्धो गोभिस्तावत् प्रतीयते ॥२१३॥

संबन्धी नियतो रूढश्चित्राणां न च विद्यते ।
गवां यथा वज्रपाणिरूयक्षो वाऽपि व्यवस्थितः ॥२१४॥

शब्दान्तरत्वाद्वाक्येषु विशेषा यद्यपि श्रुताः ।
वृत्तिशब्दोऽन्य एवायं सामान्यस्याभिधायकः ॥२१५॥

अगोरचित्रगोश्चैव रूपभेदान्निवर्तकः ।
न चित्रगुविशेषाणां रूपाभेदात्तु वाचकः ॥२१६॥

यथा चित्रगुरित्येतत् प्रयुक्ते न प्रयुज्यते ।
एवं यदि स्यात् सामान्यं तस्य न स्यात् प्रतिश्रुतिः ॥२१७॥

सर्वादयो विशेषास्तु प्रदेशानां निवर्तकाः ।
यथा प्रदेशाः सामान्यप्रदेशान्तरबाधकाः ॥२१८॥

विभक्त्यर्थाभिधानाद्वा षष्ठी नानुप्रयुज्यते ।
द्रव्यस्यानभिधानात्तु तच्छब्दोऽनुप्रयुज्यते ॥२१९॥

सामानाधिकरण्यं चेत् मतुब्लोपात् प्रकल्पते ।
मतुपोऽपि तदर्थत्वादनवस्था प्रसज्यते ॥२२०॥

संबन्धस्य च संबन्धी संबन्धोऽन्यः प्रसज्यते ।
विभक्त्यर्थप्रधाने च क्रियायोगो न कल्पते ॥२२१॥

---

१ ओ. अप्रयुक्तस्तथा. २ ओ. विशेषो यद्यपि श्रुतः । ३ ब. रूपभेदानिवर्तकः. ४ त. प्रयुक्ते. ५ ओ. प्रकल्प्यते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

विभक्त्यर्थप्रधानत्वात्[1] ततस्तत्रेति न क्रिया ।
दृश्यादिः कर्मकर्त्रादिनिमित्तत्वाय कल्पते ॥२२२॥

अन्तर्भवेच्च संबन्धः प्राधान्याभिहितः कथम् ।
स प्रातिपदिकार्थश्च तथाभूतः कथं भवेत् ॥२२३॥

असंभवात्तु संबन्धे संबन्धसहचारिणि ।
जातिसंख्यासमाहारकार्याणामिव संभवः ॥२२४॥

सोऽयमित्यभिसंबन्धात् विशिष्टाश्रयवाचिनाम् ।
शुक्लादिवल्लिङ्गसंख्ये शास्त्रारम्भाद् भविष्यतः ॥२२५॥

भेदेन तु विवक्षायां सामान्ये वा विवक्षिते ।
सलिङ्गस्य ससंख्यस्य पदार्थस्यागतिर्भवेत् ॥२२६॥

साधुत्वं न विभक्त्यर्थमात्रे वृत्तस्य दृश्यते ।
कृत्स्नार्थवृत्तेः साधुत्वमित्यर्थग्रहणं कृतम् ॥२२७॥

सोऽयमित्यभिसंबन्धात् द्रव्यवृत्तिरयं यदा ।
सलिङ्गस्य ससंख्यस्य तदा साधुत्वमुच्यते ॥२२८॥

अन्तर्भूतविभक्त्यर्थे[2] षष्ठी न श्रूयते यथा ।
तथाऽश्रुतिः प्रसज्येत लिङ्गसंख्याभिधायिनाम् ॥२२९॥

साधर्म्यमव्ययेन स्यात् बहुव्रीहेस्तथा सति ।
लिङ्गसंख्यानिमित्तस्य संस्कारस्यापवर्तनात्[3] ॥२३०॥

प्रयुक्तेन च संबन्धाच्चैत्रादिश्रवणं भवेत् ।
विना विभक्त्या संबन्धो विभक्त्या विद्यते विना ॥२३१॥

अभिधानेऽपि संख्यायाः संख्यात्वं न निवर्तते ।
षष्ठ्यर्थस्याभिधाने तु स्यात् प्रातिपदिकार्थता ॥२३२॥

अनुप्रयोगसिद्ध्यर्थं न विभक्त्यर्थकल्पना ।
वस्त्वन्तरमुपाक्षिप्तमिति केचित् प्रचक्षते ॥२३३॥

संबन्धिभिर्विशिष्टानां संबन्धानां निमित्तता ।
संबन्धैर्वा विशिष्टानां तद्वतां स्यान्निमित्तता ॥२३४॥

१ ब. विभक्त्यर्थे प्रधाने च. २ प. अन्तर्भूते विभक्त्यर्थे. ३ ब. संस्कारस्याप्यवर्तानत्.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

केचित् संयोगिनो दण्डाद्विषाणात् समवायिनः ।
तद्वति प्रत्ययानाहुर्बहुव्रीहिं तथैव च ॥२३५॥

भिन्नं संबन्धिभेदेन संबन्धमपरे विदुः ।
निमित्तं स[1]विभक्त्यर्थः समासेनाभिधीयते ॥२३६॥

प्रधानमन्यार्थतया भिन्नैः[2] स्वैरुपसर्जनैः ।
निमित्तमभिधेयं वा सर्वपश्चादपेक्ष्यते ॥२३७॥

स्वामिनि व्यतिरेकश्च वाक्ये यद्यपि दृश्यते ।
प्राधान्य एव तस्येष्टो बहु[3]व्रीहिर्विवक्षिते ॥२३८॥

गवां विशेषणत्वेन यदा तद्वाँ[4]न् प्रवर्तते ।
अस्यैता इति तत्रार्थे बहुव्रीहिर्न विद्यते ॥२३९॥

यदा प्रत्यवमर्शस्तु तासां स्वामी गवामिति ।
गोभिस्तदाऽभिसंबन्धो निमित्तत्वाय कल्पते ॥२४०॥

[5]अपेक्षमाणः संबन्धं रूढित्वस्य निवृत्तये ।
निमित्तानुविधायित्वात्तद्धर्मार्थः [6]प्रयुज्यते ॥२४१॥

नाना[7]चित्रा इति यथा निमित्तमनुरुध्यते ।
नानाभूतेऽपि वृत्तः सन् बहुव्रीहिस्तथा भवेत् ॥२४२॥

संबन्धिनि निमित्ते तु द्रव्यधर्मो न हीयते ।
लिङ्गाभावो हि लिङ्गस्य विरोधित्वे न वर्तते ॥२४३॥

संख्यावान् लिङ्गवांश्चार्थोऽभिन्नधर्मा निमित्ततः ।
आसन्न एव द्रव्यत्वात्तद्ध[8]र्मैर्न विरुध्यते ॥२४४॥

विभक्त्यर्थेन चाविष्टं शुद्धं चेति द्विधा स्थितम् ।
द्रव्यं शुद्धस्य यो धर्मः स न स्यादन्यधर्मणः ॥२४५॥

द्रव्यमात्रस्य निर्देशे भेदोऽयमविवक्षितः ।
ग्रन्थे पूर्वत्र भेदस्तु द्वितीयेऽनुप्रदर्शितः ॥२४६॥

---

१ ब. स विभक्त्यर्थः. २ त. भिन्नं. ३ ब. बहुव्रीहिर्विवक्षिते. ४ ब. तद्वाक् प्रवर्तते.
५ ब. अपेक्ष्यमाणः संबन्धो. ६ ओ. त. प्रसज्यते. ७ ब. नाना चित्रा. ८ ब. तद्धर्मे न.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

द्रव्यस्य ग्रहणं[1] चात्र लिङ्गसंख्याविशेषणम् ।
द्रव्याश्रितत्वं हि तयोस्ततोऽन्यस्य न सिध्यतः ॥२४७॥

संबन्धिभिन्नैः[2] संबन्धपरिच्छिन्ने प्रवर्तते ।
समासो द्रव्यसामान्ये विशिष्टार्थानुपातिनि ॥२४८॥

द्रव्यधर्मानतिक्रान्तो भेदधर्मेष्ववस्थितः ।
भविष्यदाश्रयापेक्षे लिङ्गसंख्ये प्रपद्यते ॥२४९॥

शास्त्रप्रवृत्तिभेदेऽपि लौकिकोऽर्थो न भिद्यते ।
नञ्समासे यतस्तत्र त्रयः पक्षा विचारिताः ॥२५०॥

शब्दान्तरेऽपि चैकत्वमाश्रित्यैव विचारणा ।
अब्राह्मणादिषु नञः प्रयोगो न हि विद्यते ॥२५१॥

प्राक् समासात् पदार्थानां निवृत्तिर्द्योत्यते[3] नञा ।
स्वभावतो निवृत्तानां रूपाभेदादलक्षिता ॥२५२॥

ब्राह्मणादिस्थया वाक्येष्वाख्यातपदवाच्यया ।
क्रियया यस्य संबन्धो वृत्तिस्तस्य न विद्यते ॥२५३॥

पाचकादिपदस्था चेन्नञा संबध्यते क्रिया ।
तत्र सत्तानुपादानात् त्रिपक्षी नोपपद्यते ॥२५४॥

सत्तयैवाभिसंबन्धो यदि सर्वत्र कल्प्यते ।
असन्निति समासेऽस्मिन् सत्ताऽन्या परिकल्प्यताम् ॥२५५॥

क्त्वान्ते च तुमुनन्ते च नञ्समासे[4] न दृश्यते ।
विशेषणविशेष्यत्वं नञा सत्ताभिधायिना ॥२५६॥

क्रियायाः साधनाधारसामान्ये नञ् व्यवस्थितः ।
ततो विशिष्टैराधारैर्युज्यते ब्राह्मणादिभिः ॥२५७॥

वृत्तौ यदा गताद्यर्थमुपादाय निरादयः ।
युज्यन्ते साधनाधारैर्नञ्समासेऽपि स क्रमः ॥२५८॥

---

१ ब. ग्रहणे चात्र. २ त. संबन्धिभिन्नसंबन्ध०. ३ ब. विवृतिर्द्योत्यते.
४ ब. नञ्समासेन.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

तत्रासति नञो वृत्तेर्ब्राह्मणक्षत्रियादिभिः ।
विशेषणविशेष्यत्वं कल्प्यते कुब्जखञ्जवत् ॥२५९॥

कामचारे च सत्येवमसतः स्यात् प्रधानता ।
गुणत्वमितरेषां च तेषां वा स्यात् प्रधानता ॥२६०॥

प्राधान्येनाश्रिताः पूर्वं श्रुतेः सामान्यवृत्तयः ।
विशेष एव प्रक्रान्ता ब्राह्मणक्षत्रियादयः ॥२६१॥

यथा गौरादिभिस्तेषामवच्छेदो विधीयते ।
असताऽप्यनभिव्यक्तं तादात्म्यं व्यज्यते तथा ॥२६२॥

यथा सत्ताभिधानाय सन्नर्थः परिकल्प्यते ।
तथा सत्ताभिधानाय नि[1]रुपाख्याऽपि कल्प्यते ॥२६३॥

क्षत्रियादौ पदं कृत्वा बुद्धिः सत्तान्तराश्रया ।
जात्या भिन्नां ततः सत्तां प्रसक्तां[2]मपकर्षति ॥२६४॥

अभाव इति भावस्य प्रतिषेधे विवक्षिते ।
स्वो[3]पाख्यत्वमनाश्रित्य प्रतिषेधो न कल्पते ॥२६५॥

अनेकधर्मवचनैः शब्दैः संघाभिधायिभिः ।
एकदेशेषु वर्तन्ते तुल्यरूपाः स्वभावतः ॥२६६॥

[4]यथैकदेशकरणात् कृत इत्यभिधीयते ।
अकृतश्चेति संघातः स एवाब्राह्मणे क्रमः ॥२६७॥

ब्राह्मणोऽब्राह्मणस्तस्मात् उपन्यासात् प्रसज्यते ।
अकृते वा कृतासङ्गादविशिष्टं कृताकृतात् ॥२६८॥

अमुख्यसंभवे तत्र मुख्यस्य विनिवृत्तये ।
शास्त्रान्वाख्यानसमये नञ् प्रयुक्तो विशेषकः[5] ॥२६९॥

पदार्थानुपघातेन दृश्यते च विशेषणम् ।
अथ जातिमतोऽर्थस्य कश्चिद्धर्मो निवर्तितः ॥२७०॥

---

१ त. निरुपाख्यो विकल्प्यते; ओ. निरुपाख्योऽपि कल्पते. २ ओ. प्रसक्तां व्यपकर्षति.
३ ब. सोपाख्य०. ४ ओ. अथैकदेश० ५ ब. विशेषतः.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

अवश्यं ब्राह्मणे कश्चित् क्वचिद्धर्मो न विद्यते ।
विशेषावचनात्तत्र नञः श्रुतिरनर्थिका ॥२७१॥

अविशिष्टस्य पर्यायो नञ्विशिष्टः प्रसज्यते ।
अन्वाख्यानाद्धि साधुत्वमेवंभूते प्रतीयते ॥२७२॥

पदार्थानुपघातेन यद्यप्यत्र विशेषणम् ।
उपचारसतोऽर्थस्य साऽवस्था द्योत्यते नञा ॥२७३॥

विशेष्येषु यथाभूतः पदार्थः समवस्थितः ।
तथाभूते तथाभावो गम्यते भेदहेतुभिः ॥२७४॥

निवृत्तेऽवयवस्तस्मिन् पदार्थे वर्तते कथम् ।
नानिमित्ता हि शब्दस्य प्रवृत्तिरुपपद्यते ॥२७५॥

आराच्छब्दवदेकस्य विरुद्धेऽर्थे स्वभावतः ।
शब्दस्य वृत्तिर्यद्यस्ति नञः श्रुतिरनर्थिका ॥२७६॥

अथ स्वभावो वचनात् अन्वाख्येयत्वमर्हति ।
तद्वाच्यमप्रसिद्धत्वान्नञार्थो विनिवर्त्यते । ॥२७७॥

यद्यप्युभयवृत्तित्वं प्रधानं[1] तु प्रतीयते ।
प्रस्थानं गम्यते शुद्धे तदर्थेऽपि[2] न तिष्ठतौ ॥२७८॥

किमर्थमतथाभूते सति मुख्यार्थसंभवे ।
भेदे ब्राह्मणशब्दस्य वृत्तिरभ्युपगम्यते ॥२७९॥

अयं पदार्थ एतस्मिन् क्षत्रियादौ न विद्यते ।
इति तद्वचनः शब्दः प्रत्ययाय प्रयुज्यते ॥२८०॥

बुद्धेर्विषयतां प्राप्ते शब्दादर्थे प्रतीयते ।
प्रवृत्तिर्वा निवृत्तिर्वा श्रुत्या ह्यर्थोऽनुषज्यते ॥२८१॥

असम्यगुपदेशाद्वा निमित्तात् संशयस्य वा ।
शब्दप्रवृत्तिर्न त्वस्ति लोष्टादिषु विपर्ययात् ॥२८२॥

अनेकस्मादस इति प्राधान्येन[3] हि सिध्यति ।
सापेक्षत्वं प्रधानानामेवं[4] युक्तं त्वतल्विधौ २८३॥

---

१ ब. प्राधान्यं तु. २ ब. तदर्थो हि न तिष्ठतौ. ३ त. प्राधान्ये सति. ४ त. एवं.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

एकस्य च प्रधानत्वात् तद्विशेषणसंनिधौ ।
प्रधानधर्माव्यावृत्तिरतो न वचनान्तरम् ॥२८४॥

प्रधानमत्र भेद्यत्वात् एकार्थोऽपि कृतो नञा ।
हित्वा स्वधर्मान् वर्तन्ते द्व्यादयोऽप्येकतां गताः ॥२८५॥

ब्राह्मणत्वं यथाऽऽपन्ना नञ्युक्ताः क्षत्रियादयः ।
द्वित्वादिषु तथैकत्वं नञ्योगादुपचर्यते ॥२८६॥

एकत्वयोगमासज्य स धर्मः प्रतिषिध्यते ।
द्व्यादिभ्यस्तेषु तच्छब्दो वर्तते ब्राह्मणादिवत् ॥२८७॥

आविष्टसंख्यो वाक्येऽसौ यथा द्व्यादौ प्रयुज्यते ।
वृत्तौ तस्य प्रधानत्वात् सा संख्या न निवर्तते ॥२८८॥

प्रतिषेध्यो यथाभूतस्तथाभूतोऽनुषज्यते ।
वचनान्तरयोगे हि न सोऽर्थः प्रतिषिध्यते ॥२८९॥

अशुक्ल इति कृष्णादिर्यथाऽर्थः संप्रतीयते ।
संख्यान्तरं तथाऽनेक इत्यत्राप्यभिधीयते ॥२९०॥

क्रियाप्रसङ्गात् सर्वेषु कर्मस्वङ्गीकृतेषु च ।
एकस्मिन् प्रतिषिद्धेऽपि प्राप्तमन्यत् प्रतीयते ॥२९१॥

क्रियाश्रुतिश्च प्रक्रान्ते प्रसज्यप्रतिषेधने ।
पर्युदासे तु नियतं संख्येयान्तरमुच्यते ॥२९२॥

धात्वर्थः कर्मविषयो व्यपदिष्टः स्वसाधनैः ।
अर्थात् सर्वाणि कर्माणि प्रागाक्षिप्यावतिष्ठते ॥२९३॥

निर्ज्ञातसाधनाधारे यत्राख्याते प्रयुज्यते ।
अनेक इति पश्चाच्च तिष्ठतीत्यनुषज्यते ॥२९४॥

साध्यत्वात्तत्र सिद्धेन क्रिया द्रव्येण लक्ष्यते ।
प्रागेवाङ्गीकृतं द्रव्यमतः पूर्वेण भिद्यते ॥२९५॥

संख्यैव प्रतिषेधेन संख्यान्तरमपेक्षते ।
वाक्येऽपि तेन नैकत्वमात्रमेव निवर्त्यते ॥२९६॥

---

१ ब. प्रधानधर्माद् व्यावृत्तिः. २ त. एकार्थो विकृतो. ३ त. क्रिया श्रुतिश्च.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

स्नेहान्तरादवच्छेदस्तथाऽऽसत्तेः प्रतीयते ।
तैलेन भोजने प्राप्ते न त्वन्यदुपसेचनम् ॥२९७॥

एकार्थे वर्तमानाभ्यामसता ब्राह्मणेन च ।
यदा जात्यन्तरं बाह्यं क्षत्रियाद्यपदिश्यते ॥२९८॥

श्यामेव शस्त्री कन्येति यथाऽन्यद् व्यपदिश्यते ।
असन्[1] ब्राह्मण इत्याभ्यां तथाऽन्ये क्षत्रियादयः ॥२९९॥

असास्नो[2] गौरिति यथा गवयो व्यपदिश्यते ।
जात्यन्तरं न गोरेव सास्नाऽभावः[3] प्रतीयते ॥३००॥

तुल्यरूपं यथाऽऽख्यातं कण्टकैर्भेदहेतुभिः ।
खदिरं जातिभेदेन खर्जूरात्[4] प्रतिपद्यते ॥३०१॥

अविद्यमानब्राह्मण्यो यादृशो ब्राह्मणो भवेत् ।
अङ्गीकृतोपमानेन तथाऽन्यार्थोऽ[5]भिधीयते[6] ॥३०२॥

अवृष्टयो यथाऽवर्षा नीहाराभ्रसमावृताः ।
तद्रूपत्वात् स हेमन्त इत्यभिन्नः प्रतीयते ॥३०३॥

अपरे ब्राह्मणादीनां सर्वेषां जातिवाचिनाम् ।
द्रव्यस्यान्यपदार्थत्वे नञा योगं प्रचक्षते ॥३०४॥

न चैवं विषयः[7] कश्चित् बहुव्रीहेः प्रकल्पते ।
अगुरश्च इति व्याप्तिर्नञ्समासेन यस्य न ॥३०५॥

द्वन्द्वैकदेशिनोरुक्ता परवल्लिङ्गता यतः ।
अवर्षासु ततोऽसिद्धिरिष्टयोर्लिङ्गसंख्ययोः ॥३०६॥

विशेषणं ब्राह्मणादि[8] क्रियासंबन्धिनोऽसतः ।
यदा विषयभिन्नं[9] तत् तदाऽसत्त्वं प्रतीयते ॥३०७॥

ब्राह्मणत्वेन चासत्त्वादुच्यते[10]ऽसत्तदन्यथा ।
असदित्यपि सत्त्वेन सतः सत्ता निवर्त्यते ॥३०८॥

---

१ त. असद् ब्राह्मण. २ ओ. ब. असास्ना गौरिति. ३ ब. सास्नाऽभावात् प्रतीयते. ४ ओ. खदिरात्; ब. खर्बुरात्. ५ ब. तथाऽन्योऽर्थो. ६ त. विधीयते. ७ त. चैवंविषयः ...बहुव्रीहिः. ८ ब. ब्राह्मणादिक्रिया. ९ ब. विषयिभिन्नं. १० ब. उच्यते सत्तदन्यथा.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

सामान्यद्रव्यवृत्तित्वात् निमित्तानुविधायिनः ।
अयोगो लिङ्गसंख्याभ्यां स्याद्वा सामान्यधर्मता ॥३०९॥

प्रागसत्त्वाभिधायित्वं समासे द्रव्यवाचिता ।
निमित्तानुविधानं च न सर्वत्र स्वभावतः ॥३१०॥

निमित्तानुविधाने च क्रियायोगो[1] न कल्पते ।
तथा चाव्यपदेश्यत्वात् उपादानमनर्थकम् ॥३११॥

असत्सामान्यवृत्तिर्वा विशेषैः क्षत्रियादिभिः ।
प्रयुक्तैराश्रयैर्भिन्नो याति तल्लिङ्गसंख्यताम् ॥३१२॥

प्रागाश्रयो हि भेदाय प्रधानेऽभ्यन्तरीकृतः ।
पुनः प्रत्यवमर्शेन विभक्त इव दृश्यते ॥३१३॥

समासे श्रूयते स्वार्थो येन तद्वांस्तदाश्रयः ।
द्रव्यं तु लिङ्गसंख्यावदसताऽभ्यन्तरीकृतम् ॥३१४॥

एकार्थविषयौ शब्दौ तस्मिन्नन्यार्थवर्तिनौ ।
असतैव तु भेदानां सर्वेषामुपसंग्रहः ॥३१५॥

ते क्षत्रियादिभिर्वाच्या वाच्या वा सर्वनामभिः ।
यान्तीवान्यपदार्थत्वं नञो रूपाविकल्पनात्[2] ॥३१६॥

विशेषस्याप्रयोगे तु लिङ्गसंख्ये न सिध्यतः ।
अवर्षादिषु दोषश्च हेमन्तोऽन्याश्रयो यतः ॥३१७॥

आकृतिः सर्वशब्दानां यदा वाच्या प्रतीयते ।
एकत्वादेकशब्दत्वं न्याय्यं तस्यां च वर्ण्यते ॥३१८॥

आविष्टलिङ्गता तस्यां स्याद् ग्राम्यपशुसंघवत् ।
द्रव्यभेदेऽपि चैकत्वात्तत्रैकवचनं भवेत् ॥३१९॥

आश्रयाणां हि लिङ्गैः सा नियतैरेव युज्यते ।
तथा च युक्तवद्भावे प्रतिषेधो निरर्थकः ॥३२०॥

सर्वत्राविष्टलिङ्गत्वं लोकलिङ्गपरिग्रहे ।
विरोधित्वात् प्रसज्येत नाश्रितं तच्च लौकिकम् ॥३२१॥

---

१ ब. क्रियायोगे. २ ब. रूपविकल्पनात्.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

सामान्यमाकृतिर्भावो जातिरित्यत्र लौकिकम् ।
लिङ्गं न संभवत्येव तेनान्यत् परिगृह्यते ॥३२२॥

प्रवृत्तिरिति सामान्यं लक्षणं तस्य कथ्यते ।
आविर्भावस्तिरोभावः स्थितिश्चेत्यथ भिद्यते ॥३२३॥

प्रवृत्तिमन्तः सर्वेऽर्थास्तिसृभिस्तु[1] प्रवृत्तिभिः ।
सततं न वियुज्यन्ते वाचश्चैवात्र संभवः ॥३२४॥

यश्चाप्रवृत्तिधर्मा[2]ख्यश्चितिरूपेण गृह्यते ।
अनुयातीव सोऽन्येषां प्रवृत्तीर्विष्वगाश्रयाः ॥३२५॥

तेनास्य चितिरूपं च चितिकालश्च भिद्यते ।
तस्य स्वरूपभेदस्तु न कश्चिदपि विद्यते ॥३२६॥

अचेतनेषु संक्रान्तं चैतन्य[3]मिव दृश्यते ।
प्रतिबिम्बकधर्मेण यत्तच्छब्दनिबन्धनम् ॥३२७॥

अवस्था तादृशी नास्ति या लिङ्गेन न युज्यते ।
क्वचित्तु शब्दसंस्कारो लिङ्गस्यानाश्रये सति ॥३२८॥

कृत्तद्धिताभिधेयानां भावानां न विरुध्यते ।
शास्त्रे लिङ्गं गुणावस्था तथा चाकृतिरिष्यते ॥३२९॥

लिङ्गं प्रति न भेदोऽस्ति द्रव्यपक्षेऽपि कश्चन ।
तस्मात् सप्त विकल्पा ये सैवात्राविष्टलिङ्गता ॥३३०॥

वचने नियमः शास्त्राद् द्रव्यस्याभ्युपगम्यते ।
यतस्तदाकृतौ शास्त्रमन्यथैव समर्थ्यते ॥३३१॥

वर्तते यो बहुष्वर्थो भेदे तस्य विवक्षिते ।
स्वाश्रयैर्व्यपदिष्टस्य शास्त्रे वचनमुच्यते ॥३३२॥

यदा त्वाश्रयभेदेन भेद एव प्रतीयते ।
आकृतेर्द्रव्यपक्षेण तदा भेदो न विद्यते ॥३३३॥

अभेदे त्वेकशब्दत्वाच्छास्त्राच्च वचने सति ।
एकशेषो न वक्तव्यो वचनानां च संभवः ॥३३४॥

---

१ त. तिसृभिश्च. २ त. धर्मार्थ० ३ व. चैतन्यं संक्रान्तमिव दृश्यते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

ननु चानभिधेयत्वे द्रव्यस्य तदपाश्रयः ।
आकृतेरुपकारोऽयं द्रव्याभावान्न कल्पते ॥३३५॥

व्यपदेशोऽभिधेयेन[1] न शास्त्रे कश्चिदाश्रितः ।
द्रव्यं नाम पदार्थो यो न च स प्रतिषिध्यते ॥३३६॥

गुणभावोऽभिधेयत्वं प्रति द्रव्यस्य नाश्रितः ।
उपकारी गुणः शेषः पदार्थ इति कल्पना ॥३३७॥

द्रव्ये न गुणभावोऽस्ति विनाऽद्रव्याभिधायिताम् ।
आकृतौ वा प्रधानत्वमत एवं समर्थ्यते ॥३३८॥

कैश्चिद्गुणप्रधानत्वं नामाख्यातवदिष्यते ।
न वृत्तिवत् परार्थस्य गुणभावस्तु वर्ण्यते ॥३३९॥

गुणभूतस्य नानात्वात् आकृतेरेकशब्दता ।
सिद्धो वचनभेदश्च द्रव्यभेदसमन्वयात् ॥३४०॥

साधनं[2] गुणभावेन क्रियाया भेदकं यथा ।
आख्यातेष्वेकशब्दाया जातेर्द्रव्यं तथोच्यते ॥३४१॥

एकत्वे तुल्यरूपत्वात् शब्दानां प्रतिपादने ।
निमित्तात्तद्वतोऽर्थस्य विशिष्टग्रहणे सति ॥३४२॥

सोऽयमित्यभिसंबन्धात् आश्रयैराकृतेः सह ।
प्रवृत्तौ भिन्नशब्दायां लिङ्गसंख्ये प्रसिध्यतः ॥३४३॥

प्राक् च जात्यभिसंबन्धात् सर्वनामाभिधेयता ।
वस्तूपलक्षणं सत्त्वे प्रयुज्यन्ते त्यदादयः ॥३४४॥

पाकौ पाका इति यथा भेदकः कैश्चिदाश्रयः ।
इष्यते चानुपादानो धर्मोऽसौ गुणवाचिनाम् ॥३४५॥

आश्रयस्यानुपादाने केवलं लभते यदि ।
आधारधर्मान् सामान्यं पुरस्तात्तद्विचारितम् ॥३४६॥

जातौ पूर्वं प्रवृत्तानां शब्दानां जातिवाचिनाम् ।
अशब्दवाच्यात् संबन्धात् व्यक्तिरप्युपजायते ॥३४७॥

---

१ ब. अभिधीयेत. २ ओ. साधकं.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

सोऽयमित्यभिसंबन्धात् जातिधर्मोपचर्यते ।
द्रव्यं तदाश्रयो भेदो जातेश्चाभ्युपगम्यते ॥३४८॥

मञ्चशब्दो यथाऽऽधेयं मञ्चेष्वेव व्यवस्थितः ।
तत्त्वेनाह तथा जातिशब्दो द्रव्येषु वर्तते ॥३४९॥

तत्र जातिपदार्थत्वं तथैवाभ्युपगम्यते ।
जातिरुत्सृष्टसंख्या तु द्रव्यात्मन्यनुषज्यते ॥३५०॥

अस्येदमिति वा यत्र सोऽयमित्यपि वा श्रुतिः ।
वर्तते परधर्मेण तदन्यदभिधीयते ॥३५१॥

यत् प्रधानं न तस्यास्ति स्वरूपमनिरूपणात् ।
गुणस्य चात्मना द्रव्यं तद्भावेनोपलक्ष्यते ॥३५२॥

गुणस्य भेदकाले तु प्राधान्यमुपजायते ।
संसर्गश्रुतिरर्थेषु साक्षादेव न वर्तते ॥३५३॥

जातौ वृत्तो यदा द्रव्ये स शब्दो वर्तते पुनः ।
जातेरेव पदार्थत्वं न तदाऽभ्युपगम्यते ॥३५४॥

प्रवृत्तानां पुनर्वृत्तिरेकत्वेनोपवर्ण्यते ।
प्रतिपत्तेरुपायेषु न तत्त्वमनुगम्यते ॥३५५॥

अपृथक्शब्दवाच्यस्य जातिराश्रीयते यदा ।
द्रव्यस्य सति संस्पर्शे तदा जातिपदार्थता ॥३५६॥

द्रव्यस्य सति संस्पर्शे द्रव्यमाश्रीयते यदा ।
वाच्यं तेनैव शब्देन तदा द्रव्यपदार्थता ॥३५७॥

अपृथक्शब्दवाच्याऽपि भेदमात्रे प्रवर्तते ।
यदा संबन्धवज्जातिः साऽपि द्रव्यपदार्थता ॥३५८॥

अत्यन्तभिन्नयोरेव जातिद्रव्याभिधायिनोः ।
अवाच्यस्योपकारित्व आश्रिते तूभयार्थता ॥३५९॥

आश्रिते त्वाश्रयकृतं भेदमभ्युपगच्छता ।
पुनश्चाप्येकशब्दत्वं जातिशब्देऽनुवर्णितम् ॥३६०॥

---

१ ब. जातिशब्देन वर्णितम्.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

अनिर्ज्ञातस्य निर्ज्ञानं येन तन्मानमुच्यते ।
प्रस्थादिकेन मेयात्मा साकल्येनावधार्यते ॥३६१॥

अनिर्ज्ञातं प्रसिद्धेन येन तद्धर्म गम्यते ।
साकल्येनापरिज्ञानादुपमानं तदुच्यते ॥३६२॥

द्वयोः समानो यो धर्म उपमानोपमेययोः ।
समास उपमानानां शब्दैस्तदभिधायिभिः ॥३६३॥

आधारभेदाद्भेदो यः श्यामत्वे सोऽविवक्षितः ।
गुणोऽसावाश्रितैकत्वो भिन्नाधारः प्रतीयते ॥३६४॥

गुणयोर्नियतो भेदो गुणजातेस्तथैकता ।
एकत्वेऽत्यन्तभेदे वा नोपमानस्य संभवः ॥३६५॥

जातिमात्रव्यपेक्षायामुपमार्थो न कश्चन ।
श्यामत्वमेकं गुणयोरुभयोरपि वर्तते ॥३६६॥

येनैव हेतुना श्यामा शस्त्री तत्र प्रवर्तते ।
स हेतुर्देवदत्तायाः प्रत्ययेन[1] विशिष्यते ॥३६७॥

आश्रयाद् यो गुणे भेदो जातेर्या चाविशिष्टता ।
ताभ्यामुभाभ्यां द्रव्यात्मा सव्यापारः प्रतीयते ॥३६८॥

सोऽयमेकत्वनानात्वे[2] व्यवहारः समाश्रितः ।
भेदाभेदविमर्शेन व्यतिकीर्णेन वर्तते ॥३६९॥

श्यामेत्येवाभिधीयेत जातिमात्रे विवक्षिते ।
शस्त्र्यादीनामुपादाने तत्र नास्ति प्रयोजनम् ॥३७०॥

अशब्दवाच्यो यो भेदः श्याममात्रे न[3] वर्तते ।
श्यामेषु केषुचिद् वृत्तिर्यस्य सोऽत्र व्यपेक्ष्यते ॥३७१॥

श्यामेषु केषुचित् किंचित् किंचित् सर्वत्र वर्तते ।
सामान्यं कश्चिदेकस्मिन् श्यामे भेदो व्यवस्थितः ॥३७२॥

तथा हि सति सौरभ्ये भेदो जात्युत्पलादिषु ।
गन्धानां सति भेदे तु सादृश्यमुपलभ्यते ॥३७३॥

---

१ त. प्रत्यये न. २ ब. नानात्वं. ३ ब. स वर्तते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

गुणानामाश्रयाद् भेदात् स्वतो वाऽप्यनुगम्यते[1]।
अनिर्देश्याद्विशेषाद्वा संकराद्वा गुणान्तरैः[2] ॥३७४॥

उपमानं प्रसिद्धत्वात् सर्वत्र व्यतिरिच्यते ।
उपमेयत्वमाधिक्ये साम्ये वा न निवर्तते ॥३७५॥

अन्यैस्तु मानं जात्यादि भेद्यस्यार्थस्य वर्ण्यते ।
अनिर्ज्ञातस्वरूपो हि ज्ञेयोऽर्थस्तेन मीयते ॥३७६॥

मितस्तु स्वेन मानेन प्रसिद्धो यो गुणाश्रयः ।
आश्रयान्तरमानाय स्वधर्मेण प्रवर्तते ॥३७७॥

रूपान्तरेण संस्पर्शो रूपान्तरवतां सताम् ।
भिन्नेन यस्य भेद्यानामुपमानं तदुच्यते ॥३७८॥

धर्मः समानः श्यामादिरुपमानोपमेययोः ।
आश्रीयमाणप्राधान्यो धर्मेणान्येन भिद्यते ॥३७९॥

शस्त्रीकुमार्योः सदृशः श्याम इत्येवमाश्रिते ।
व्यपदेश्यमनेनेति निमित्तं गुणयोः स्थितम् ॥३८०॥

यदा निमित्तैस्तद्वन्तो गच्छन्तीव तदात्मताम् ।
भेदाश्रयं तदाख्यानमुपमानोपमेययोः ॥३८१॥

तत्त्वासङ्गविवक्षायां येषु भेदो निवर्तते ।
लुप्तोपमानि तान्याहुस्तद्धर्मेण समाश्रयात् ॥३८२॥

शस्त्र्यां प्रसिद्धं श्यामत्वं मानं सा तेन मीयते ।
अन्या श्यामा तु तद्रूपा तेनात्यन्तं न मीयते ॥३८३॥

शस्त्रीं स्वेन गुणेनातो मिमानामाश्रयान्तरम् ।
असमाप्तगुणं सिद्धेरुपमानं प्रचक्षते ॥३८४॥

उपमेये स्थितो धर्मः श्रुतोऽन्यत्रानुमीयते ।
श्रुतोऽथवोपमानस्थ उपमेयेऽनुमीयते ॥३८५॥

अधीयते ब्राह्मणवत् क्षत्रिया इति दृश्यते ।
उपमेयस्य भिन्नत्वात् वचनं क्षत्रियाश्रयम् ॥३८६॥

---

१ ब. वाच्यनुवर्तते. २ ओ. गुणान्तरे.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

साधारणं ब्रुवन् धर्मं क्वचिदेव व्यवस्थितम् ।
सामान्यवचनः शब्द इति सूत्रेऽपदिश्यते ॥३८७॥

नाभेदेन न भेदेन गुणो द्विष्ठोऽभिधीयते ।
भिन्नयोर्धर्मयोरेकः श्रूयतेऽन्यः प्रतीयते ॥३८८॥

नात्यन्ताय मिमीते यत् सामान्ये समवस्थितम् ।
सादृश्यादुपमेयार्थः समीपे परिकल्प्यते ॥३८९॥

मानं प्रति समीपं वा सादृश्येन प्रतीयते ।
परिच्छेदाद्धि सादृश्यमिह मानोपमानयोः ॥३९०॥

एकजातिव्यपेक्षायां तदेवेत्यवसीयते ।
भेदस्यैव व्यपेक्षायामन्यदेवेति गम्यते ॥३९१॥

कर्मत्वं करणत्वं च भेदेनैवाश्रितं यतः ।
अत्यन्तैकत्वविषयात् न स्यात् तेनात्र संशयः ॥३९२॥

भेदेन तुल्यरूपत्वात् शालींस्तानिति दृश्यते ।
जात्यभेदात् स एवायमिति भिन्नोऽभिधीयते ॥३९३॥

कथं ह्यवयवोऽन्यस्य स्यादन्य इति चोच्यते ।
अत्यन्तभेदे नानात्वं यत्र तत्त्वं न विद्यते ॥३९४॥

अभेदस्य विवक्षायामेकत्वं संघसंधिनोः ।
संधिनोर्न त्वभेदोऽस्ति तथा¹ऽन्यत्वमुदाहृतम् ॥३९५॥

तत्राभिन्नव्यपेक्षायामुपमार्थो न विद्यते ।
यो हि गौरिति विज्ञाने हेतुः सोऽस्ति गवान्तरे ॥३९६॥

व्यावृत्तानां विशेषाणां व्यापारे तु विवक्षिते ।
न कश्चिदुपकारोऽस्ति बुद्धेर्बुद्ध्यन्तरं प्रति ॥३९७॥

किंचिद् यत्रास्ति सामान्यं यदि भेदाश्च केचन ।
गोत्वं गोष्वस्ति सामान्यं भेदाश्च शबलादयः ॥३९८॥

सामान्यं श्यामताद्येवं² तद्धि साधारणं द्वयोः ।
तदेव सिद्ध्यसिद्धिभ्यां भेद इत्यपदिश्यते ॥३९९॥

---

१. ब. न वाऽन्यत्व० २ ब. श्यामता चैव.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

श्यामत्वमेव सामान्यमन्येषामुभयोः स्थितम् ।
संपूर्णत्वात्तदन्यस्मात् विशेष इति गम्यते ॥४००॥

आकृतौ वाऽपि सामान्ये क्वचिदेव व्यवस्थिताः ।
श्यामादयोऽवसीयन्ते विशेषास्त इहाश्रिताः ॥४०१॥

जातेरभेदे भेदे वा सादृश्यं तत् प्रचक्षते ।
कश्चित् कदाचिदर्थात्मा तथाभूतोऽपदिश्यते ॥४०२॥

यत्रार्थे प्रत्ययाभेदो न कदाचिद्विकल्पते[1] ।
अविद्यमानभेदत्वात् स एक इति गम्यते ॥४०३॥

योऽर्थ आश्रितनानात्वः स एवेत्यपदिश्यते ।
व्यापारं जातिभागस्य तत्रापि प्रतिजानते ॥४०४॥

जातिभागाश्रया प्रख्या तत्राभिन्ना प्रवर्तते ।
व्यक्तिभागाश्रया बुद्धिस्तत्र भेदेन जायते ॥४०५॥

अन्यत्र वर्तमानं सत् भेदाभेदसमन्वितम् ।
निमित्तं पुनरन्यत्र नानात्वेनेव गृह्यते ॥४०६॥

आधारेषु पदन्यासं कृत्वोपैति तदाश्रयम् ।
स सादृश्यस्य विषय इत्यन्यैरपदिश्यते ॥४०७॥

परापेक्षे यथा भावे कारणाख्या प्रवर्तते ।
तथाऽन्याधिगमापेक्षमुपमानं प्रचक्षते ॥४०८॥

गुरुशिष्यपितापुत्रक्रियाकालादयो यथा ।
व्यवहारास्तथौपम्यमप्यपेक्षानिबन्धनम् ॥४०९॥

श्यामत्वमुपमाने चेत् वृत्तौ[2] वृत्तं प्रयुज्यते ।
उपमेयं समासेन बाह्यं तत्राभिधीयते ॥४१०॥

टाबन्त एव चैत्रादौ श्यामाशब्दस्तथा भवेत् ।
सूत्रे च प्रथमाऽभावात् न श्यामाद्युपसर्जनम् ॥४११॥

अथवैकविभक्तित्वात् गुणत्वाद्वोपसर्जनम् ।
नैव तित्तिरिकल्माष्यामिष्टः स्त्रीप्रत्ययो भवेत् ॥४१२॥

---

१ ब. विकल्प्यते. २ त. धृत्तं वृत्तौ.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

सतिशिष्टबलीयस्त्वात् बाह्ये ङीपि च सत्यपि ।
उपमानस्वरो न स्यात् तस्मात् स्त्र्यन्तः समस्यते ॥४१३॥

गुणे न चोपमानस्थे सापेक्षत्वं प्रकल्पते ।
प्राधान्यंस्य तथा न स्याद् व्याघ्रादौ लिङ्गदर्शनम् ॥४१४॥

तस्मात् सति गुणत्वेऽपि प्राधान्यं विग्रहान्तरे ।
नैवंजातीयकं शास्त्रे संभवत्युपसर्जनम् ॥४१५॥

उपमेयात्मनि श्यामो वर्तमानोऽभिधीयते ।
उपमानेष्वनिर्दिष्टः सामर्थ्यात् संप्रतीयते ॥४१६॥

द्रव्यमात्रेऽपि निर्दिष्टे चन्द्रवक्त्रेऽनुगम्यते ।
विशिष्ट एव चन्द्रस्थो गुणो नोपप्लवादयः ॥४१७॥

भेदभावनयैतच्च[1] समासेऽप्युपवर्ण्यते ।
विशिष्टगुणभिन्नेऽर्थे पदमन्यत् प्रयुज्यते ॥४१८॥

यदि भिन्नाधिकरणो वचनादनुगम्यते ।
मृगीव चपलेत्यत्र पुंवद्भावो न सिध्यति ॥४१९॥

अस्त्रीपूर्वपदत्वात्तु पुंवद्भावो भविष्यति ।
यथैव मृगदुग्धादौ न चेत् स्त्र्यर्थो विवक्ष्यते ॥४२०॥

शस्त्रीव शस्त्रीश्यामेति देवदत्तैव कथ्यते ।
तस्यामेवोभयं तस्मादुच्यते शास्त्रविग्रहे ॥४२१॥

पुंवद्भावस्य सिद्ध्यर्थं पक्षे स्त्रीप्रत्ययस्य च ।
बह्वपेक्ष्यमतस्तस्यामुभयप्रतिपादनम् ॥४२२॥

श्यामा शस्त्री यथा श्यामा शस्त्रीकल्पेति चोच्यते ।
तत्रोपमानेतरयोः श्यामेत्येतदपेक्ष्यते ॥४२३॥

अथ श्यामेव शस्त्रीयं श्यामेत्येवं प्रयुज्यते ।
शस्त्री यथेयं श्यामेति तावदेव प्रतीयते ॥४२४॥

उपलक्षणमात्रार्था गुणस्यास्य यदि श्रुतिः ।
पृथग्द्वयोः श्रुतोऽप्येष नेष्टस्यार्थस्य वाचकः ॥४२५॥

---

१ हे. भेदवासनयैतच्च.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

उपमेयं तु यद्वाच्यं तस्य चेत् प्रतिपादने ।
सव्यापारा गुणास्तत्र सर्वस्योक्तिः सकृच्छ्रुतौ ॥४२६॥

प्रकाराधारभेदेन विशेषे समवस्थितः ।
शब्दान्तराभिसंबन्धे सामान्यवचनः कथम् ॥४२७॥

सादृश्यमात्रं सामान्यं द्विष्ठं कैश्चित् प्रतीयते ।
गुणो भेदेऽप्यभेदेन द्विवृत्तिर्वा विवक्षितः ॥४२८॥

व्यापारो जातिभागस्य द्रव्ययोर्वाऽभिधित्सितः ।
रूपात् सामान्यवाचित्वं प्राग्वा वृत्तेरुदाहृतम् ॥४२९॥

व्याघ्रशब्दो यदा शौर्यात् पुरुषार्थोऽवतिष्ठते ।
तदाऽधिकरणाभेदात् समासस्यास्ति संभवः ॥४३०॥

शूरशब्दप्रयोगे तु व्याघ्रशब्दो मृगे स्थितः ।
भिन्नेऽधिकरणे वृत्तेस्तत्र नैवास्ति संभवः ॥४३१॥

सामानाधिकरण्येऽपि गुणभेदस्य संभवात् ।
प्रयोगः शूरशब्दस्य समासेऽप्यनुषज्यते ॥४३२॥

पूजोपाधिश्च यो दृष्टः कुत्सनोपाधयश्च ये ।
तेषां भिन्ननिमित्तत्वात् नियमार्था पुनः श्रुतिः ॥४३३॥

असंभवेऽपि वा वृत्तेः स्यादेतल्लिङ्गदर्शनम् ।
अच्वेरिति यथा लिङ्गमभावेऽपि भृशादिषु ॥४३४॥

वत्यन्तावयवे वाक्ये यदौपम्यं प्रतीयते ।
तत्प्रत्ययविधौ सूत्रे निर्देशोऽयं विचार्यते ॥४३५॥

क्रियेत्युपाधिः प्राथम्यात् प्रकृत्यर्थस्य यद्यपि ।
न प्रातिपदिकं तत्र क्रियावाच्युपपद्यते ॥४३६॥

सत्त्ववृत्तस्य शेषे वा तृतीयासाधनेऽपि वा ।
तिङामसत्त्ववाचित्वात् उभयं तन्न विद्यते ॥४३७॥

पाकादयस्तृतीयान्ताः सत्त्वधर्मसमन्वयात् ।
न क्रियेत्यपदिश्यन्ते कृत्वोऽर्थप्रत्यये यथा ॥४३८॥

---

१ ब. क्रिया वाऽप्युपपद्यते. २ ब. तत्र विद्यते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

ये चाव्ययाः[1] कृतः केचित् क्रियाधर्मसमन्विताः ।
तेषामसत्त्ववाचित्वं तिङन्तैर्न विशिष्यते ॥४३९॥

कृत्वसुज्विषया याऽपि शयितव्यादिषु क्रिया ।
उपमानोपमेयत्वं तत्रात्यन्तमसंभवि ॥४४०॥

न केवलौ द्रव्यगुणौ तद्वान् वाऽप्युपमीयते ।
शयितव्यादिभिस्तेषु नोपमार्थोऽस्ति कश्चन ॥४४१॥

उपमानोपमेयत्वे द्रव्ये चानुक्तधर्मिणि ।
निमित्तत्वेन गम्यन्ते रूढयोगाः क्रियागुणाः ॥४४२॥

होतव्यसदृशो होतेत्यत्राप्यर्थो न[2] विद्यते ।
विरोधात् क्रियया तस्मात् क्रियावान्नोपमीयते ॥४४३॥

क्रिया समानजातीया तद्भावान्नोपमीयते ।
जातिभेदेऽपि पाकेन भिन्नाः पाकादयः क्रियाः ॥४४४॥

आधार[3]भेदाद् भिन्नायामुपमानस्य संभवः ।
अध्येतव्येन विप्राणां तुल्यमध्ययनं विशाम् ॥४४५॥

अर्थात् प्रकरणाद्वापि यत्रापेक्ष्यं प्रतीयते ।
सामर्थ्यादनपेक्षस्य तस्य वृत्तिः प्रसज्यते ॥४४६॥

तैलपाकेन तुल्ये च घृतपाके विवक्षिते ।
क्रियावदपि कार्याणां दर्शनात् प्रत्ययो भवेत् ॥४४७॥

अतिङ्ग्रहणमेवं तु समासस्य निवर्तकम् ।
गमनं कारकस्येति ण्वुल्यन्यस्मिन्न संभवेत् ॥४४८॥

सर्वस्य परिहारार्थं समुदायत्वमाश्रितम् ।
शुद्धायाः संभवान्न स्यात् क्रियाया ब्राह्मणादिषु ॥४४९॥

उपमानविवक्षायां स्वधर्मश्च निवर्तते ।
क्रियाया न श्रुताद् यस्मात् उपमानं समाप्यते ॥४५०॥

तृतीयोऽप्याश्रितो भेदो धर्मः साधारणो द्वयोः ।
व्यापारवान् न कृत्स्नस्य साम्यं कृत्स्नेन[4] विद्यते ॥४५१॥

---

१ ओ. ये चाव्ययकृतः. २ ओ. नु विद्यते. ३ ब. आकारभेदात्. ४ ब. कृत्स्ने न विद्यते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

द्रव्ये वाऽपि क्रियायां वा निमित्तात् तत् प्रकल्पते ।
क्रियाणां विद्यमानत्वात् वृत्तिर्न स्याद् गवादिषु ॥४५२॥

अभावात् केवलायास्तु तद्वानर्थः प्रतीयते ।
प्रधानासंभवे युक्ता लक्षणार्था क्रियाश्रुतिः ॥४५३॥

क्रियान्तरेषु सापेक्षाः क्रियाशब्दाः क्रियान्तरे ।
उपकाराय गृह्यन्ते यथैव ब्राह्मणादयः ॥४५४॥

यथा प्रकर्षः सर्वत्र निमित्तान्तरहेतुकः ।
द्रव्यवद्गुणशब्देऽपि स निमित्तमपेक्षते ॥४५५॥

यो य उच्चार्यते शब्दः स स्वरूपनिबन्धनः ।
यथा तथोपमानेषु व्यपेक्षा न निवर्तते ॥४५६॥

क्रियावृत्तेस्तृतीयान्तस्यैवं चासंभवे सति ।
प्रसिद्धन्यायकरणो भाष्ये युजिरुदाहृतः ॥४५७॥

अन्तर्भूते तु करणे प्रयोगो न पुनर्भवेत् ।
न्यायेनायुक्तमित्यत्र जीवतौ प्राणकर्मवत् ॥४५८॥

शास्त्राभ्यासाय[1] भेदोऽयमयुक्तमिति वर्ण्यते ।
अशोभनमसंबद्धमिति रूढिर्व्यवस्थिता ॥४५९॥

विविभक्तिः प्रकृत्यर्थं प्रत्युपाधिः कथं भवेत् ।
विभक्तिपरिणामे च प्रकल्प्यं विषयान्तरम् ॥४६०॥

विभक्त्यन्तरयोगो हि यस्य तद्विषयान्तरे ।
विभक्त्यन्तरसंबन्धः सामर्थ्यादनुमीयते ॥४६१॥

सारूप्याच्चु तदेवेदमिति तत्रोपचर्यते ।
शब्दान्तरे विभक्त्या तु युक्तं शास्त्रे तदश्रुतम् ॥४६२॥

प्रकृतिश्चेत् तृतीयान्ता तेनेत्यस्मात् प्रतीयते ।
क्रियेति प्रथमान्ता सा कथं भवितुमर्हति ॥४६३॥

क्रिययेति तृतीया च प्रयोगे कस्य कल्प्यताम्[2] ।
तेनेत्यस्य हि संबन्धः सूत्रस्थेन न विद्यते ॥४६४॥

---

१ ब. शास्त्राभ्यासाच्च. २ ब. कथ्यताम्.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

सोपस्कारेषु सूत्रेषु वाक्ये[1] शेषः समर्थ्यते ।
तेन यत्तत् तृतीयान्तं क्रिया चेत् सेति गम्यते ॥४६५॥

उपाधेः कस्यचिद्वाक्ये प्रयोग उपलभ्यते ।
प्रतीयमानधर्माऽन्यो न कदाचित् प्रयुज्यते ॥४६६॥

नीलमुत्पलमित्यत्र न विशेष्ये न भेदके ।
कश्चित् तद्धर्मवचनो वाक्ये शब्दः प्रयुज्यते ॥४६७॥

अत्यन्तानुगमात् तत्र न सूत्रे न च विग्रहे ।
विभक्तिपरिणामेन किंचिदस्ति प्रयोजनम् ॥४६८॥

तृतीयान्तं क्रियेत्येतत् विग्रहे न प्रयुज्यते ।
यथा दण्डः प्रहरणं क्रीडायामिति दृश्यते ॥४६९॥

घेविधौ[2] घश्च संज्ञायामिति सूत्र उदाहृतम् ।
उपादानं प्रयोगेषु तस्यात्यन्तं न विद्यते ॥४७०॥

यैरप्रयुक्तैः संस्कारः प्रधानेषु प्रतीयते ।
ते भेदेऽपि विभक्तीनां निर्दिश्यन्त उपाधयः ॥४७१॥

समुदायेषु वर्तन्ते भावानां सहचारिणाम् ।
शब्दास्तत्त्वविवक्षायां समुच्चयविकल्पयोः ॥४७२॥

समुच्चयस्तु क्रियते येषु प्रत्यर्थवृत्तिषु ।
भेदाधिष्ठानया योगस्तेषां भवति संख्यया ॥४७३॥

सर्वैर्विशिष्टास्तैरर्थैर्जन्यन्ते सहचारिभिः ।
बुद्धयः प्रतिपत्तॄणां शब्दार्थास्तानतो विदुः ॥४७४॥

संसृष्टाः प्रत्ययेष्वर्थाः सर्व एवोपकारिणः ।
तेषां प्रत्ययरूपेण सर्वेषां शब्दवाच्यता ॥४७५॥

केवलानां तु भावानां न रूपमवधार्यते ।
अनिरूपितरूपेषु तेषु शब्दो न वर्तते ॥४७६॥

पूर्वशब्दप्रयोगाच्च समूहान्न निवर्तते ।
वर्ततेऽवयवे नापि नोपात्तं त्यजति[3] क्वचित् ॥४७७॥

---

१ ब. वाक्यशेषः. २ ब. घविधौ दध्न. ३ ब. त्यज्यते.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

समुदायाभिधायी च यदि भेदं विशेषयेत् ।
तत्रातुल्यविभक्तित्वं पूर्वकायादिवद् भवेत् ॥४७८॥

समूहे च प्रदेशे च पञ्चाला इति दृश्यते ।
तथा विशेषणं सर्वं इत्येतदुपपद्यते ॥४७९॥

तथाऽर्धपिप्पलीत्यत्र जात्यन्तरनिवृत्तये ।
अर्धं च पिप्पली चेति खण्डे शब्दः प्रयुज्यते ॥४८०॥

पञ्चालानां प्रदेशोऽपि भिन्नो जनपदान्तरात् ।
तत्रान्यस्य निवृत्त्यर्थे शब्दे भेदो न गम्यते ॥४८१॥

प्रसिद्धास्तु विशेषेण समुदाये व्यवस्थिताः ।
प्रदेशे दर्शनं तेषामर्थप्रकरणादिभिः ॥४८२॥

यदुपव्यञ्जनं जातेः सहचारि च कर्मसु ।
तत्र[1] वा रूढसंबन्धं यत् प्रायेणोपलक्षितम् ॥४८३॥

समुदायः प्रदेशो वेत्येवं तस्मिन्ननाश्रिते ।
अर्थात्मन्यविशेषेण वर्तन्ते ब्राह्मणादयः ॥४८४॥

यश्च तुल्यश्रुतिर्दृष्टः समुदाये व्यवस्थितः ।
तेनोपचरितैकत्वं प्रदेशेऽप्युपलभ्यते ॥४८५॥

संस्कारादुपघाताद्वा वृत्तोऽक्तपरिमाणके ।
तैलादौ जातिशब्दोऽत्र सामर्थ्यादवसीयते ॥४८६॥

[2]नेक्षिता जातिशब्दानां समुदायानुपातिता ।
जातिमाचक्षते तर्हि व्यक्तीर्वा जातिसंश्रयाः ॥४८७॥

न जातिगुणशब्देषु मूर्तिभेदो विवक्षितः ।
ते जातिगुणसंबन्धभेदमात्रनिबन्धनाः ॥४८८॥

कृष्णादिव्यपदेशश्च सर्वावयववृत्तिभिः ।
गुणैस्तेऽप्येकदेशस्थाः पटादीनां विशेषकाः ॥४८९॥

---

१ ब. तत्तदारूढ० २ ओ. त. श्लोकोऽयं मूलग्रन्थे न पठ्यते; टीकायामवतरणचिह्नान्तर्गतो दृश्यते । त. जातिमाचक्षते ते हि व्यक्तिर्जातिसमाश्रया ।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

पटावयववृत्तास्तु यदा तत्र पटादयः ।
तदा तैलादिवत्तेषां जातिशब्दत्वमुच्यते ॥४९०॥

निवृत्त्यर्था श्रुतिर्येषां भेदस्तेष्वनपेक्षितः ।
प्रदेशे समुदाये वा गुणोऽन्येषां निवर्तकः ॥४९१॥

ब्राह्मणाध्ययने तत्र वर्तते ब्राह्मणश्रुतिः ।
सादृश्यं तत्र दृष्टं हि क्षत्रियाध्ययनादिभिः ॥४९२॥

ब्राह्मणाध्ययने वृत्तिर्यदि स्याद् ब्राह्मणश्रुतेः ।
वक्तव्यं केन धर्मेण तुल्यत्वं क्रिययोरिति ॥४९३॥

अध्येतरि यदा वृत्तिरुच्यते ब्राह्मणश्रुतेः ।
निमित्तत्वं तदोपैति क्रियैवाध्येतरि स्थिता ॥४९४॥

सिंहशब्देन संबन्धे शौर्यमात्राभिधायिनः[1] ।
चैत्रात् षष्ठी प्रसज्येत योगे शौर्यादिभिर्यथा ॥४९५॥

ब्राह्मणायेव दातव्यं वैश्यायेत्येवमादिषु ।
संप्रदानादियोगश्च क्रियामात्रे न कल्पते ॥४९६॥

क्रियामात्राभिधायित्वादव्ययेषु वतेर्न च ।
पाठः कदाचित् कर्तव्यस्तुल्यौ पक्षावुभौ यतः ॥४९७॥

जहाति जातिं द्रव्यं वा तस्मान्नावयवे स्थितः ।
क्रियायास्तु श्रुतिर्यस्मात् तद्वत्यर्थेऽवतिष्ठते ॥४९८॥

अक्रियाणां निवृत्त्यर्था यतश्चात्र क्रियाश्रुतिः ।
क्रियोपलक्षिते तस्मात् क्रियाशब्दः प्रतीयते ॥४९९॥

होतव्यादिषु यस्माच्च क्रियाऽन्या ब्राह्मणादिवत् ।
अपेक्षणीया शुद्धेऽर्थे तस्माद् वृत्तिर्न कस्यचित् ॥५००॥

सर्वं वाऽप्येकदेशो वा यस्मिन्नाश्रीयते क्वचित् ।
विशेषवृत्तिं तं सर्वमाहुर्भेदे व्यवस्थितम् ॥५०१॥

समुच्चयो विकल्पो वा प्रकाराः सर्व एव वा ।
विशेषा इति वर्ण्यन्ते सामान्यं वोऽविकल्पितम्[2] ॥५०२॥

---

१ ब. शौर्यमात्राभिधायिना. २ ब. वा विकल्पितम्.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

न हि ब्राह्मण इत्यत्र भेदः कश्चिदुपाश्रितः[1] ।
अपाकृतो वा तेनायं समुदाये व्यवस्थितः ॥५०३॥

क्रिया त्वाश्रीयते यस्मिन् स भेदोऽध्यवसीयते ।
तथाऽन्यथा सर्वथा चेत्यप्रयोगे न विद्यते ॥५०४॥

उपमाने क्रियावृत्तिमुपमेये क्रियाश्रुतिः ।
प्रत्याययन्ती भेदस्य करोतीव पदार्थताम् ॥५०५॥

व्यापारेणैव सादृश्ये व्यापारस्य विवक्षिते ।
क्रियावद्वचनाच्छब्दात् प्रत्ययः प्रतिपाद्यते ॥५०६॥

क्रियावतोऽपि[2] सादृश्ये वक्तुमिष्टे क्रियावता ।
अध्येता ब्राह्मण इव प्रत्ययो न निवर्तते ॥५०७॥

अधीते तुल्य इत्येवं पुंल्लिङ्गेन विशेषणम् ।
क्रियावति क्रियायां तु तुल्यशब्दे नपुंसकम् ॥५०८॥

प्रकृत्यर्थे [3]विशिष्टेऽपि प्रत्ययार्थाविशेषणात् ।
पुत्रेण तुल्यः कपिल इति वृत्तिः प्रसज्यते ॥५०९॥

याः पुत्रे रूढसंबन्धाः क्रिया लोके विवक्षिताः ।
[4]ताभिः क्रियावतः पुत्रात् गुणतुल्ये वतिर्भवेत् ॥५१०॥

अन्तर्भूतं निमित्तं च रूढिशब्देषु यद्यपि ।
क्रियास्तु सहचारिण्यो रूढाः सन्ति पदार्थवत् ॥५११॥

क्रमं तु यदि बाधित्वा प्रत्ययार्थविशेषणम् ।
प्रधानानुग्रहात् साम्यात् विभक्तेश्चावतिष्ठते ॥५१२॥

प्रकृतेरविशिष्टत्वात् क्रियातुल्ये प्रसज्यते ।
पुत्रादौ गुणशब्देभ्यः पूर्वोक्तस्य विपर्यये ॥५१३॥

स्थूलेन तुल्यो यातीति बहिरङ्गा क्रियाश्रुतिः ।
अनिमित्तं वतेस्तुल्यं यातीत्यत्रेष्यते वतिः ॥५१४॥

द्वयं विशेष्यते तेन यदेकत्र विशेषणम् ।
तुल्यशब्दो हि तं धर्ममुभयस्थमपेक्षते ॥५१५॥

---

१ त. ब. अपाश्रितः. २ ब. क्रियावतो हि. ३ ब. विशिष्टोऽपि. ४ ब. तान्निक्रियावतः.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

एकः समानो धर्मश्चेत् उपमानोपमेययोः ।
तुलया संमितं तुल्यमिति तत्रोपपद्यते ।।५१६।।

सूत्रे श्रुतश्च द्विष्ठोऽसावभेदेन प्रतीयते ।
न च सामान्यशब्दत्वादश्रुतां[1] गम्यते क्रिया ।।५१७।।

अश्रुताश्च प्रतीयन्ते निर्देशस्थायितादयः ।
ये धर्मा नियतास्तेषां पुत्रादिषु न विद्यते ।।५१८।।

अनाश्रितक्रियस्तस्मात् न तुल्योस्ति क्रियावता ।
क्रियायाः श्रवणे साऽपि क्रियावत्ता प्रतीयते ।।५१९।।

द्वयोः प्रतिविधानाच्च ज्यायस्त्वमभिधीयते ।
नित्यासत्त्वाभिधायित्वात् प्रत्ययार्थविशेषणे ।।५२०।।

असत्त्वभूतो व्यापारः केवलः प्रत्यये यतः ।
विद्यते लक्षणार्थत्वं नास्ति तेन क्रियाश्रुतेः ।।५२१।।

क्रियावतस्तु ग्रहणात् प्रकृत्यर्थविशेषणे ।
क्रियामात्रेण तुल्यत्वे सिद्धाऽसत्त्वाभिधायिता[2] ।।५२२।।

यदा क्रियानिमित्तं तु सादृश्यं स्यात् क्रियावतोः ।
क्रियावतोऽभिधेयत्वात् तदा द्रव्याभिधायिता ।।५२३।।

अव्ययेषु वतेः पाठः कार्यस्तत्र स्वरादिवत् ।
ब्राह्मणेन समोऽध्येतेत्यत्र वत्प्रत्ययो[3] भवेत् ।।५२४।।

सामानाधिकरण्यं च वत्यर्थेनापदिश्यते ।
तुल्यमित्यन्यथा कल्प्यो वाक्यशेषोऽश्रुतो भवेत् ।।५२५।।

क्रियावतोश्च सादृश्ये प्रत्ययार्थविशेषणे ।
अध्येत्रा सदृशोऽध्येतेत्यत्र नास्ति वतेर्विधिः ।।५२६।।

तुल्यार्थैरिति या तस्यास्तृतीयाया न भिद्यते ।
अर्थो भेदेऽपि सर्वाभिरितराभिर्विभक्तिभिः ।।५२७।।

भोज्यते ब्राह्मण इव तुल्यं भुक्तं द्विजातिना ।
पश्यति ब्राह्मणमिव तुल्यं विप्रेण पश्यति ।।५२८।।

---

१ ब. अश्रुते गम्यते. २ त. सिद्धासत्त्वाभिधायिता. ३ त. च प्रत्ययो.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

ब्राह्मणेनेव विज्ञातं तुल्यं ज्ञातं द्विजातिना ।
दीयतां ब्राह्मणायेव तुल्यं विप्रेण दीयताम् ॥५२९॥

ब्राह्मणादिव वैश्यात् त्वमधीष्वाध्ययनं बहु ।
इत्येवमादिभिर्भेदस्तृतीयाया न कश्चन ॥५३०॥

तुल्यं [१]मधुरयाऽधीये मात्रा तुल्यं स्मरामि ताम् ।
मधुरायाश्च मातुश्च कथं सादृश्यकल्पना ॥५३१॥

मधुराविषयः पाठः स्मरणं मातृकर्मकम् ।
मधुरामातृशब्दाभ्यामभेदेनाभिधीयते ॥५३२॥

उष्ट्रावयवतुल्येषु मुखेषूष्ट्रश्रुतिर्यथा ।
वर्तते गृहतुल्ये च प्रासादे मधुराश्रुतिः ॥५३३॥

यथाऽध्ययनयोः साम्यमध्येत्रोरपदिश्यते ।
तथा क्रियागतैर्धर्मैरुच्यन्ते साधनाश्रयाः ॥५३४॥

इवार्थे [२]यच्च वचनं पूर्वसूत्रे च यो विधिः ।
क्रियाशब्दश्रुतौ भेदो न कश्चिद्विद्यते तयोः ॥५३५॥

यद्यप्युपाधिरन्यत्र नियतो न प्रयुज्यते ।
रूपाभेदाच्चनिर्ज्ञाता क्रियाऽत्र श्रूयते पुनः ॥५३६॥

यथा व्युत्परयः पुच्छौ क्यङन्ते सुदुरादयः ।
सत्यपि प्रत्ययार्थत्वे भेदाभावादुदाहृताः ॥५३७॥

एवं च सति पूर्वेण सिद्धोऽत्रापि वतेर्विधिः ।
नियमे वाऽभिधाने वा भिद्यते न क्रियाश्रुतिः ॥५३८॥

इवे द्रव्यादिविषयः प्रत्ययः पुनरुच्यते ।
क्रियाणामेव सादृश्ये पूर्वसूत्रे विधीयते ॥५३९॥

मधुरायामिव गृहा ब्राह्मणस्येव पाण्डुराः ।
इत्यत्र द्रव्यगुणयोः पूर्वेण न वतिर्भवेत् ॥५४०॥

आरम्भस्याक्रियार्थत्वे नार्थो योगेन विद्यते ।
ऋते क्रियाया ग्रहणात् पूर्वयोगेन सिध्यति ॥५४१॥

---

१ ब. मथुरया; 'मधुरा' शब्दस्य स्थाने सर्वत्र 'मथुरा' शब्दः पठ्यते । २ ब. यत्र.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

मधुरावयवे वृत्तिर्व्याख्याता मधुराश्रुतेः ।
ब्राह्मणावयवान् दन्तान् वक्ष्यति ब्राह्मणश्रुतिः ॥५४२॥

न काचिदिवयोगे तु बाह्यात् संबन्धिनो विना ।
षष्ठी विधीयते तत्र पूर्वेण प्रत्ययो भवेत् ॥५४३॥

आधिक्यं तुल्यशब्देन संबन्ध उपजायते ।
षष्ठीतृतीये तत्र स्तस्तुल्यशब्दो हि वाचकः ॥५४४॥

इवशब्दप्रयोगे तु बाह्यात् संबन्धिनो विना ।
नाधिक्यमुपमानेऽस्ति द्योतकः संप्रयुज्यते ॥५४५॥

इवे यो व्यतिरेकोऽत्र स प्रासादादिहेतुकः ।
तुल्ये तद्विषयापेक्षमाधिक्यमुपजायते ॥५४६॥

गवयेन समोऽनड्वानिति वृत्तिस्तदा भवेत् ।
न त्वस्ति गौरिवेत्यत्र व्यतिरेक इवाश्रयः ॥५४७॥

उपमेयेन संबन्धात् प्राक् प्रासादादिहेतुके ।
व्यतिरेके वतेर्भावो न तुल्यार्थत्वहेतुके ॥५४८॥

इवशब्देन संबन्धे न तृतीया विधीयते ।
प्रकृतां तामतस्त्यक्त्वा विभक्त्यन्तरमाश्रितम् ॥५४९॥

सप्तम्यपि न तत्रास्ति ज्ञापकार्था तु सा कृता ।
इष्टा सा शेषविषये नियतासु विभक्तिषु ॥५५०॥

यदि तु व्यतिरेकेण विषयेऽस्मिन् विभक्तयः ।
प्रवर्तेरंस्तृतीयैव व्यभिचारं प्रदर्शयेत् ॥५५१॥

व्यभिचारे तथा सिद्धे सप्तमीग्रहणाद्विना ।
सप्तम्येवोच्यते सर्वा न सन्त्यन्या विभक्तयः ॥५५२॥

अत्यन्तमत्र विषये सप्तम्या ज्ञापकार्थया[1] ।
बाधिता[2] विनिवर्तेत षष्ठी[3] सा गृह्यते पुनः ॥५५३॥

पूर्वाभ्यामेव योगाभ्यां विग्रहान्तरकल्पनात् ।
अर्हार्थेऽपि वतिः सिद्धः स त्वेकेन निदर्श्यते ॥५५४॥

---

१ ब. ज्ञापकार्थता. २ ब. बाधिताऽपि निवर्तेत. ३ ब. षष्ठी संगृह्यत

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

तेन तुल्यमिति प्राप्तेः क्रियोपाधिः प्रसिध्यति ।
राजवद्वर्तते राजेत्यत्र भेदे विवक्षिते ॥५५५॥

राजत्वेन प्रसिद्धा ये पृथुप्रभृतयो नृपाः ।
युधिष्ठिरान्तास्तेऽन्येषामुपमानं महीक्षिताम् ॥५५६॥

सिद्ध्यसिद्धिकृतो भेद उपमानोपमेययोः ।
सर्वत्रैव यतोऽसिद्धं प्रसिद्धेनोपमीयते ॥५५७॥

राजवद्रूपमस्येति राजन्येव विवक्षिते ।
अक्रियार्थेन योगेन द्वितीयेन भविष्यति ॥५५८॥

[1]उपमानाविवक्षायां नियमार्थोऽयमुच्यते ।
धर्मोऽर्हतिक्रियाकर्ता तदर्थं वचनं पुनः ॥५५९॥

कृतहस्तवदित्येतत् प्रसिद्धेष्वेव दृश्यते ।
राजत्वेन प्रसिद्धे च राज्ञि राजवदित्यपि ॥५६०॥

अराज्ञि येषां धर्माणां दृष्टोऽत्यन्तमसंभवः ।
ते राजनि नियम्यन्ते त्यज्यन्ते व्यभिचारिणः ॥५६१॥

अर्हतेश्च क्रिया कर्त्री या तस्यां वतिरिष्यते ।
राजानमर्हतिच्छत्रमिति न त्वेवमादिषु ॥५६२॥

प्रयुक्तानां हि शब्दानां शास्त्रेणानुगमः सताम् ।
छत्राद्यर्थे तु वचने [2]प्रत्याख्यानं न संभवेत् ॥५६३॥

तदर्हमिति नारब्धं सूत्रं व्याकरणान्तरे ।
संभवत्युपमाऽत्रापि भेदस्य परिकल्पनात् ॥५६४॥

एकस्य कार्यनिर्ज्ञानात् सिद्धस्य विषयान्तरे ।
[3]तद्धर्मत्वविवक्षायां बुद्ध्या भेदः प्रकल्प्यते ॥५६५॥

[4]सूत्रारम्भान्न चैतस्मात् इवशब्दस्य विद्यते ।
प्रयोगः सोऽपि चैतस्य विषये विद्यते वतेः ॥५६६॥

---

१ ओ. उपमानविवक्षायां. २ ब. वत्याख्यानं न. ३ ओ. तद्धर्मस्य विवक्षायां. ४ ओ. सूत्रारम्भाच्च नैतस्मात्.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

दस्युहेन्द्र इवेत्येतत् ऐन्द्रे मन्त्रे प्रयुज्यते ।
अन्यत्र दृष्टकर्मेन्द्रो यथेत्यस्मिन् विवक्षिते ॥५६७॥

पूर्वामवस्थामाश्रित्य याऽवस्था व्यपदिश्यते ।
सदृशस्त्वं तवैवेति तत्रैवमभिधीयते ॥५६८॥

प्रसिद्धभेदं यत्रान्यत् उपमानं न विद्यते ।
उपमेयस्य तत्रात्मा स्वबुद्धया प्रविभज्यते ॥५६९॥

योऽपि स्वाभाविको भेदः सोऽपि बुद्धिनिबन्धनः ।
तेनास्मिन् विषये भिन्नमभिन्नं वा न विद्यते ॥५७०॥

अङ्गदी कुण्डली चेति दर्शयन् भेदहेतुभिः ।
चैत्रमीदृशमित्याह बुद्धयवस्थापरिग्रहात् ॥५७१॥

एतैः शब्दैर्यथाभूतः प्रत्ययात्मोपजायते ।
तत्प्रत्ययानुकारेण विषयोऽप्युपपद्यते ॥५७२॥

बुद्धयवस्थाविभागेन भेदकार्यं प्रतीयते ।
जन्यन्त इव शब्दानामर्थाः सर्वे विवक्षया ॥५७३॥

तथाविधेऽपि बाह्येऽर्थे भिद्यन्ते यत्र बुद्धयः ।
न तत्र कश्चित् सादृश्यं सदपि प्रतिपद्यते ॥५७४॥

अत्यन्तं विषये भिन्ने यावत् प्रख्या न भिद्यते ।
न तावत् प्रत्यभिज्ञानं कस्यचिद्विनिवर्तते ॥५७५॥

अयमेव तु सूत्रेण भेदो भेदेन दर्शितः ।
प्रसिद्धमपि दुर्ज्ञानमबुधः प्रतिपद्यते ॥५७६॥

वैयाकरणवद् ब्रूते न वैयाकरणः सदा ।
वैयाकरणवद् ब्रूष्वेत्यतः सोऽप्यभिधीयते ॥५७७॥

केचित् पुमांसो भाषन्ते स्त्रीवत् पुंवच्च योषितः ।
व्यभिचारे स्वधर्मोऽपि पुनस्तेनोपदिश्यते ॥५७८॥

सदृशस्त्वं तवैवेति लोके यदभिधीयते ।
उपमानान्तरं तत्र प्रसक्तं विनिवर्तते ॥५७९॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

युक्तमौपयिकं राज्ञ इत्यर्थस्य निदर्शने ।
उपमानाविवक्षायां तदर्हमिति पठ्यते ॥५८०॥

प्रसक्तानुप्रसक्तस्तु वतिशेषोऽभिधीयते ।
उपमानाभिसंबन्धात् अस्मिन् वतिरुदाहृतः ॥५८१॥

प्रधानकल्पनाऽभावे गुणशब्दस्य दर्शनात् ।
उपसर्गाद् वतौ सिद्धा धातौ धात्वर्थकल्पना ॥५८२॥

स्वं रूपमिति चैतस्मिन् अर्थस्यापि परिग्रहः ।
रूपवज्ज्ञापितस्तस्मात् आसन्नोऽर्थो ग्रहीष्यते ॥५८३॥

धात्वर्थेनोपजनितं साधनत्वेन साधनम् ।
धातुना कृतमित्येवमस्मिन् सूत्रे प्रतीयते ॥५८४॥

यः शब्दश्चरितार्थत्वात् अत्यन्तं न प्रयुज्यते ।
विषयेऽदर्शनात्तत्र लोपस्तस्याभिधीयते ॥५८५॥

क्रियायां साधने द्रव्ये प्रादयो ये व्यवस्थिताः ।
तेभ्यः सत्त्वाभिधायिभ्यो वतिः स्वार्थे विधीयते ॥५८६॥

प्रत्ययेन विना प्रादिस्तत्रार्थेन[1] प्रयुज्यते ।
भेदेन तु समाख्याने विभागः परिकल्पितः ॥५८७॥

अनङ्गीकृतसत्त्वं तु यदि गृह्येत साधनम् ।
विभक्तिभिर्नियोगः स्यात् यथैव तसिलादिषु ॥५८८॥

पाठाद् यैरविभक्तित्वं वत्यन्तेष्वनुगम्यते ।
तेषामुद्धत इत्यत्र[2] वक्तव्या सविभक्तिता ॥५८९॥

वत्यर्थं नावगाहेते पुंवदित्यस्य दर्शनात् ।
नञ्स्नञावपवादस्य बाधकं तन्निपातनम् ॥५९०॥

एतमुत्क्रामतो नूनं वत्यर्थं नञ्स्नञाविति ।
तयोः प्रवृत्तावुत्सर्गो बाधनान्नोपपद्यते ॥५९१॥

नञ्स्नञौ विहितौ येन स योगो नावगाहते ।
वतिप्रकरणं तद्धि लिङ्गमेवं समर्थ्यते ॥५९२॥

---

१ ब. अर्थे न.　२ ब. इत्येव.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

अभेदेनोपमानस्य भिन्नार्थोपनिपातिता ।
ऊहस्तथोपमानानामङ्गवन्नोपलभ्यते ॥५९३॥

गवेधुके चरौ दृष्टा गोविकर्ताक्षवापयोः ।
पशू रुद्र इव ह्येतावित्येकवचनश्रुतिः ॥५९४॥

उपमानस्य भेदाच्च बहुषु स्यादञो विधिः ।
काश्यपा इति लोपः स्यात् तथा प्रतिकृतिष्वपि ॥५९५॥

एवं तु युक्तवद्भावात् अत्रैकवचनं भवेत् ।
लुम्मनुष्ये तथोक्तं[1] स्यात् लिङ्गस्यैकस्य सिद्धये ॥५९६॥

उपमेयेषु भिन्नेषु किञ्चिदेकं प्रवर्तते ।
प्रत्ययस्य विधौ तत्र नित्यं युक्तवदिष्यते ॥५९७॥

यदा प्रत्युपमेयं तु तदेकैकमवस्थितम्[2] ।
तदा बाह्यार्थभेदेन तद्धितान्तं प्रचीयते ॥५९८॥

यथा समूहप्रचये द्विगूनां भिन्नसंख्यता ।
पञ्चपूल्यादिषु तथा सुबन्तप्रचयो भवेत् ॥५९९॥

प्रचये भिद्यमाने तु संख्या पूलेषु भिद्यते ।
अर्थभेदो लुबन्तेषु नैवं कश्चन दृश्यते ॥६००॥

येषूपमेयवचनः शब्दोऽन्यो न प्रयुज्यते ।
उपमानस्य तत्रान्यैः संख्यायां[3] भेद इष्यते ॥६०१॥

यथा गुडतिलादीनां प्रयोगादेकसंख्यता ।
पाकादेरप्रयोगे तु भिन्नसंख्याऽभिधीयते ॥६०२॥

यः संबन्धिगतो[4] भेदः स प्रयोगे प्रतीयते ।
संबन्धिनामतो भेदः उपमेयेन गम्यते ॥६०३॥

तस्मात्[5] समानशब्दत्वप्रसङ्गविनिवृत्तये ।
उपमेयगतो भेद उपमानेषु दृश्यते ॥६०४॥

---

१ ब. तथोक्तः. २ ब. तदैकैकमवस्थितम्. ३ ब. संख्यया. ४ ब. संबन्धगतो.
५ त. तस्मात् सामान्य०

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

उपमानं समस्तानामभिन्नं श्रूयते क्वचित् ।
भिन्नानामुपमेयानामेकैकं वोपमीयते ॥६०५॥

यथा गरुड इत्येतत् व्यूहापेक्षं प्रयुज्यते ।
एकेन यत्र सादृश्यं वैनतेयेन हस्तिनाम् ॥६०६॥

एकस्यापि प्रतीयेत भिन्ना प्रतिकृतिः सह ।
काश्यपस्येति तेनायं प्रत्येकमवतिष्ठते ॥६०७॥

मेघाः शैल इवेत्युक्ते समस्तानां प्रतीयते ।
सादृश्यं गिरिणैकेन प्रत्येकं तेन भिद्यते ॥६०८॥

छापेक्षा तद्विषयता विधेयत्वान्न गम्यते ।
काकतालीयमित्यत्र प्रसिद्धं ह्युपलक्षणम् ॥६०९॥

राजाश्वादिश्च विषयः स्यादन्यो वेत्यनिश्चितम् ।
तेनच्छस्य विधानात् प्राग् व्यपदेशो न विद्यते ॥६१०॥

द्वयोरिवार्थयोरर्थनिमित्तत्वं प्रतीयते ।
एकेनावयवो युक्तः[1] प्रत्ययोऽन्येन युज्यते ॥६११॥

चैत्रस्य तत्रागमनं काकस्यागमनं यथा ।
दस्योरभिनिपातस्तु तालस्य पतनं यथा ॥६१२॥

संनिपाते तयोर्याऽन्या क्रिया तत्रोपजायते ।
वधादिरुपमेयेऽर्थे तया छविधिरिष्यते ॥६१३॥

क्रियायां समवेतायां द्रव्यशब्दोऽवतिष्ठते ।
पातागमनयोः काकतालशब्दौ तथा स्थितौ ॥६१४॥

यदन्वाख्यायकं वाक्यं तदेवं परिकल्प्यते ।
प्रयोगवाक्यं यल्लोके तदेवं न प्रयुज्यते ॥६१५॥

ययोरतर्किता प्राप्तिर्दृश्यते काकतालवत् ।
तयोः समासप्रकृतेर्वृत्तिरभ्युपगम्यते ॥६१६॥

काकस्य तालेन यथा वधो यस्य तु दस्युना ।
तत्र चित्रीकृतेऽन्यस्मिन् उपमेये छ इष्यते ॥६१७॥

---

१ ब. युक्तं.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

चश्वत्प्रकारश्चश्वत्को बृहत्क इति चापरे ।
मणिमण्डूकखद्योतान् सादृश्येन प्रचक्षते ॥६१८॥

तत्रोन्मेषनिमेषाभ्यां खद्योत उपमीयते ।
श्वासप्रबन्धैर्मण्डूकः स्पन्दमानप्रभो मणिः ॥६१९॥

प्रविकासिप्रभोऽल्पोऽपि महान् य उपलभ्यते ।
बृहत्क इति तत्रैष मणौ शब्दः प्रयुज्यते ॥६२०॥

सादृश्यमेव सर्वत्र प्रकारः कैश्चिदिष्यते ।
भेदेऽपि तु प्रकाराख्या कैश्चिदभ्युपगम्यते ॥६२१॥

प्रकारवचनः[1] कश्चित् प्रकारवति संस्थितः ।
प्रकारमात्रे वर्तित्वा[2] कश्चित्तद्वति वर्तते ॥६२२॥

सादृश्यग्रहणं सूत्रे सदृशस्योपलक्षणम् ।
तुल्ययोरव्ययीभावे सहशब्दोऽभिधायकः ॥६२३॥

वीप्सासादृश्ययोर्वृत्तिर्या यथार्थाभिधायिनः ।
स चायमव्ययीभावे[3] भेदो भेदेन दर्शितः ॥६२४॥

सादृश्यं योग्यता कैश्चित् अनावश्युपगम्यते ।
यत्तु मूर्तिगतं साम्यं तत् सहेनाभिधीयते ॥६२५॥

इत्थंभावेऽपि सादृश्यं बुद्धयवस्थानिबन्धनम् ।
ग्रहणे भेदमात्रस्य तत्रान्यैवाभिधीयते ॥६२६॥

गौर्वाहीक इति द्वित्वे सादृश्यं प्रत्युदाहृतम् ।
शुक्लादौ सति निष्पन्ने वाहीको न द्विरुच्यते ॥६२७॥

॥ इति श्रीभर्तृहरिकृते वाक्यपदीये तृतीयं काण्डं समाप्तम् ॥

---

१ ओ. वचने. २ ब. वर्तित्वात्. ३ त. तद् व्यतिवर्तते. ४ ब. अव्ययीभावभेदो.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

Appendix I

Index of verses in Vākyapadīya.

In the first two Kāṇḍas, reference is to the Kāṇḍa and the number of the verse; while in the third Kāṇḍa, reference is to the Kāṇḍa, the number of the particular Samuddes'a and the number of the verse in the Samuddes'a.

The following are the numbers and the names of the Samuddes'as in the third Kāṇḍa :—

१	जाति	८	क्रिया
२	द्रव्य	९	काल
३	संबन्ध	१०	पुरुष
४	भूयोद्रव्य	११	संख्या
५	गुण	१२	उपग्रह
६	दिक्	१३	लिङ्ग
७	साधन	१४	वृत्ति

अ

अकर्मकत्वे सत्येवम् ३-१४-६६
अकृत्स्नाविषयाभासम् ३-३-५४
अक्रियाणां निवृत्त्यर्था ३-१४-४९९
अक्षाणां तन्त्रिणां तन्त्रम् २-४६३
अक्षादिषु यथा भिन्नाः २-४६२
अगृहीतविशेषेण ३-१४-१०४
अगोराचित्रगोश्चैव ३-१४-२१६
अग्निदत्तस्तु योऽग्निः स्यात् २-२८२
अग्निशब्दस्तथैवायम् १-६०
अग्निसोमादयः शब्दाः २-२८१
अङ्गत्वेन प्रतीतानाम् ३-१-५९
अङ्गदी कुण्डली चेति ३-१४-५७१
अङ्गीकृते तु केषांचित् २-४१३
अचेतनेषु संक्रान्तम् ३-१४-३२७
अजन्मनि तथा नित्ये ३-२-१८
अजस्रवृत्तिर्यः शब्दः १-११६
अडादीनां व्यवस्थार्थम् २-१८०
अणवः सर्वशक्तित्वात् १-११०
अतः संयोगिदेशानाम् ३-१-१८
अतस्तैः कर्मभिर्धातुः ३-७-६९
अतिङ्ग्रहणमेवं तु ३-१४-४४८
अतीन्द्रियानसंवेद्यान् १-३८
अतो द्रव्याश्रितां संख्याम् ३-११-१२
अतो भाषितपुंस्कत्वात् ३-६-१०
अत्यद्भुता त्वियं वृत्तिः ३-३-८१
अत्यन्तं विषये भिन्ने ३-१४-५७५
अत्यन्तभिन्नयोरेव ३-१४-३५९
अत्यन्तभिन्नयोर्वा स्यात् २-४७१
अत्यन्तमतथाभूते १-१३०
अत्यन्तमत्र विषये ३-१४-५५३
अत्यन्तविपरीतोऽपि २-२८५
अत्यन्तानुगमात्तत्र ३-१४-४६८
अत्र तूपपदेनायम् ३-१२-२७
अत्रातीतविपर्यासः १-१७
अत्वं संपद्यते यस्त्वम् ३-७-११७
अथ तैरेव जनितः २-३९२
अथ प्रतिविधानाय ३-१२-२४

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

अथ यज्ज्ञातुमुत्पन्नम् २-२४३
अथर्वणामङ्गिरसाम् १-२१
अथवैकविभक्तित्वात् ३-१४-४१२
अथ श्यामेव शास्त्रीयम् ३-१४-४२४
अथ स्वभावो वचनात् ३-१४-२७७
अथाप्यवाच्यमित्येवम् ३-३-२१
अथायमान्तरो जातः १-११२
अथासंसृष्ट एवार्थः २-२४८
अथास्मान्नियमादूर्ध्वम् ३-९-१९
अथोपचारसत्तैवम् ३-३-४६
अदृष्टत्वात् प्रतिनिधेः ३-७-१०२
अदृष्टवृत्तिलाभेन ३-३-१८
अदेशाश्चाप्यभागाश्च ३-६-१४
अदेशानां घटादीनाम् ३-१-१६
अद्वये चैव सर्वस्मिन् ३-३-६५
अधीते तुल्य इत्येवम् ३-१४-५०८
अधीयते ब्राह्मणवत् ३-१४-३८६
अध्येतरि यदा वृत्तिः ३-१४-४९४
अध्रुवेण निमित्तेन ३-२-३
अध्वनो वर्तमानस्य ३-९-१०२
अनङ्गीकृतसत्त्वं तु ३-१४-५८८
अनन्तरं फलं यस्याः ३-८-१५
अनर्थकानां संघातः २-२०५
अनर्थकान्युपायत्वात् २-५५
अनवस्थितकम्पेऽपि १-१०६
अनागता जन्मशक्तेः ३-९-५१
अनागमश्च सोऽभ्यासः २-११८
अनादिनिधनं ब्रह्म १-१
अनादिमव्यवच्छिन्नाम् १-१४५
अनाश्रितक्रियस्तस्मात् ३-१४-५१९
अनाश्रिते तु व्यापारे ३-७-२४
अनित्यस्य यथोत्पादे ३-९-२२
अनित्येष्वपि नित्यत्वम् ३-३-३४
अनिराकरणात् कर्तुः ३-७-१२९
अनिर्ज्ञातं प्रसिद्धेन ३-१४-३६२
अनिर्ज्ञातस्य निर्ज्ञानम् ३-१४-३६१
अनिर्धारितधर्मत्वात् ३-१४-१४२
अनुग्रहार्थं भोक्तॄणाम् २-३८५
अनुच्छेद्याश्रयामेके ३-१-८२
अनुनिष्पादिकल्पेन ३-९-६७
अनुप्रयोगसिद्ध्यर्थम् ३-१४-२३३
अनुप्रवृत्तिधर्मो वा ३-१-१४
अनुप्रवृत्तिरूपां याम् ३-१-१९
अनुप्रवृत्तीति यथा ३-१-९९
अनुबन्धश्च सिद्धेऽर्थे ३-१२-१२
अनुस्यूतेव भेदाभ्याम् ३-१४-२८
अनुस्यूतेव संसृष्टैः ३-१४-९४
अनेकधर्मवचनैः ३-१४-२६६
अनेकव्यक्त्यभिव्यङ्ग्या १-९३
अनेकशक्तिरेकस्य २-४७४
अनेकशक्तेरेकस्य २-४४१
अनेकस्मादस इति ३-१४-२८३
अनेकाख्यातयोगेऽपि २-३४९
अनेकार्थत्वमेकस्य २-२६३
अन्तःकरणतत्त्वस्य १-११४
अन्तःकरणधर्मो वा ३-६-२३
अन्तःकरणवृत्तौ च ३-१४-९३
अन्तरात्मनि या सत्ता ३-८-२४
अन्तरेण चशब्दस्य ३-१४-१९२
अन्तर्भवेच्च संबन्धः ३-१४-२२३
अन्तर्भूतं निमित्तं च ३-१४-५११
अन्तर्भूतणिजर्थानाम् ३-७-७३
अन्तर्भूतविभक्त्यर्थे ३-१४-२२९
अन्तर्भूते तु करणे ३-१४-४५८
अन्ते या वा क्रियाभागे ३-८-२२
अन्नादानादिरूपां च २-३७४
अन्यत्र वर्तमानं सत् ३-१४-४०६
अन्यत्र श्रूयमाणैश्च २-३४६
अन्यत्राविहितस्यैव ३-१-५७
अन्यथा च समाख्यानम् २-१७३
अन्यथा प्रतिपद्यार्थम् २-२३९
अन्यथैवाग्निसंबन्धात् २-४१९
अन्यान्यसाधनाधीना ३-९-११०
अन्या संस्कारसावित्री २-२६१
अन्येन व्यपदिष्टस्य ३-७-१६१
अन्यैस्तु भावैरन्येषाम् ३-९-३५
अन्यैस्तु मानं जात्यादि ३-१४-३७६
अन्वयव्यतिरेकाभ्यामर्थवान् ३-१४-१९

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

अन्वयव्यतिरेकाभ्यां संख्या० ३-१-६७
अन्वयव्यतिरेकौ च ३-११-३०
अन्वयाद् गम्यते सोऽर्थः ३-१४-९७
अन्वाख्यानस्मृतौ ये च २-२-३१
अन्वाख्यानानि भिद्यन्ते २-१७०
अन्वाख्यानाय यो भेदः २-४४०
अपदेऽर्थे पदन्यासः ३-३-७८
अपरे ब्राह्मणादीनाम् ३-१४-३०४
अपि प्रयोक्तुरात्मानम् १-१३१
अपूर्वं कालशक्तिं वा ३-७-३४
अपूर्वस्य विधेयत्वात् ३-१-६९
अपृथक्शब्दवाच्यस्य ३-१४-३५६
अपृथक्शब्दवाच्याऽपि ३-१४-३५८
अपेक्षमाणः संवन्धम् ३-१४-२४१
अपोद्धारपदार्था ये १-२४
अपोद्धारश्च सामान्यम् ३-१४-१४५
अप्रयोगेऽधिपर्यौश्च २-१९०
अप्रसिद्धं तु यद्भागम् २-९१
अप्राप्तो यस्तु शुक्लादिः २-७४
अप्शालिवीजसंयोगे ३-९-१०६
अबुधान् प्रति वृत्तिं च ३-१४-१६
अबुधान् प्रत्युपायाश्च ३-१४-४९
अभाव इति भावस्य ३-१४-२६५
अभावस्यानुपाख्यत्वात् ३-३-६२
अभावात् केवलायास्तु ३-१४-४५३
अभावे त्रिषु कालेषु ३-३-६९
अभावो यदि वस्तु स्यात् ३-३-७६
अभावो वा लुको यत्र ३-१४-१३३
अभिधानक्रियाभेदात् २-४०५
अभिधानक्रियायोगात् २-१०६
अभिधानेऽपि संख्यायाः ३-१४-२३२
अभिधेयः पदस्यार्थः २-११३
अभिन्नकालामर्थेषु ३-३-५०
अभिन्नमेव वाक्यं तु २-७५
अभिन्नो भेदरूपेण २-४६७
अभिव्यक्ततरो योऽर्थः २-२१२
अभिव्यक्तिनिमित्तस्य ३-९-६१
अभेदपूर्वका भेदाः २-५७
अभेदरूपं सादृश्यम् ३-१-९२
अभेदस्य विवक्षायाम् ३-१४-३९५
अभेदादभिधेयस्य २-२२७
अभेदे त्वेकशब्दत्वात् ३-१४-३३४
अभेदेन क्रियैका तु ३-७-१४२
अभेदेनोपमानस्य ३-१४-५९३
अभेदे यदि कालस्य ३-९-६३
अभेदे लिङ्गसंख्याभ्याम् ३-१४-१३६
अभेदैकत्वसंख्या वा ३-१४-१०१
अभ्यासात् प्रतिभाहेतुः २-११७
अमुख्यसंभवे तत्र ३-१४-२६९
अम्बाम्बेति यथा बालः १-१५२
अयं पदार्थ एतस्मिन् ३-१४-२८०
अयनप्रविभागश्च ३-९-४३
अयमेव तु सूत्रेण ३-१४-५७६
अरणिस्थं यथा ज्योतिः १-४६
अराज्ञि येषां धर्माणाम् ३-१४-५६१
अरूपं पररूपेण ३-५-९
अर्थं कथंचित् पुरुषः २-३९
अर्थक्रियासु वाक् सर्वान् १-१२७
अर्थजात्यभिधानेऽपि ३-१-११
अर्थप्रकरणापेक्षः २-२६४
अर्थप्रवृत्तितत्त्वानाम् १-१३
अर्थभागैस्तथा तेषाम् २-३१
अर्थवद्भ्यो विशिष्टार्थः २-२०८
अर्थस्य विनिवृत्तत्वात् ३-१४-४४
अर्थस्यानुगमं कश्चित् ३-१४-७५
अर्थस्वरूपे शब्दानाम् २-२६२
अर्थात् प्रकरणाद्वापि ३-१४-४४६
अर्थात् प्रतीतमन्योन्यम् ३-१२-२३
अर्थानां संनिधानेऽपि २-३०३
अर्थान्तराभिधानाच्च ३-१४-८२
अर्थान्तराभिधायित्वम् ३-१४-३२
अर्थान्तरे च यद्वृत्तम् २-१७७
अर्थित्वमत्र सामर्थ्यम् २-७९
अर्थोपसर्जनीभूतान् १-५४
अर्धर्चादिषु शब्देषु २-१०३
अर्हतेश्च क्रिया कर्त्री ३-१४-५६२
अलब्धगाधे गाम्भीर्यात् २-४८०
अलुकश्चैकवद्भावः ३-१४-१०८

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

अल्पे महति वा छिद्रे ३-९-७१
अल्पे महति वा शब्दे १-१०३
अवधित्वेन चापेक्षा० ३-६-२१
अवश्यं ब्राह्मणे कश्चित् ३-१४-२७१
अवस्तुत्वादतीतं यत् ३-३-७७
अवस्थां पञ्चमीमाहुः ३-७-६०
अवस्था तादृशी नास्ति ३-१४-३२८
अवस्थादेशकालानाम् १-३२
अवाच्यमिति यद्वाच्यम् ३-३-२०
अविकल्पेऽपि वाक्यार्थे २-११६
अविकारस्य शब्दस्य १-९४
अविग्रहा गतादिस्था ३-१४-६७
अविद्यमानब्राह्मण्यः ३-१४-३०२
अविनाशो गुरुत्वस्य ३-७-१५०
अविप्रयोगः साधुत्वे ३-१४-७७
अविभक्तेऽपि वाक्यार्थे २-८८
अविभागं तु शब्देभ्यः २-४१६
अविभागाद् विवृत्तानाम् १-१४६
अविरोधी विरोधी वा... तेन भावो न विद्यते ३-३-६८
अविरोधी विरोधी वा.... नाभाव उपपद्यते ३-३-६७
अविशिष्टस्य पर्यायः ३-१४-२७२
अवृष्ट्यो यथाऽवर्षाः ३-१४-३०३
अव्यक्तः क्रमवान् शब्दः २-१९
अव्ययानां च यो धर्मः ३-१४-१०७
अव्ययेषु वतेः पाठः ३-१४-५२४
अव्याहतकलां यस्य १-३
अशक्तेः सर्वशक्तेर्वा २-१३१
अशब्दमपरेऽर्थस्य २-४१८
अशब्दवाच्यो यो भेदः ३-१४-३७१
अशब्दो यदि वाक्यार्थः २-१६
अशुक्ल इति कृष्णादिः ३-१४-२९०
अश्रुताश्च प्रतीयन्ते ३-१४-५१८
अश्वमेधेन यक्ष्यन्ते २-४५२
असंख्यासमुदायत्वात् ३-११-२१
असंनिधौ प्रतिनिधिः २-७०
असंभवात्तु संबन्धे ३-१४-२२४
असंभवेऽपि वा वृत्तेः ३-१४-४३४
असतश्च क्रमो नास्ति ३-९-३६
असतश्चान्तराले यान् १-८५
असत्त्वभूतो व्यापारः ३-१४-५२१
असत्यां प्रतिपत्तौ च २-३३३
असत्योपाधि यत् सत्यम् २-१२७
असत्सामान्यवृत्तिर्वा ३-१४-३१२
असन्निवर्तते तस्मात् ३-८-२०
असमाख्येयतत्त्वानाम् २-१४२
असमासे समासे च ३-१४-५०
असम्यगुपदेशाद्वा ३-१४-२८२
असाधिका प्रतिज्ञेति ३-३-२७
असाधुरनुमानेन ३-३-३०
असास्नो गौरिति यथा ३-१४-३००
अस्तं यातेषु वादेषु १-१३४
अस्तित्वं च प्रतिज्ञाय ३-१३-११
अस्तित्वं वस्तुमात्रस्य ३-९-११३
अस्तित्वेनानुषक्तो वा २-४२४
अस्त्यर्थः सर्वशब्दानाम् २-११९
अस्त्रीपूर्वपदत्वात्तु ३-१४-४२०
अस्य वाक्यान्तरे दृष्टात् २-८६
अस्यादीनां तु कर्तृत्वे ३-७-९६
अस्यायं वाचको वाच्यः ३-३-३
अस्येदमिति वा यत्र ३-१४-३५१
अस्वगोण्यादयः शब्दाः १-१४९
अस्वतन्त्रे स्वतन्त्रत्वम् ३-११-५
अस्वशब्दाभिधानास्तु ३-१-४८
अस्वातन्त्र्यफलो बन्धिः ३-१-४

आ

आकारवन्तः संवेद्याः २-१३३
आकारवर्णावयवैः २-१५४
आकारैश्च व्यवच्छेदात् ३-२-५
आकाशमेव केषांचित् ३-७-१५१
आकाशस्य प्रदेशेन ३-६-५
आकाशस्य यथा भेदः ३-७-१११
आकृतिः सर्वशब्दानां ३-१४-३१८
आकृतौ वाऽपि सामान्ये ३-१४-४०१
आक्रीड इव कालस्य ३-९-७२

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

आक्षेपाच्च प्रयोगेण ३-१४-७२
आख्यातं तद्धितार्थस्य २-३०६
आख्यातपदवाच्येऽर्थे निर्वर्त्य-त्वात् ३-९-९९
आख्यातपदवाच्येऽर्थे साधनोप० २-४२७
आख्यातशब्दः संघातः २-१
आख्यातशब्दे नियतम् २-३२७
आख्यातशब्दे भागाभ्याम् ३-८-४७
आख्यातशब्दैरर्थोऽसौ ३-८-३०
आख्यायते च शास्त्रेण ३-१४-१५६
आचार्यो मातुलश्चेति ३-८-६४
आण्डभावमिवापन्नः १-५१
आत्मतत्त्वपरित्यागः ३-३-७०
आत्मभूतः क्रमोऽप्यस्याः ३-१-३७
आत्मभेदस्तयोः केचित् १-४५
आत्मभेदेऽपि सत्येवम् ३-७-९७
आत्मभेदो न चेत् कश्चित् २-२१३
आत्मरूपं यथा ज्ञाने १-५०
आत्मलाभस्य जन्माख्या ३-३-४३
आत्मानमात्मना बिभ्रत् ३-३-४७
आत्मान्तरस्य येनात्मा ३-३-९
आत्मान्तराणां येनात्मा ३-११-१३
आत्मा परः प्रियो द्वेष्यः ३-२-१७
आत्मा वस्तु स्वभावश्च ३-२-१
आदित्यग्रहनक्षत्र० ३-९-७६
आद्यः करणविन्यासः १-१२२
आधारं कल्पयन् बुद्ध्या ३-३-८६
आधारत्वमिव प्राप्ताः ३-७-६८
आधारनियमाभावात् २-४१४
आधारभेदाद्भिन्नायाम् ३-१४-४४५
आधारभेदाद्भेदो यः ३-१४-३६४
आधारेषु पदन्यासम् ३-१४-४०७
आधिक्यं तुल्यशब्देन ३-१४-५४४
आपि के चापरार्थत्वात् ३-१४-१२०
आभासोपगमो व्यक्तिः ३-७-५३
आमिश्र एव प्रक्रान्तः ३-९-९७
आम्नायशब्दानभ्यासे २-४०४
आरम्भश्च क्रिया चैव ३-९-३३
आरम्भस्याक्रियार्थत्वे ३-१४-५४१
आराच्छब्दवदेकस्य ३-१४-२७६
आराद्वृत्तिषु संबन्धः २-४३२
आविर्भावतिरोभावौ ३-८-२६
आविर्भावस्तिरोभावः ३-१३-१३
आविर्भूतप्रकाशानाम् १-३७
आविश्येवानुसंधत्ते ३-९-४२
आविष्टलिङ्गता तस्याम् ३-१४-३१९
आविष्टसंख्यो वाक्येऽसौ ३-१४-२८८
आवृत्तिरनुवादो वा २-११५
आवृत्तिशक्तिभिन्नार्थे २-४७५
आवृत्तेरनुमानं वा २-३६९
आवेशो लिङ्गसंख्याभ्याम् ३-१४-१५२
आशंसा वर्तमानाऽपि ३-९-१०३
आशंस्यमानतन्त्रत्वात् ३-९-१०५
आश्रयः समवायी च ३-१४-१६८
आश्रयः स्वात्ममात्रा वा ३-१-४०
आश्रयस्यानुपादाने ३-१४-३४६
आश्रयाणां त्वनित्यत्वम् ३-९-२१
आश्रयाणां हि लिङ्गैः सा ३-१४-३२०
आश्रयाद् भेदवत्तायाः ३-१४-११०
आश्रयाद् यो गुणे भेदः ३-१४-३६८
आश्रये लिङ्गसंख्याभ्याम् ३-१४-१५४
आश्रिते त्वाश्रयकृतम् ३-१४-३६०
आसन्नं ब्रह्मणस्तस्य १-११
आहारप्रीत्यभिद्वेष० २-१५०
आहितोत्तरशक्तित्वात् ३-८-१४

इ

इच्छा चिकीर्षतीत्यत्र ३-९-१०४
इतरेतरयोगस्तु ३-१४-२९
इतिकर्तव्यताऽर्थस्य २-४४७
इतिकर्तव्यता लोके १-१२१
इति वाक्येषु ये धर्माः २-८७
इत्थंभावेऽपि सादृश्यम् ३-१४-६२६
इदं तदिति साऽन्येषाम् २-१४४
इदं पराङ्गैः संबद्धम् २-८१
इदं पुण्यमिदं पापम् १-४०
इदं प्रधानं शेषोऽयम् २-८२
इदमत्रेति भावानाम् ३-७-१५२

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

इदमाद्यं पदस्थानम् १-१६
इदं वेयमयं वेति ३-१३-३०
इन्द्रियस्यैव संस्कारः शब्दस्य १-७८
इन्द्रियस्यैव संस्कारः समाधाना० १-७९
इन्द्रियाणां स्वविषये० ३-३-२९
इन्द्रियादिविकारेण २-१०५
इन्द्रियार्थमनःकर्तॄ० ३-७-१२
इन्द्रियैरन्यथाप्राप्तौ ३-८-८
इयं श्रुत्या क्रमप्राप्तिः २-८०
इवशब्दप्रयोगे तु ३-१४-५४५
इवशब्देन संबन्धे ३-१४-५४९
इवार्थे यच्च वचनम् ३-१४-५३५
इवे द्रव्यादिविषयः ३-१४-५३९
इवे यो व्यतिरेकोऽत्र ३-१४-५४६
इषेश्च गमिसंस्पर्शात् ३-७-८४

उ

उच्चरन् परतन्त्रत्वात् १-६२
उच्चारणे तु वाक्यानाम् २-४५५
उत्पत्तिः प्रसवोऽन्येषाम् ३-१३-२७
उत्पत्तेः प्रागसद्भावः ३-७-१०५
उत्पत्तौ च स्थितौ चापि ३-९-३
उत्प्रेक्षते सावयवम् २-२३६
उत्सर्गवाक्ये यत् त्यक्तम् २-३४७
उदयास्तमयावृत्त्या ३-९-७५
उपकारात् स यत्रास्ति ३-३-५
उपकारि च संस्थानम् ३-१४-१७८
उपचर्थं तु कर्तारम् ३-३-४५
उपप्लवो हि ज्ञानस्य ३-३-५७
उपमानं प्रसिद्धत्वात् ३-१४-३७५
उपमानं समस्तानाम् ३-१४-६०५
उपमानविवक्षायाम् ३-१४-४५०
उपमानस्य भेदाच्च ३-१४-५९५
उपमानाविवक्षायाम् ३-१४-५५९
उपमाने क्रियावृत्तिम् ३-१४-५०५
उपमानोपमेयत्वे ३-१४-४४२
उपमेयं तु यद्वाच्यम् ३-१४-४२६
उपमेयात्मनि श्यामः ३-१४-४१६
उपमेयेन संबन्धात् ३-१४-५४८
उपमेयेषु भिन्नेषु ३-१४-५९७
उपमेये स्थितो धर्मः ३-१४-३८५
उपयुक्ते नियुक्तानाम् ३-९-१०८
उपरिग्रात् पुरस्ताद्वा २-१९३
उपलक्षणमात्रार्थां ३-१४-४२५
उपश्लेषमिवार्थानाम् २-१४५
उपश्लेषस्य चाभेदः ३-७-१४९
उपात्तं च प्रकृत्यर्थः ३-१४-१६५
उपात्ता बहवोऽप्यर्थाः २-२४०
उपादानविकल्पाश्च ३-१३-३
उपादायापि ये हेयाः २-३८
उपाधिभूता या संख्या ३-१४-१२६
उपाधिभेदादर्थेषु ३-१३-२४
उपाधेः कस्यचिद्वाक्ये ३-१४-४६६
उपायमात्रं नानात्वम् ३-१४-९८
उपायाः शिक्षमाणानाम् २-२३८
उपायाच्छ्रुतिसंहारे २-१०८
उभयस्तस्य तुल्यार्थः ३-१४-११९
उभयेषामविच्छेदे १-१५६
उभावप्यध्रुवौ मेषौ ३-७-१४०
उरभ्यर्थे वर्तमानस्य ३-१२-१४
उच्चावयवतुल्येषु ३-१४-५३३

ऊ

ऊ इत्यभेदमाश्रित्य २-९९
ऊ इत्येदभिन्नं च २-१०१
ऊहोऽस्मिन् विषये न्याय्यः २-७८

ऋ

ऋचो वा गीतिमात्रं वा २-१०७
ऋषीणां दर्शनं यच्च २-१३९
ऋष्यादौ प्राप्तसंस्कारः २-२८४

ए

एकं ग्रहणकं वाक्यम् २-४५६
एकः समानो धर्मश्चेत् ३-१४-५१६
एकः साधारणो वाच्यः २-३९५
एकजातिव्यपेक्षायाम् ३-१४-३११
एकतिङ् यस्य वाक्यं तु २-४४५
एकत्वं तु स्वरूपत्वात् २-२५७

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

एकत्वं वा बहुत्वं वा ३-१-५२
एकत्वमासां शक्तीनाम् ३-६-२४
एकत्वमेक इत्यत्र ३-११-३१
एकत्वयोगमासज्य ३-१४-२८-७
एकत्वसमुदायो वा ३-११-१७
एकत्वावृत्तिभेदाभ्याम् ३-८-४२
एकत्वे तुल्यरूपत्वात् ३-१४-३४२
एकत्वेऽपि क्रियाऽऽख्याते ३-१२-१६
एकत्वे बुद्धिसहिते ३-११-१६
एकदेशस्वरूपास्तु २-३६०
एकदेशात्तु संघाते २-३५८
एकदेशात् स्मृतिर्भिन्ने २-३५९
एकदेशे समूहे च ३-७-५८
एकद्व्योर्यञादीनाम् ३-१४-१२४
एकमाहुरनेकार्थम् २-२५०
एकमेव यदाम्नातम् १-२
एकरूपमनेकार्थम् २-४५८
एकविंशतिसंख्यायाम् ३-११-२०
एकश्च द्व्यात्मकोऽर्थोऽसौ ३-१४-२११
एकश्च सोऽर्थः सत्ताख्य ३-८-६३
एकसंख्येषु भेदेषु २-४६१
एकस्मिन्नपि दृश्येऽर्थे २-१३६
एकस्य कार्यनिर्ज्ञानात् ३-१४-५६५
एकस्य च प्रधानत्वात् ३-१४-२८४
एकस्य प्रचयो दृष्टः ३-११-२८
एकस्य बुद्ध्यवस्थाभिः ३-७-१०४
एकस्य भागे सादृश्यम् २-९३
एकस्य शक्तयस्तिस्रः ३-९-४९
एकस्य सर्वबीजस्य १-४
एकस्यानेकरूपत्वम् २-१११
एकस्यापि च शब्दस्य २-१३७
एकस्यापि प्रतीयेत ३-१४-६०७
एकस्यापि विवक्षायाम् २-४७३
एकादिशब्दवाच्यायाः ३-१-५४
एकाभिधान एकोऽर्थः ३-८-४५
एकार्थविषयौ शब्दौ ३-१४-३१५
एकार्थे वर्तमानाभ्याम् ३-१४-२९८
एकेन चेत् प्रसिद्धायाम् ३-१-६३
एकेनैव प्रदीपेन २-३९८
एकैव सा सती शक्तिः ३-७-१४६
एकोऽपि गुणभेदेन ३-११-१८
एको मन्त्रस्तथाऽध्यात्मम् २-२५४
एतमुत्क्रामतो नूनम् ३-१४-५९१
एतां सत्तां पदार्थो हि ३-३-५१
एतावत् साधनं साध्यम् ३-८-४६
एतैः शब्दैर्यथाभूतः ३-१४-५७२
एवं च प्रतिषेध्येषु ३-३-४२
एवं च बालवायादि २-१७९
एवं च सति पूर्वेण ३-१४-५३८
एवं जातिमाति द्रव्ये ३-१४-२५
एवं तु युक्तवद्भावात् ३-१४-५९६
एवंभूता च साऽवस्था ३-१४-१९०
एवं मात्रातुरीयस्य ३-९-६६
एवं साधौ प्रयोक्तव्ये १-१५३
एवमर्थस्य शब्दस्य ३-३-५९

औ

औदासीन्येन यत् प्राप्यम् ३-७-४६

क

कथं ह्यवयवोऽन्यस्य ३-१४-३९४
करणत्वादिभिर्ज्ञाताः ३-७-२१
करणस्य स्वकक्ष्यायाम् ३-७-७४
करणेषु तु संस्कारम् ३-७-९२
कर्तृकर्मव्यवहिताम् ३-७-१४८
कर्तृभेदात् तदर्थेषु ३-९-३१
कर्त्रभिप्रायता सूत्रे ३-१२-९
कर्मणस्त्वाप्तुमिष्टत्वे ३-७-७५
कर्मणो जातिभेदानाम् ३-६-३
कर्मत्वं करणत्वं च ३-१४-३९२
कर्मप्रवचनीयत्वम् २-२०२
कलाभिः पृथगर्थाभिः ३-९-५७
कश्च साधनमात्रार्थान् २-२१९
कश्चिदेव गुणो द्रव्ये ३-१-७३
काकस्य तालेन यथा ३-१४-६१७
काकेभ्यो रक्ष्यतां सर्पिः २-३१२
काचिदेव हि साऽवस्था ३-३-७
का तस्य प्रागवस्थेति ३-३-७९
कामचारे च सत्येवम् ३-१४-२६०

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

कायवाग्बुद्धिविषयाः १-१४७
कारणं कार्यभावेन ३-७-१०६
कारणानुविधायित्वात् ३-९-२०
कारणेषु पदं कृत्वा ३-१-२६
कार्यं सत्ताश्रयं शास्त्रात् ३-१४-१३१
कार्यकारणभावेन ध्वनती० ३-८-२
कार्यकारणभावेन योग्यभावेन १-२५
कार्यत्वे नित्यतायां वा १-७०
कार्याणामन्तरङ्गत्वम् २-१८२
कार्यानुमेयः संबन्धः २-४६
कार्योत्पत्तौ समर्थं वा ३-९-८९
कालभावाध्वदेशानाम् ३-७-६७
कालभिन्नाश्च भेदा ये २-४६०
कालविच्छेदरूपेण ३-७-४२
कालस्याप्यपरं कालम् ३-३-८५
कालात् क्रिया विभज्यन्ते ३-७-१५३
कालानुपाति यद्रूपम् ३-८-१२
काले निधाय स्वं रूपम् ३-९-३९
काल्यां कालाद् द्वितीयान्तात् ३-१४-१६२
किञ्चिद्यत्रास्ति सामान्यम् ३-१४-३९८
किमर्थमतथाभूते ३-१४-२७९
कुड्यस्यावरणे शक्तिः ३-७-२९
कुतश्चिदाहृत्य पदम् ३-७-६५
कुत्साप्रशंसातिशयैः ३-१४-१
कुत्सितत्वेन कुत्स्यो वा ३-१४-४
कृतणत्वाश्च ये शब्दाः २-३६३
कृतहस्तवदित्येतत् ३-१४-५६०
कृतेऽथ पतञ्जलिना २-४७९
कृत्तद्धितानामर्थश्च २-२११
कृत्तद्धिताभिधेयानाम् ३-१४-३२९
कृत्वसुज्विषयो याऽपि ३-१४-४४०
कृष्णादिव्यपदेशश्च ३-१४-४८९
क्लृपि संपद्यमाने या ३-७-११५
केचित्तु युतसिद्धार्थाः २-२०९
केचित् पुमांसो भाषन्ते ३-१४-५७८
केचित् संयोगिनो दण्डात् ३-१४-२३५
केचित् स्वाश्रयसंयुक्ताः ३-३-१५
केचिद्भेदाः प्रकाश्यन्ते २-१२१
केवलानां तु भावानाम् ३-१४-४७६
केवलेन पदेनार्थः २-४१
केषांचिज्जातिगुणयोः ३-१४-२२
केषांचित् कर्त्रभिप्राये ३-१२-६
केषांचित् त्यक्तभेदेषु ३-१४-१८५
केषांचित् साहचर्येण ३-१-३
केषांचिद्देवदत्तादेः ३-७-६२
कैश्चिद्गुणप्रधानत्वम् ३-१४-३३९
कैश्चिन्निर्वचनं भिन्नम् २-१७४
क्त्वान्ते च तुमुनन्ते च ३-१४-२५६
क्रमं तु यदि बाधित्वा ३-१४-५१२
क्रमात् संभविनां तेषाम् ३-८-६
क्रमान्न यौगपद्यस्य ३-३-८४
क्रमे विभिद्यते रूपम् २-४६५
क्रमोल्लेखानुषङ्गेण २-२६
क्रियया योऽभिसंबन्धः ३-१-७५
क्रिययेति तृतीया च ३-१४-४६४
क्रिययोरपवर्गिण्योः ३-९-२७
क्रियाकृतविशेषाणाम् ३-७-५१
क्रिया क्रियान्तराद्भिन्ना २-४१५
क्रियाणां जातिभिन्नानाम् ३-८-५८
क्रियाणां समुदाये तु ३-७-१३२
क्रियातिपत्तिरत्यन्तम् ३-९-९१
क्रिया त्वाश्रीयते यस्मिन् ३-१४-५०४
क्रियानुषङ्गेण विना २-४२५
क्रियान्तरपरिच्छेदे ३-९-७७
क्रियान्तरेण चैतेषाम् २-२७६
क्रियान्तरेषु सापेक्षाः ३-१४-४५४
क्रियाप्रधानमाख्यातम् २-३४२
क्रियाप्रबन्धरूपं यत् ३-९-९०
क्रियाप्रवृत्तावाख्याता ३-१२-५
क्रियाप्रवृत्तौ यो हेतुः ३-८-१६
क्रियाप्रसङ्गात् सर्वेषु ३-१४-२९१
क्रियाभेदाद्यथैकस्मिन् ३-९-३२
क्रियाभेदेन दृष्टानाम् ३-१४-१७
क्रियामन्ये तु मन्यन्ते ३-८-३७
क्रियामात्राभिधायित्वात् ३-१४-४९७
क्रियायां समवेतायाम् ३-१४-६१४
क्रियायां साधने द्रव्ये ३-१४५८६
क्रियायाः परिनिष्पत्तिः ३-७-९०

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

क्रियायाः प्रेरकं कर्म ३-७-१२८
क्रियायाः साधनाधार० ३-१४-२५७
क्रियाया द्योतको नायम् २-२०४
क्रियायै करणं तस्य ३-७-२६
क्रियार्थोपपदेष्वेवम् २-३३०
क्रियावतस्तु ग्रहणात् ३-१४-५२२
क्रियावतोऽपि सादृश्ये ३-१४-५०७
क्रियावतोश्च सादृश्ये ३-१४-५२६
क्रिया विना प्रयोगेण २-१२४
क्रियाविशेषचने ३-१२-११
क्रिया विषयभेदेन ३-१२-३
क्रियावृत्तेस्तृतीयान्त० ३-१४-४५७
क्रियाव्यपेतः संबन्धः २-४०२
क्रियाश्रुतिश्च प्रक्रान्ते ३-१४-२९२
क्रिया समानजातीया ३-१४-४४४
क्रियासिद्धौ प्रकर्षो वा ३-७-९५
क्रियेत्युपाधिः प्राथम्यात् ३-१४-४३६
क्रियोपाधिश्च सन् भूत० ३-९-३७
क्रीडायां जीविकायां च ३-१४-४०
क्रीणीष्व वपते धत्ते ३-१२-७
क्वचित् क्रिया व्यक्तिभागैः २-४५९
क्वचित् तत्त्वसमाख्यानम् २-३२४
क्वचित् संभविनो भेदाः २-१८७
क्वचित् साधनेमवासौ ३-१२-२
क्वचिद्गुणप्रधानत्वम् २-३०४
क्वचिद्विषयभेदेन २-३७०
कथितोदककल्पैषाम् ३-१३-१६
क्षत्रियादौ पदं कृत्वा ३-१४-२६४

ग

गतिर्विना त्ववधिना ३-७-१४३
गन्तव्यं दृश्यतां सूर्यः २-३१०
गर्गा इत्येक एवायम् २-२२१
गवये नरसिंहे वा २-९०
गवयेन समोऽनड्वान् ३-१४-५४७
गवां विशेषणत्वेन ३-१४-२३९
गवेधुके चरौ दृष्टा ३-१४-५९४
गुणः प्रकर्षहेतुर्यः १-६४
गुणक्रियाणां कर्तारः ३-७-२०
गुणक्रियायां स्वातन्त्र्यात् ३-७-१२७
गुणप्रधानताभेदः ३-१०-७
गुणभावेन साकाङ्क्षम् २-४८
गुणभावोऽभिधेयत्वम् ३-१४-३३७
गुणभूतस्य नानात्वात् ३-१४-३४०
गुणभूतैरवयवैः ३-८-४
गुणमात्राभिधायित्वम् ३-१४-१७६
गुणमात्राभिधायित्वात् ३-१४-२६
गुणयोर्नियतो भेदः ३-१४-३६५
गुणस्य भेदकाले तु ३-१४-३५३
गुणा इत्येव बुद्धेर्वा ३-१३-१८
९ अभिनवगुप्त.	१० रामकण्ठ.	११ क्षीरस्वामिन्.	१२ पार्थसारथिमिश्र.
१३ महेश्वर.	१४ दुर्गसिंह.	१५ त्रिलोचनदास.	१६ वाचस्पतिमिश्र.
१७ श्रीसोमानन्दनाथ.	१८ उत्पलदेव.	१९ गोकुलनाथ.	

* * * *

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

१·१ हरिस्वामिन् (638 A. D.), **Commentator of** शतपथब्राह्मण **quotes in his** भाष्य, भर्तृहरि's वाक्यपदीय **thus** :—" अन्ये तु शब्दब्रह्मैवेदं विवर्तते अर्थभावेन प्रक्रिया इत्यत आहुः । " जयन्तभट्ट (**880 A. D.**) **in his** न्यायमञ्जरी **quotes** 'अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।' **& goes on to say** : यत्तु नित्यं वा किञ्चिदुच्यते तच्छब्दतत्त्वमित्यत्र । का युक्तिः । आह- 'शब्दोपग्राह्यतया च शब्दतत्त्वम्' । **The relevant portion of** स्वोपज्ञ **on** वाप **1·1 is as follows** :—' तत्तु भिन्नरूपाभिमतानामपि विकाराणां प्रकृत्यन्वयित्वात् शब्दोपग्राह्यतया शब्दोपग्राहितया च शब्दतत्त्वमित्यभिधीयते ।' (**Deccan College edition, pp. 6–7**).

रामकण्ठ (**950 A. D.**) **in his** विवृति **on** स्पन्दकारिका (**4·18**) **quotes** वाप **1·1** (**along with** वाप **1·112** अथायमान्तरो...विवर्तते) **thus** : 'शब्दाद्वयवादे सामान्येन शब्दार्थोभयरूपोऽपर्यन्तावान्तरभेदो योऽयमीश्वरस्य शक्तिप्रसरः तं विवर्तवाचोयुक्त्या व्यवहराति स्म । यदाह– 'अनादिनिधनं ब्रह्म...विवर्ततेऽर्थभावेन...यतः ॥' इति । अत्र ब्रह्मपर्यायशब्दतत्त्वतया पारमेश्वरमेव रूपं निर्दिष्टम् । तदियं परा शक्तिरेव स्वमार्गस्था ज्ञाता तथा सम्यक्प्रतिपन्नस्वभावा सती संपूर्णां सिद्धिमुपपादयति इत्युक्तम् । सेयमेव वैखरीरूपतामापन्ना पुरुषप्राणपरिस्पन्दाधीनाभिव्यक्तिकत्वात् स्थूला क्रियाशक्तिः इत्यपि क्वचिदुक्ता, तत्पूर्वा च मध्यमा वाक् इच्छाशक्तिः, तत्पूर्वा च पश्यन्ती ज्ञानशक्तिरिति । तदेवं शक्तित्वे सति शक्तिमन्तमियमपेक्षते–इति आभिन्नमातृकात्मकः शब्दराशिरूपक्रियाप्रधान ऐश्वरो विग्रहोऽस्याः समाश्रयः यत्रेयं वर्गादिभिः वाक्यपर्यन्तैः स्वप्रसरभेदैः विजृम्भते । योऽपि वाक्यरूपः प्रसरोऽस्याः स नित्यानित्यभेदेन द्विविधः । तत्र मन्त्रात्मकः शास्त्रात्मकश्च नित्यः । लौकिकव्यवहारविषयलौकिकवाक्यात्मकस्तु अनित्यः । एवं परमेश्वरशक्तित्वेन प्रत्यभिज्ञायमाना एषा वाङ्मयी विभूतिः परसिद्धिप्रदा । नानापशुसम्बन्धितया तु अवच्छिद्यमाना बन्धहेतुर्भवति । ...

सर्वदर्शनसंग्रह **of** माधव (**circa 1350 A. D.**) **has this** कारिका **in its** पाणिनिदर्शन (**XIII 113–116 BORI 2nd. ed.**) " जगन्निदानं स्फोटाख्यो निरवयवः नित्यः शब्दो ब्रह्मैवेति हरिणाऽभाणि ब्रह्मकाण्डे—" अनादिनिधनं...तदक्षरम् । विवर्तते....जगतो यतः ॥ '; **it reads** तदक्षरम् **for** यदक्षरम्.

'अनादिनिधनं ... जगतो यतः' लम १७४ : ज्ञातमर्थं विवक्षोः पुंसः इच्छया जातेन प्रयत्नेन योगे एव मूलाधारस्थपवनसंस्कारः । तदभिव्यक्तं शब्दब्रह्म स्वप्रतिष्ठतया निष्पन्दं परा वागित्युच्यते । तदुक्तं हरिणा— 'अनादिनिधनं...'; आद्यश्लोके हरिग्रन्थेऽपि स्पष्टमेतत् (लम ३१६–३१७)। 'तत्त्वादप्रच्युतस्य वस्तुना भेदानुकारेण असत्याविभिक्तान्यरूपोपग्राहिता विवर्त्तः स्वप्नविषयप्रतिभासवत् इत्यादिना, (**this** हरिग्रन्थ **refers to**

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

the स्वोपज्ञटीका of भर्तृहरि)। तत्त्वात् स्वस्वरूपात्। असत्यं वस्तुना वहिरसत्त्वात्। अविभक्तं तदधिष्ठानेन। अन्यत् वैधर्म्योपलम्भात्। तादृशरूपोपग्राहिता तद्रूपप्रकारकज्ञानविशेष्यता। तदाह–स्वप्नविषयेति। इति तद्व्याख्यातारः। पयसो दधि न तु विवर्त्तः तत्त्वादप्रच्युतेः। स्वर्णादेः कुण्डलादि तु विवर्त्त एव॥

शान्तरक्षित, in effect, refers to this कारिका when he says, under text (128) of तत्त्वसंग्रह, thus:—

'नाशोत्पादासमालीढं ब्रह्म शब्दमयं परम्।
यत्तस्य पारिणामोऽयं भावग्रामः प्रतीयते॥'

His commentator, कमलशील, expressly quotes भर्तृहरि's कारिका and explains it:—

'नाशोत्पादेत्यादिना शब्दब्रह्मवादिनो ब्रुवते। पूर्वापरादिविभागरहितमनुत्पन्नमविनाशि यच्छब्दमयं ब्रह्म तस्यायं रूपादिर्भावग्रामः परिणाम इति प्रतीयते। यथोक्तं—'अनादिनिधनं...यतः॥' इति। तत्र आदिः उत्पादः निधनं नाशः तदभावात् अनादिनिधनम्। अक्षरमिति अकाराद्यक्षरस्य निमित्तत्वात्। एतेनाभिधानरूपेण विवर्तो दर्शितः। अर्थभावेनेत्यादिना पुनरभिधेयविवर्तः। प्रक्रियेति भेदाः। ब्रह्मेति नामसंकीर्तनम्। अस्यैव श्लोकस्यार्थं निर्दिशति नाशोत्पादासमालीढमिति। नाशोत्पादग्रहणं उपलक्षणम्। इदमप्यत्र बोद्धव्यं पूर्वापरदेशविभागरहितमिति। शब्दमयमिति शब्दस्वभावम्। अत एव शब्दस्तत्त्वमस्य शब्दतत्त्वं तदुच्यते। शब्दोऽस्याविपरीतं रूपमित्यर्थः। परमिति प्रणवात्मकम्। प्रणवो हि किल सर्वेषां शब्दानां सर्वेषां चार्थानां प्रकृतिः। स च वेदः। अयं तु वर्णपदक्रमेणावस्थितो वेदः तदधिगमोपायः तस्य प्रतिच्छन्दकन्यायेनावस्थितः। तं तु परमं ब्रह्माणं (referring to शब्द & perhaps, therefore, put in the masc. gender) अभ्युदयनिःश्रेयसफलधर्मानुगृहीतान्तःकरणाः पश्यन्तीति।......

And again at तत्त्वसंग्रह (141):—

'अन्योन्यरूपसंभूतौ तस्मादेकस्वरूपतः।
विवृत्तमर्थरूपेण कथं नाम तदुच्यते॥'

१·११ सर्वदर्शनसंग्रह in its पाणिनिदर्शन (XIII 86–87) quotes this कारिका & reads आहुः for प्राहुः:—प्रधानं च षट्सु अङ्गेषु व्याकरणं प्रधाने च कृतो यत्नः फलवान् भवति। तदुक्तं—'आसन्नं...बुधाः॥' This is a verbatim echo of पतञ्जलि's महाभाष्य (Kielhorn ed. Vol. I p. 1, 19–20).

१·१३ cd. "तत्त्वाववोधः शब्दानां नास्ति व्याकरणादृते॥" Quoted and criticised by कुमारिलभट्ट (650–700 A. D.), according to Dr. P. V. Kane) in his तन्त्रवार्त्तिक on जैसू 1·3·8·24 (p. 266 of आनन्दाश्रम edition) thus:—"यदपि केनचिदुक्तं 'तत्त्वाववोधः ...व्याकरणादृते' इति तत् रूपरसगन्धस्पर्शेष्वपि वक्तव्यमासीत्।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

'को हि प्रत्यक्षगम्येऽर्थे शास्त्रात्तत्त्वावधारणम् ।
शास्त्रलोकस्वभावज्ञ ईदृशं वक्तुमर्हति ॥'

अतएव श्लोकस्योत्तरार्धं वक्तव्यम्—'तत्त्वाववोधः शब्दानां नास्ति श्रोत्रेन्द्रियादृते ॥" इति ॥ न ह्यत्र कश्चिद् विप्रतिपद्यते बधिरेष्वेवमदृष्टत्वात् ।

१·१४,१६ सर्वदर्शनसंग्रह in पाणिनिदर्शन (XIII 274–284) refers to वाक्यपदीय (1·14 & 16) thus :—
'शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥' (मभा C. E. Poona, 12·224·10; also 12·262·1) इति अभियुक्तोक्तेः (where अभियुक्त = व्यास)। तथा च शब्दानुशासनशास्त्रस्य निःश्रेयससाधनत्वं सिद्धम् । तदुक्तम्—'तद्द्वारमपवर्गस्य...प्रचक्षते' इति । तथा—'इदमाद्यं...राजपद्धतिः' इति । तस्माद् व्याकरणशास्त्रं परमपुरुषार्थसाधनतयाऽध्येतव्यमिति सिद्धम् ॥

१·१४,१६,१७ ab. वैमू २५४; वैभूसा ४२४–४२५.

१·१४ ab. 'तद्द्वारमपवर्गस्य...चिकित्सितम्' लम १५७३ : यद्यपि शास्त्रज्ञानं विना प्रकारान्तरेणापि पदार्थज्ञानं लोके दृश्यते तथापि शास्त्रीयप्रकृतिप्रत्ययव्युत्पादनपूर्वकं विजातीयतज्ज्ञानपूर्वकप्रयोगस्य चित्तशुद्धिद्वारा अपवर्गसंपादकत्वेन शास्त्रज्ञानस्य आवश्यकत्वात् । तदुक्तं हरिणा—'तद्द्वारम् . '। एवं लघुनोपायेन सर्वशब्दप्रतिपत्तौ च शास्त्रस्योपयोगो बोध्य इति शिवम् ॥

१·१६ Quoted by उ on पा ८·४·६८ अ अ इति, the last सूत्र of अष्टाध्यायी, which is fittingly concluded by ना thus : सिद्धमिष्टमिति । अनेन व्याकरणाध्ययनप्रयोजनाभ्यां सकलपुरुषार्थसिद्धिं दर्शयति । अन्ते मङ्गलाचरणं च कृतं भवति । एवं सूत्रकारेणापि विष्णुवाचकाऽकारस्य द्विरुच्चारणात् द्विर्विष्णुस्मरणरूपं मङ्गलमाचरितम् । किंच 'अकारो वै सर्वा वाक् । सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति' इति श्रुतेः (ऐआ २·३·६) अकारस्य सर्वशब्दप्रकृतित्वात् 'अ इति ब्रह्म' इति शब्दब्रह्मरूपत्वश्रवणाच्च महामङ्गलार्थता वार्त्तिककृताऽपि 'भगवतः पाणिनेः सिद्ध' मिति सिद्धशब्दोच्चारणेन कृतं मङ्गलम् । भगवता पतञ्जलिनाऽपि 'एकदेशनिर्देशोऽयम्–' अ '–इति अन्ते वदता कृतं मङ्गलम् । एवं च तदध्यायिनां प्रवक्तॄणां च सकलपुमर्थसिद्धिर्दर्शिता । यथोक्तं—'इदमाद्यं पदस्थानम्...' इति सर्वेष्टसिद्धिः ।

१·३० ab. 'न चागमादृते धर्मस्तर्केण व्यवतिष्ठते ।' referred to by अभिनवगुप्त (980–1020 A. D.) in his अभिनवभारती on भरत's नाट्यशास्त्र (1·1) thus :—'न चागमादृते धर्मः अनुमानगम्यः' इति न्यायात् ॥

१·३२–३३ 'अवस्थादेशकालानां...अतिदुर्लभा ॥' 'निर्ज्ञातशक्तेर्द्रव्यस्य...प्रतिबध्यते॥' These two कारिकाs are incorporated in तत्त्वसंग्रह of

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

शान्तरक्षित (a Buddhist author, 720 A. D.) under the headings 1460 & 1461 (with the reading विज्ञातशक्तेरप्यस्य for निर्ज्ञातशक्तेर्द्रव्यस्य). The idea in these two कारिकाs of भर्तृहरि was made use of by शंकराचार्य in his भाष्य on ब्रसू 2·1·17 'श्रुतेस्तु शब्दमूलत्वात्' thus :– 'लौकिकानामपि मणिमन्त्रौषधिप्रभृतीनां देशकालनिमित्तवैचित्र्यवशात् शक्तयो विरुद्धानेककार्यविषया दृश्यन्ते। ता अपि तावत् न उपदेशमन्तरेण केवलेन तर्केण अवगन्तुं शक्यन्ते–अस्य वस्तुनः एतावत्यः एतत्सहायाः एतद्विषयाः एतत्प्रयोजनाश्च शक्तय इति। किमुत अचिन्त्यस्वभावस्य ब्रह्मणो रूपं विना शब्देन न निरूप्येत। तथा चाहुः पौराणिकाः—

' अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्।
प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणम् ॥'

तस्मात् शब्दमूल एव अतीन्द्रियार्थयाथात्म्याधिगमः। The verse quoted occurs, besides in the पुराणs, in मभा CE 6·6·11 with the reading साधयेत् for योजयेत्.

१·३२, ४२ शिवदृष्टि (२·३३) refers to वाप (1·32 & 42) & उत्पलदेव expressly cites these two कारिकाs thus in his टीका on

"न चानुमानमिष्टं तेऽप्यवस्थेत्यादिदूषणात्" ॥ ३३ ॥

The अवस्थादि in this श्लोकार्ध of श्रीसोमानन्द obviously has in view अवस्था, देश & काल of वाप :— 'न चापि भवतोऽनुमानं सम्यग्ज्ञानमिष्टम् – "अवस्थादेशकालानां...अतिदुर्लभा ॥" इति "हस्तस्पर्शादिवान्धेन...न दुर्लभः ॥" इति चान्यच्च वदन्तः। नहि वस्तुव्यवस्थापने शक्ततायां प्रत्यक्षात् न्यूनता तस्य स्यात्। अशक्ततायां तु अप्रामाण्यमेव ॥' श्रीसोमानन्दनाथ further refers to this कारिका (१·३२) in his शिवदृष्टि (5·62) on which no comm. of उत्पलदेव is available :

' अनुमानस्यान्यथाऽन्यैर्दूषणा प्रविधीयते।
अवस्थादेशकालानामित्यादिभिरुदाहृतैः ॥'

१·३४ 'यत्नेनानुमितोऽप्यर्थः ... अन्यथैवोपपद्यते ॥'

It would appear that शंकराचार्य when commenting upon ब्रसू 2·1·11 'तर्काप्रतिष्ठानादप्यन्यथानुमेयम् ...' had before him वाप (1 34) : "इतश्च नागमगम्येऽर्थे केवलेन तर्केण प्रत्यवस्थातव्यम्। यस्मान्निरागमाः पुरुषोत्प्रेक्षामात्रनिबन्धनास्तर्का अप्रतिष्ठिता भवन्ति। उत्प्रेक्षाया निरङ्कुशत्वात्। तथाहि कैश्चिदभियुक्तैर्यत्नेनोत्प्रेक्षिताः तर्काः अभियुक्ततरैः अन्यैः आभास्यमाना दृश्यन्ते। तैरप्युत्प्रेक्षिताः सन्तः ततोऽन्यैराभास्यन्ते इति न प्रतिष्ठितत्वं तर्काणां शक्यमाश्रयितुम्। पुरुषमतिवैरूप्यात्।"

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

In fact, भामती quotes this कारिका (1·34) :— 'शुष्कतर्को हि स भवति अप्रतिष्ठानात् । तदुक्तं—' यत्नेन...' इति।

It is also quoted in the अनुमानपरीक्षा of तत्त्वसंग्रह as a doctrine of भर्तृहरि under the heading 1462.

अर्चट in his comm. on हेतुबिन्दु (p. 154) quotes भर्तृहरि's वाक्यपदीय (1-32) thus :— " तादृशस्य सामान्यात्मन एव लिङ्गत्वात् तस्य च अतथाविधादपि जन्माशङ्कायां कुतस्तथाविधेन अन्वयो व्यतिरेको वा। तदुक्तं — ' अवस्थादेशकालानां भेदाद् भिन्नासु शक्तिषु ।
भावानामनुमानेन प्रतीतिरतिदुर्लभा ॥ '

(Our text reads प्रसिद्धिः for प्रतीतिः)

१·३२-३४ कमलशील, the commentator of तत्त्वसंग्रह of शान्तरक्षित, observes : ' तथा भर्तृहरिराह—

" अवस्थादेशकालानां भेदाद् भिन्नासु शक्तिषु ।
भावानामनुमानेन प्रसिद्धिरतिदुर्लभा ॥ १४६० ॥

विज्ञातशक्तेरप्यस्य तां तामर्थक्रियां प्रति ।
विशिष्टद्रव्यसंबन्धे सा शक्तिः प्रतिबध्यते ॥ १४६१ ॥

यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः ।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते ॥ १४६२ ॥ "

(Note the variants by comparing these quotatons with the Karikas in our text).कमलशील in his पञ्जिका continues :- ' अवस्थादेशकालभेदेन पदार्थानां शक्तयो भिन्नाः। अतो न शक्यतेऽनुमानात् तद्भावनिश्चयः कर्तुम् । न ह्येवं शक्यतेऽनुमानात् प्रत्येतुम्—देवदत्तो भारोद्वहनसमर्थो न भवति, देवदत्तत्वात् बालावस्थदेवदत्तवदिति । अत्र हि अवस्थाभेदेन शक्तिभेदसम्भवाद् व्यभिचारः । तथा देशभेदेन आमलकी-खर्जूरादीनां रसवीर्यविपाकभेदो दृश्यते । तत्र नैवं शक्यते कर्तुम्—सर्वाऽऽमलकी कषायफला अनुभूयमानामलकीवदिति । तथा कालभेदेन कूपोदकादीनां शीतोष्णादिभेदः सम्भवति । तत्र सर्वा आपः शीता इति न शक्यते निश्चयः कर्तुम् । इत्येवमादि । अवस्थादेशकालानामिति भेदादित्यपेक्ष्य षष्ठी । भावानामिति प्रसिद्ध्यपेक्षया। तथा तृणादिषु निश्चितदहनसामर्थ्यस्याग्नेः अभ्रपटले तत् सामर्थ्यं प्रतिहन्यते। न च तत्रैवमनुमातुं शक्यते–अभ्रपटलमग्निना दह्यते पार्थिवत्वात् तृणादिवदिति। तथाऽन्येनान्यथा प्रतिपादितोऽर्थः पुनरभियुक्ततरेणान्येनान्यथा प्रतिपाद्यते इत्यनिष्ठा ॥ १४६० ॥ १४६१ ॥ ॥ १४६२ ॥

१·३५ वाचस्पतिमिश्र (820 to 900 A. D.) in his तत्त्वबिन्दु refers to this कारिका with the remark यदाहुः बाह्या अपि:—

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

" परेषामनुपाख्येयमभ्यासादेव जायते ।
मणिरूपादिषु ज्ञानं तद्विदां नानुमानिकम् ॥ " इति ॥

Our text reads असमाख्येयं **for** अनुपाख्येयं **&** मणिरूप्यादिविज्ञानं **for** मणिरूपादिषु ज्ञानं.

अर्चट **in his comm. on** हेतुविन्दु **(p. 294) observes and quotes** भर्तृहरि **(**वाप **1·35) thus :—"** तथाऽनभ्यासावस्थायां स्वतः तद्योग्यताऽनिश्चयेऽपि अभ्यासादितः पटिमप्रत्यक्षं स्वयमेव तद्योग्यं निश्चाययिष्यति इति किं नानुमन्यते । आह चात्र भर्तृहरिः—

" मणिरूप्यादिविज्ञानं तद्विदां नानुमानिकम् ॥ "

१·३७,३८ 'आविर्भूतप्रकाशानाम्'; 'अतीन्द्रियान्...' **quoted by** प्र **on** पा **6-3-109.** आचारमाह–कुम्भीधान्या इति । कुम्भ्यामेव येषां धान्यं ते कुम्भीधान्याः । दम्भार्थं कुम्भीधान्यं स्यादित्याह–अलोलुपा इति । अगृह्यमाणकारणा इति । दृष्टकारणमन्तरेणैव सदाचारानुवर्तिन इत्यर्थः । किञ्चिदन्तरेणेति । विनैव अभियोगादिना सर्वविद्यापारगाः । ते हि साधुत्वपरिज्ञाने प्रमाणम् । तदुक्तं–'आविर्भूत०...'; 'अतीन्द्रियान्...' इति ॥ उ कुम्भ्यामेवेति विशेषणसामर्थ्यात् अवधारणगर्भः समास इति भावः । दम्भः सर्वेभ्यः स्वस्य आधिक्यभावनम् । दृष्टं कारणं लाभपूजादि । विहितबुद्ध्या नित्यादिकर्मकर्तार इत्यर्थः । एवं सदाचारानुष्ठानकृतान्तःकरणशुद्ध्या अविद्याऽपगमात् दिव्यज्ञानावाप्तिस्तेषामिति दर्शयितुं भाष्ये किञ्चिदन्तरेणेति तद्व्याचष्टे विनैव अभियोगादिनेति । अभियोगो गुरूपदेशः । आदिना अभ्यासादिः । कस्यांश्चित् इत्यस्यार्थमाह–सर्वविद्येति । अव्ययानामनेकार्थत्वात् (ना **refers to** चित् **in** कस्यांश्चित्) । तपोबलादेव शब्दतोऽर्थतश्च प्रतिभातसर्वविद्या इति तात्पर्यम्। आविर्भूतेति। अविद्यापगमेन योगाभ्याससहकृतप्रत्यक्षेण आविर्भूतसर्वविषयज्ञानानां इत्यर्थः। तत्र कारणम्–अनुपप्लुतेति । विहितकर्मानुष्ठानात् शुद्धान्तःकरणानामित्यर्थः । प्रत्यक्षात् विद्यमानवस्तुविषयास्मदादिप्रत्यक्षात् इत्यर्थः । अतीन्द्रियान् बाह्येन्द्रियाग्राह्यान् । असंवेद्यान् अन्यैर्मनसाऽपि अनुपलभ्यमानान् । आर्षेण योगाभ्याससहकृतदिव्यचक्षुषा । शिष्टवचनविरुद्धमनुमानं न प्रमाणमिति भावः ॥

१·४० 'इदं पुण्यं...' **quoted by** कुमारिल **in his** श्लोकवार्त्तिक **(3) on** जैसू **1·1·5 thus :—**

" धार्मिकाधार्मिकत्वाभ्यां पीडानुग्रहकारिणौ ।
प्रसिद्धौ हि तथा चाह पाराशर्योऽत्र वस्तुनि ॥ २ ॥
इदं पुण्यमिदं पापमित्येतस्मिन् पदद्वये ।
आचण्डालं मनुष्याणामल्पं शास्त्रप्रयोजनम् ॥ ३ ॥

as from पाराशर्य **i. e.** व्यास **in** महाभारत. उम्बेक, **the commentator of** श्लोकवार्त्तिक, **says :—"** तामाह धार्मिकेत्यादिना प्रसिद्धौ

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

हीत्यन्तेन। तामेव श्लोकप्रसिद्धिं व्यासवचनेन दर्शयति तथा चेति सशेषेण श्लोकेन।" पार्थसारथिमिश्र, another commentator of श्लोकवार्त्तिक, observes:—"लोकप्रसिद्धिगम्यत्वं धर्माधर्मयोःभगवता व्यासेनापि दर्शितमित्याह–तथा चेति। व्यासवचनमुदाहरति–इदमिति। इदं प्रपातडागादिकं पुण्यं इदं अगारदहनादिकं अपुण्यं इत्येवं उपकारापकार-विषये धर्माधर्मपदद्वये यावच्चाण्डालप्रसिद्धे सति अल्पं शास्त्रप्रयोजनमिति॥

जयन्तभट्ट in his न्यायमञ्जरी (p. 251) also quotes this कारिका thus:—'तथाऽऽह व्यासः'

अभिनवगुप्त in his ईप्रविवि (Vol. III p. 102) refers to this कारिका of भर्तृहरि as taken from मुनि i. e व्यास:—

'इदं पुण्यमिदं पापं...शास्त्रप्रयोजनम्॥' इत्यादिमुनिवचनं भर्तृहरिणा आगमप्रामाण्यदार्ढ्याय उपन्यस्तमिति तन्मुखेन इह लिखितम्। तथा प्रस्तावदार्ढ्यार्थमेव शास्त्रशब्देन विशिष्टवाक्यरचना अत्र उक्ता इति दर्शयति 'ननु' इति। ... (ईप्रविवि = ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी)

१·४२ 'हस्तस्पर्शादिवान्धेन....अनुमानप्रधानेन...दुर्लभः॥' quoted by भव्य (600 A. D.) in his comm. प्रज्ञाप्रदीपवृत्ति on मूलमध्यमककारिका (9·3) of नागार्जुन (150 A. D.) and expressly stated by भव्य's commentator अवलोकितव्रत as coming from आचार्य भर्तृहरि·

Also quoted by जयन्तभट्ट in his न्यायमञ्जरी with the following as उपोद्घात:—

"अत एवानुमानानामपश्यन्तः प्रमाणताम्।
तद्विस्रम्भनिषेधार्थमिदमाहुर्मनीषिणः॥"

१·५०,५५ अभिनवगुप्त in his ईप्रविवि (Vol. II p. 248) quotes these, observing:—ननु विषयत्वं इन्द्रियगोचरत्वं तत् धूमस्य इव शब्दस्यापि भवतु। ज्ञापकस्य हि किमेतदपूर्वम्। अत्र आह वाच्यीभाव एव इति परा-मृश्यतेत्यर्थः। कुतोऽयं विशेष इति चेदाह प्रकृत इति। स्वरूपवाच्यत्व-निर्णयप्रकरणादेष विशेष इति यावत्। तथा हि उपक्रान्तम्,

'आत्मरूपं यथा ज्ञाने ज्ञेयरूपं च भासते।
अर्थरूपं तथा शब्दे स्वरूपं च प्रकाशते॥ इति॥

'ग्राह्यत्वं ग्रहणत्वं च द्वे शक्ती तेजसो यथा। तथैव सर्वशब्दानाम्...॥' इति च। एतदेव स्फुटयति ज्ञानशब्द इत्यादिना ग्रन्थेन। We read दृश्यते for भासते in वाप 1-50 and ग्राहकत्वं for ग्रहणत्वं in वाप 1-55.

१·५५ गोकुलनाथ in his पदवाक्यरत्नाकर (Yet in MS form) under verse 23 quotes भर्तृहरि's वाप (1·55) along with वाप (1·123) thus:—

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

'प्रतिपाद्यत्वमेव वा शक्यत्वं लक्ष्यसाधारणमाविशेषेण जनकजन्यज्ञानयोर्विशेषः।.यदाहुरभियुक्ताः—'ग्राह्यत्वं...पृथगवस्थिते ॥' इत्यादि । तस्मात्

स्मरणं पदेन जनितं पदवृत्तिमतः पदार्थस्य ।
अन्वयबुद्धावर्थः कथं न तादृक् परिस्फुरति ॥ इति व्याकुर्वते ।

'ग्राह्यत्वं ग्राहकत्वं चेति ...' quoted by भ in शकौ (p. 4) under स्फोटस्वरूपव्युत्पादनम् thus : आह च 'ग्राह्यत्वं ...' युक्तं चैतत् । गृहीतशक्तिकं प्रति शब्देनार्थस्येव अर्थेन शब्दस्यापि स्मरणे बाधकाभावात् ।; वैभू 128; वैभूसा 227.

१·५६ ab "विषयत्वमनापन्नैः ..."
वैभू 125 and वैभूसा 227 read अनादृत्य for अनापन्नैः

१·५९ उ तदुक्तं हरिणा—'वृद्ध्यादयो यथा शब्दाः..." on भाष्य (पा 1·1·1):—
"द्वयोर्हि प्रतीतपदार्थकयोर्लोके विशेषणविशेष्यभावो भवति । न चादैच्छब्दः प्रतीतपदार्थकः । तस्मात् संज्ञासंज्ञिनौ एव ॥"

१·७३ 'पदे न वर्णा विद्यन्ते ...' quoted by भ in शकौ twice (p. 8) and (p. 50) thus :—

(i) अखण्डेष्वपि ऋकारादिषु वर्णेषु वर्णान्तरसमानाकारैकदेशावभासः तथाऽत्र पक्षे वर्णावभासोऽपि भविष्यति । उक्तं च वोपदेवेन—

'शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्ष्यताम् ।
औपाधिको वा भेदोऽस्तु वर्णानां तारमन्द्रवत् ॥'

इति ॥ (This is कारिका 69 of भट्टोजि) भर्तृहरिरप्याह—'पदे न वर्णा विद्यन्ते...' इति । तस्मादखण्डं पदं वाक्यं वेति.... ।

(ii) अत्राहुः—व्यञ्जनमर्धमात्रमेव । आशूच्चारणात्तु तुल्यरूपयोर्द्वयोः एकत्वभ्रमः । इदं च शिष्टसमाचारात् प्रक्रियादशायां अवश्यं स्वीकार्यम् । परमार्थदशायां तु 'पदे न वर्णा विद्यन्ते' इति वाक्यपदीयोक्तरीत्या स्फोटं सिद्धान्तयतां क्वास्य पूर्वपक्षस्यावसरः ॥ In वैभूसा 411 this is कारिका 68 cd and 69 ab put together.

१·७४ cd 'तत्र यन्मुख्यमेकेषाम्... 'quoted by भ in शकौ (p. 9) thus:— अवयवशक्तेर्दुरुपपादतया प्राथमिकशक्तिग्रह एव प्रमारूप इति तु सैद्धान्तिकः पन्थाः । उक्तं च हरिणा—'तत्र यन्मुख्यम्... '.

१·७५ ab, ७६,७७ quoted by ना in लम (pp 237-238) with variants and explanations thus :—स्वभावतस्तु नित्यत्वात् for स्वभावभेदान्नित्यत्वे (७६); वृत्तिभेदे for वृत्तिभेदं (७७); in between १·७६ and १·७७ लम has one more कारिका :—

'स्फोटस्य (v. l. वर्णस्य) ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते ।
स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते ॥'

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

प्राकृतध्वनिशब्देन स्फोटव्यञ्जकमत्रोच्यते । ग्रहणे अभिव्यक्तौ । स्थितिभेदे चिराचिरोपलब्धिविशेषे । शब्दस्याभिव्यक्तेरूर्ध्वं वैकृता ध्वनयो जायन्ते इति शेषः । ते तु वृत्तिभेदे द्रुतादिवृत्तिभेदे । १·७७ समुपोहन्ते तत्र कारणानि भवन्ति । स्फोटस्तु तैर्न भिद्यते इति तदर्थः । वैकृतत्वं चैषां आलस्यादिकृतत्वात् ...१·७७ quoted by उ on भा (पा 1-1-70 तपरस्तत्कालस्य) with वृत्तिभेदाय as v. l. for वृत्तिभेदम्. It is said that the interposed कारिका, referred to above, was from संग्रह of व्याडि with v. l. स्फोटस्य and शब्दस्य, for वर्णस्य.

१·८४ कमलशील quotes this कारिका with the reading आवृत्तिपरिपाकायां for आवृत्तपरिपाकायाम् on शान्तरक्षित's तत्त्वसंग्रह (2310–2312) which, themselves, are bodily taken from कुमारिल's श्लोकवार्त्तिक (शब्दनित्यता 318 cd–321 ab):

" वक्तव्यं चैष कः शब्दो विनाशित्वेन साध्यते ।
त्रिगुणः पौद्गलो वाऽयमाकाशस्याथवा गुणः ॥
वर्णादन्योऽथ नादात्मा वायुरूपमवाचकम् ।
(कुमारिल correctly reads वायूरूपोऽर्थवाचकः)
पदवाक्यात्मकः स्फोटः सारूप्यान्यनिवर्तने ॥
एतेषामस्त्वनित्यत्वं नास्माकं तेषु नित्यता ।
अप्रसिद्धविशेषत्वमाश्रयासिद्धहेतुता ॥ "

कमलशील comments thus :—

" शिष्टानपि पक्षदोषान् हेतुदोषांश्च प्रतिपिपादयिषुराह वक्तव्यमित्यादि । सिद्धान्तभेदेन शब्दगतान् विकल्पानाह । तत्र सत्त्वरजस्तमःस्वभावत्वात् त्रिगुणः साङ्ख्यैरिष्टः शब्दः । पौद्गलो दिगम्बरैः । पुद्गलाः परमाणव उच्यन्ते । तेषामयं पौद्गलः । तदात्मक इति यावत् । आकाशगुणः काणादैरिष्टः । वर्णव्यतिरिक्तो नादात्मा लौकिकैः । यथोक्तं पातञ्जले भाष्ये—' अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द ' इति । वायुरूपवाचकं शिक्षाकारैः । यथाहुः—' वायुरापद्यते शब्द ' मिति (cf वाप 1·107 ' वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते ' ।) पदस्फोटात्मको वाक्यस्फोटात्मकश्च वैयाकरणैः रिष्टः । तद्यथाहुः—" नादैः ... अवधार्यते ॥ " इति । सारूप्यं सादृश्यं विन्ध्यवासीष्टम् । बौद्धैरन्यनिवर्तनं अन्यापोहो वाचकत्वेन य इष्टः । ... ...

पार्थसारथिमिश्र, a much later commentator of कुमारिल's श्लोकवार्त्तिक, thus observes :—

" सत्त्वरजस्तमःस्वभावः सांख्यानां, आर्हतानां पुद्गलारब्धः काणादानां आकाशगुणः नादात्मा शङ्खादिविषयः शिक्षाकारस्य वायुरूपोऽर्थवाचक-अर्थवाचकरूपेण शब्दात्मना परिणतो वायुरिति यावत् स्फोटश्च द्विविधो वैयाकरणाभिमतः सारूप्यान्यनिवर्तने च सांख्यसौगताभिमते इति ॥ " It i

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

remarkable that विन्ध्यवासिन्, the सारूप्यसाङ्ख्यवादिन्, if we may so call him, is separately mentioned (see कमलशील's पञ्जिका above).

Quoted by अभिनवगुप्त in ईप्रविवि (vol. II p. 188) thus:—

सर्वत्र चात्र सघोषाघोषरूपवाग्व्यापारशब्दानुविद्धता प्राधान्येन दृश्यते। तदिदं ग्रहीष्यामि गृह्णामि गृहीतमिति तत एवमुक्तम्। वर्णपदग्रहणं च तत्रैव श्रूयमाणताभिमानात्। वर्णे एव हि तावत् श्रूयमाणताबुद्धिरतिस्फुटा पद तु अल्पवर्णे स्यादप्येषा। वाक्ये तु संकलनास्मरणानुव्यवसायादिरूपबुद्धिनिर्ग्राह्ये श्रूयमाणता न स्फुटा – इत्येवमुक्तम्। तथा च वैयाकरणैरपि वाक्यस्फोटस्य प्रायशो बुद्धिनिर्ग्राह्यतैव दर्शिता। यदाह तत्रभवान्

'नादेनाहितबीजानामन्त्येन ध्वनिना सह।
आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते॥'

इति। एषा तावत् प्रथमा वाक्।... (Mark the reading नादेन for नादैः and बीजानां for बीजायां)।

सर्वदर्शनसंग्रह (XIII 189-196) quotes:—

'नादैराहितबीजायां...बुद्धौ शब्दोऽवधार्यते॥' इति प्रामाणिकोक्तेः। तस्मात् अस्माच्छब्दादर्थं प्रतिपद्यामहे इति व्यवहारवशात्. वर्णानामर्थवाचकत्वानुपपत्तेः प्रथमे काण्डे तत्रभवद्भिः भर्तृहरिभिः अभिहितत्वात् निरवयवं अर्थप्रत्यायकं शब्दतत्त्वं स्फोटाख्यं अभ्युपगन्तव्यमिति। एतत्सर्वं परमार्थसंविल्लक्षणसत्ता जातिरेव सर्वेषां शब्दानामर्थ इति प्रतिपादनपरे जातिसमुद्देशे (वाप ३·१) प्रतिपादितम्॥

१·९३ 'अनेकव्यक्त्यभिव्यङ्ग्या...' is कारिका 70 of भट्टोजि; see वैभूसा 435. भ quotes it twice in शकौ (p. 9): जातेः स्फोटत्वमपि प्रघट्टकान्तरे स एवाह—'अनेक०...' इति। and (p. 36): तदेतदुच्यते अखण्डं पदं वाक्यं वा वाचकमिति। किं बहुना मास्त्वेव व्यङ्ग्यो वर्णः व्यञ्जकत्वाभिमतैः ध्वनिभिरेव सर्वनिर्वाहात्। उक्तं च हरिणा—'अनेक० ...'; लम (486) thus refers:—'यथा भ्रमणत्वादिजातिः चरमक्रियाप्रत्यक्षव्यङ्ग्या एवमेषाऽपि चरमवर्णप्रत्यक्षव्यङ्ग्या। समुदाये बौद्धे भ्रमणत्ववत् एषाऽपि तादृशे वर्णसमुदाये व्यासज्यवृत्तिः। तदुक्तं—'अनेक० ...'। यद्वा शक्यतावच्छेदके शक्तेरिव शक्ततावच्छेदकेऽपि तस्याः सत्त्वमिति तस्याः स्फोटत्वव्यवहारः॥

१·१०७ 'वायोरणूनां ज्ञानस्य ...'. कै on भा on पा 1·4·29: ज्ञानस्य शब्दरूपापत्तिरिति दर्शनमत्र भाष्यकारस्य। तथा चोक्तं—'वायोः ...' इति। लम 184 reads अत्र for हि in (c). वैखरी तु 'वायोः' इति हर्युक्तेः पातञ्जलभाष्ये (योगसूत्रे) व्यासेनापि तथोक्तेश्च। 'आख्यातोपयोगे' (पा 1·4·29) इति सूत्रे पतञ्जल्युक्तेश्च वाय्वादिपरिणामरूपा कण्ठताल्वादिअभिघातजन्यैव इति बोध्यम्। वायोः प्राणादिरूपस्य। अणूनां शब्दतन्मात्रादि-

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

रूपपरमाणूनाम् । ... ज्ञानस्य वक्तृज्ञानस्य । पराशक्तिसाहित्येन च तत्परिणाम इति बोध्यम् । कैश्चिदित्यनेन पराशक्तिरेव मध्यमावत् परिणामविशेषो अन्येषां मते वैखरी इति सूचितम् । तदाह—प्रवादेषु शास्त्रेषु । अत्र विषये । दर्शनभेदः सिद्धान्तभेदोऽनवास्थित इति ।

१·१०८,११०–११५ 'लब्धक्रियः ...' & 'अणवः ...' & so on till the end of 115, quoted by उ on भा on पा 1·4·29 thus :— तदुक्तं हारिणा— 'लब्धक्रियः...' वक्तुरिच्छा इत्यनेन एकस्यैव वायोरनेकशब्दत्वोपपत्तिरुक्ता । १·११० लम 187 छायातपतमांसि अपि एवम् 'अणवः' इति तदुक्तेः । १·११२ उ reads in his comm. on भा on पा 1·4·29 सूक्ष्मवागात्मना for सूक्ष्मो वागात्मनि of the text, & स्वस्वरूपस्य for स्वस्य रूपस्य of the text. ज्ञाता वृत्तिविशिष्टमन्तःकरणम् । १·११३ उ तेजसा जाठरेण । पाकं दाहम् । असौ सवृत्तिमनोयुतः प्राणः । १·११४ उ reads तेजसा सोऽपि पच्यते for तेजसैव विवर्तते of the text. तद्धर्मेण दाहेन । १·११५ 'विभज्य...' उ दाहवशादेव 'विभज्य ...' श्रुतिरूपैः ध्वनिरूपैः । सह इति शेषः प्राणः सवृत्तिकमनोरूपान्तःकरणयुतः । उ concludes the current topic thus :— एतावतैव ज्ञानस्य शब्दत्वमिति द्रष्टव्यम् ।

१·११२ 'अथायमान्तरो जातः सूक्ष्मो वागात्मनि स्थितः ।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ॥'

रामकण्ठ quotes this कारिका in his विवृति on स्पन्दकारिका (4·18) (with readings ज्ञाता for जातः & सूक्ष्मे for सूक्ष्मो) thus :—'शब्दाद्वयवादे सामान्येन शब्दार्थोभयरूपोऽपर्यन्तावान्तरभेदो योऽयमीश्वरस्य शक्तिप्रसरः तं विवर्तवाचोयुक्त्या व्यवहरति स्म । यदाह—'अथायमान्तरो ... विवर्तते ॥'

१·१२०-१२५ 'शब्दस्य परिणामोऽयम्' and so on. Referred to by अभिनवगुप्त in his अभिनवभारती on भरत's नाट्यशास्त्र (14·3) thus :— 'वागेव विश्वा भुवनानि' इति श्रुतेः । शब्दविवर्तादिरूपत्वं च प्रसाधितं तत्रभवद्भिः भर्तृहरिप्रभृतिभिः इति तदिह अनुसरणीयम् ॥

१·१२३ कमलशील on तत्त्वसंग्रह (128) and (135) quotes this oft-quoted कारिका :—

(१) 'नाशोत्पाद०...प्रतीयते'... ये यदाकारानुस्यूताः ते तन्मयाः... शब्दाकारानुस्यूताश्च सर्वभावाः इति स्वभावहेतुः । यतः प्रत्यक्षत एव सर्वार्थानां शब्दाकारानुगमः सिद्धः । तथाहि–शब्द एव प्रत्ययोऽर्थेषूपजायमानः शब्दोल्लेखानुगत एवोपजायते । यथोक्तं–'न सोऽस्ति...शब्देन वर्तते' ॥ इति ॥ ज्ञानाकारानिबन्धना च वस्तूनां स्वभावप्रज्ञप्तिः । अतः सिद्धमेषां शब्दाकारानुस्यूतत्वं तत्सिद्धौ च तन्मयत्वमपि सिद्धमेव तन्मात्रभावित्वात् तन्मयत्वस्येति ॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

(2) 'विरुद्धधर्मसङ्गो हि वहूनां भेदलक्षणम् ।
नान्यथा व्यक्तिभेदानां कल्पितोऽपि भवेदसौ ॥'

कमलशील comments at the end :

'... अथ किञ्चिदविकल्पमपि ज्ञानमभ्युपगम्यते । न तर्हि वक्तव्यं – 'न सोऽस्ति प्रत्ययो लोके यः शव्दानुगमादृते' इति । शव्दाकारानुस्यूतत्वादिति च हेतु र्न सिध्येत् । ततश्च प्रमाणाभावात् शव्दात्मकत्वव्यवस्थानं भावानामनिवन्धनमेव स्यात् । किं च क्षणिकत्वं भावानां प्रमाणान्तरतः सिद्धेरनुभूतमपि न निश्चीयत इति व्यपदिश्यते । शव्दात्मता तु भावानां कुतः सिद्धा येन साऽप्येवं व्यवस्थाप्यते ॥'

(3) Further कमलशील on तत्त्वसंग्रह (147–148) 'न तत् प्रत्यक्षतः सिद्धमविभागमभासनात् ... ॥' (147) says:—

"स्यादेतत् । स्वसंवेदनप्रत्यक्षत एव तत् सिद्धं ज्ञानात्म रूपत्वात् । तथाहि ज्योतिस्तदेव शव्दात्मकत्वात् चैतन्यरूपत्वात् चेति । तदेतत् स्वसंवेदनविरुद्धम् । तथाहि अन्यत्रगतमानसोऽपि चक्षुषा रूपमीक्षमाणः ... नीलादिप्रत्ययमनुभवतीति । एतच्च विस्तरेण प्रतिपादयिष्यते । एतेन यदुक्तं—'न सोऽस्ति प्रत्ययो लोके' (वाप 1·123) इत्यादि तदपि प्रत्युक्तं भवति । तस्मादविभागं शव्दमयं व्रह्म न प्रत्यक्षतः सिद्धम् । तस्य तथाभूतस्याप्रतिभासनात् । नाप्यनुमानतः । ...

'न सोऽस्ति प्रत्ययो लोके यः शव्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शव्देन भासते ॥'

quoted by रामकण्ठ in his विवृति on स्प० का० (4·17) which reads (cd) thus :—

यतः शव्दानुवेधेन न विना प्रत्ययोद्भवः' (which itself is an echo of भर्तृहरि above). अन्यत्राप्युक्तः—'न सोऽस्ति...'; he reads शव्दानुगमं विना for शव्दानुगमादृते.

अभिनवगुप्त on भरतनाट्यशास्त्र (20·26 'या वाक् प्रधाना...सा भारती ...') says : न ह्येकोऽपि कश्चिच्चेष्टांशोऽस्ति । कायचेष्टा अपि हि मानसीभिः सूक्ष्माभिश्च वाचिकीभिश्चेष्टाभिर्व्याप्यन्ते एव । 'न सोऽस्ति प्रत्ययो लोके यः शव्दानुगमादृते' इति न्यायात् ।

अभिनवगुप्त in his ईप्रविवि (Vol. II p. 239) quotes this oft-quoted कारिका thus :—

"ननु उक्तमत्र परैः

'शव्देनाव्यापृताक्षस्य बुद्धावप्रतिभासनात् ।
अर्थस्य दृष्टाविव तदनिर्देश्यस्य वेदकम् ॥' इति ॥

एतत् परिहरति अर्थसहकारिसहित इति । संस्कृतात् मनस्कारात् अर्थं सहकारित्वेन अपेक्षमाणात् या अभिलापयोजना वोधे या च तमनपेक्षमाणात् सा कथमेकरूपा भवेत् । ... असौ इति पूर्वोक्ता 'न सोऽस्ति

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

प्रत्ययः ॥' (वाप 1·123) इत्यादिना च दर्शनान्तरेषु अपि (= व्याकरण-शास्त्रे) शतशः समर्थिता।

'न सोऽस्ति प्रत्ययो लोके ...' quoted by भ्र in शकौ (p. 4) under स्फोटस्वरूपव्युत्पादन thus: चाक्षुषबोधेऽपि व्यक्त्या स्मारितः शब्दो विशेषणमित्यभ्युपगमः। आह च—'न सोऽस्ति प्रत्ययः ...'. उ on भा on पा 1·1·68 स्वं रूपं ... observes:— मन्त्रादिसहचरितो योऽर्थस्तस्य गतिर्भविष्यति साहचर्यात्। (कै साहचर्यं च शब्दानुविद्धस्यै-वार्थस्यानुगमात्) उ शब्दानुविद्धस्यैवेति। 'न सोऽस्ति ...' इति हर्युक्तेरिति भावः।

लम 353 'अनुविद्धं...' cd उत्तरार्धेन अनुव्यवसाये प्रमाणं दर्शितम्। ; 449 शब्दं विनाऽपि गुडादिशब्दैर्माधुर्यादिरूपार्थस्य अक्षिनिकोचादिना चार्थस्य बोधस्य दर्शनात् ... अर्थस्यापि तत्पदविशिष्टस्य अध्याहारः। एतेन अर्थाध्याहारे 'चैत्र ओदनं' इत्यत्र तृतीयापत्तिः। प्रत्ययेन कर्तुरनभिधानात्। 'शब्दानुविद्धं सर्वं ज्ञानं' इति नियमभङ्गश्चेति परास्तम् ॥

'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।' Quoted by शिवदृष्टि (2·9 ab) followed by 'शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति' as (2·9cd). उत्पलदेवः – 'तथा न स घटपटादिप्रत्ययो लोकव्यवहारे अस्ति यो वाचकशब्दानुगमवर्जितः। 'वाग्रूपतां' विना न ब्रह्मतत्त्वप्रकाशोऽपि प्रकाशेत। 'सा हि प्रत्यवमर्शिनी' (वाप 1·124) ॥ शिवदृष्टि (2·11):— 'अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा।' is quoted by स्वोपज्ञ on वाप (1·143) by the remark 'इत्यादिवाक्यरचनैस्तैरेवं प्रति-पादितम्'. उत्पलदेवः — 'तथा तच्च पश्यन्तीरूपं ग्राह्यग्राहकविभाग-क्रमरहितं 'अविभागा तु पश्यन्ती' देशकालक्रमसंहारवती चेति। आदि-ग्रहणात् प्राक्प्रदर्शितमध्यमावैखर्यादिवाक्यैरुक्तामिति ॥

गोकुलनाथ in his पदवाक्यरत्नाकर (yet in MS form) under verse 23 quotes वाप (1·123) along with वाप (1 55) thus :- 'प्रतिपाद्यत्वमेव वा शक्यत्वं लक्ष्यसाधारणमविशेषेण जनकजन्यज्ञान-योर्विशेषः। यदाहुरभियुक्ताः—'न सोऽस्ति प्रत्ययो लोके ... सर्वं शब्देन दृश्यते ॥' इत्यादि (दृश्यते for भासते of our text). तस्मात्

स्मरणं पदेन जनितं पदवृत्तिमतः पदार्थस्य।
अन्वयबुद्धावर्थः कथं न तादृक् परिस्फुरतीति ॥ व्याकुर्वते।

१·१२३–१२४ "न सोऽस्ति प्रत्ययो लोके ..."
"वाग्रूपता चेत् ... प्रत्यवमर्शिनी ॥"

Quoted by शिवसूत्रवृत्ति on शिवसूत्र (1·4) 'ज्ञानाधिष्ठानं मातृका।' thus: अकारादि क्षकारान्तं मातृकारूपम्। 'न सोऽस्ति ... प्रत्यवमर्शिनी ॥' मातृकाधिष्ठानादेव हि अन्तरभेदानुसन्धिवन्ध्यत्वात्

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

क्षणमपि अलब्धविश्रान्तीनि बहिर्मुखान्येव ज्ञानानि । See also शिवसूत्र (3·19) "कवर्गादिषु माहेश्वर्याद्याः पशुमातरः" ... "ज्ञानाधिष्ठानं मातृका" (शिसू 1·4) इति सामान्येनोक्तम् । इदं तु प्राप्ततत्त्वोऽपि प्रमाद्यन् माहेश्यादिभिः पशुजनाधिष्ठातृभूताभिरपि शब्दानुवेधनद्वारेण मोह्यते इत्याशयेन, इति विशेषः ॥

१·१२३, १२४, १२६ ab, १२७ cd अभिनवगुप्त in his विमर्शिनी on ईश्वरप्रत्यभिज्ञा of उत्पलदेवः (1-5-14).

'सा स्फुरत्ता महासत्ता देशकालाविशेषिणी ।
सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः ॥'

says: सत्ता च भवनकर्तृता । सर्वक्रियासु स्वातन्त्र्यम् । सा च खपुष्पादिकमपि व्याप्नोति इति महती । देशकालौ...सैव सृजति इति ताभ्यां विशेषणीया न भवति । एवं देशकालास्पर्शात् विभुत्वं नित्यत्वं च । ... सर्वस्य हि मन्त्र एव हृदयम् । मन्त्रश्च विमर्शनात्मा । विमर्शनं च परावाक्शक्तिमयम् । तत एवोक्तं :—

'न तैर्विना भवेच्छब्दो नार्थो नापि चितेर्गतिः ॥' इत्यागमेषु । तत्रभवद्भर्तृहरिणाऽपि

'न सोऽस्ति...' 'वाग्रूपता चेत्...' इति ।
'सैषा संसारिणां ...' 'यदुत्क्रान्तौ ...' इत्यादि च ।

.... बौद्धैरपि अध्यवसायापेक्षं प्रकाशस्य प्रामाण्यं वदद्भिः उपगतप्राय एवायमर्थः अभिलापात्मकत्वात् अध्यवसायस्येति ।

१·१२४ 'वाग्रूपता...' Quoted by रामकण्ठ in his विवृति on स्प. का. (4–18) thus:—'तथा शब्दाद्वयवादिभिरपि विवृत्तिवाचोयुक्त्या (cf विवर्तते – वाप 1·1) प्रतिपादयद्भिः स्वमार्गस्थत्वमेवास्याः प्रदर्शितम् (cf 'स्वमार्गस्था, in स्प. का. 4-18)। यदाहुः—'वाग्रूपता चेत् ...' इति । सैषाऽत्यन्ताभेददशा यस्यां स्फुटमेव अस्याः स्वमार्गस्थत्वम् ॥

'वाग्रूपता चेदुत्क्रामेत् अवबोधस्य शाश्वती ।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥'

Quoted by अभिनवगुप्त in ईप्रविवि (Vol. II pp. 81–183) thus–

'ये तु शरीरादितित्यक्षवस्ते तदितरस्वर्गादिगतशरीरवाञ्छया वा तच्छरीराविनाभावि निष्प्रतीकारदुःखजिहासया अहमितिचमत्काराध्यासं तत्र शरीरे शिथिलयन्ति शरीरान्तरे च तं चमत्कारग्रहं अभिसंचारयन्ति । पारमार्थिकीमेव तु चमत्कारानन्ददशां वीतविघ्नमेव अवलिलम्बिषन्ते मुमूर्षुदशापन्नाः । एतदुपसंहरति तदेवमिति । एतत् संवादयति तथाचेति भर्तृहरिरित्यवोचत् इति सम्बन्धः । केन वाक्येन । आह—

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

'वाग्रूपता ... ' इत्यादिना ' ... ... प्रत्यवमर्शिनी ' इत्यन्तेन। किमवोचत्। आह— प्रकाशस्य जडवैलक्षण्यं संरम्भः कर्तृतारूपो यः स एव आत्मविश्रान्तिलक्षणो निरपेक्षत्वेन विमर्शोऽहमिति कथ्यते। ननु केन शब्देन असौ संरम्भः कारिकायामुक्तः। आह— प्रकाशेत इति। लिङ् अत्र संभावनाधिक्यमात्रमाह। आख्यातरूपता तु कर्तृव्यापारप्राधान्यविश्रान्तिसतत्त्वेति आशयः।... तदयं तिङन्तार्थ एव स्वातन्त्र्यात्मा विमर्शः प्रकाशस्य अहेयं वपुर्बोधस्य या वाग्रूपता शब्दनशब्दयितृरूपता शाश्वती संकेतादिवत्। ... ... अत एव निरपेक्षा अहमितिचमत्कारस्वभावता यदि उत्क्रामेत् भावप्रकाशमुल्लंघ्य क्रामेत् इदंभावग्राह्यं भावनं स्वीकुर्यात् तदा प्रकाशमानोऽयमर्थो निर्विकल्पके वा ... द्योत्यते।

... वक्तीति वचनं चेति वाक् प्रकाश इति अर्थमुखेन उपक्रमो मन्तव्यः। ...इति हि व्यवहारः। एतदर्थमेव अवबोधस्य इत्युपक्रम्य नासौ प्रकाशेत इत्युक्तम्। ' अवबोधस्य ' इति च षष्ठ्या अयमेवाशयः। अन्यथा चैतत्। प्रकाशः प्रकाशते इति बोधस्य यदि अपरः प्रकारो न भवेत्। भवति च॥

१·१२६ ab, १२७ अभिनवगुप्त (ईप्राविवि vol I p 100) refers to these:—

"ननु आन्तरी वृत्तिर्जीवनरूपा सा कथं परसंवेद्या इत्याशङ्क्याह ' बहिरपि ' इति। अन्तस्तावत् जीवनं दर्शितं बहिरपि तु यत् विशेषवृत्तिरूपं वचनादानादि तदपि विशेषस्य सामान्याविनाभावात् वा सामान्यपरिणामात् वा जीवनरूपं न केवलं स्वसंवेद्यं यावत् परैरपि संवेद्यते। अत्रार्थे तत्रभवद्भर्तृहरिपठितमागमं लिखति ' तदुत्क्रान्तौ ' इति।

' अर्थक्रियासु वाक् सर्वान् समीहयति देहिनः। ...
' सैषा संसारिणां संज्ञा बहिरन्तश्च वर्तते।
' तदुत्क्रान्तौ ' विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत्॥

तस्या उत्क्रमणे काष्ठकुड्यतुल्योऽयं नष्टसंज्ञ इति प्रत्यक्षेणैव दृश्यते। तच्च नष्टमिति भाति यत् सदिति प्रत्यक्षेणैव भाति। तेन वागादिद्वारे तत तादात्म्यापन्नं आन्तरमपि जीवनं प्रत्यक्षत्वेनैव अभिमन्यते नतु ... केवलानुमानगोचर तयैवेति। एतदुक्तं भवति—परशरीरेऽपि यावत् गौरत्वश्यामत्वक्षुत्तृष्णासुखदुःखादि वेद्यभूतं तावदन्यजडवत् जीवति प्रतिबिम्बितं भाति। जीवनं तु ज्ञानक्रियारूपं स्वात्मतादात्म्येनैव। ... लोकोऽत्र ... अनुमाने एव सातिशयं निबद्धादरो भवति॥

अभिनवगुप्त on भरतनाट्यशास्त्र (20-26) says:—मानस्यपि वाचिक्यपि चेष्टा अवश्यं सूक्ष्मं कायपरिस्पन्दमन्दप्राणव्यापाररूपं नातिवर्तते। तदुक्तं:— ' अर्थक्रियासु वाक् सर्वान् समीहयति देहिनः... '। न च रसोपयोगिलालित्यभागशून्यः कोऽपि नाट्ये परिस्पन्दः इत्यन्योन्यं संवलिता वृत्तयः केवलं क्वचित् किञ्चिदधिकमिति प्राधान्येन व्यपदेशः परिवर्तते॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

१·१२८ 'प्रविभागे यथा कर्ता...कार्यत्वेनावतिष्ठते ॥' स्वोपज्ञ of भर्तृहरि reads under this कारिका :

'प्रविभज्यात्मनात्मानं सृष्ट्वा भावान् पृथग्विधान् ।
सर्वेश्वरः सर्वमयः स्वप्ने भोक्ता प्रवर्तते ॥'

रामकृष्ण in his विवृति on स्प. का. (4-4). quotes प्रविभज्य etc. as from भर्तृहरि : "...न तस्य स्वप्नपदार्थाः स्वातन्त्र्येण प्रवर्तमानाः सर्वकर्तृत्वलक्षणस्वशक्तिप्रतिबन्धं उद्भावयन्ति असंसारित्वात् किन्तु स्वतन्त्रः स्वशक्त्या यथेष्टं तान् सृजति। यथाह भर्तृहरिः 'प्रविभज्य ...सर्वशक्तिः (for सर्वमयः of स्वोपज्ञ reading) ... इति । ...

अपि प्रयोक्तुरात्मानं ... सायुज्यमिष्यते. उ reads इष्यते for अश्नुते of the text. तदुक्तं हरिणा—'अपि ...' on भा 'महान् देवः शब्दः । महता देवेन नः साम्यं यथा स्यात्' इति in the पस्पशा; he further quotes part of स्वोपज्ञटीका on this कारिका:—इह द्वौ शब्दात्मानौ कार्यो नित्यश्च । तत्रान्त्यः सर्वेश्वरः ... शब्दवृषभः । तस्मिन् पुरुषः अत्यन्तं संसृज्यते ।"

१·१४२ ab Referred to by वैभू 70.

१·१४३ 'वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम् ॥'

After this कारिका we get a good many कारिकाs which are regarded as coming from भर्तृहरि, one of them being अविभागात्तु पश्यन्ती सर्वतः संहृतक्रमा & so on; the following prose passage is from his स्वोपज्ञटीका; thus अभिनवगुप्त in his ईप्रविवि (Vol. II p. 189) says : ...स पदवाक्यात्मा अभिजल्पः सूत्रस्थानीयेन वपुषा सूक्ष्म इति यावत् । यथाह तत्रभवान्

'प्रतिसंहृतक्रमा तु सत्यपि भेदे समाविष्टक्रमशक्तिः पश्यन्ती' इत्यादि; again in Vol. II p. 226 more extensviely : 'उत्तरोत्तर-प्रसरापेक्षया पूर्वपूर्वनिष्ठं सौक्ष्म्यं यतः । तदाह तत्रभवान् भर्तृहरि :—

"प्रतिसंहृतक्रमान्तः सत्यप्यभेदे समाविष्टक्रमशक्तिः पश्यन्ती । सा अचला च चला प्रतिलब्धासमाधाना च संविन्निष्ठज्ञेयाकारा प्रतिलीनाकारा निराकारा च परिच्छिन्नार्थप्रत्यवभासा संसृष्टार्थप्रत्यवभासा च सर्वार्थप्रत्यवभासा प्रशान्तप्रत्यवभासा च" इति । अनेन हि अपरिमाण-भेदत्वेन अहंतेदंतयोर्विचित्रतोक्ता । .... This passage deserves to be critically edited & restored to its original correctness, as, in effect, the whole स्वोपज्ञ of भर्तृहरि as far as it is available in Mss.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

" वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम् ॥ "

रामकण्ठ in his विवृति on स्प० का० (4·18) quotes :

' अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा ।
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी ॥ '

(vl. अविभागात्तु for अविभागा तु & अनुयायिनी for अनपायिनी) as from भर्तृहरि (but which is a quotation in his स्वोपज्ञ on वाप 1-143) thus :—' यदा पुनरिदमिति नानारूपं विभक्तत्वेन क्रमिकत्वेन च अन्तः परिस्फुरितं अखिलं जगत् अविमर्शात् उपसंहृत्य विभागक्रमशून्यस्वमहिम्नि स्वभावव्योम्नि निमिषन्ती स्वरूपप्रकाशमात्र-परिशेषैव भवति तदा आन्तरस्य परस्य ज्ञातुः पश्यन्त्यभिधानवाग्रूपा विवृत्तिः (cf विवर्तते वाप १·१) इत्युक्ता । यदाहुः—' अविभागा तु ....' । अत्रापि " स्वमार्गस्थैवैषा " (cf स्प० का० 4·18) ।

जयरथ (1170 A. D.) in his विवेक on तन्त्रालोक (11·63–65) of अभिनवगुप्त says : इह खलु ' अविभागा तु पश्यन्ती ' इत्यादिनीत्या क्रमस्य अनुन्मीलनात् परस्परं अनासादितविभागवर्णौघाः भगवता ... तावतोऽर्थान् अभेदेन आमृशन्तः ... सृष्टाः समुल्लासिताः इत्यर्थः ।

रामकण्ठ further quotes

' केवलं बुद्ध्युपादाना क्रमरूपातिपातिनी ।
प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ॥ '

as from भर्तृहरि (but which is a quotation in his स्वोपज्ञ on वाप 1·143) thus :—' यदा प्राणप्रयत्नव्यतिरेकेण प्रतिप्राणि शरीरान्तर-स्वोदितानादिनिधनध्वनिविशेषात्मकतया कालादिक्रमं वर्णादिविभागं भाविनमनुगच्छन्ती प्रसरं गृह्णाति तदा मध्यमाख्यवाग्रूपा विवृत्तिः इत्यभिहिता । तदापि संविन्मात्रप्रकृतिकत्वमनतिक्रान्ता स्वमार्गस्थैवैषा । यदुक्तं—' केवलं ....' ।

He further quotes

' स्थानेष्वभिहिते वायौ कृतवर्णपरिग्रहा ।
वैखरी वाक् प्रयोक्तृणां प्राणवृत्तिनिबन्धना ॥ '

as from भर्तृहरि (but which is a quotation in his स्वोपज्ञ on वाप 1·143) thus: —' यदा तु प्रयोक्तृपुरुषेच्छानुविधायिप्रयत्नप्रेरिते प्राणाभिधाने मरुति शरीरोद्देशेषु उरःप्रभृतिषु जाताभिघाते सैव सामान्य-ध्वनिरूपा स्वरव्यञ्जनादिभेदविभक्ताकारादिवर्णरूपतां प्रयोक्तृभेदेऽपि अव्यभिचरन्ती प्रसरति तदा वर्णभेदादिव्यञ्जकप्राणमात्राश्रया वैखर्यभिधान-वाग्रूपा विवृत्तिरित्युक्तम् । यदुक्तं — ' स्थानेषु .... ०निबन्धना ॥ ' इति ।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

तदापि असौ देशकालाधारप्रयोक्त्रादिवैचित्र्यैः अविकार्यनियतवर्णसमुदायात्मिकतां पुरुषेच्छादिसापेक्षाभिव्यक्तिकां अजहती नित्यैव संविद्रूपत्वमपि अनुगतमेव मध्यमावदस्यामपि — इति स्वमार्गस्थत्वमपि अस्या न व्याहन्यते। एवमसौ वैखरीरूपतामापन्नाऽपि मातृकावर्गवर्णपदवाक्यार्थभेदेन अपर्यन्तं प्रसरं गृह्णाति। यथा च वर्णवैखरीरूपा इयं एवं अनन्तप्रसरा तथा स्वरवैखरीरूपाऽपि स्वरग्राममूर्च्छनातानजातरागादिभेदेनापि अनन्तप्रसरा।

And lastly रामकण्ठ quotes as from भर्तृहरि in a similar manner :

‘ सेयमाकीर्यमाणाऽपि नित्यमागन्तुकैर्मलैः।
अन्त्या कलेव सोमस्य नात्यन्तमभिभूयते ॥ ’

‘ तदेवं इयं पारमेश्वरी परा शक्तिः स्वभावप्रत्यवमर्शा क्रियादिना सांकेतिकशब्दपर्यन्तेन निरवधिना स्वमहिम्ना प्रसृताऽपि सर्वस्यैव पदार्थजातस्य सामान्यसंवित्प्रकाशव्यतिरेकेण अनुपपन्नस्वात्मलाभस्य प्रत्यवमर्शिनी सती सर्वदा स्वमार्गस्थत्वं न व्यभिचरति। ततश्च जगत्क्रीडार्थं ईश्वरोद्भावितमायाशक्तिजनितैः नानाविकल्परूपैरावरणैः सस्वच्छमानाऽपि अनुग्रहशक्तिस्पर्शोन्मेषितसत्यतद्रूपग्रहणकुशलविमलविज्ञानदृशः प्रमातॄन् प्रति तैः स्थगयितुं अत्यन्तं तिरोधातुमशक्यैव। यदुक्तं—‘सेयमाकीर्यप्राणाऽपि... नात्यन्तमभिभूयते ॥ इति ॥ तदित्थं परममेव कारणं यथाविभक्तशब्दरूपतयाऽपि प्रसृतमिति स्थितम् ॥

‘ वैखर्या मध्यमायाश्च... ’ उ.हरिरप्याह—‘ वैखर्याः... ’ on भा ‘ तुरीयं वा एतत् वाचो यन्मनुष्येषु वर्तते चतुर्थमित्यर्थः ’ of पस्पशा.
लम 178 observes :—

सैव (मध्यमा वाक्) च आस्यपर्यन्तं गच्छता तेन वायुना कण्ठदेशं गत्वा मूर्धानमाहत्य परावृत्य तत्तत्स्थानेषु अभिव्यक्ता परश्रोत्रेणापि ग्रहणयोग्या विराडधिदेवत्या वैखरी वागित्युच्यते। प्रणव एव व्यानोदानाभ्यां सह वैखरीरूपं प्रतिपद्यते। अतएव हरिणा व्याकरणस्य त्रिविधा वाग् विषय इत्युक्तम् — ‘ वैखर्याः ... ’ इति। एतत् व्याकरणम्। अनेकतीर्थेति श्लिष्टव्यक्तवर्णरूपा प्राप्तसाधुभावाऽपभ्रष्टा दुन्दुभिवेणुवीणादिशब्दरूपा चेत्यर्थ ॥

शिवदृष्टि (2·7–8) refers to वैखरी thus :—

“ संप्राप्ता वक्त्रकुहरं कण्ठादिस्थानभागशः।
वैखरी कथ्यते सैव बहिर्वासनया क्रमात् ॥
घटादिरूपैर्व्याप्तृत्ता गृह्यते चक्षुरादिना। ”

उत्पलदेवः—‘ अत्रापि बिन्दुनादमरुत्क्रमात् (शिद 2·6) सा पश्यन्ती संप्राप्ता वक्त्रकुहरं इति योज्यम्। तदुक्तं—

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

'प्राणो वर्णानभिव्यज्य वर्णेष्वेव प्रलीयते ॥' (वाप 1·115 cd) इति। ततो वक्त्रोदरं प्राप्ता कण्ठादिस्थानभागेषु विभक्तककारादिवर्णरूपा वैखरी वर्ण्यते—

'स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा।
वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धना ॥' इति ॥

परतोऽपि बाह्यार्थवासनया अविद्यारूपया क्रमेण घटपटाद्याकारैर्विवृत्ता सैव वाक् चक्षुरादीनां ग्राह्यभावमापद्यते ॥ The कारिका, along with a few others, is quoted in स्वोपज्ञ on this (वाप 1·143).

१·१४८, १४९. Quoted in वैभू 199.

१·१५०–१५३ Quoted in वैभू 196 & वैभूसा 296–297. वैभूसा reads ते यतः स्मृतिमात्रेण for न यतः स्मृतिशास्त्रेण of the text; वैभूसा reads शिक्ष्यमाणः प्रभाषते for शिक्षमाणोऽपभाषते & निर्णयः for निश्चयः of the text.

१·१५२–३ कमलशील in his पञ्जिका on शान्तरक्षित's तत्त्वसंग्रह (2668) quotes these two कारिकाs of भर्तृहरि, to support the argument of कुमारिल in his श्लोकवार्त्तिक (276 शब्दनित्यत्ववाद) which runs thus :

'गोशब्देऽवस्थितेऽस्माकं तदशक्तिजकारितात्।
गाव्यादेरपि गोबुद्धिर्मूलशब्दानुसारिणी ॥'

Mark the readings in the quoted verses :—

'गवाश्वेति यथा बालः शिक्ष्यमाणः प्रभाषते।
अव्यक्तं तद्विदां तेन व्यक्तेर्भवति निश्चयः ॥
एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते।
तेन साधुव्यवहितः कश्चिदर्थोऽनुमीयते ॥'

१·१५४, १५५ Quoted in वैभू 197 & वैभूसा 300; the latter reads येषु for येन in 1·154.

२·१-२ "आख्यातं शब्दसंघातो जातिः संघातवर्तिनी।
एकोऽनवयवः शब्दः क्रम बुद्ध्यनुसंहतिः ॥
"पदमाद्यं पृथक्सर्वं पदं सापेक्षमित्यपि।
वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायदर्शिनाम् ॥

(with आख्यातशब्दः for आख्यातं शब्दसंघातो; ०संहतिः for ०संहतिः; साकाङ्क्षं for सापेक्षं; ० वादिनां for ०दर्शिनां). Thus quoted with these many variants by पार्थसारथिमिश्र in his

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

न्यायरत्न on कुमारिल's श्लोकवार्त्तिक (वाक्याधिकरण–श्लोकs 49-51): 'येऽपि वैयाकरणैरुक्ता वाक्यविकल्पाः—'आख्यातं'; 'पदमाद्यं' तान् निराकरोति एवमिति। ...

२·४ 'साकाङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम्।
कर्मप्रधानं गुणवद् एकार्थं वाक्यमुच्यते॥'

Wrongly quoted as from कुमारिलभट्ट by क्षीरस्वामी on अमर० 'तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता' ... कारकैरन्विता सम्बद्धार्था वा क्रिया वाक्यम् —'देवदत्त गामभ्याज शुक्लां दण्डेन'। सर्वत्र आकाङ्क्षायोग्यतावशात् अन्वितत्वं लक्षणम्। यज्जैमिनिः (जैसू 2-1-46) 'अर्थैकत्वात् एकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्'। भट्टोऽपि (correctly हरिरपि): 'साकाङ्क्षावयवं भेदे...वाक्यमुच्यते॥' एकं शब्दात्मनोऽन्यदर्थात्मकस्य वाक्यस्य लक्ष्मेत्येके।

'साकाङ्क्षावयवं भेदे...' Quoted by भ in शकौ (p. 96) thus: न हि राजपुरुषमानयेत्यादौ अर्थतः प्रधानभूतोऽपि राजा आनयनेन अन्वेति अपि तु पुरुष एव। प्रकृते च शाब्दं प्राधान्यं वाक्यार्थभूतायाः पदोपस्थितेरेव कारकविशिष्टा क्रिया वाक्यार्थ इति सिद्धान्तात्। आह च 'साकाङ्क्षावयवं भेदे...". भ reads उच्यते for इष्यते. उ quotes this कारिका on पा 2·1·1:—

"एतदेव ऐकाद्देशेकविधेयकत्वगर्भं एकवाक्यलक्षणं बोध्यम्। तदुक्तं हरिणा—'साकाङ्क्षावयवं....वाक्यमिष्यते'; वाक्यमित्यस्य एकं वाक्यमित्यर्थः।" उ reads क्रियाप्रधानं for कर्मप्रधानं & उच्यते for इष्यते. In another place, लम 310 he repeats: वाक्यमित्यस्य एकं वाक्यमित्यर्थः। 'अर्थैक्यादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्' इति जैमिनिसूत्रात् (2·1·46) गुणवत् इत्यस्य साक्षात् परम्परया वा यद्विशेषणं तद्वदित्यर्थः।

२·५ 'सम्बोधनपदं यच्च...' वैभू 64 वैभूसा 94 & लम 1188 all read क्रियायां विशेषणम् for क्रियाया विशेषकम्. नागेश observes: तच्च सिद्धस्याभिमुखीभावेत्यादिवक्ष्यमाणहरिग्रन्थविरुद्धम्— 'संबोधनपदं यच्च...' & then quotes, in substance, comm. of पुञ्जराज— "अत्र पुञ्जराजः ..."

२·१२ "शब्दस्य न विभागोऽस्ति ... प्रतिपद्यते" पतञ्जलि on पा 3·1·109 remarks: "आङ्पूर्वस्य एष (आज्यम्) प्रयोगो भविष्यति। यद्येवमवग्रहः प्राप्नोति। न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्यम्। यथालक्षणं पदं कर्तव्यम्।" कै न लक्षणेनेति संहिताया एव नित्यत्वम्। पदविच्छेदस्य तु पौरुषेयत्वम्। तथा च यत्र अर्थनिश्चयाभावस्तत्र अवग्रहो न क्रियते। तदुक्तं—'हरिद्रूरनवगृह्यते' इति। हरिद्रूरित्यत्र

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

किं हरिशब्दः इकारान्तः अथ हरिच्छब्दस्तकारान्त इति संदेहात्। उ comments on this: संहिताया एत्र नित्यत्वमिति। अविच्छिन्नपारम्पर्यत्वमेव अत्र नित्यत्वम्। अर्थनिश्चयाभाव इति। आज्यशब्दस्य रूढत्वात् आङर्थोऽस्ति न वा इति निश्चयाभाव इत्यर्थः। 'समासे संहिता नित्या' इत्यवग्रहस्य साधुत्वाभावात् सम्प्रदायमात्रशरणस्य तस्य लक्षणाविषयता इत्यर्थं मन्ये। cf स्वोपज्ञ of भर्तृहरि on this कारिका (from a Ms. in the Govt. Oriental Mss. Library, Madras): कुशलस्तु प्रतिपत्ता सर्वमेव भेदं अभेदानतिक्रमेण पश्यति। प्रक्रियाभेदास्तु शास्त्रे विभागनिबन्धनम्। तथाहि - हरिद्रुर्मितद्रुः दुर्दशो दुस्तर इति। अत्र मितद्रुरवगृह्यः। हरिद्रुरनवगृह्यः। तत्र विभागे प्रक्रिया भिद्यते। हरि–द्रवः, हरित्–द्रवः इति। तथा दुस्तर इत्यत्रापि। तरतेः स्तृणातेर्वा। अतश्च विभागे विद्यमानायां प्रक्रियायां अनवग्रहः। हरिद्रवः (ऋ 10·94·12) पदपाठे नावग्रहः। हरिद्रोः (शब्रा 13·8·1·16)। हरिमितयोः द्रुवः (उणादि 1·35)। मितद्रु in भा on पा 3·2·180·1। "डुप्रकरणे मितद्र्वादिभ्य उपसंख्यानम्। धातुविधितुक्प्रतिषेधार्थम्। ... ... तुग्विधिः। मितद्रुः। ह्रस्वस्य पिति कृति तुग्भवतीति (पा 6·1·71) तुग्मा भूदिति।"

२·१४ 'ब्राह्मणार्थो यथा नास्ति ...' Quoted by कुमारिल in his तन्त्रवार्त्तिक on जैसू 1·3·8·24 (p. 273 of आनन्दाश्रम edition) & also in शकौ (p. 9) by भ thus:—अवयवशक्तेर्दुरुपपादतया प्राथमिकशक्तिग्रह एव प्रमारूप इति तु सैद्धान्तिकः पन्थाः। उक्तं च हरिणा— 'ब्राह्मणार्थो ... ...'

२·१६ ab 'अशब्दो यदि ....' See वैभू 244. लम 165 reads अशाब्दो for अशब्दो; 'किञ्च एवं पदवाक्ययोरभावेन शब्दार्थसम्बन्धस्यैव हानिः। तदुक्तं—'अशब्दो यदि वाक्यार्थ' इति। पदसमुदायात्मकवाक्यस्येव वर्णसमुदायरूपपदस्याप्यभावात् उभयोरपि अर्थासम्बन्धात् इति तदर्थः॥

'अशब्दो यदि वाक्यार्थः पदार्थोऽपि तथा भवेत्। एवं च सति सम्बन्धः शब्दस्यार्थेन हीयते॥' कै on भाष्य on पा 1-2-45 says:—'ध्वनिव्यङ्ग्यं नित्यं वाक्यं विशिष्टस्यार्थस्य पदार्थसंसर्गरूपस्य वाचकम्। अन्यथा हि अशाब्दो वाक्यार्थः स्यात्।' नागेश thus explains & explicitly quotes वाप (2-16): ...ध्वनिव्यङ्ग्यमिति। अनेन स्थिरत्वं तस्य दर्शितम्। विशिष्टस्यार्थस्येति विशेषणत्वादिविशिष्टस्येत्यर्थः। पदार्थानां संसर्गबोधकत्वे दोषमाह-अन्यथेति। न च शब्दप्रयोज्यत्वात् शाब्दत्वम्। प्रत्यक्षदृष्टधूमबोध्यवह्नेरपि प्रत्यक्षत्वापत्तेः श्रुतधूमशब्दोपस्थितधूमार्थबोध्यवह्नेरपि शाब्दत्वापत्तेश्च। यदि तु पदसमभिव्याहाररूपाकाङ्क्षा तत्कारणत्वज्ञानं च शाब्दबोधे कारणमिति शाब्दत्वं तदा पदानां पदार्थेष्वपि शक्तिर्न सिध्येत्। तदुक्तं—'अशाब्दो यदि वाक्यार्थः पदार्थोऽपि तथा भवेत्।' इति। यदि बोधजनकतयाऽसम्बद्धे वक्तुमशक्यतया पदार्थैः पदानां

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

रूपशक्तिसम्बन्धकल्पनं तदा समभिव्याहारे संसर्गबोधकारणताया अपि असम्बद्धे वक्तुमशक्यतया तेन तादात्म्यसम्बन्धस्य वाक्ये आवश्यकत्वात्। तादात्म्यमेव च शक्तिरिति तत्त्वम् । पदार्थातिरिक्तः कश्चिद् वाक्यार्थोऽस्तीति वक्तुमुपक्रमते भाष्ये इहेत्यादि ।

२·१९ **अभिनवगुप्त in ईप्रविवि (Vol. III p. 12) quotes this कारिका thus :—** " आकाशीयस्य इति प्राणप्रेरणनैरपेक्ष्येण एव इच्छाप्रयत्नमात्र-प्रक्षोभिते आकाशे हृदयगगने अहमिति परिस्फुरतो ग्राहकरूपस्य ज्ञानभागे वा पश्यन्तीमध्यमात्मना स्फुरत इदमिति ग्रहणरूपस्य । भेदाभावात् इति अवेद्यत्वादित्यर्थः। यदाह तत्रभवान् ' अव्यक्तः क्रमवाग्छब्द उपांशु योऽभि-धीयते । अक्रमस्तु वितत्यैव बुद्धिर्यत्रावतिष्ठते ॥ ' इति । **we read अयमधीयते for योऽभिधीयते & वितत्येव for वितत्यैव.**

२·२२ cd **अभिनवगुप्त in ईप्रविवि (Vol. III p. 9) quotes this half-verse as follows :—**

" तस्मात् आभासनानाभासनाभ्यां यो भेदः तथाभूतभेदनिमित्तकः कालात्मा क्रमो न भेदमात्रनिमित्तकः । आभाससद्भावासद्भावौ च यौ वैचित्र्येण तौ स्वप्नसंकल्पनादौ क्रमोत्थापनदृष्टसामर्थ्यस्य प्रभविष्णोरेव सकाशात् भवतः । यदुक्तं तत्रभवता ' एकस्यैव तु सा शक्तिर्यदेवम व-भासते, ॥ इति । ... ...

२·३०, ३१ ' यदन्तःशब्दतत्त्वं ... प्रकाश्यते ... अपृथक् स्थितौ ' **लम 387 reads प्रकाशते for प्रकाश्यते.** अन्तस्तथा स्थितावपि बहिर्भेदेन भासेते । तस्यैव शक्तिभेदात् । अक्रमेऽपि तस्मिन् क्रमभासोऽपि तच्छक्तिवशादेव इत्यपि स्पष्टं तत्रैव ॥

२·३८ ' उपादायापि ये हेयास्तानुपायान् प्रचक्षते । उपायानां च नियमो नावश्य-मवतिष्ठते ॥ ' **Quoted by अभिनवगुप्त in ईप्रविवि (Vol. I p. 180) thus :—**

" ज्ञानमेव ज्ञातता इत्ययमर्थो विशिष्टेन हेतुना ...यदि तु अन्यतो हेतो-र्ज्ञानमेव ज्ञातता इति असाधयिष्याम तत्पक्षे तु अस्य हेतुता न भवेत्— इति विशिष्टहेतुकस्य सतो हेतोर्हेतुत्वम् । न पुनः ' उपादायापि ये हेयाः ... ' इति नयेन । पूर्वहेतुसिद्धेऽर्थे हेतुचिकीर्षिते स पूर्वहेतुस्त्यज्यत एव ॥

' उपादायापि ये हेयास्तानुपायान् प्रचक्षते ' **जयरथ (1170 AD) in his विवेक on अभिनवगुप्त's (1014 AD) तन्त्रालोक (4·41-42)** ' किरणायां यदप्युक्तं गुरुतः शास्त्रतः स्वतः । तत्रोत्तरोत्तरं मुख्यं पूर्वपूर्व उपायकः । ' **observes and quotes वाप. thus :** ' ननु अन्यत्र परतत्त्वाधिगमे गुर्वादि अन्यदपि कारणतयोक्तं इह पुनः कथं स्वत एवं इति एकमेव इत्याशङ्क्याह—यदपि किरणाख्यायां संहितायां मायाधर्मैः शून्यं परं तत्त्वं ज्ञातुं ' शून्यमेवंविधं ज्ञेयं गुरुतः शास्त्रतः स्वतः ' इत्यादिना

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

कारणत्रयमुक्तं तत्र उत्तरोत्तरं मुख्यं विवक्षितं यथा—गुरुतः शास्त्रं ततोऽपि स्वपरामर्शः यतः पूर्वः पूर्वो यथा गुरुः शास्त्रे उपायः तदपि स्वपरामर्शे। एवम् 'उपादायापि...' इत्याद्युक्तयुक्त्या गुरुशास्त्रयोः उपायत्वात् अमुख्यत्वम् इति स्वपरामर्शस्यैव प्राधान्यं येन अत्र अस्यैव उपादानम् ।

'उपादायापि ये हेयाः ... तानुपायान्...' Quoted by कै on पा 3·1·96 :—

"नित्यानां शब्दानां यथाकथञ्चित् अन्वाख्यानं कर्तव्यमिति मन्यते। यथोक्तं—'उपादायापि...' उ comments : ननु बोधे विशेषात् कथं तद्धितेन सिद्धिरत आह—नित्यानामिति वास्तुभवत्वेनापि (as regards the word वास्तव्य) वासकर्तुरेव रूढ्या बोधात् नार्थविशेषः सर्वदोषपरिहारादिति भावः। उपादायापि ये हेया इति। उपायशब्दव्युत्पत्तिः। पृषोदरादित्वात् साधुः (पा 6·3·109 पृषोदरादीनि यथोपदिष्टम्) [this involves the dropping of दायापि ये हे and retaining उपा & या :; extremely fanciful, especially when उपाय can be easily derived thus: उप + √अय्] रेखागवयस्थानीयत्वादिति भावः। In another place (लम 405) नागेश observes :

'पदप्रकृतिः संहिता' (निरुक्त 1-17) इत्यत्र तु षष्ठीसमासः। तथा च तत्रैव (पा 6·1·207) कैयटः 'संहितैव अपौरुषेयी पदानि तु पौरुषेयाणि'। किञ्च तेषां सत्यत्वे अश्वकर्णादौ अश्वाद्यर्थप्रतीत्यापत्तिः। इदं रूढं इदं यौगिकं इदं योगरूढं इत्याद्यपि शास्त्रकृत्कल्पनैव विशिष्टार्थबोधार्था। बुद्धे च तत्र प्रयोजनसम्पत्तेः उपायपरित्यागः। अतएव व्याकरणभेदेन उपाया अनियताः। तदुक्तं 'उपादायापि...'॥

२·८३ c 'सम्बन्धाज्जातभेदोऽयम्' इति हरिकारिकाप्रतीकमुपादाय यथाऽऽख्याते प्रत्ययवाच्यकारकभेदे तत्सम्बधात् धात्वर्थक्रियाया अपि भेदः प्रतीयते यथा पचतः पचन्ति इति पुञ्जराजः। लम 817. नागेश gives the gist of the actual text of पुञ्जराज's comm., which is rather different.

२·११९ 'अस्त्यर्थः सर्वशब्दानामिति प्रत्याय्यलक्षणम्। अपूर्वदेवतास्वर्गैः सममाहुर्गवादिषु॥" कुमारिल in his तन्त्रवार्त्तिक on जैसू 1-3-9-28 (p. 297 of आनन्दाश्रम edition) quotes thus:— यथाहुः— 'अस्त्यर्थः ... गवादिषु॥' इति॥

'अस्त्यर्थः ... गवादिषु' ॥ शान्तरक्षित in his तत्त्वसंग्रह (887) quotes this कारिका after first (886) observing thus: 'येऽन्येऽन्यथैव शब्दार्थमस्त्यर्थादीन् प्रचक्षते। निरस्ता एव तेऽप्येतैस्तथापि पुनरुच्यते॥'. कमलशील in his पञ्जिका comments on 'अस्त्यर्थः ...' thus:—'इतिशब्दो भिन्नक्रमः अस्त्यर्थं इत्यस्यानन्तरं सम्बध्यते। तेनायमर्थो भवति—अस्त्यर्थ इति यदेतत् प्रतीयते तत् सर्वशब्दानां

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

प्रत्याय्यस्य अभिधेयस्य लक्षणम्। शब्दार्थस्य लक्षणमिति यावत्। तेन गवादिषु अर्थेषु विषयभूतेषु यद् गवादिशब्दप्रत्याय्यं तद् अपूर्वदेवतास्वर्गैः तुल्यमित्याहुः। अपूर्वादिशब्दार्थैस्तत् तुल्यमित्येवमाहुरित्यर्थः। यथैव हि अपूर्वादिशब्दा नार्थाकारविशेषं बुद्धिषु संनिवेशयन्ति केवलं तत्रैतावत् प्रतीयते—सन्ति केऽप्यर्था येषु अपूर्वादयः शब्दाः प्रयुज्यन्ते इति तथा दृष्टार्थेष्वपि गवादिशब्देषु तुल्यम्। यतस्तेभ्योऽप्येवं प्रतीयते—अस्ति कोऽप्यर्थो गवादिशब्दाभिधेयो गोत्वादिसामान्यसम्बद्धो वेति। यस्तु तत्राकारविशेषपरिग्रहः केषांचिदुपजायते स तेषां सिद्धान्तबलात्॥

२·१२६ शान्तरक्षित in his तत्त्वसंग्रह (888) reads this कारिका thus with variants :

"समुदायोऽभिधेयो वाऽप्यविकल्पसमुच्चयः। असत्यो वाऽपि संसर्गः शब्दार्थः कैश्चिदुच्यते॥". कमलशील, his disciple, comments in his पञ्जिका :—"केचिद् ब्राह्मणादिशब्दैः तपोजातिश्रुतादिसमुदायो विना विकल्पसमुच्चयाभ्यां अभिधीयते इत्याहुः.यथा वनादिशब्दैर्धवादय इति। तथाहि—वनमित्युक्ते धवो वा खदिरो वा पलाशो वेति न विकल्पेन प्रतीतिर्भवति नापि धवश्च खदिरश्च पलाशश्चेति समुदायेन अपि तु सामान्येन प्रतीयन्ते धवादयः। तथा ब्राह्मण इत्युक्ते तपो वा जातिर्वा श्रुतं वा तपश्च जातिश्च श्रुतं चेति न प्रतिपत्तिर्भवति। (This example of ब्राह्मण & what it means refers to तत्त्वसंग्रह (897): तपोजातिक्रियादीनां सामस्त्येनाभिधानतः॥ which itself is based upon a verse in महाभाष्य of पतञ्जलि on पा 2·2·6 नञ् 'अथवा सर्वे एते शब्दा गुणसमुदायेषु वर्तन्ते ब्राह्मणः ... इति। "तपः श्रुतं च योनिश्चेत्येतद् ब्राह्मणकारकम्। तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः॥" तथा गौरः शुच्याचारः पिङ्गलः कपिलकेश इत्येतानपि अभ्यन्तरान् ब्राह्मण्ये गुणान् कुर्वन्ति। ... ...) अपि तु साकल्येन सम्बन्ध्यन्तरव्यवच्छिन्नाः तपःप्रभृतयः संहताः प्रतीयन्ते इति। तत्र बहुषु अनियतैकसमुदायिभेदावधारणं विकल्पः। एकत्र युगपदभिसम्बध्यमानस्य नियतस्यानेकस्य स्वरूपभेदावधारणं समुच्चयः। अविद्यमानौ विकल्पसमुच्चयौ यस्य स तथोक्तः। अन्ये तु द्रव्यत्वादिभिरनिर्धारितरूपैर्यः सम्बन्धो द्रव्यादीनां स शब्दार्थः स च सम्बन्धिनां शब्दार्थत्वेन असत्यत्वात् असत्य इत्युच्यते। यद्वा तपःश्रुतादीनां मेचकवर्णवत् ऐक्येन भासनात् एषामेव परस्परं असत्यः संसर्गः। तथाहि एते प्रत्येकं समुदिता वा न स्वेन रूपेणोपलभ्यन्ते किन्तु अलातचक्रवत् एषां समूहः स्वरूपमुत्क्रम्यावभासत इति॥

२·१२७ 'असत्योपाधि यत् सत्यं तद्वा शब्दनिबन्धनम्। शब्दो वाप्यभिजल्पत्वमागतो याति वाच्यताम्॥' Quoted by शान्तरक्षित in his तत्त्वसंग्रह as text (889); कमलशील observes : 'अन्ये त्वाहुः। यदसत्योपाधि सत्यं स शब्दार्थ इति। तत्र शब्दार्थत्वेन असत्या

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

उपाधयो विशेषा वलयाङ्गुलीयकादयो यस्य सत्यस्य सर्वभेदानुयायिनः सुवर्णादेः सामान्यात्मनः तत् सत्यं असत्योपाधि । शब्दनिबन्धनामिति । शब्द-प्रवृत्तिनिमित्तमभिधेयामित्यर्थः । अन्ये तु ब्रुवते । शब्द एव अभिजल्पत्वमागतः शब्दार्थ इति । बुद्धौ विपरिवर्तमानः बुद्धिस्थ इति यावत् । बाह्यवस्तु-निबन्धन इति । सदसद् बाह्यं वस्तु निबन्धनं अक्षरचिह्नस्थानीयं स्वरूपमुप-दर्शयितुं प्रक्रम्यते यस्य स बाह्यवस्तुनिबन्धनः । बाह्यं वस्तु इति ज्ञात इति । बुद्धिरूपत्वेनाविर्भावितो बाह्यतयाऽध्यवसित इत्यर्थः । तथाहि—यावद् बुद्धिरूपं अर्थेषु अप्रत्यस्तं बुद्धिरूपमेव इति तत्त्वभावनया गृह्यते तावत् तस्य शब्दार्थत्वं नावसीयते तत्र क्रियाविशेषसम्बन्धाभावात् । न हि 'गामानय, दधि खाद' इत्यादिकाः क्रियाः तादृशि बुद्धिरूपे सम्भवन्ति क्रियायोगसम्भवी चार्थः शब्दैरभिधीयते । अतो बुद्धिरूपतया गृहीतोऽसौ न शब्दार्थः । यदा तु बाह्यवस्तुनि प्रत्यस्तो भवति तदा तस्मिन् प्रतिपत्ता बाह्यतया विपर्यस्तः क्रियासाधनसामर्थ्यं तस्य मन्यत इति भवति शब्दार्थः ... ... यत्पुनरुक्तं—'शब्दार्थोऽर्थः स एव' इति तत् समारोपित-मेवार्थमभिसन्धाय । बुद्ध्याकारवादिना तु बुद्ध्याकारः परमार्थतो वाच्य इष्यते इति महान् विशेषः ॥

२·१२८ This कारिका is तत्त्वसंग्रह (890); कमलशील says : तत्र कोऽसौ अभिजल्प इत्याह—'सोऽय' मित्यादि ।

'सोऽयमित्यभिसम्बन्धाद्रूपमेकीकृतं यदा ।
शब्दस्यार्थेन तं शब्दमभिजल्पं प्रचक्षते ॥'

शब्द एवार्थ इत्येवं शब्देऽर्थस्य निवेशनं सोऽयमित्यभिसम्बन्धः तस्मात् कारणात् यदा शब्दस्यार्थेन सह एकीकृतं रूपं भवति तं स्वीकृतार्थाकारं शब्दमभिजल्पमित्याहुः ।

अभिनवगुप्त in his ईप्रविवि (Vol. I pp. 114–115) refers to this कारिका thus : "ननु स्वलक्षणाभासं ज्ञानमेकं परं पुनः । साभिलापं विकल्पाख्यं बहुधा नापि तद्द्वयम् ॥"... अभिलप्यते आभिमुख्येन विषयि-विषयपरवशतात्यागेन बोधस्वातन्त्र्ये शब्देन च विषयस्य तादात्म्यापादनेन व्यक्ततया प्रमातृसाक्षात्कारपर्यन्ततया उच्यते परामृश्यते येन सोऽभिलापः आन्तरशब्दलक्षणः संजल्पः । यदाहुर्भर्तृहरिपादाः

'सोऽयमित्यभिसम्बन्धाद्रूपमेकीकृतं यदा ।
शब्दस्यार्थेन तं शब्दमभिजल्पं प्रचक्षते ॥ इति ।

तेन सह वर्तते इति । अनेन सोऽयमितिसम्बन्धात्मकसंकेत-व्युत्पत्तिकालव्यवहारकालानुगामित्वं विषयस्य वदता सामान्यविषयत्वं दर्शितम् । बहुधात्वे च अवान्तरजातिभेदकृते युक्तिः सूचिता । स इति अनुसन्धाने स्मृतिः । सोऽयमिति अनुवेधे प्रत्यभिज्ञा । स एवायमिति अनुरोधे उत्प्रेक्षा । स एवायमिति अनुयोगे व्यवच्छेदः इत्यादयो विकल्पभेदा अभिलाप-

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

भेदमूला एव। स्मृत्युत्प्रेक्षादेश्च अवान्तरजातिभेदयोगेऽपि विकल्पलक्षण-महासामान्ययोग इत्यपि साभिलापशब्देन सूचितम्। तृतीयश्च एष पक्षो विवृतिकृता स्फुटीकृतः। अपिशब्दो भिन्नक्रमः। द्वयमपि तत् न नित्यस्य कस्यचित् द्रष्टृशब्दवाच्यस्य परैरुपगतस्य सम्बन्धित्वेन युक्तम्।...

२·१३२ This कारिका is तत्त्वसंग्रह (891); mark the variant : बाह्यं वस्तु for बाह्यवस्तु of our text—

"यो वाऽर्थो बुद्धिविषयो बाह्यवस्तुनिबन्धनः। स बाह्यं वस्त्विति ज्ञातः शब्दार्थः कैश्चिदिष्यते॥" कमलशील comments extensively:

'अन्ये तु बुद्ध्यारूढमेवाकारं बाह्यवस्तुविषयं बाह्यवस्तुतया गृहीतं बुद्धिरूपत्वेन आविर्भावितं शब्दार्थमाहुः तद्दर्शयति यो वा इत्यादि। बुद्धिविषयः इति।......

'यो वाऽर्थो बुद्धिविषयो...' लम 344 reads बाह्यं वस्तु for बाह्यवस्तु and सम्यक् for कैश्चित्. पूर्वपूर्वबोधैः वासनाजननाच्च अनादित्वाच्च व्यवहारस्य न दोषः। तदुक्तं हरिणा—'यो वाऽर्थो...'। 'अबहीरूपोऽपि बहीरूपतया अध्यस्तः' इति पुञ्जराजः। अध्यासे बीजं च अन्तःकरणस्य रागादिदोष एव। अत एव बाह्यपदार्थानयनमुपपन्नम्। यत्र च आभ्य-न्तरार्थस्य बाह्यार्थेन संवादः स शब्दः प्रमाणम्। विसंवादे तु अप्रमाणमिति व्यवस्था॥

२·१३९ 'ऋषीणां दर्शनं यच्च...न तच्छब्दनिबन्धनम्'. लम 416 refers to this कारिका in substance thus:— यद्यपि ऋषीणां दर्शनं तत्त्वविषयं भवति तथापि तत्त्वभूतेन वस्तुना व्यवहारासम्भवात् व्यवहारकाले तेऽपि अदृष्ट-तत्त्वसदृशा नानाप्रकारैः व्यवहरन्ति इति न तद्वचसा अपि पदपदार्थसत्यत्वं मन्तव्यम्। अत्र वाक्यसापेक्षिकं सत्यत्वं द्रष्टव्यम्। सर्वव्यवहारस्य असत्य-विषयत्वात्। वाक्यार्थश्च प्रतिभामात्रविषयः। प्रतिभा च जन्मान्तर-संस्कारजाऽपि यथा मधौ पिकस्य पञ्चमस्वरविरावो जन्मान्तरसंस्कारजः (cf वाप 2-149):—

"स्वरवृत्तिं विकुरुते मधौ पुंस्कोकिलस्य कः।
जन्त्वादयः कुलायादिकरणे केन शिक्षिताः॥"

In this context, cf माठरवृत्ति on सांख्यकारिका (61) quoting:—

"येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः।
मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति॥"

अत एव शशशृङ्गमस्तीत्यादितोऽपि स प्रतिभाविषयत्वाच्च प्रतिभा वाक्यार्थ इति व्यवहार इत्यलम्। (cf वाप 2-143):—

"विच्छेदग्रहणेऽर्थानां प्रतिभाऽन्यैव जायते।
वाक्यार्थ इति तामाहुः पदार्थैरुपपादिताम्॥"

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

२·१६४ 'वाचिका द्योतिका वा स्युः...स्याद्वा..." ab quoted in वैभू (twice) 125, 215; in वैभूसा 220, which reads द्योतिका वाचिका वा स्युः; लम 1150 reads यद्वा for स्याद्वा of the text.

२·१७१ 'वैरवासिष्ठगिरिशाः ...' Quoted by कै on पा 3-2-15 thus :— तद्धितो वा इति। यो गिरौ शेते गिरिरस्यास्तीति लोमादिषु दर्शनात् शप्रत्ययः। अन्ये त्वाहुः गिरौ गिरौ शेते इति 'संख्यैकवचनात्' (पा 5-4-43) इति सप्तम्यन्तात् शस्-प्रत्ययः। व्युत्पत्तिर्हि यथाकथञ्चित् कर्तव्या उपायानामनियमात्। तदुक्तं हरिणा—'वैरवासिष्ठगिरिशाः...' इति। 'छन्दसि' इति वचनात् भाषायां गिरिशशब्दस्य असाधुत्वमाहुः।

उ comments on कैः—

'गिरौ शेते' इत्यर्थे तद्धितस्य अविधानादाह—यो गिराविति। अन्ये त्वाहुरिति। अत्र अरुचिस्तु अदन्तशब्दासिद्धिः अव्ययत्वापत्तिः शसः स्वार्थिकत्वेन 'गिरौ गिरौ शेते' इति विग्रहासंगतिश्च। वीरस्येदं वीराया वा वीरादागतं तत्र भवमिति। वसिष्ठस्येदं तेन कृतं प्रोक्तं वा। गिरौ शेते गिरिं श्यति वा गिरिशः। निमित्तं अर्थः। अवधिः प्रत्ययानां प्रकृतिः। तत्सङ्करैरित्यर्थः। भ in शकौ on पा 4·2·8 observes :— कलेर्ढक्। अणपवादः। कलिना दृष्टं कालेयं साम। यत्तु व्याकरणाधिकरणे भट्टैरुक्तं 'यदकालयत् तत् कालेयस्य कालेयत्व' मिति श्रुतिविरुद्धा इयं पाणिनिस्मृतिरिति (The relevant portion from कुमारिल's तन्त्रवार्तिक is as follows:—

'कलेर्ढक्' इति कलिदृष्टसामाभिधानप्रतिपत्तिः वैयाकरणस्य भवति। वेदे तु 'यदकालयत् तत् कालेयस्य कालेयत्वम्' (जैब्रा 1·153) इत्याद्यर्थ· व्युत्पत्तिदर्शनं व्याकरणानुसारिणीं प्रतिपत्तिं बाधते। तथा ... ...
व्याकरणशतेनापि अनवगता अर्था वेदार्थवित्परम्पराप्राप्ता वेदवाक्यपौर्वा-पर्यावगतशब्दार्थाश्च व्याख्यायन्ते। यथा चैवमादिषु व्याकरणानपेक्षाणा-मेव निःसंशयार्थप्रतिपत्तिस्तथा स्थूलपृषत्यादिशब्दार्थेष्वपि व्याख्यातृपर-म्परैव निर्णयक्षमा इति न व्याकरणमपेक्षितव्यम्। किञ्च

"वाक्यार्थेषु च संदेहा जायन्ते ये सहस्रशः।
नैषां व्याकरणात् कश्चित् पूर्वपक्षोऽपि गम्यते ॥"

See सतन्त्रवार्त्तिकशाबरभाष्यसमेतमीमांसादर्शन — आनन्दाश्रम edition पृ २६६-२६७.) तत् प्रौढिवादमात्रम्। एकस्मिन्नेव सामनि कलिदृष्टत्वस्य कालयितव्यस्य च अविरोधात्। तन्त्रेण अवयवार्थद्वय-सम्भवाच्च। अत एवाह भर्तृहरिः—'वैरवासिष्ठगिरिशाः...'। अस्यार्थः— वीरेषु भवं वीरैर्लब्धं वीराणामिदमिति निमित्तसङ्करेण वैरशब्दो व्याख्यातः। अतिशयेन वासयन्तीति वा वसिष्ठेन प्रोक्तमधीयते इति वा निमित्तस्य सङ्करः प्रकृतिप्रत्ययावधिसङ्करश्च। गिरौ शेते गिरिं श्यति उपभोगेन तनू-करोति गिरिरस्यास्तीति वा। ऐकागारिकशब्दोऽपि एकेन अगारेण जय-तीति एकमगारं प्रयोजनमस्येति वा निमित्तसङ्करेण व्याख्यातः॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

२·१८० "अडादीनां व्यवस्थार्थं पृथक्त्वेन विकल्पनम् । धातूपसर्गयोः शास्त्रे धातुरेव तु तादृशः ॥" कै on पा 3-1-7 reads differently thus :

"अडादीनां व्यवस्थार्थं पृथक्त्वेन प्रकल्पनात् ।
धातूपसर्गयोर्धातुः क्रियावाचीति निर्णयः ॥"

व्यवस्थार्थं = व्यवस्थार्थं; स्वो० reads प्रकल्पनम् (perhaps this is to be preferred to विकल्पनम् of the text); v. l. धातूपदेशयोः is obviously undesirable. कै observes :—"अयं भावः— धातुरेव क्रियावाची उपसर्गस्तु विशेषकः । ततश्चार्थद्वारके कर्मत्वसमानकर्तृकत्वे धातोरेव सम्भवत इति । अयमर्थः—धातुरेव क्रियावाचीति तदर्थस्यैव कर्मत्वं न तु उपसर्गार्थस्यापि ।... यदि संघातस्य अर्थद्वारकं कर्मत्वं स्यात् तदा अवयवस्य अकर्मत्वात् ततः सन्प्रत्ययो न स्यात् । 'कर्मणः' (पा 3-1-7) इत्येषा पञ्चमी । षष्ठ्यां तु सत्यां कर्मणोऽवयवात् धातोः सन् इत्याश्रीयमाणेऽनुपसर्गात् न स्यात् । तस्मात् – 'अडादीनां व्यवस्थार्थं....' इति । उ further clarifies :—तस्मादिति । तेन आचार्येण (भर्तृहरिणा) तयोः पृथक्त्वेन कल्पनात् क्रियावाचिनां च धातुत्वात् उपसर्गरहित एव क्रियावाचीति निर्णय इत्यर्थः । पार्थक्यकल्पना फलं च अडादिव्यवस्था । 'समानकर्तृकात्' (पा 3·1·7) इत्यनेन क्रियावाचकादेव सनो विधानमिति न तद्विशिष्टात् सनिति भावः ।

Also quoted by भ in शकौ (p. 9) thus:— एवं स्थिते निपाता द्योतका विकरणा अनर्थका इत्यादिविचारोऽपि प्रक्रियादशायामेव । आह च "अडादीनां..." । तादृशोऽखण्ड इत्यर्थः । लम 602 reads प्रकल्पनं for विकल्पनम्. "तादृशः एव विशिष्ट एव तु । धातुः क्रियावाचीत्यर्थः ।" See also वैभू 206 .

२.१८१cd,१८२ 'क्रियाविशेषाः...तथाविधाः ॥' 'कार्याणामन्तरङ्गत्वं...तथाभूतैव सा क्रिया ॥' इत्यपि उक्तं हरिणा (लम 602) तथापि भाष्यसंमतत्वात् आद्यमेव युक्तम् । धातूपसर्गकार्यस्य अन्तरङ्गत्वं तु पूर्वोपस्थितान्तर्भूतार्थकनिमित्तकत्वात् । बाह्यसाधनकार्यप्रत्ययनिमित्तं तु द्वित्वादिबहिरङ्गमीति भावः ॥; for 2·181 ab see वैभू 206.

२·१८३ 'प्रयोगार्हेषु ... ... विशिष्यते । प्राक्च ... उपजायते' लम 599 reads विशेषणैः for विशिष्यते. "तथा 'प्रयोगार्हेषु....' इति च (उक्तं हरिणा) । प्रयोगार्हत्वं च प्रत्ययोत्पत्त्यनन्तरम् । तेषु शब्देषु सिद्धः सन्नेव विशेषणैर्भेत्तव्यः विशेष्यः । श्रोतृबोधार्थमिति शेषः ॥"

२·१८४,१८६ लम 598. तदुक्तं हरिणा –"धातोः ....' & "बुद्धिस्थात् ..." अस्यार्थः— यथा भाविसाधनसम्बन्धाश्रयणेन क्रियावाचित्वमाश्रित्य धातुसंज्ञोच्यते ... ... तथा भाव्युपसर्गसम्बन्धात् उपक्रमे एव विशिष्ट-

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

क्रियावचनत्वं दृश्यताम् । धातूपसर्गयोः सम्बन्धं बुद्धिविषयीकृत्य उपसर्गार्थकृतो विशेषो धातुनैवाभ्यन्तरीकृतः पदप्रयोगकाले उपसर्गसम्बन्धे सति प्रकाशते । श्रोतॄणामिति शेषः ॥

२·१८७ See वैभू 215; लम 609 'क्वचित्' = पचत्यादौ.

२·१८८ ab See वैभू 215; वैभूसा 367; लम 609 'यद्यप्युपसर्गमुपक्रम्य "स वाचको विशेषाणां..." इत्युक्तं हरिणा–यथा प्रतिष्ठते इत्यत्र गतिनिवृत्तिवाचको धातुः उपसर्गो गतिवाचक इति पुञ्जराजश्च तथापि तिष्ठतेर्धातुत्वेन यज्यादिवत् अनेकार्थत्वात् धातोरेव गतिरर्थः । प्रशब्दस्तु द्योतक एव उपसर्गत्वात् प्रपचतीत्यादिस्थप्रशब्दवदित्यर्थिकया (2·189 स्थादिभिः तद्धर्मा प्रादिरुच्यते) इति कारिकया (2·187 'क्वचित्...प्रपरादिना') इत्यादिना च द्योतकत्वमेवोपसर्गाणां सिद्धान्तितम् । तद्धर्मा द्योतकत्वधर्मा ।

२·१८८ cd See वैभू 212.

२·१९२ 'निपाता द्योतकाः केचित् पृथगर्थाभिधायिनः । आगमा इव केऽपि स्युः संभूयार्थस्य वाचकाः' ॥ लम 156 : अत एव निपातानां द्योतकत्वं स्फोटस्य व्यङ्ग्यता च हर्यादिभिरुक्ता । द्योतकत्वं च क्वचित् समभिव्याहृतपदीयशक्तिव्यञ्जकत्वमिति वैयाकरणानामपि एतत्स्वीकार आवश्यकः एषा च शब्दतदर्थपदपदैकदेशवर्णरचनाचेष्टादिषु सर्वत्र तथैवानुभवात् । In another place (लम 614) नागेश observes :—स्त्रियामिति सूत्रे ... स्त्रीशब्दार्थस्य प्रकृत्यर्थविशेषणत्वात् इत्यर्थकेन द्योतकतापक्ष उक्तः । तदुक्तं हरिणा–'निपाताः ..' केचिदिति उभयान्वयि । केचित् पृथगर्थाभिधायिनः वाचकाः केचित् अनर्थका एवेत्याह–आगमा इवेति इति तदर्थः । प्रातिशाख्येऽपि (ऋप्रा 12·6 cd; 12·8)

"उपसर्गा विंशतिरर्थवाचकाः
सहेतराभ्यामितरे निपाताः ॥
क्रियावाचकमाख्यातमुपसर्गो विशेषकृत् ।
सत्त्वाभिधायकं नाम निपाताः पादपूरणाः ॥"

इतरे नामाख्यातेभ्योऽन्ये निपातास्तथा ज्ञेयाः । उपसर्गो विशेषकृत् इत्यनेन द्योतकत्वं दर्शयति । पादपूरणाः पादपूरणा अपीत्यर्थः ।

(ऋप्रा reads निपातः पादपूरणः instead of निपाताः पादपूरणाः of लम) (उवट comments : प्र, अभि, आ, परा, निः, दुः, अनु, वि, उप, अप, सं, परि, प्रति, नि, अति, अधि, सु, उत्, अव, अपि–एते विंशतिः उपसर्गसंज्ञाः स्युः । ते च इतराभ्यां नामाख्याताभ्यां इति यावत् सह अर्थवाचकाः अर्थवाचिनः न तु केवला इत्यर्थः । इतरे नामाख्यातोपसर्गेभ्योऽन्ये निपाता वेदितव्याः । अ, उ, वा, घ, शश्वत्, कुवित्, सकृत्, अथ, अथो इत्येवमादयः ।) The प्रातिशाख्य (12·9) has this verse, concluding the पटल, on निपात :—

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

"निपातानामर्थवशान्निपातनाद्
अनर्थकानामितरे च सार्थकाः।
नेयन्त इत्यस्ति सङ्ख्येह वाङ्मये
मिताक्षरे चाप्यमिताक्षरे च ये॥"

(उवटः—अर्थविशेषे केचन निपाता निपातिताः। तथा च केचन निपाताः सार्थकाः केचन च निरर्थकाः। परं इयत्तया ते मिताक्षरे पद्ये अमिताक्षरे गद्ये च संख्यातुं न शक्याः।)

२·१९४ cd See वैभू 214.

२·१९५ ab See वैभू 214.

"समुच्चिताभिधानेऽपि व्यतिरेको न विद्यते" लम 590 reads च for अपि; "वस्तुतोऽव्ययेषु नामत्वमेव न ......अत एव समुच्चेयानन्तरं चादिप्रयोग इति वृद्धाः। यद्वा समुचितश्चार्थः। स्वभावतः चाद्युपस्थाप्यस्य असत्त्वभूतत्वम्। तदुक्तं 'समुचिताभिधाने च...'"

२·१९५ cd 'असत्त्वभूतो भावश्च
क्रियाऽन्येनाभिधीयते॥'

वैभू 59 reads (d) thus:—

तिङ्पदैरभिधीयते, which is also the सोपज्ञसहितवाक्यपदीय reading of the Ms; similarly वैभूसा 12.

२·१९६ See वैभू 214.

२·२०३ "हेतुहेतुमतोर्योग॰ ... तृतीया हेतुलक्षणा॥"

Quoted by भ in शकौ on पा 1·4·84 thus: 'संहितामनु प्रावर्षत' इत्यत्र...हेतुभूतसंहितोपलक्षितं वर्षणमित्यर्थात् हेतुभूते लक्षणे परत्वात् तृतीया स्यात्। पुनः संज्ञाविधानसामर्थ्यात् तु द्वितीयैव भवति। आह च–'हेतुहेतुमतोः... '।

२·२०४ 'क्रियाया द्योतको नायं न सम्बन्धस्य वाचकः।
नापि क्रियापदाक्षेपी सम्बन्धस्य तु भेदकः॥'

Our text reads सम्बन्धस्य न वाचकः in (b). कै on पा 1·4·83 'कर्मप्रवचनीयाः' says: शाकल्यस्य संहितामनु प्रावर्षत् इति वाक्येऽप्रयुज्यमानस्य निशमेर्या क्रिया तत्कृतो वर्षसंहितयोर्हेतुहेतुमद्भावलक्षणः सम्बन्ध इत्ययमर्थोऽनुशब्दसंनिधौ प्रतीयते।... तथाहि क्रियायाः तावदयं न वाचकः कारकविभक्तिप्रसङ्गात् शेषविभक्तिसम्बन्धस्य अप्रतीतिप्रसङ्गाच्च। अत एव न क्रियापदाक्षेपः। ...क्रियाविशेषद्योतकत्वमपि क्रियापदसंनिधाने दृष्टमिति अत्र न संभवति इति पारिशेष्यात् तत्सम्बन्धावच्छेदहेतुः अनुः सम्पद्यते। तथा चोक्तं हरिणा—'क्रियायाः...' इति। उ has brief comments: ... कारिकायां 'क्रियायाः' इत्यस्य क्रियागतविशेषस्येत्यर्थः। भेदकः द्योतकः। Elsewhere नागेश (लम 1235) observes:

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

अस्यार्थः – प्रपचतीत्यादौ उपसर्गवत् नायं क्रियागतविशेषद्योतकः विभक्त्यैव उक्तत्वात् सम्बन्धस्य न वाचकः। नापि प्रादेशं विलिखति इत्यादौ विशब्दवत् क्रियापदाक्षेपी। .... विशिष्टक्रियाजनितोऽयं सम्बन्धो विभक्त्यर्थ इति द्योतकः। यथा प्रकृते निशमनक्रियाकृतः सम्बन्ध इति॥

भ in his शकौ on the same सूत्र explains:—कर्म क्रियां प्रोक्तवन्तः कर्मप्रवचनीयाः ... स च भूते। तेन संप्रति क्रियां न द्योतयन्ति इति लभ्यते। आह च–'क्रियायाः ...'। भट्टोजि comments on this कारिका, taking each प्रतीक, and explaining it separately.

दुर्गसिंह on कातन्त्रव्याकरण (2·4·23) quotes this with variants mostly 'plural' for 'singular.' क्रियान्तरापेक्ष for क्रियापदाक्षेपी is a major variant.

२·२१० cd,२११ 'धात्वादीनां...' & 'कृत्तद्धितानां...'. लम 410 ... 'श्वेतो धावती'त्यादौ अखण्डमेव वाक्यं तन्त्रेणोभयार्थबोधकम्। एवं च सकलशास्त्रव्यवहारः तदनुसारिलोकव्यवहारश्च अपोद्धाराश्रयेणैव बोध्यः। प्रकृतिप्रत्ययविभागोऽप्येवमेव। तदुक्तं–'धात्वादीनां ...' 'कृत्तद्धितानां...'। अत एव प्रकृतिप्रत्ययोभयार्थे क्वचिदन्यतर एवाभिधत्ते। यथा 'इयान्' इति 'अहन्' इति च। तथा क्वचित् प्रत्ययद्वयेन कर्त्राद्यर्थबोधः। यथा 'पचति' इति। क्वचिदेकेनैव। यथा 'अत्ति' इति॥

२·२२८ 'जहत्स्वार्थविकल्पे च ...' इति हर्युक्तेः। एतेन जहत्स्वार्थतैव एकार्थीभावोऽजहत्स्वार्था च व्यपेक्षैवेति भूषणोक्तमपास्तम्॥ .(लम १४०९) (See वैभू 143 : "तस्मादेकार्थीभावो व्यपेक्षा चेति यत्पक्षद्वयं भाष्ये व्युत्पादितं तदेवाभिप्रेत्य जहत्स्वार्थाजहत्स्वार्थविचारः। एकार्थीभावे जहत्स्वार्था व्यपेक्षायामजहत्स्वार्था। एकार्थीभावश्च समासादौ। पृथगर्थानामेकार्थीभावः सामर्थ्यमिति भाष्यस्वरसादिति व्यवस्थां वयं विभावयामः।)

२·२३३ ab 'शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते' Quoted by भ in शकौ (p. 10) thus:—"अविद्यैव ब्रह्मैव वा स्फुटत्यर्थोऽस्मादिति व्युत्पत्त्या स्फोट इति स्थितम्। आह च—'शास्त्रेषु ...' इति।" लम (411) observes on this :— ये कस्मिंश्चिद् व्याकरणे प्रत्ययार्थत्वेनोक्तास्तेऽन्यत्र प्रकृत्यर्थत्वेनोक्ताः। तस्मात् पदपदार्थादि असत्यमेव। शास्त्रमपि असत्यव्युत्पादकमेव। तदुक्तं—'शास्त्रेषु ...'

See वैभू 258 which treats 2·233 ab & 237 cd, as if they form one कारिका, as also वैभूसा 440.

२·२३७ "घटादिदर्शनाल्लोकः परिच्छिन्नोऽवसीयते।
समारम्भाच्च भावनामनादि ब्रह्म शाश्वतम्॥"

लम (411–412) reads आदिमत् for अनादि. 'अनादिमिथ्याभूतशास्त्राभ्यासानुसारेणैव शब्दः शास्त्रज्ञलोकेन अर्थप्रत्यायकतया गृह्यते केनाचित्। यथा घटादिकः सर्वोऽपि प्रपञ्चः परिच्छिन्नत्वेन गृह्यते।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

'भावानामुत्पादं दृष्ट्वा च शाश्वतमपि ब्रह्म उत्पादवत् इति मन्यते लोकेन तद्वत्। तदुक्तं—'घटादिदर्शनात्...'। लोको विश्वप्रपञ्चः। समारम्भः उत्पत्ति। cd is quoted by भ in शकौ (p. 10), who reads समारम्भस्तु for समारम्भाच्च & eloquently observes:—"तदेवं वराटिकान्वेषणाय प्रवृत्तश्चिन्तामणिं लब्धवानिति वासिष्ठरामायणोक्ताभाणकन्यायेन शब्दविचाराय प्रवृत्तः सन् प्रसङ्गात् अद्वैते औपनिषदे ब्रह्मण्यपि व्युत्पद्यतामित्यभिप्रायेण भगवान् भर्तृहरिर्विवर्तवादादिकमपि प्रसङ्गात् व्युदपादयत् ... ..."; also see वैभूसा 440.

२·२३८ "उपायाः शिक्षमाणानां बालानामपलापनाः। असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते॥" भ in शकौ (p. 5) quotes this with उपलालनाः for अपलापनाः under स्फोटस्वरूपव्युत्पादनम् & remarks: "...प्रकृतिप्रत्ययविभागकल्पनारूपो लघुभूत उपायः समाश्रीयते लिपिवत्। आरोपित एव च तत्र सम्बन्धः। ... तात्पर्यविषयाबाधाच्च प्रामाण्यम्। एषैव ह्यर्थवादेष्वपि गतिः। उक्तं च हरिणा—'उपायाः... समीहते।' See वैभू 254 & लम 411.

२·२३८ c असत्ये वर्त्मनि स्थित्वा is quoted by सुरेश्वराचार्य in his नैष्कर्म्यसिद्धि (9th century A.D.) (3-103-109; pp. 166-169 of the Bombay S. and P. series edition, No. XXXVIII) thus:—

"षष्ठीगुणक्रियाजातिरूढयः शब्दहेतवः।
नात्मन्यन्यतमोऽमीषां तेनात्मा नाभिधीयते॥ १०३॥

यदि शब्दोऽभिधानाभिधेयत्वसंबन्धाङ्गीकारेण नात्मनि वर्तते कथं शब्दात् अहं ब्रह्मास्मीति सम्यग्बोधोत्पत्तिः। उच्यते।

असत्ये वर्त्मनि स्थित्वा निरुपायमुपेयते।
आत्मत्वकारणाद्विज्ञो गुणवृत्त्या विबोधिताः॥ १०४॥

कथं पुनरभिधानं अभिधेयेन अनभिसंबद्धं सत् अनभिधेयेऽर्थे प्रमां जनयतीति। शृणु यथाऽनभिसंबद्धमपि अनभिधेयेऽर्थेऽविद्यानिराकरणमुखेन बोधयतीत्याह।

शयानाः प्रायशो लोके बोध्यमानाः स्वनामभिः।
सहसैव प्रबुध्यन्ते यथैवं प्रत्यगात्मनि॥ १०५॥

... ... असत्ये वर्त्मनि स्थित्वा इत्युपश्रुत्या अतिविस्मितो महता संभ्रमेण कश्चिच्चोदयति।

नासन्नुपायो लोकेऽस्ति परमार्थविनिश्चये।
नासाल्लिङ्गाद्धि बाष्पादेः कश्चिदग्निं प्रपद्यते॥ १०८॥

इत्येवं चोदयेद्योऽपि जोषयेत्तं घटादिना।
सदसद्भ्यां विभक्तोऽसौ पर्यायश्च न चानयोः॥ १०९॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

२·२५०–२५३ See वैभू 195; for 2·251 & 2·253 see लम 145 :—हरिरप्याह – "एकमाहुरनेकार्थं ... सार्वार्थ्यं तस्य भिद्यते ॥" & "सर्वशक्तेस्तु ... उपवर्ण्यते ॥" (नागेश reads उपचर्यते for उपवर्ण्यते) ... गौण-मुख्यार्थबोधकशब्द एक एव। युगपत् सर्वार्थप्रकाशनं तु न प्रकरणादि-रूपनिमित्तभेदात्। सर्वशक्तेः इत्यस्य व्याख्यानं अनेकधर्मण इति। गोशब्दो गोजातौ प्रसिद्ध इति तत्र मुख्यः, वाहीके त्वप्रसिद्ध्या गौण इति तदर्थः ॥

२·२५५ "गोत्वानुषङ्गो वाहीके ... व्यवस्थितः ॥" Quoted by कै on पा 4·1·48 thus :—'सिंहो माणवकः 'गौर्वाहीकः' इत्यादावपि ताद्-धर्म्यात् ताद्रूप्यारोपात् तच्छब्दप्रवृत्तिः। तदुक्तं हरिणा—'गोत्वानुषङ्गो...' उ ताद्धर्म्यादिति शौर्यादियोगात् माणवकवाहीकयोः सिंहत्वगोत्वारोप इति भावः। गोत्वानुषङ्ग इति गोत्वसम्बन्ध इत्यर्थः। ननु अन्यधर्मस्य अन्यत्र कथं सम्बधोऽत आह—निमित्तादिति। शौर्यादिरूपादित्यर्थः। विपर्यस्तमिति। अन्यत्र विद्यमानं अर्थरूपं अन्यत्रारोपितमित्यर्थः। स्वार्थे गोत्वे। कैश्चिदित्यस्य पातञ्जलैरित्यर्थः। नागेश quotes this कारिका on पा 8·3·82. "गामित्यादौ यथाऽऽत्त्वप्रवृत्तिः तथा ओत्सूत्रे निरूपितम्। इत एवा-स्वरसात् 'गोत्वादियोगो...' इतिरीत्या प्रातिपदिककार्येषु तन्न्यायाप्रवृत्तिं दर्शयति। (नागेश here reads गोत्वादियोगः for गोत्वानुषङ्गः). He elsewhere (लम 145) comments : नन्वेवं शब्दार्थसम्बन्धस्य अनित्यत्वं स्यादत आह—"गोत्व०..." इति। कैश्चित् शब्दार्थसम्बन्धस्य-नित्यत्ववादिभिः। निमित्तात् जाड्यादेः। शब्दस्तु गोत्वमेवाभिधत्ते गौरि-त्यत्र मुख्यं गोत्वं वाहीके तूपचरितम्। ... अर्थोऽत्र विशेष्यभूतः। स्वार्थे प्रवृत्तिनिमित्ते। ...

२·२६१ लम 1538 : केचित्तु अर्थभेदेन शब्दभेदवत् वेदमन्त्राणां विनियोगभेदेनापि भेद एव। तदुक्तं—

'अन्या संस्कारसावित्री कर्मण्यन्या प्रयुज्यते।
अन्या जपप्रबन्धेषु सा त्वेकैव प्रतीयते ॥'

(ना reads ०गायत्री for ०सावित्री; & ०प्रबन्धे सा for प्रबन्धेषु)

इति सादृश्यात् एकत्वबुद्धिरित्यर्थः। वेदे तु सर्वेषां तन्त्रेणो-च्चारणमित्याहुः ॥

२·२६२cd Quoted by लम 421 तदुक्तं— 'वाक्यरूपस्य वाक्यार्थे वृत्तिरन्याऽनपेक्षया' इति।

२·२९१ "स्पर्शप्रबन्धो ... न तथाऽलातचक्रस्य ... तत् ॥" Quoted by कै on पा 3·2·124 thus :–आशुसञ्चारात् चक्रभ्रान्तिरुत्पद्यते रूपसहचारिणस्तु स्पर्शस्य अनेकदिक्कस्य युगपदग्रहणात् अनन्यथासिद्धानुमानेन प्रत्यक्षाभासो बाध्यते। तदुक्तं हरिणा—'स्पर्शप्रबन्धो हस्तेन ..." उ रूपसहचारिणस्तु इति। शुक्लभास्वररूपव्यापकस्येत्यर्थः तमस्तु न तद्रूपवत्। स्पर्शस्य उद्भूतस्येति द्रष्टव्यम्। तेन दीपप्रभायां स्पर्शाग्रहेऽपि अनेकदिक्करूपस्य युगपद्ग्रहणेऽपि न दोषः ॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

२·३०४ ab "क्वचिद् ... अविवक्षितम् ।" Quoted by भ in शकौ on पा 2·2·5: दण्डी चित्रगुः इत्यादाविव विशेषणविशेष्यभावव्यत्यासेनैव एकार्थीभावाभ्युपगमात् । तथा च हरिणा—'क्वचित् ...' इत्युपक्रम्य ...; लम (1456) quotes this.

२·३०६ "आख्यातं तद्धितार्थस्य ... तत्र दृष्टो विपर्ययः ॥" भ in शकौ on पा 2·2·5 observes: "आख्यातं ..." इति वदता आक्षिकवैयाकरणाद्युदाहरणानि स्पष्टीकृतानि । वैभूसा 271 has this कारिका 35 of भट्टोजि दीक्षित with तद्धितकृतो॰ for तद्धितार्थस्य & ॰ भावादौ for ॰भावस्य. उ quotes this कारिका on पा 4·4·76: अर्थस्यैक्यादिति । 'वहती'त्यस्य क्रियाप्रधानत्वेऽपि विशेषणविशेष्यभावव्यत्यासेन कर्तृरूपार्थस्यैत्र सूत्रे प्रतीत्या तस्यैव तद्धितार्थत्वेन विवक्षितत्वात् इति भावः । कर्मत्वयोर्वैजात्ये मानाभाव इति तत्त्वम् । भाष्ये य एवार्थ इति । तद्धितार्थोपदर्शकविग्रहवाक्यस्य तिङन्तस्येत्यर्थः । तदुक्तं—'आख्यातं ...' इति । On पा 5·1·16 उ says: ननु अन्यनिरूपितप्रधानत्वेऽपि अन्यनिरूपितविशेषणत्वं स्यात् को विरोधोऽत आह—प्रतीतिकाल एवेति । अयं भावः—'आख्यातं ... ... विपर्ययः' इति । 'तद्वहति' इति सूत्रस्थभाष्यन्यायेन शक्योत्पत्तिकर्तृवाचकप्रथमान्तात् अस्येत्यर्थे प्रत्यय इत्यर्थो वाच्यः । तत्र च शक्यत्वं असधात्वर्थोत्पत्तिविशेषणं तस्याश्चोपस्थितिकाल एव कर्तृविशेषणतया उपस्थितेः न तत्र विशेषणान्वय इति । In लम (1456) नागेश observes: दीव्यतीत्याद्यर्थविहिततद्धितानां साधनप्रधानत्वेन सूत्रस्थे दीव्यतीत्यादौ विग्रहवाक्यस्थे च गुणप्रधानभावो विपरीतो दृष्टोऽन्यथा वृत्तिविग्रहयोः समानार्थत्वं भज्येतेति तदर्थः । ...

२·३०७cd "प्रमाणमर्धह्रस्वादावनुपात्तं प्रतीयते" ॥ The author of लघुशब्दरत्न cites part of this कारिका to support his statements thus: तदुक्तं भाष्ये 'अर्धह्रस्वशब्दोऽर्धमात्रायां रूढ' इति (See भाष्य Kiel. Vol I 208-12 'मात्रचोऽत्र लोपो द्रष्टव्यः । अर्धह्रस्वमात्रं अर्धह्रस्वमिति; See कै & ना on this) । हरिरप्याह—'प्रमाणमेव ह्रस्वादौ अनुपात्तं प्रतीयते ॥' (evidently he reads एव for अर्ध॰) अनुपात्तमपि अर्धमात्रारूपं प्रमाणमेवोपलक्ष्यते इत्यर्थे तस्य हेलाराज आह। एवं च लोकेऽन्यशाखासु च दीर्घादिष्वपि अर्धमात्रैव उदात्ता इति भावः। (हेलाराज mistaken for पुञ्जराज; he says: अत्र च अर्धह्रस्वग्रहणं अर्धमात्रालक्षणस्य प्रमाणस्योपलक्षणमिति तदेव तस्मात् प्रतीयते ...); for further merits of the controversy see p.33 of प्रौढमनोरमाशब्दरत्नम् being published by the Deccan College, Poona.

२·३१२ 'काकेभ्यो रक्ष्यतां सर्पिरिति बालोऽपि चोदितः ।
उपघातपरे वाक्ये न श्वादिभ्यो न रक्षति ॥'

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

कुमारिल in his तन्त्रवार्त्तिक on जैसू 3·1·7·14 (p. 713 of आनन्दाश्रम edition) quotes this with variants : अन्नं for सर्पिः & ०प्रधानत्वात् for ०परे वाक्ये० & further remarks : न त्विद्मत्रोदाहरणं घटते । कुतः । ...

Besides कुमारिलभट्ट, भावविवेक (circa 600 A. D.), the बौद्ध scholar, in his महायानकरतलरत्न (rendered into संस्कृत from Chinese by N. Aiyaswami Shastri of शान्तिनिकेतन and published in the विश्वभारती Quarterly, Vol. II, pp 33–99; 1949) expressly alludes to this well-known example (न्याय) of उपलक्षण thus :–

"यथा काकेभ्यो दधि रक्ष्यतामिति वचनं रक्षणीयस्य (दध्नः) अनुपघातत्वात् तज्जातीयबिडालमूषिकादीनपि प्रतिषिध्यात् ।" (p. 68). Shastri adds in his note 6 :—"Chinese will read literally thus :— भवता कर (स्थ) मिदं दधि रक्ष्यतां काको मा उपसर्पतु इति ।"

२·३१५ हरिभास्कर in his परिभाषाभास्कर (p. 325 of परिभाषासंग्रह published by BORI, 1964) on परिभाषा 9 "अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् ॥" thus refers to this कारिका :— "यथा रामलक्ष्मणौ इत्यत्र उभयोरदाशरथित्वेऽपि परस्परसाहचर्येण दाशरथ्योरेव प्रतीतिः । अत एव 'संयोगो विप्रयोगश्च साहचर्यं विरोधिता' इत्यादिभर्तृहर्युक्तिमनूद्य काव्यप्रकाशकृता साहचर्योदाहरणप्रसङ्गे 'रामलक्ष्मणौ इति दाशरथी' इत्युक्तम् । तत्र दाशरथौ इति क्वाचित्कपाठोऽपि 'प्रदीयतां दाशरथाय' इतिवत् 'तस्येदम्' (पा 4·3·120) इति अणि कृते न विरुध्यते ।

२·३१५–३१६ "संसर्गो विप्रयोगश्च ..."

"सामर्थ्यमौचिती...शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः" In the following passage of लम 1174, नागेश refers to these two oft-quoted कारिकाs :— वत्सशब्दः गोत्वसमानाधिकरणवयःप्रवृत्तिनिमित्तक एव अत एव महिष्यादावपि धेनुव्यवहारो लौकिकानाम् । अत एव हर्यादिभिः सवत्सा सकरभा अवत्सा अकरभा धेनुरिति संयोग—(लम reads संयोग for संसर्ग of our text) विप्रयोगयोरुदाहृतम् । वत्ससंयोगादिना गौः करभसंयोगादिना उष्ट्री उच्यते इति च विवृतम् (cf पुञ्जराज on these कारिकाः :—संसर्गात् यथा 'साकिशोरा धेनुरानीयता' मित्यत्र नियतेन संसर्गिणा किशोरलक्षणेन विशेषावसायनिमित्तेन वडवाया एव सम्प्रत्ययः यथा त्र 'सवत्सा धेनु' रित्यत्र वत्ससंसर्गात् गोधेनोरेव सम्प्रत्ययः इति संसर्गादर्थनिर्णयः । रूढ्या गौरेव धेनुरुच्यते इति तु येषां दर्शनं तेषामत्र संसर्गो विशेषसम्प्रत्यये नोपयुज्यते इति बोद्धव्यम् ।) नागेश else-

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

where (लम 110) comments on these two thus:—सैषा शक्तिः संयोगादिभिर्नानार्थशब्देषु नियम्यते। तदुक्तं हरिणा — "संयोगो विप्रयोगश्च...". एते संयोगादयः शब्दार्थस्यानवच्छेदे संदेहे तदपाकरणद्वारेण विशेषस्मृतिहेतवः निर्णयहेतव इत्यर्थः। उपस्थितनामनेकेषां एकतरमात्रार्थ तात्पर्यनिर्णयद्वारा तन्मात्रार्थविषयकान्वयबोधजनका इति भावः। ... अत्र सामर्थ्यमेवैकं मुख्यं निर्णायकं संयोगादयस्तद्व्यञ्जकप्रपञ्चः तैः सामर्थ्यस्य एव अभिव्यक्तेः इति परे॥

लम (1161) refers to 2-316c; भ in शकौ on पा 2·2·10 refers to 2-316 d thus: कथं तर्हि हरिस्मरणं–'विशेषस्मृतिहेतवः"

२·३१५-३१६ मम्मट in his काव्यप्रकाश (2·19) says:—

'अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम्'॥

and begins his स्वोपज्ञ on this कारिका with the two कारिकाs from वाप (2·315·6) with the reading संयोग for संसर्ग of our text; and he gives examples of each. इत्युक्तदिशा सशङ्खचक्रो हरिः अशङ्खचक्रो हरिरित्युच्यते। रामलक्ष्मणौ इति दाशरथौ। रामार्जुनगतिस्तयोरिति भार्गवकार्तवीर्ययोः। स्थाणुं भज भवच्छिदे इति हरे। सर्वं जानाति देव इति युष्मदर्थे। कुपितो मकरध्वज इति कामे। देवस्य पुरारातेरिति शम्भौ। मधुना मत्तः कोकिल इति वसन्ते। पातु वो दयितामुखमिति सांमुख्ये। भात्यत्र परमेश्वर इति राजधानीरूपाद् देशाद् राजनि। चित्रभानुर्विभातीति दिने रवौ रात्रौ वह्नौ। मित्रं भातीति सुहृदि। मित्रो भातीति रवौ। इन्द्रशत्रुरित्यादौ वेदे एव न काव्ये स्वरो विशेषप्रतीतिकृत्। आदिग्रहणात्...अभिनयादयः। इत्थं संयोगादिभिः अर्थान्तराभिधायकत्वे निवारितेऽपि अनेकार्थस्य यत् क्वचिदर्थान्तरप्रतिपादनं तत्र न अभिधा, नियमनात् तस्याः। न च लक्षणा मुख्यार्थबाधाद्यभावात्। अपि तु अञ्जनं व्यञ्जनमेव व्यापारः। ...

मल्लिनाथ (14 century A. D.) the great commentator, quotes these two कारिकाs, with the reading संयोगः for संसर्गः of our text, on शिशुपालवध (14·80) of the great poet माघ thus: रेणुकातनयतामुपागतः अयं हरिः रेणुकातनयतां परशुरामत्वमुपागतः सन्। अर्जुनः कार्तवीर्यार्जुनः। 'अर्जुनः ककुभे पार्थे कार्तवीर्यमयूरयोः' (मेदिनी) इत्यनेकार्थत्वेऽपि रेणुकेयविरोधित्वान्निश्चयः। तदुक्तं हरिणा–'संयोगो...विशेषस्मृतिहेतवः॥' इति॥

२·३२१ व्याघ्रादिव्यपदेशेन....प्रत्यवायो विधीयते॥ Quoted by नागेश on पा 6·1·84. He reads अभिधीयते for विधीयते (कै ऊर्ध्वं प्राणा इति। अर्थवादोऽयं प्रत्युत्थानप्रशंसापरः।) [उ अर्थवादोऽयमिति। प्रत्युत्थानाकरणे प्राणोत्क्रमणरूपं असन्तमपि दोषमुद्भाव्य तत्प्रशंसा क्रियते तदननुष्ठाने दोषप्रदर्शनेन तदनुष्ठानार्थम्। 'व्याघ्रादि०...अभिधीयते' इत्युक्तेः॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

२.३२६ ab 'वाक्यं तदपि मन्यन्ते यत् पदं चरितक्रियम् ।' लम 442 तदुक्तं— 'वाक्यं... ०क्रियम्' In some Mss of वाप the second half of this कारिका: 'अन्तरेण क्रियाशब्दं वाक्यादेव द्विदर्शनात् ॥' is missing, which is supplied by the comm. & which finds place in our text.

२.३२७ 'आख्यातशब्दे ... समाप्तार्थवाक्यं ...' लम 442 reads समाप्तार्थं वाक्यं ...

२.३२९ सीरदेव (12th century A. D.) in his बृहत्परिभाषावृत्ति (P. 170 of the BORI edition, 1964) on परिभाषा 9 :—"अर्थवद्ग्रहणे नानर्थकस्य" quotes this कारिका with उच्चरिते for उच्चारिते of our text thus:—"ननु कथं अतिशुनी इत्यादौ वन्शब्दस्य अनर्थकत्वमुक्तं यावता स्वरूपेण अर्थेन अर्थवत्ताऽस्त्येव । यथा 'वृद्धिरादैच्' (पा 1-1-1) इत्यत्रोक्तं संज्ञासंज्ञिसम्बन्धात् प्राक् वृद्धिशब्दस्य स्वरूपेण अर्थेन अर्थवत्त्वात् प्रातिपदिकत्वम् । तथा चाहुः ।

"यस्मिन्नुच्चारिते शब्दे यदा योऽर्थः प्रतीयते ।
तमाहुरर्थं शब्दस्य नान्यदर्थस्य लक्षणम् ॥" इति ॥

यो हि स्वरूपपरः प्रयुज्यते तस्य स्वरूपमेवार्थः तत्परत्वात्तस्य । न च अतिशुनी इत्यादौ वनाद्यो वर्णसमुदायाः स्वरूपपराः । अतिशुन्यादिसमुदायसम्पादनाय तेषामुच्चारणात् । अत एव 'अर्थवत् ...' (पा 1-2-45) सूत्रे वनं धनमित्यत्र नान्तस्यावधेरनर्थकत्वमुक्तम् ।....

२.३४२ 'क्रियाप्रधानमाख्यातं नाम्नां सत्त्वप्रधानता ।
चत्वारि पदजातानि सर्वमेतद् विरुध्यते ॥'

लम 448 refers to this कारिका thus :—

पदानामानर्थक्येऽपि 'क्रियाप्रधानं आख्यातं' 'सत्त्वप्रधानानि नामानि' 'चत्वारि पदजातानि' इत्यादि शास्त्रकृतकल्पनामात्रमेव । यथाऽसत्येनाप्यर्थेन मरीचिकाजलेन 'इदं जलमानय' इत्यादिव्यवहारो लोकानां दृश्यते तद्वत् सर्वत्रापि पदे अर्थव्यवहारे इति स्पष्टम् ॥

२.३४५ ab 'न लोके प्रतिपत्तॄणां अर्थयोगात् प्रसिद्धयः ।' लम 448 'न लोके ..' इत्यादिना हरिग्रन्थे । प्रसिद्धयः शास्त्रे इति शेषः । एतेनोच्चारितं पदं अमुकार्थान्वयित्वेन स्वार्थबोधेच्छया वक्त्रुच्चारितमिति तात्पर्यग्रहे कस्यचित् पदाध्याहारेण कस्यचित् अर्थाध्याहारेण बोध इति यथानुभवं व्यवस्था ॥

२.३४८ 'ब्राह्मणानां श्रुतिर्दध्नि ... तत्राचष्टे यथार्थताम् ॥' लम 6S! ... तत्र प्रतिषेधे द्वयी गतिः—प्रतिषेधं दृष्ट्वा पश्चादुत्सर्गस्य तद्विषयत्वाभावज्ञाने प्रामाण्यग्रह इत्येका । एवं उत्सर्गापवादस्थलेऽपि । तदुक्तं हरिणा— 'ब्राह्मणानां...' इति । 'दधि ब्राह्मणेभ्यः' इत्यादौ माठरवर्जमेव दधिदानमुपक्रान्तं उत्तरकालं 'तक्रं माठराय' इत्येतत् तस्य यथार्थत्वं गमयतीति भिन्नवाक्यतायां अप्राप्त्यनुमानं बाधः इति पुञ्जराजः ॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

२·३४९-३५० 'अनेकाख्यातयोगेऽपि...भिन्नरूपमिव स्थितम् ॥' 'नियमः प्रतिषेधश्च... तच्छेषमलुकं विदुः ॥" Quoted by कै on पा 3-4-26; भाष्य— "न विदेशस्थमिति कृत्वा अतो नाना वाक्यं भवति। विदेशस्थमपि सत् एकं वाक्यं भवति। तद्यथा। द्वितीयेऽध्याये लुगुच्यते। तस्य चतुर्थ-षष्ठयोः अलुगुच्यतेऽपवादः।" कै० न कालभेदात् नानावाक्यत्वं भवति। शास्त्रे विदेशस्थानामपि अवान्तरवाक्यानां आकाङ्क्षावशात् एकवाक्यत्व-दर्शनात्। देशग्रहणं चात्र कालस्योपलक्षणम्। शब्दक्रमस्य कालकृतत्वात्। चतुर्थषष्ठयोरिति। चतुर्थे 'गोत्रेऽलुगचि' (पा 4-1-89) इति। षष्ठे तु 'अलुगुत्तरपदे (पा 6-3-1) इति। तदुक्तं हरिणा-'अनेकाख्यात०' 'नियमः' इति। उ अनेकाख्यातयोगः 'यण् भवति' 'दीर्घो भवति' इत्यादिरूपः। न्यायः उत्सर्गः। 'विधिशेष' इति (instead of प्रतिषेध) पाठे नियमप्रतिषेधौ विधिशेषौ एव न तु स्वतन्त्रौ इत्यर्थः। तदुदाहरणमाह द्वितीये इति। 'विशेषश्च तथा' इति पाठे विशेषोऽपवादः। एतत् त्रितयं विध्येकतापन्नमित्यर्थः। Elsewhere लम 685, नागेश reads न्याय्य० for न्याय०. उत्सर्गापवादनियमनिषेधानामेकवाक्यता इत्यपरा (प्रतिषेधे गतिः)। तदुक्तं-'अनेकाख्यातं....' 'नियमः....' इति। न्याय्यः उत्सर्गः। आपाततो भिन्नवाक्यत्वावभासेऽपि सर्वस्याप्युत्सर्गस्य विशेषविधि-नियमनिषेधविध्याकाङ्क्षानियमेन तल्लाभे वाक्यैकवाक्यता तयोः। तदलाभे तु स्वार्थे एव पर्यवसानम्। एकवाक्यता च इत्थम्-यतो माठरस्य तक्रं अतस्तदतिरिक्तेभ्यो दधि इत्येव इत्यलम् ॥

२·३५९ 'एकदेशात्...अभिधायकः'; see लम 443.

२·३६२ 'तुल्यायामनुनिष्पत्तौ ज्येद्राघा इत्यसाधवः।
न ह्यन्वाख्यायके शास्त्रे तेषु दत्तादिवत् स्मृतिः ॥'

Quoted by कै on पा 5-3-84, He reads अन्वाख्यायते for अन्वाख्यायके of our text. एवं तर्हि अनुनिष्पन्नत्वात् अवयवाना-मपि संज्ञात्वम्। तत्र वर्णानां अनुनिष्पादिनां शास्त्रेण अनन्वाख्यानात् असाधुत्वम्। पदानामेव तु संज्ञैकदेशानां साधुत्वमिष्यते इति लोप-विधानद्वारेण तदभ्यनुज्ञायते। यदुक्तं-'तुल्यायां...' इति। दृष्टश्चायं लोके व्यवहारो यत् समुदायस्य संज्ञात्वे तदेकदेशः प्रयुज्यते। तत्र समुदायस्य मुख्यं संज्ञात्वं अवयवानां तु अनुनिष्पन्नम्। (कै reads देयसो for ज्येद्राघा) नागेश explains it thus:—देयसो इति। देवस्य आद्यं 'दे' इति। यज्ञदत्तस्य 'य' इति। सोमस्य 'सो' इति। तेषु वर्णेषु। दत्तादिवत् तेषु इव शास्त्रे स्मृतिः अन्वाख्यायकं वचनम्। अन्वा-ख्यायते क्रियते इत्यर्थः। तदेकदेश इति। देवदत्त 'दत्त' इत्यादौ ॥

२·३६५-३६६ "व्यवहाराय नियमः संज्ञानां...."
"वृद्धयादीनां च शास्त्रेऽस्मिन्...."

Quoted by कै on पा 4-1-162 thus:—ननु अपत्यमात्रस्य लोके गोत्रत्वात् अपत्यविशेषे गोत्रशब्दस्य नियमात् परिभाषेयं न्याय्या न तु

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

संज्ञा । नैष दोषः । लिङ्गवती परिभाषा भवति विध्यन्तरशेषभूता वा । न चेयं तथा । यथा च वृद्ध्यादयः सर्वार्थप्रत्यायनयोग्या अपि संज्ञिविशेषे शक्त्यवच्छेदकरणात् संज्ञा उच्यन्ते तथेयमपि । उक्तं च हरिणा– 'व्यवहाराय ...' & 'वृद्ध्यादीनां ....' उ नियमादिति । अनियमे नियमकारिणी परिभाषा इति भावः । लिङ्गवतीति यथा 'इको गुणवृद्धी' इति । विध्यन्तरेति यथा 'विप्रतिषेधे परम्' इति ।...व्यवहारायेति । क्वचित् संज्ञिनि संज्ञानां नियमो व्यवहाराये 'ति अन्वयः । ननु विधिरेव किं न स्यादत आह – नित्य एव त्विति । डित्थादिषु डित्थादिपदानां नित्य एव सम्बन्धो यथा गवादिपदानां गवाद्यर्थे इत्यर्थः । अस्मिन् शास्त्रे व्याकरणे वृद्ध्यादीना शब्दानां शक्तिसंकोचलक्षणो नियमो व्यवहारायेत्यन्वयः । तत्र हेतुः– अकृत्रिमेति कृत्रिमत्वं आधुनिकत्वमिति भावः । यथा गुणद्रव्ययोः गुणे विशेषणत्वं द्रव्ये विशेष्यत्वं अकृत्रिमं अनादिसिद्धमेव न त्वाधुनिकं तद्वत् संज्ञासंज्ञिसम्बन्धोऽकृत्रिम एवेत्यर्थः । परे तु–कारिकायां नियमः शक्तिबोधनं शक्तिस्तु नित्या इत्याह नित्य एवेति । एवं च गोत्रशब्दस्य अनेकेषु अर्थेषु शक्तिरस्त्येव तद्बोधनफलकं शास्त्रं अज्ञातशक्तिबोधकत्वात् - कैयटोक्तनियमत्वानुपपत्तेः वृद्ध्यादिष्वपि एवमेवेत्याह –'वृद्ध्यादीनां च' इत्यर्थमाहुः [अत्र यद् वक्तव्यं तत् वृद्धिसूत्रे शब्देन्दुशेखरे शक्तिवादे मञ्जूषायां च विस्तरेण निरूपितम् । These two oft-quoted कारिकाs are referred to by भ in शकौ (p 21) thus : उक्तं च– 'व्यवहाराय...'; 'वृद्ध्यादीनां...' पक्षद्वयेऽपि अनुशासनविषयता निर्विवादा इति । also on p. 69, where he observes :—गौणमुख्यविभागोऽपि प्रसिद्ध्यप्रसिद्धिनिबन्धन एव । गाव्यादीनामसाधुताऽपि संकेतविरहे सत्येव । अत एव प्रसिद्धेऽपि पक्षे गोण्यादीनां गोण्यां साधुत्वमस्त्येव इत्यन्यत्र विस्तरः । उक्तं च–'व्यवहाराय...' & 'वृद्ध्यादीनां...' वस्तुतस्तु साध्वसाधुबहिर्भावपक्षेऽपि एषां अनुशासनविषयताऽस्त्येव इति पस्पशायां साधुत्वनिर्वचनप्रसङ्गेन उपपादितम् । 2·365 ab quoted by भ in शकौ (p. 276) with संज्ञायाः for संज्ञानाम्; similarly लम 94 reads the two कारिकाs with the same variant & comments thus :— यत्तु 'व्यवहाराय ...' 'वृद्ध्यादीनां ...' तत् तत्र संकेते कृते तत्तत्संकेतज्ञानरूपप्रकरणवशात् तस्यैवोपस्थितिर्नान्यस्येति फलितनियमपरम् । तदेतत् विशेषणविशेष्यवत् इत्यनेन सूचितम् । .... पाणिन्युपदेशादिरूपसंकेतग्राह्यत्वात् तत्संज्ञात्वस्य संज्ञानामनित्यत्वव्यवहारोऽपि ॥

२·३८२ 'वृषलैर्न प्रवेष्टव्यमित्येतास्मिन् गृहे यथा ।
प्रत्येकं संहतानां च प्रवेशः प्रतिषिध्यते ॥'

Quoted by कुमारिल in his तन्त्रवार्त्तिक on जैसू 3·1·7·14 (p. 714 of आनन्दाश्रम edition), with (b) to be read as गृहेऽस्मिन्निति चोदिते, thus : इह तु

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

'संख्यामात्रविवक्षायां लोके यच्छ्रूयते वचः ।
तदुदाहरणं देयं वृषलस्थबहुत्ववत् ॥
वृषलैर्न प्रवेष्टव्यं गृहेऽस्मिन्निति चोदिते ।
प्रत्येकं संहतानां च प्रवेशः प्रतिषिध्यते ॥'
बहुत्वस्याविवक्षितत्वात् ।

२·४०४ 'आम्नायशब्दानभ्यासे...परेषां प्रतिपादने ॥'

लम 1152 reads शिष्याणां for परेषाम्. आम्नायशब्दानां स्वरवर्णानुपूर्वीदेशकालनियतत्वात् । तस्य क्वचिदभावेन न स तत्र हेतुरिति तदाशयः । यद्यपि 'आम्नायशब्दान्...' इति तत्रापि अर्थे तात्पर्याभावमात्रं तत्र देशकालादिनियमस्तु तत्राप्यस्त्येवेति बोध्यम् ॥

२·४१० 'यथैवानर्थकैर्वर्णैः ... . विशिष्टार्थोऽभिधीयते ॥'

'नहि किञ्चित् पदं नाम रूपेण नियतं क्वचित् ।
पदानामर्थरूपं च वाक्यार्थादेव जायते ॥' इति ॥

लम 412 quotes these two together, but the second is not found in the वाक्यपदीय. स्वोपज्ञ on वाप 1·26 (चारुदेव edition, p. 42) observes:— संग्रहेऽप्युक्तं— 'न हि किञ्चित् ... पदानां रूपमर्थो वा ... जायते ॥' लम comments :— 'त्वं ग्राममश्वः' 'अश्वो गच्छति;' 'अजापयः शत्रून्' 'अजापयः पिब' इत्यादौ नामाख्यातसारूप्ये वाक्यार्थादेव पश्चात् पदपदार्थनिर्णय इत्यखण्डमेव वाक्यं बोधकमखण्डार्थस्येत्युचितम् । तदुक्तं—'यथैव...' 'न हि किञ्चित् ...'। वाक्येऽखण्डत्वं च अपृथगुपस्थितिजनकत्वम् । अपृथगुपस्थितिविषयत्वं च अर्थे अखण्डत्वम् । पदानां केवलानां पृथगुपस्थापकत्वं वृत्तिघटकानां अपृथगुपस्थापकत्वमिति तु शास्त्रकृत्कल्पनैव। यदपि केवलं पदं सदित्यादि प्रयुज्यते तदप्यन्ततोऽस्तिक्रियाघटितार्थबोधकमिति तदपि वाक्यमेव । साधनस्य साध्यक्रियाऽऽकाङ्क्षत्वात् । साध्यक्रियायां च साधनाकाङ्क्षत्वात् ॥

२·४४४ 'बहुष्वपि तिङन्तेषु...' वैभू 65 quotes this.

२·४४९ 'चङ्क्रम्यमाणोऽधीष्वात्र...' Quoted by कै on पा 1·4·24 ध्रुवमपायेऽपादानम्, thus : एवं तर्हि वस्तुस्थित्या अत्र (भाष्ये—ग्रामादागच्छन् कंसपात्र्यां पाणिना ओदनं भुङ्क्ते) आगमनं प्रधानं तदङ्गं तु भोजनम् । शब्दात्तु विपरीतो गुणप्रधानभावः प्रतीयते । तदुक्तं हरिणा—'चङ्क्रम्यमाणः ..' उ वस्तुस्थित्येति । भोजनस्य आगमनोद्देश्यकत्वात् आर्थिकं प्राधान्यमिति भावः । 'अधीयंश्चङ्क्रमणं' इति पाठे 'इङ्धार्योः शत्रकृच्छ्रिणी' ति (पा 3·2·130) इति शता इत्यन्ये । Elsewhere लम 1081-82 says :—तत्र शतृशानजन्तार्थस्य आख्यातार्थक्रियाविशेषणत्वमित्यर्थः ।.... हरिरप्याह—'चङ्क्रम्यमाणः ...'। अध्ययनमत्र जपः । उभयत्रापि जपस्यैव विधिः । शब्देन तु आद्ये जपस्य प्राधान्यं अन्ते तस्य गुणभाव इति तदर्थः । ...

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

२·४५१ 'निवृत्तभेदा सर्वैव...प्रविभागप्रकल्पना ॥' Quoted by कै on पा 3·1·67, who observes:—इह क्रियाप्रधानमाख्यातं सा च क्रिया साध्यरूपत्वात् निवृत्तभेदा। तदुक्तं-'निवृत्तभेदा सर्वैव...'. उ ननु भावस्य क्रियारूपस्य संख्ययाऽयोगात् न द्विवचनादिकं भविष्यति। कर्मणि तु शक्तिशक्तिमतोरभेदोपचारात् शाक्तिमतश्च संख्यायोगात् द्विवचनादिकं सेत्स्यतीत्यत आह-इहेति। श्रुतेरिति। साधनादिभेदात् भिन्नत्वेऽपि श्रुतेः आख्यातशब्दात् प्रविभागकल्पना भेदावगमरूपाऽशक्येत्यर्थः॥

२·४५६,६५८ भूवादयो धातव इत्यादौ प्रत्येकं धातुत्वपर्याप्तिबोधनाय बहुवचनम्। हरिरप्याह-'एकं ग्रहणकं वाक्यं...' 'एकरूपमनेकार्थं...'; ग्रहणकवाक्यत्वाभावे यत् किञ्चिद्योगेन परिक्षीणशक्तित्वात् अन्येन प्रत्ययविधायकेन कर्तरि कृदित्यादि न सम्बध्येत अत एव पशौ कर्तरीत्यादि उपपद्यते। उपनिबन्धनं बहूनां वाक्यानां निबन्धनं स्थानं तेभ्यो विभागवाक्येभ्यः अनेकार्थं यथा ण्वुल् कर्तरि, अण् कर्तरि इत्याद्यनेकार्थबोधकमित्यर्थे पुञ्जराजः॥ (लम 1367)

२·४६६ ab लम 1405 reads (b) in हरिरपि-'भेदसंसर्गशक्ती द्वे शब्दाद् भिन्ने इव स्थिते।' as शब्दस्यैते व्यवस्थिते। & observes: भेदशक्त्या पृथग्भानं संसर्गशक्त्या एकभानं इति तदर्थः।

२·४७७,४७८ 'संप्रसारणसंज्ञायां ... एकस्मिन्नेव कल्पते॥' 'तथा द्विर्वचनेऽचीति... एवोपवर्णितः॥' (v. l. जायते for कल्पते; & समर्थितः for उपवर्णितः). Quoted by भ in शकौ (p. 187) thus:—आह च-विभक्तिविशेषनिर्देशस्तु ज्ञापक उभयसंज्ञात्वस्येति उभयोः संज्ञा इति षष्ठीतत्पुरुषः। भर्तृहरिश्चाह-'संप्रसारणसंज्ञायां....' & 'तथा ... तन्त्रोपायादिलक्षणः। ...' तन्त्रं च शब्दतन्त्रं अर्थतन्त्रं वा इति मतभेदेन व्यवस्था बोद्धव्या॥

२·४८१ 'वैजिसौभवहर्यक्षैः शुष्कतर्कानुसारिभिः।
आर्षे विप्लाविते ग्रन्थे संग्रहप्रतिकञ्चुके॥'

It would appear that शंकराचार्य when commenting upon ब्रसू 2·1·11 तर्काप्रतिष्ठानादप्यन्यथाऽनुमेयं ... had before him वाप 2·481 along with वाप 1·34:

"अथ कस्यचित् प्रसिद्धमाहात्म्यस्य कपिलस्य चान्यस्य वा संमतस्तर्कः प्रतिष्ठित इत्याश्रीयेत एवमप्यप्रतिष्ठितमेव। प्रसिद्धमाहात्म्यानुमतानामपि तीर्थकराणां कपिलकणभुक्प्रभृतीनां परस्परविप्रतिपत्तिदर्शनात्। ... ... न हीदमतिगम्भीरं भावयाथात्म्यं मुक्तिनिबन्धनं आगममन्तरेण उत्प्रेक्षितुमपि शक्यम्। रूपाद्यभावाद्धि नायमर्थः प्रत्यक्षगोचरः। लिङ्गाद्यभावाच्च नानुमानादीनाम्। ... ... Mark the phrase शुष्कतर्क & the word आर्ष in contrast.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

३·१·१ सर्वदर्शनसंग्रह (XIII lines 117–122) quotes वाक्यपदीय (3·1·1) in this way :—" ननु नामाख्यातभेदेन पदद्वैविध्यप्रतीते कथं चातुर्विध्यमुक्तमिति चेत् । मैवम् । प्रकारान्तरस्य प्रसिद्धत्वात् । तदुक्तं प्रकीर्णके (तृतीयकाण्डे of वाक्यपदीय) :—' द्विधा कैश्चित्पदं भिन्नं चतुर्धा पञ्चधाऽपि वा । अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत् ॥ ' इति कर्मप्रवचनीयेन वै पञ्चमेन सह पदस्य पञ्चविधत्वमिति हेलाराजो व्याख्यातवान् । ...

३·१·३–४ तदुक्तं हरिणा —' केषांचित् ... खदिरादिषु ... शक्तः प्रतिनिर्धायते ॥ '
' अस्वातन्त्र्यफलो वन्धिः प्रमाणादीव ... ॥ '

लम 520 reads खादिर० for खदिर०, जातिः for शक्तः; वन्धः for वन्धिः & प्रमाणादौ च for प्रमाणादीव केषांचित् जातिशक्तिवादिनाम् । प्रमाणं हिंसा। शुद्धव्यक्तिशक्तिवादेऽपि वस्तुगत्या जातिशक्तिविशिष्टा केवला व्यक्तिः शक्येति न दोष इति वोध्यमित्याहुः ॥

३·१·९ ab, ११,१४ ab अभिनवगुप्त in his ईप्रविवि (Vol II pp 28-29) quotes these कारिकाs, thouhg not in the same order thus :—

" जातिष्वपि वा व्यक्तितया स्वातन्त्र्येण स्पृष्टासु जातिरपरा संभवत्येव आत्मादिविकल्पेषु इव आद्यन्तरम् । तथाह तत्रभवान्

' अनुप्रवृत्तिधर्मो वा जातिः स्यात् सर्वजातिषु । ' इति (वाप 3·1·14ab)

' जातिशब्दैकदेशे सा जातीनां जातिरिष्यते । ' इति (वाप 3·1·9 ab)

' अर्थजात्यभिधानेऽपि सर्वे जात्यभिधायिनः ।
व्यापारलक्षणा यस्मात् पदार्थाः समवस्थिताः ॥ ' इति च
(वाप 3·1·11)

And again अभिनवगुप्त in his ईप्रविवि (Vol II, p 293) quotes वाप (3·1·11 cd) thus :—

' न हि अत्र विशेषो विधिप्रतीतावेव सामान्येन भवितव्यं ननु निषेधप्रतीताविति । आभासवस्तुवादो हि अयं ततश्च कणादप्रक्रिया न अवश्यमत्र प्रमाणीकर्तव्या " अभावे चेत् सामान्यं समवेयात् भावरूपता अस्य प्रसज्येत " इत्यादिः । तदुक्तं तत्रभवता ' व्यापारलक्षणा यस्मात् पदार्थाः समवस्थिताः ॥ ' इति ।

३·१·११ कमलशील in his पञ्जिका on शान्तरक्षित's तत्त्वसंग्रह (1132) :

" जातिर्भावश्च सामान्यमिति वा तेषु संमतम् ।
न सामान्यानि युज्यन्ते सामान्येष्वपराणि हि ॥ "

comments thus in refuting भर्तृहरि's argument in कारिका (3·1·11) :— " न सामान्यानि ... अपराणि इति ' निःसामान्यानि सामान्यानि ' इति सिद्धान्तात् । एतच्च वैशेषिकसिद्धान्ताश्रयेणोक्तम् ।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

यदा तु सामान्येष्वपराणि सामान्यानीष्यन्ते वैयाकरणैः यथोक्तं— 'अर्थजात्यभिधानेऽपि .... समवस्थिताः ...' न हि शास्त्रान्तरपरिदृष्टा जातिव्यवस्था नियोगतो वैयाकरणैरभ्युपेतव्या। प्रत्ययाभिधानान्वय-व्यापारकार्योन्नीयमानरूपा हि जातयो न हि तासामियत्ता काचित्। अतो यच्चोदितकार्यदर्शनात् सामान्याधारा जातिः सती जातय इत्यस्याः श्रुतेर्निबन्धनमिति। व्यापारलक्षणा इति अभिधानप्रत्ययव्यापारतो व्यवस्थित-लक्षणा इत्यर्थः, तदाऽनन्तरोक्तमेव दूषणम् 'सामान्यस्य...' (1131)॥

'अर्थजात्यभिधानेऽपि सर्वे जात्याभिधायिनः।.... लम 472 जात्याभिधायिनः जातिविशिष्टवाचकाः। व्यापारलक्षणाः प्रयोजनज्ञाप्याः। शब्दस्यान्वयिरूपं अनवच्छेदकीकृत्य अप्रत्यायकत्वात्॥

३·१·१५ 'संयोगिधर्मभेदेन ... आकाशस्यापि विद्यते॥' लम 471 reads ०द्रव्य० for ०धर्म०; सा च जातिः सर्वत्र। आकाशजातिसमवायादेरपि औपाधिकानेकत्वात्। तदुक्तं हरिणा— 'संयोगिद्रव्यभेदेन...'। आकाशे-त्युपलक्षणम्॥

३·१·३२ अभिनवगुप्त in his ईप्रविवि (Vol III p. 130) cites this कारिका with भागौ for भावौ (which i. e. भागौ seems to be the correct reading) and स्थिताः for स्मृताः; तात्त्विक इति मायीया-भिमानमात्रकृतस्तु भेदः पूर्णस्वात्मरूपाख्यानमात्रसार इति यावत्। तदाह

"सत्यासत्यौ तु यौ भागौ ... ...।
... ... असत्या व्यक्तयः स्थिताः॥" इति।

'सत्यासत्यौ तु यौ भावौ प्रतिभावं ...' This is कारिका 73 of भट्टोजि दीक्षित, who reads भागौ for भावौ perhaps correctly; see वैभूसा 438.

३·१·३३–३४ सर्वदर्शनसंग्रह (XIII lines 197–227) quotes these two कारिकाs in the following context :—

"यदि सत्तैव सर्वेषां शब्दानामर्थः तर्हि सर्वेषां शब्दानां पर्यायता स्यात् ... इति चेत् ... नीललोहितपीताद्युपरञ्जकद्रव्यभेदेन स्फटिकमणेरिव सम्बन्धिभेदात् सत्तायाः तदात्मना भेदेन प्रतिपत्तिसिद्धौ गोसत्तादिरूप-गोत्वादिभेदनिबन्धनव्यवहारवैलक्षण्योपपत्तेः। ... तया हरिणाऽप्युक्तम्— "सम्बन्धिभेदात् सत्तैव ... सर्वे शब्दा व्यवस्थिताः॥"

"तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः॥"

आश्रयभूतैः सम्बन्धिभिर्भिद्यमाना कल्पितभेदा गवाश्वादिषु सत्तैव महा-सामान्यं जातिः। गोत्वादिकमपरं सामान्यं परमार्थतस्ततो भिन्नं न भवति। गोसत्तैव गोत्वं नापरमन्वयि प्रतिभासते। ... ...

एवं च तस्यामेव गवादिभेदभिन्नायां सत्तायां जातौ सर्वे गोशब्दादयो वाचकत्वेन व्यवस्थिताः। प्रातिपदिकार्थश्च सत्तेति प्रसिद्धम्। "तस्य भावः

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

त्वतलौ ” (पा 5·1·119) इति भावार्थे त्वतलादीनां विधानात् सत्ता-वाचित्वं युक्तम् । सा च सत्ता उदयव्ययवैधुर्यात् नित्या । सर्वस्य प्रपञ्चस्य तद्विवर्ततया देशतः कालतः वस्तुतश्च परिच्छेदराहित्यात् सा सत्ता महानात्मा इति व्यपदिश्यते इति कारिकाद्वयार्थः ॥

‘ सम्बन्धिभेदात् सत्तैव… ’
‘ तां प्रातिपदिकार्थं च … ’

भ in शकौ on पा 2-3-14 says:—प्रातिपदिकार्थः सत्ता । उक्तं हि “ तस्यां सर्वे शब्दा व्यवस्थिताः ॥ ” … उच्चैः । नीचैः । अत्र हि परिमाण-विशेषोपहितं सत्तामात्रं प्रतीयते इत्याहुः । अन्ये तु नियतोपस्थितिकः प्रातिपदिकार्थ इत्याहुः । भ in शकौ (p. 9) quotes these कारिकाs & observes:—जातेश्च ब्रह्मात्मकत्वमुक्तं हरिणा । see वैभू 219,258; वैभूसा 348.

३·१·३३-३६ महेश्वर in his निरुक्तभाष्यटीका on निरुक्त (1·3): ‘ षड् भावविकाराः …’ refers to, or at least has before his mind's eye, these four कारिकाs of वाप:—“अन्येषां दर्शनम्—भावः सत्ता महासामान्यम् । तथा च प्रयोगः ‘ न द्रव्यं न कर्म न गुणो वा भावः ’ इति । अत्र द्रव्यादि-व्यतिरिक्ता सत्तेत्यर्थः । सा च सत्ता कैश्चित् परमात्मत्वेनाध्यवसिता । ‘ स एष महानात्मा सत्तालक्षणः ’ ‘ तत् परं ब्रह्म ’ इति ब्रह्मवादिभिः । सा चैकापि सती नित्यापि वाऽसत्यैः शब्दमाहात्म्यनिवन्धनैः व्यवहारानुवादिभिः ‘जायते ’शब्दादिवाच्यैः अवस्थाभेदैराविष्टेव अनुगतेव… सोऽयं सत्तालक्षण आत्मा…. जन्यादिभिरभिधेयत्वेन विषयीक्रियते इति ।

३·१·३५ ‘ प्राप्तक्रमा विशेषेषु … … ’
Quoted by भ in शकौ on पा 1·3·1 thus:— जातिसमुद्देशेऽपि सम्बन्धिभेदात् सत्तैव ’ (वाप ३·१·३३) इत्युपक्रम्योक्तं ‘ प्राप्तक्रमा …’ (He reads प्राप्तक्रमावशेषेषु) इति । व्यापारविशेषाणां साध्यत्वात् क्रमिकत्वाच्च तदुपहितायास्ते भवत इत्यर्थः ।

३·१·३७ ‘ आत्मभूतः क्रमोऽप्यस्या …. स्थितम् ॥ ’
लम 556 अस्तिभवतिविद्यतीनां अर्थः सत्ता । अनेककालस्थायिनीति काल-गतपौर्वापर्येण क्रमवतीति तस्याः क्रियात्वम् । तदुक्तं हरिणा— ‘ आत्मभूतः … ’। अस्याः क्रियायाः यत्र क्रियायाम् । कालदर्शनम् कालगत-पौर्वापर्यस्य तत्रारोपः इति हेलाराजः । यद्वा सत्ताविषयव्यापारार्थकत्वेन क्रियावाचकत्वनिवन्धनधातुत्वसिद्धिः । (हे० तात्पर्येण तु कालः पौर्वा-पर्यादिरूपेण प्रविभक्त इव क्रियोपाधिवशात् । …)

३·१·३८ ‘ तिरोभावाभ्युपगमे…’ See वैभू 99 and वैभूसा 152.

३·१·४४ ‘ ब्राह्मणत्वादयो भावाः सर्वप्राणिष्ववस्थिताः ।
अभिव्यक्ताः स्वकार्याणां साधका इत्यपि स्मृतिः ॥ ’

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

लम 484 reads सर्वत्रैव च ते स्थिताः for (b) & इति च for इत्यपि

यत्रैव उपदेशादिना अभिव्यक्ताः तत्रैव स्वकार्यसाधकाः। प्रतिनियत-व्यञ्जकव्यङ्ग्यत्वादिति भावः॥

३·१·४५ 'चित्रादिष्वपि...' लम 482–483 आकृतिस्तु यत्र संभवति तत्रैव।... 'पिष्टकमय्यो गावः' इत्यादौ आकृतिरेव। वस्तुतस्तत्रापि जातिः। प्राण्याश्रितत्वेनाभिव्यक्ता तु पुण्यपापसाधनम्। तदुक्तं हरिणा—'चित्रादिषु...' चित्रादीत्यादिना प्रतिमाः। प्राण्याश्रिता इति प्राणपदं कृतदेवताऽऽवाहनप्रतिमोपलक्षणम्। विसर्जने तु कृते ता न पुण्यपापसाधनम्॥

३·१·४६ 'ज्ञानं त्वस्मद्विशिष्टानां तासु सर्वेन्द्रियं विदुः। अभ्यासान्मणिरूप्यादिविशेषेष्विव तद्विदाम्॥' लम 963 reads ज्ञानमस्मद्० for ज्ञानं त्वस्मद्० सर्वं for तासु; ०रूपे० for ० रूप्य०. न च योगिसत्त्वे न मानम्। श्रुतेर्मानत्वात्। तदुक्तं हरिणा—'ज्ञानं तु...'। अस्मद्विशिष्टानां ईश्वरस्य योगसिद्धानां पतञ्जल्यादीनां च। ईश्वरसत्त्वे च त एव मुनयः प्रमाणम्। तत्र तेषां ज्ञानं सर्वं सर्वेन्द्रियसाध्यम्। 'घ्राणतः शब्दं शृण्वन्ति, पृष्ठतो रूपाणि पश्यन्ति' इति श्रुतेः (untraced)। यथा रूपपरीक्षकाणां अभ्यासातिशयात् मणिरूपातिशयप्रकाशः तद्वत् योगाभ्यासबलाद् योगिनाम्। ईश्वरस्य स्वत एवेति नान्धपरम्परा इति तदर्थः।

३·१·५१ ab अभिनवगुप्त in his ईप्रविवि (Vol. III p. 64) cites this श्लोकार्ध with the following remarks:—

'एवं त्रय इत्यादौ परार्धान्ते परम्परावच्छेदेन तदुपयोगो बहुशाखो मन्तव्यः। तत्र च आश्चर्यानाश्चर्यहर्षविषादाद्यर्थक्रियासहस्रसंभेदः। तत एव सम्यगिति प्राधान्येन चेद् भावस्याख्यानं तदवश्यमागच्छति स्वरूपस्य आभासान्तरेण अपेक्ष्यमाणेन अनपेक्ष्यमाणेन वा छेदः। तत उच्यते।

"न विना संख्यया कश्चित् सत्त्वभूतोऽर्थ उच्यते।" इति। तत्र तु प्रातिपदिकार्थस्य संख्याभास उपसर्जनभावं प्रतिपद्यते। विभक्त्यर्थस्य हि स्वभावोऽयं यत् प्रातिपदिकार्थे गुणीभावः।

३·१·५५ हरिरप्याह–'यजेत पशुनेत्यत्र...'. लम 1356 न केवला प्रकृतिरिति न्यायात्। विभक्तेः संस्कारार्थं सम्भवेऽपि जातिवत् एकत्वमपि क्रियासाधनं विशिष्टस्यैवोपस्थितेः इत्यर्थः इति हेलाराजः॥

३·१·५८-५९ see वैभू 230.

३·१·६२-६५ see वैभू 227.

३·१·१०४ अभिनवगुप्त in ईप्रविवि (Vol. I p. 277) quotes 1st half of this कारिका with the 2nd half reading differently thus:—

"... इत्याशयेन सौगतीयमभावसिद्धिप्रकारमेव विचारयति। तत्र ज्ञानं स्वप्रकाशैकरूपमिति उपपादितमसकृत्। यथाह तत्रभवान्

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

'यथा ज्योतिः प्रकाशेन नान्येनाभिप्रकाश्यते ।
ज्ञानरूपं तथा ज्ञाने नान्यत्राभिप्रकाश्यते ॥' इति ।

ततश्च ज्ञानान्तरेण एकज्ञानसंसर्गयोग्यं न भवति येनैवमुच्येत यदि द्वे ज्ञाने भवेतां तद्द्विज्ञानज्ञानं तृतीयं भवेत् । इदं तु एकज्ञानज्ञानं तस्मात् न द्वे ज्ञाने स्त इति ॥ (Our text reads (b): ज्ञानाकारस्तथाऽन्येन न ज्ञानेनोपगृह्यते ॥ which in substance means the same thing.)

३·१·१०५ अभिनवगुप्त in ईप्रविवि (Vol. II p. 53) quotes this कारिका thus:—

"घटे मम अनुभवोऽभूदित्यपि कथने घट एव वेद्यः । यथाह तत्रभवान्
'घटज्ञानमिति ज्ञानं घटज्ञानविलक्षणम् ।
घट इत्यपि यज्ज्ञानं विषयोपनिपाति तत् ॥'" इति ।

३·२·१ Quoted by अभिनवगुप्त (1014 A. D.) in his ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी (Vol. I p. 41): "ननु सूत्रे स्वात्मनि इति शुद्धमुपात्तं वृत्तौ तु सर्वेषामिति सम्बन्धिपदं यदुक्तं तत् कुत आनीयेति आशङ्कमान आह 'स्व' इति । आत्मशब्दोऽपि यद्यपि

'आत्मा वस्तु स्वभावश्च शरीरं तत्त्वमित्यपि ।
द्रव्यमित्यस्य पर्यायास्तच्च नित्यमिति स्मृतम् ॥' (वाप 3-2-1)

इतिदृष्ट्यां स्वभाववाची सम्बन्धिशब्दः तथापि वैशेषिकादिदृशि स्वतन्त्र एव आत्मपदार्थ इति शङ्केतापि । स्वशब्दोपादाने तु स्वभाववचनता अस्य गम्यते । ... and again thus (on pp. 47–48 Vol. I):

ननु आत्मशब्द एव
'आत्मा वस्तु स्वभावश्च ...' इति स्थित्या

स्वभाववाची व्याख्यायिष्यते किं स्वग्रहणेनेति । आह — स्वशब्दः इति । शास्त्रतस्तावत् काणादिदर्शनप्रसिद्ध एव आत्मा लभ्यते । लोकेऽपि स्वभावो नीलादीनां नीलादिरूपतैव आत्मेति प्रसिद्धः नीलमात्मना अर्थक्रियाकारिणा सत् न पररूपेणेति तदुभयमपि स्वशब्देन अव्यभिचरणीयं प्रतिष्ठास्थानत्वात् अपर्यनुयोज्यं स्वं रूपमभिदधता निरस्यते ।

अभिनवगुप्त in ईप्रविवि (Vol III pp 78-9) observes, while quoting part of this कारिका:— "वस्तु इति प्रधानं द्रव्यम् । भवति इति विधेयं वस्तु अपेक्ष्य स्थित्या निर्देशः । एवमुत्तरत्र विशेषणमपेक्ष्य । ... अत्र इति तु विशेष्यप्रधानभूतद्रव्यवाची । यथा पूर्वमुक्तं— 'किञ्चित् वस्तु भवाति' इति । 'आत्मा वस्तु स्वभावश्च शरीरम्' इति च ।

"आत्मा वस्तु स्वभावश्च शरीरं तत्त्वमित्यपि ।
द्रव्यमित्यस्य पर्यायास्तच्च नित्यमिति स्मृतम् ॥"

together with वाप (3·2·11):—

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

" सत्यमाकृतिसंहारे यदन्ते व्यवतिष्ठते ।
तन्नित्यं शब्दतत्त्वं तत् शब्दतत्त्वं न भिद्यते ॥ "

वाचस्पतिमिश्र (850 A. D.) in his भामती on ब्रसू (2·2·8) शांभा indirectly refers to these two कारिकाs, when he quotes the following श्लोकार्ध ' नित्यं तमाहुर्विद्वांसो यः स्वभावो न नश्यति ॥ ' (source untraced) & the following from महाभाष्यः— ' तदपि नित्यं यस्मिन् तत्त्वं न विहन्यते '. The untraced quotation is twice referred to, before वाचस्पतिमिश्र, by कमलशील in his पञ्जिका on शान्तरक्षित's तत्त्वसंग्रह (texts 347 and 1796) thus:— ' किमसौ पुद्गलाख्यस्य वस्तुनः स्वभावः सर्वदाऽस्ति आहोस्वित् नास्तीति । यद्यस्ति तदा नित्य एवासौ । न हि नित्यो नामान्य एव कश्चित् । अपि तु यः स्वभावः सदाऽवस्थायी न विनश्यति स नित्य उच्यते । यथोक्तं - ' नित्यं तमाहुः ... ' इति । अथ नास्तीति पक्षः तदापि अनित्य एवासौ अनवस्थायिस्वभावलक्षणत्वादनित्यस्य । ' and again : " .... अन्यथा यदि प्रागूर्ध्वं च निःस्वभावता न स्यात् तदा सर्वस्य संस्कृतस्य नित्यता प्राप्नोति स्वभावस्य सर्वदा व्यवस्थिततत्वात् । न च सदासत्त्वव्यतिरेकेण नित्यत्वलक्षणमस्ति । यदाह - " नित्यं तमाहुः ... " इति ॥

३·२·२·३ सर्वदर्शनसंग्रह (XIII lines 228-236) refers to these कारिकाs thus :— " द्रव्यपदार्थवादिनोऽपि नये संविल्लक्षणं तत्त्वमेव सर्वशब्दार्थ इति द्रव्यसमुद्देशे (वाप ३·२) समर्थितम्—

' सत्यं वस्तु तदाकारैरसत्यैरवधार्यते ।
असत्योपाधिभिः शब्दैः सत्यमेवाभिधीयते ॥ '
' अध्रुवेण निमित्तेन देवदत्तगृहं यथा ।
गृहीतं गृहशब्देन शुद्धमेवाभिधीयते ॥ ' इति ॥

भाष्यकारेणापि ' सिद्धे शब्दार्थसम्बन्धे ' इत्येतद्वार्त्तिकव्याख्यानावसरे ' द्रव्यं हि नित्यम् ' इत्यनेन ग्रन्थेन असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्द-वाच्यं सर्वशब्दार्थ इति निरूपितम् ।....

' अध्रुवेण निमित्तेन ... शुद्धमेवाभिधीयते ॥ '. लम 1119 तदुक्तं —

' आनन्त्येऽपि हि भावानां एकं कृत्वोपलक्षणम् ।
शब्दः सुकरसम्बन्धो न च व्यभिचरिष्यति ॥ ' इति

(तन्त्रवार्त्तिक of कुमारिल, p. 678 of आनन्दाश्रम edition) । हरिरप्याह– ' अध्रुवेण ... '. शुद्धमेव न तु उपलक्षणीभूतकाकविशिष्टमित्यर्थः । तथाऽसत्योपाध्युपलक्षितं सत्यं उपाध्यनादरेणैव शब्दैरभिधीयते इति हेलाराजः ॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

३·२-१२ मेधातिथि (825-900 A. D.) in his भाष्य on मनु (12-118)

"सर्वमात्मनि संपश्येत् सच्चासच्च समाहितः।
सर्वं ह्यात्मनि संपश्यन् नाधर्मे कुरुते मनः॥"

quotes वाप 3·2·12 thus :—

'तानि च वाक्यानि प्रतिशाखं सर्वोपनिषद्भ्योऽवगन्तव्यानि। प्रमाणान्तराणामपि एकत्वप्रतिपादनपरत्वात् ... उक्तं च वाक्यपदीये 'न तदस्ति न तन्नास्ति ...'

३·२·१५,१६ सर्वदर्शनसंग्रह (XIII lines 257-267) quotes these two कारिकाs thus : – द्रव्यसमुद्देशेऽपि (वाप ३·२)

"विकारापगमे सत्यं सुवर्णं कुण्डले यथा।
विकारापगमो यत्र तामाहुः प्रकृतिं पराम्॥" इति॥

अभ्युपगताद् द्वितीयनिर्वाहाय वाच्यवाचकयोरविभागः प्रदर्शितः—

"वाच्या सा सर्वशब्दानां शब्दाच्च न पृथक् ततः।
अपृथक्त्वे च सम्बन्धस्तयोर्नानात्मनोरिव॥"

(सदसं reads अपि for च and जीवात्मनोः for नानात्मनोः). तत्तदुपाधिपरिकल्पितभेदबहुलतया व्यवहारस्य अविद्यामात्रकल्पितत्वेन प्रतिनियताकारोपधीयमानरूपभेदं ब्रह्मतत्त्वं सर्वशब्दविषयः। अभेदे च पारमार्थिके संवृतिवशात् व्यवहारदशायां स्वप्नावस्थावत् उच्चावचः प्रपञ्चो विवर्तते इति कारिकार्थः॥

३·२·१७ 'आत्मा परः प्रियो द्वेष्यो वक्ता वाच्यं प्रयोजनम्।
विरुद्धानि यथैकस्य स्वप्ने रूपाणि चेतसः॥'

Perhaps quoted by अभिनवगुप्त in ईप्रविवि (Vol. I pp. 56–57): "तथाहि आत्मा पर इति संकेते स्वान्तःप्रवेशमिव बहिर्निर्गममिव दृष्टि-वक्त्राङ्गुलीक्रियाविशेषाविर्भावकं परामृशन् स्वभावो भाति। तत्र च 'अहं हं अम्हे हगे' इति 'एषः एहो एसो' इति च सोदराः संकेताः आत्मा पर इत्यादयश्च तद्व्यवहिता इति युक्तम्। संकतवदनावलोकनप्राणित-मात्रशब्दार्थव्यवहारवादिनोऽपि लोकदृढनिरूढव्यवहारसिद्धसंकेतकैरेव शब्दैस्तद्विकल्पैश्च व्यवहिता एव सामयिकप्रायाः संकेता भान्ति। पचति शुक्लः पट इति लोकनिरूढशब्दव्यवहारोपरि पाकः पचनं क्रिया वर्णो गुणो धर्म इति पार्षदप्रायसंकेतोपजीवीनि शब्दान्तराणि। तत्रापि पर्षदोऽपि संकोचासंकोचादिना भेदाः। ......

३·२·१८ Cf वैभू 259.

३·२·८०-८१ 'परतो भिद्यते सर्वं आत्मा तु न विकल्प्यते।
पर्वतादिस्थितिस्तस्मात् पररूपेण भिद्यते॥'
'प्रसिद्धभेदा व्यापारा विरूपावयवक्रियाः।
साहचर्येण भिद्यन्ते सरूपावयवक्रियाः॥'

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

Quoted by कै **on** पा **3·2·123, who reads** विकल्पते **for** विकल्प्यते. **He comments thus :** प्रसिद्धपरिमाणा क्रियैव क्रियान्तरपरिच्छेदात् काल इत्युक्तम् । तत्र राज्ञां स्थितिर्भूतादिभेदेन भिन्ना पर्वतादिस्थित्यादेर्भेदिका इति क्रियारूपत्वं कालत्रयविभागश्चोपपन्न इत्यर्थः। उक्तं च हरिणा–'परतो' & 'प्रसिद्धभेदाः'। उ ननु कालः क्रियाऽधिकरणं न तु क्रियाऽत आह–प्रसिद्धेति। वस्तुतोऽनवस्थापत्त्या चिन्त्यमिदम्। भाष्ये 'क्रिया'—पदेन तदधिकरणकालो लक्ष्यते इति वक्तुं युक्तम्। ...क्रियारूपत्वमिति तत्तद्राजक्रियासमानाधिकरणपर्वतादिस्थित्यादेः इत्यर्थः। यतः कालत्रययोगोऽतः क्रियारूपत्वमित्यर्थः। आत्मा द्रव्यम्। न विकल्पते न स्वरूपेण भिन्न इत्यर्थः। विरूपावयवक्रिया व्यापाराः प्रसिद्धभेदा न तु साध्यभेदा इत्यर्थः। स्वरूपावयवक्रियास्तु गिरिस्थित्यादयो राजक्रियादेः साहचर्येण भिद्यन्ते इत्यर्थः। साहचर्यं कालघटितम्॥

३·३·१ 'ज्ञानं प्रयोक्तुर्बाह्योऽर्थः ...' लम 39. हरिरप्याह–अतएव एतदुपक्रमे 'ज्ञानं प्रयोक्तुरर्थस्य ...' (**mark v. l.** अर्थस्य **for** बाह्योऽर्थः).

इत्यादिना शब्दार्थज्ञानानां अध्यासस्योपपादनं कृतम्। अत्र 'तेषा' मित्यस्य 'अतः' इत्यादिः। अयं सास्नादिमानर्थो गौरित्यर्थको 'अयं गौः' इत्येवं लोकानां व्यवहारादुक्तं तादात्म्यं सम्बन्ध इत्यक्षरार्थः॥

३·३·२ 'अस्यायं वाचको वाच्यः....'. लम 45. अस्यायमर्थोऽस्यार्थस्येदं पदमित्यादौ षष्ठ्यनुपपत्त्या तयोः स्वाभाविकयोगाङ्गीकाराच्च। असम्बद्धानां घटपटादीनामेवं व्यवहाराभावात्। अस्यायं वाचकः इत्यादिव्यवहारोऽपि एवमेव अयं वाचक एतत्सम्बन्धी इत्यादितदर्थात्। स्पष्टञ्चेदं—'अस्यायं वाचकः...' इति हरिकारिकाव्याख्यावसरे हेलाराजीये। (**See comm. of** हे **on this** कारिकाः **Deccan College Edition of** वाप **III part I pp. 127-8**).

३·३·४ 'नाभिधानं स्वधर्मेण ... रूपं नास्यापदिश्यते॥' लम **431 reads for (d)** षष्ठ्येवास्य तु वाचिका (**For this, see** वाप ३·३-३ **d** इति षष्ठ्या प्रतीयते) तत्र सम्बन्धस्य सम्बन्धिद्वयनिरूपितत्वेनैव बोधात् वाक्यतो न पृथक् तद्बोधः। तदुक्तं हरिणा–'नाभिधानं ...'. षष्ठ्येव सम्बन्धस्य वाचिका न तु सम्बन्धशब्दादीति तदर्थः। अभिधानं पदम्। सम्बन्धिनोः संघटनस्वभावत्वेन नित्यपरतन्त्रत्वात्। षष्ठीपदं विभक्तीनां वाक्यस्य च उपलक्षणम्। पदानां तु पृथक् स्वार्थबोधकत्वमपि॥

३·३·४,५,६ **ab** अभिनवगुप्त **in** ईप्रविवि (**Vol. I p. 205**) **quotes these** कारिकाः "ननु रूपश्लेषः सूत्रे तावदादिशब्देन उक्तः वृत्तौ तु किं न विवृत इत्याशङ्क्याह—एवमादि न विवृतमिति। ... ... आदिपदेन तन्त्रान्तरोक्तमपि सूचयति। यदाह तत्रभवान्

'नाभिधानं स्वधर्मेण सम्बन्धस्यास्ति वाचकम्।
अत्यन्तपरतन्त्रत्वाद्रूपं नास्योपदिश्यते॥४॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

उपकारात् स यत्रास्ति धर्मस्तत्रानुगम्यते ।
शक्तीनामपि सा शक्तिर्गुणानामप्यसौ गुणः ॥ ५ ॥

'तद्धर्मणोस्तु ताच्छब्द्यं संयोगसमवाययोः ॥ ६ ॥' इत्यादि ।

एतच्च सम्बन्धस्तोत्रमात्रम् । न तु न्यायाभिधानमिति न दूषितं ग्रन्थकृता। कार्यकारणभावश्च न अत्र संगतः । तथाहि—आत्मा तावत् न कार्यः। ज्ञानमपि विषयेन्द्रियमनस्कारादेः भवत् न आत्मानं कारणीकुर्यात्

'यस्मिन् सति भवत्येव यत्ततोऽन्यस्य कल्पने ।
तद्धेतुत्वेन सर्वत्र हेतूनामनवस्थितिः ॥'

इति न्यायात्। क्रिया च नाम न काचिदिति न कश्चित् सम्बन्ध इह ॥

३·३·५ 'उपकारात् स यत्रास्ति...गुणानामप्यसौ गुणः ॥'. लम 34. शक्तेरपि कार्यजनकत्वे सम्बन्धस्यैव नियामकत्वात् । ... तदुक्तं हरिणा—"उपकारः स ... शक्तीनामप्यसौ..." । उपकार इति। उपकार्योपकारयोः उपकारस्वभावः सम्बन्धो यत्रास्ति तत्र धर्मः शक्तिरूपः कार्यं दृष्ट्वाऽनुमीयते। असौ सम्बन्धः शक्तीनामपि कार्यजनने उपकारकः गुणानामपि द्रव्याश्रितत्वनियामकः सम्बन्ध इति तदर्थ इति हेलाराजः ॥

३·३·५,१०-११ अभिनवगुप्त in his ईप्रविवि (vol. III p. 115) refers to parts of these three कारिकाs with different readings thus :— "आह 'बुद्धि' इति यद्यपि समवायादि एव संवन्धरूपं तथा संवन्ध एव च अनेकस्य एकता तथापि समवायः पृथक्पदार्थः । सामानाधिकरण्यादि अपि अदृष्टरूपं वस्त्वन्तरं वा धर्मात्मकं पृथगेवेति येषां दृष्टिस्तदाशयेन संवन्धस्य सर्वानुग्राहकत्वं अभिधातुं पृथगुक्तं एकत्वमपि च अनेकस्य वास्तवमिति । तथाहि तत्रभवान् समवायस्य रूपमभिधाय अभ्यधात्

'तां शक्तिं समवायाख्यां भेदाभेदप्रदर्शिनीम् ॥'

'अनुगृह्णाति सम्बन्ध इति पूर्वेभ्य आगमः ॥' इति ।

(वाप 3·3·10–11)

'शक्तीनामपि सा शक्तिर्गुणानामप्यसौ गुणः ॥' इत्यादि च।

(वाप 3·3·5 cd)

३·३·९ ab अभिनवगुप्त in his ईप्रविवि (Vol. III p 55) quotes this half-verse thus : 'सम्पद्यते इति काणाददर्शनेऽपि इति मन्यते । तथा च हेतुः अयुत इत्यादि । तथाहि तत्रभवान्

"आत्मान्तरस्य येनात्मा तदात्मेवावभासते ।' इति । अत एव इति यदुक्तं एकानेकरूपता ईदृशी चाक्षुषे न अवभाति इति विस्तरेण ततो हेतोरित्यर्थः ।

३·३·९,१० a अभिनवगुप्त in his ईप्रविवि (vol. II p. 35) refers to these कारिकाs :—

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

"स्मरणे एव हि अर्थस्य श्वेततावेशो दृष्टान्तः न तु अनुभवे। तत्र तादात्म्यतावभासस्य यौक्तिकत्वात् श्वेतगुणस्य समवायदर्शनेऽपि तादात्म्येन अवभासोऽङ्गीकार्यः। यदाह तत्रभवान्

'आत्मान्तरस्य येनात्मा तदात्मेवावभासते।
यतश्चैकत्वनानात्वतत्त्वं नाध्यवसीयते ॥'

'तां शक्तिं समवायाख्यां...।' इति। (**our text reads** ० धार्यते **for** ० भासते, एकस्य नानात्वं तत्त्वं **for** एकत्वनानात्वतत्त्वं **in** वाप **3·3·9**)

३·३·२९ 'इन्द्रियाणां स्वविषयेषु ...' **This is** कारिका **37 of** भट्टोजि दीक्षित; **See** वैभूसा **275** लम **28 comments thus:**– हरिरप्याह –'इन्द्रियाणां ...'। अस्यार्थः–यथा चक्षुरादीनां रूपादिविषयज्ञानजनने अनादिः पुरुष-यत्नानपेक्षा योग्यता तज्जनकतावच्छेदकधर्मवत्त्वरूपा तथा शब्दानां अर्थे अनादिः सम्बन्ध एव योग्यता तद्बोधजनकतावच्छेदको धर्मः ॥

३·३·३० 'असाधुरनुमानेन वाचकः कैश्चिदिष्यते।
वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः ॥'

This is कारिका **38 of** भट्टोजि दीक्षित; **see** वैभूसा **296.** लम **80 reads (c) with** वा **for** अपि. 'वाचकत्व० ...' इति हरिणाप्युक्तम्।... एवञ्च पाणिनीयव्याकरणव्युत्पत्तिज्ञानपूर्वकं साधुत्वेन ज्ञातसाधुशब्दप्रयोगात् धर्म इति बोध्यम्। अत एव 'समानायामर्थावगतौ शब्दैश्च अपशब्दैश्च शास्त्रेण धर्मनियमः' इति भाष्ये उक्तम् ॥ (**cf** पस्पशा)

३·३·३१ 'सम्बन्धशब्दे सम्बन्धो योग्यतां प्रति योग्यता।
समयाद्योग्यतासंविद् मातापुत्रादियोगवत् ॥'

This is कारिका **39 of** भट्टोजि दीक्षित **who reads** सम्बन्धि० **for** सम्बन्ध०. **See** वैभूसा **305-6.** लम **38 says:** हरिरप्याह—'सम्बन्धशब्दे ...'। सम्बन्धशब्दे योग्यतां प्रति बोधजनकतावच्छेदक-धर्मरूपयोग्यतानिरूपितो यः तादात्म्यलक्षणः सम्बन्धः स एव योग्यता। सा च स्वाभाविकी एव। अनादिवृद्धव्यवहारपरम्पराऽपरपर्यायास्मदा-दिसमयगृहीतोक्तेश्वरसमयात् निश्चीयते। यथा मातापुत्रयोः जन्यजनक-भावसम्बन्धस्य व्यवहारो निश्चायकः तद्वत् ॥

(भा० अयं सत्त्वशब्दोऽस्त्येव द्रव्यपदार्थकः ...) द्रव्यशब्देन चात्र सिद्धरूपं वस्तु अभिधीयते। तदुक्तं—'वस्तूपलक्षणं यत्र...'। (वाप **3·4·3**) उ सिद्धरूपमिति तत्त्वं च लिङ्गसङ्ख्याकारकान्वयित्वेन सर्वनामपरामर्श-योगत्वेन वा। तदाह–वस्तूपेति। लक्षणान्तरमाह – भेद्यत्वेनेति लिङ्ग-सङ्ख्याविशेष्यत्वेनेत्यर्थः। **Once again** कै **on** पा **3·1·67 says:** द्रव्यत्वेन प्रसिद्धो यो घटादिः तद्वदयं भावो भवति लिङ्गसङ्ख्यासाधन-सम्बन्धप्रतिपत्त्या। तत्र 'वस्तूपलक्षणं यत्र' इति द्रव्यलक्षणयोगेऽपि प्रसिद्धत्वप्रसिद्धत्वपेक्ष उपमानोपमेयभावः। भ **in** शकौ **on** पा **1·4·57 observes:** असत्त्वे न तु द्रव्ये।... लिङ्गसङ्ख्यान्वयि द्रव्यमिति वा।...

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

लम 1110 says : इदं तत् इति सर्वनामपरामर्शयोग्यं द्रव्यमित्यर्थः। अद इति यत् प्रतीयते तद् द्रव्यमिति निरुक्तोक्तेः। (cf निरुक्त 1·1 अदः इति सत्त्वानामुपदेशः) दुर्ग quotes : तथा चोक्तं—'शब्देनोच्चारितेनेह येन द्रव्यं प्रतीयते। तदक्षरविधौ युक्तं नामेत्याहुर्मनीषिणः॥'... नाम्नोऽपि सत्ता द्रव्यं सङ्ख्या लिङ्गमित्येतेऽर्थाः। तेषां द्रव्यं प्रधानमित्यतः सत्त्वप्रधानानि नामानि इत्युक्तं — एवमेके मन्यन्ते।)

३·३·३७ 'सति प्रत्ययहेतुत्वं...यतस्तत्र ... गम्यते॥' लम 38 reads तस्मात् for तत्र. हरिरप्याह—'सति प्रत्ययहेतुत्वम्....'। न तु जनकत्वमेव योग्यता 'एतज्जननेऽयं योग्यः' इति व्यवहारात्। तदाह—सतीति। यतः शब्दस्यार्थे सम्बन्धे सति तत्प्रत्ययहेतुत्वमुपपद्यते तस्मादित्यन्वयः॥

३·३·४७ 'आत्मानमात्मना बिभ्रद् अस्तीति व्यपदिश्यते।
अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मकः॥'

(ab) Quoted by भ in शकौ on पा 1·3·1 thus : सोत्पत्त्यनुकूलव्यापारभाजामपि सूक्ष्मरूपापन्नघटादीनां परसमवेतत्वघटितकर्मताविरहात्। उक्तं च हरिणा—'आत्मानमात्मना बिभ्रत्...'। cf निरुक्त 1·3 'अस्तीति उत्पन्नस्य सत्त्वस्य अवधारणम्' दुर्ग comm : अस्तीति जातस्य सत्त्वस्य अवधारणमात्रं ब्रवीति न विपरिणाममाचष्टे अपूर्णत्वात्। न प्रतिषेधति उपस्थितत्वात्। See वैभू 51 for (ab) & 57 for (cd); & वैभूसा for 87 the whole कारिका.

३·३·७२ सर्वदर्शनसंग्रह (XIII ll 254-256) observes :—

'सत्यस्वरूपमपि हरिणोक्तं सम्बन्धसमुद्देशे (वाप ३·३) :—
'यत्र द्रष्टा च दृश्यं च दर्शनं वा विकल्पितम्।
तस्यैवार्थस्य सत्यत्वं श्रितास्त्रय्यन्तवेदिनः॥'

(सदसं reads चाविकल्पितम् for वा विकल्पितम् and आहुः for श्रिताः)

३·३·८५ 'कालस्याप्यपरं कालं ... व्यतिरेकोऽनुगम्यते॥'. Quoted by कै on पा 3·2·111 ... ... समुदायावयवभेदाश्रयेण समुदायेऽद्यतनेऽवयवा अद्यतनाः सन्ति इति अनद्यतनो न भवतीत्युच्यते। न तु तत्त्वतोऽवयवव्यतिरिक्तोऽत्र समुदाय आधारोऽस्ति। तदुक्तं हरिणा—'कालस्याप्यपरं कालम्...' इति। उ कालस्यापीति। यथा दिने 'मुहूर्त' इति। न च तावता मुहूर्तसमुदायातिरिक्तं दिनमस्तीत्यर्थः। अनुगम्यते प्रमाविषयो भवति॥

३·३·८७ सर्वदर्शनसंग्रह (XIII lines 250–253) quotes this कारिका thus:–
'तस्माद्द्वयं सत्यं परं ब्रह्मतत्त्वं सर्वशब्दार्थ इति स्थितम्। तदुक्तम् :—

"तस्माच्छक्तिविभागेन नित्यः सदसदात्मकः।
एकोऽर्थः शब्दवाच्यत्वे बहुरूपः प्रकाशते॥"

with v. l. सत्यः सर्वः सदात्मकः for (b).

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

३·४·३ 'वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते ।
द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः ॥'

Quoted by कै on पा 1·4·57 चादयोऽसत्त्वे. क्षीरस्वामी on अमरकोश 'द्रव्यासुव्यवसायेऽपि सत्त्वम्' quotes भर्तृहरि's वाक्यपदीय (3·4·3) thus :—द्रव्यं पारिभाषिकं विशेष्याख्यं यदाहुः 'वस्तूपलक्षणं... व्यवस्थितः'. क्षीर० reads व्यवस्थितः for विवक्षितः of our text.

३·५·१ 'संसर्गि भेदकं यद्यत् सव्यापारं प्रतीयते ।
गुणत्वं परतन्त्रत्वात् तस्य शास्त्र उदाहृतम् ॥'

कै on पा 2·1·1 says :—केचिदाचार्याः द्रव्यं पदार्थं प्रतिपन्नाः (व्याडिः) केचिदाकृतिम् (वाजप्यायनः) ... गुणशब्देनापि आकृतिरुच्यते। यथा—'यस्य गुणस्य भावात्'। 'संसर्गिभेदकं .... उदाहृतम्' इति गुणलक्षणयोगात्। उ प्रतिपन्नाः सर्वशब्दवाच्यत्वेन गृहीतवन्तः। अत्र द्रव्यशब्देन प्रवृत्तिनिमित्ताश्रय उच्यते। अत एव रूपादिशब्दसंग्रहः। आकृतिमिति। आकृतिशब्देन प्रवृत्तिनिमित्तमुच्यते। संसर्गिभेदकमिति। स्वसंसर्गिण इतरभेदानुमापकमित्यर्थः। स्वविषयशक्तिग्रहणे (Is it ०ग्रहेण?) स्वाश्रयोपस्थापकत्वरूपव्यापारवदित्यर्थः। स्वावच्छिन्नत्वेन सकलव्यक्त्युपस्थापकत्वव्यापारवदित्यर्थो वा। नागेश quotes this कारिका on पा 4·1·44 thus : ननु एवं 'संसर्गिभेदकं यद्यत्' इति लक्षितगुणग्रहणमस्तु इत्यत आह। Elsewhere (लम 1551) he says : यत्तु 'संसर्गि...' इति (he reads संसर्गिभेदकं as one word) तत्तु 'यस्य गुणस्य भावात् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलौ' इत्यादावुपयुक्तम्। तदर्थस्तु संसर्गि आधारेण सम्बद्धं भेदकं स्वाश्रयस्य इतरतो भेदकं सव्यापारं अवच्छेदकत्वेन प्रतीयमानं...यद्यत् इति वीप्सया जात्यादेरपि एवंभूतस्य गुणत्वमुक्तम्। परतन्त्रत्वात् इत्यनेन तद्व्यवहारप्रयोजकमुक्तम्। परतन्त्रो हि लोके गुण इत्युच्यते॥

३·५·२ 'द्रव्यस्याव्यपदेशस्य य उपादीयते गुणः ।
भेदको व्यपदेशाय. तत्प्रकर्षोऽभिधीयते ॥'

कै on पा 2·1·66 :—सर्वत्रैव यतः प्रत्ययो विधीयते तदर्थस्य स्वतः प्रकर्षाभावात् अन्यगत एव प्रकर्ष आश्रीयते। यथोक्तं—'द्रव्यस्य...'। एक एवासौ प्रकर्ष इत्यर्थः। यद्यप्यत्र आश्रयान्तरवर्तिगुणप्रकर्षः तथापि यत्र यथाभूतः संभवति तत्र तथाभूत आश्रीयते। उ एक एवासाविति। गुणप्रकर्ष एव द्रव्यप्रकर्ष इत्यर्थः (नागेश does not comment on the कारिका as such)। स च क्वचित् प्रवृत्तिनिमित्तगुणप्रकर्षः यथा 'शुक्लतर' इत्यादौ। क्वचित् तत्सहचरितगुणप्रकर्षो यथा 'गोतर' इत्यादौ। क्वचित् तद्विशेषणघटकगुणप्रकर्षो यथा प्रकृते (i. e वस्त्राणां सौक्ष्म्यप्रकर्षः)। 'नैवान्यस्य' इति भाष्येणापि पृथग्द्रव्यप्रकर्षाभाव एव प्रतिपाद्यते इति बोध्यम्।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

३·५·२,९ ‘द्रव्यस्याव्यपदेशस्य... ’ and
‘अरूपं पररूपेण द्रव्यमाख्यायते यथा ।
अप्रकर्षं प्रकर्षेण गुणस्याविश्यते तथा ॥ ’

Quoted by कै on पा 5·3·55; he reads अव्यपदेश्यस्य for अव्यपदेशस्य and अपीष्यते (we think correctly) for आविश्यते which is, to say the least, unsatisfactory. आश्रितोऽभिधेयधर्मो गुणः । स च कश्चित् शब्दप्रवृत्तिनिमित्तं शुक्लतरः पटः इति यथा । पटस्य स्वतः न शुक्लस्य नाप्यशुक्लस्य शुक्लो गुणो व्यपदेशहेतुरेवं स्वगतप्रकर्षद्वारेण द्रव्यस्य स्वतोऽप्रकृष्टस्य प्रकृष्टव्यपदेशहेतुर्भवति । तदुक्तं हरिणा— ‘द्रव्यस्य... ’ ‘अरूपं... ’। यद्यपि तत्र द्रव्ये बहवो गुणाः सन्ति तथापि अन्तरङ्गत्वात् प्रवृत्तिनिमित्तगुणप्रकर्षाश्रयः प्रत्ययः । उ comments on the कारिकाs :—अव्यपदेश्यस्य धर्मयोगमन्तरा स्वरूपेण अव्यवहार्यस्य । व्यपदेशाय व्यवहाराय यो भेदको गुण उपादीयते तत्प्रकर्षः तरवादिभिरभिधीयते इत्यर्थः । अरूपं स्वतः तद्रूपाभाववत् । स्फटिकादि जपादिरूपेण रक्तत्वादिगुणं आख्यायते इत्यर्थः । यद्वा अद्वैतिमते ब्रह्मैव द्रव्यं मायाकार्यरूपादिसम्बन्धेन तत्तद्रूपादिमत्त्वेन व्यवह्रियते इत्यर्थः ॥

३·५·३ ‘सर्वस्यैव प्रधानस्य ...’ Quoted by कै on पा 4·1·1 “सर्वत्र प्रधानस्य प्रकर्षाभावः । तदुक्तं हरिणा—‘सर्वस्यैव... ’। उ सर्वस्यैवेति भेदहेतुगुणाधिकं विना न द्रव्यस्य स्वतः प्रकर्षः नापि भेदहेतुं विना स द्रव्यरूपः प्रधानार्थः शब्दाभिधेय इत्यर्थः । ... Elsewhere (on पा 5·3·55) कै observes :—उपाधिसंसर्गेण तु विना द्रव्यस्य न प्रकर्षो नापि शब्दवाच्यत्वमस्ति । तदुक्तं ‘सर्वस्यैव...’। तत्र वास्तवः प्रकर्षो द्रव्ये भवतु मा वा । आश्रितधर्मद्वारकस्तु तत्प्रकर्षः शब्देनाभिधीयते न तु तन्निरपेक्षः स्वगतः । अद्रव्यप्रकर्ष इति निषेध उपचरितगुणक्रियागतप्रकर्षद्रव्यविषयो द्रष्टव्यः ॥

३·६·७,८ ‘प्रत्यस्तरूपा भावेषु .... ’ & ‘स्वाङ्गाद् व्यवस्था... ’

लम 1170 perhaps refers to these कारिकाs & others in the दिक्समुद्देश (वाप ३·१०), when नागेश says : पूर्वाध्युषितत्वं पूर्वार्जितत्वमपि पूर्वशब्दार्थः पूर्वस्मिन् देशे वसतीत्यादौ तथा प्रतीतेः । सर्वं चेदं हरिग्रन्थे हेलाराजीये च स्पष्टम् ॥

३·७·१ लम 1193 हरिरप्याह—‘स्वाश्रये समवेतानाम् ...’ द्रव्यगता क्रियाजनकत्वशक्तिरेव कारकं साधनमिति चोच्यते । सिद्धस्य द्रव्यस्य स्वरूपतः क्रियाजनकत्वानुपपत्त्या शक्त्याविष्टस्यैव तत्त्वं वाच्यमिति प्राप्ताप्राप्तविवेकेन शक्तिरेव साधनम् ॥

३·७·४ ‘बुद्ध्या समीहितैकत्वान् पञ्चालान् ... ’ भशकौ (पा 2·3·42): इदं च सूत्रं बुद्धिकल्पितमपायमाश्रित्य अपादानप्रकरणे प्रत्याख्यातम् । आह च – ‘बुद्ध्या ... ’। भ reads ० एकत्वात् for ० एकत्वान् ॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

३·७·५ ‘शब्दोपहितरूपांश्च बुद्धेर्विषयतां गतान् ।
प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते ॥’

कै on पा 3·1·26 (with तु for च) says : (भाष्ये) तेऽपि हि तेषामुत्पत्तिप्रभृति आ विनाशात् ऋद्धीः व्याचक्षाणाः सतो बुद्धिविषयान् प्रकाशयन्ति । तदुक्तं हरिणा — ‘शब्दोपहित० ....’ इति । उ शब्देति । शब्दसमर्पितबुद्धिविषयाकारान् इत्यर्थः । साधनत्वेनेति । बुद्धिविषयवधादेरित्यर्थः । भशकौ on the same सूत्रः— इदं च ‘आख्यानात् कृतः’ इत्यादिवार्त्तिकजातं भाष्यवार्तिकयोरेव प्रत्याख्यातम् । तदीयलक्ष्यजातस्य आरोपेणापि सूपपादत्वात् । तथाहि — कंसं घातयतीति तावदारोपः । ये हि कंसानुकारिणां नटानां व्याख्यानोपाध्यायाः ते कंसानुकारिणं नटं सामाजिकैः कंसबुद्ध्या गृहीतं तादृशेनैव वासुदेवेन घातयन्तीव ।... न ह्यत्र णिज्विधिः किंचिदुपकरोति उक्तोदाहरणेषु णिच्प्रवेशाभावात् । उक्तं च ‘शब्दोपहितरूपांश्च...’ । लम 346–7.

३·७·६ तदुक्तं हरिणा— ‘शब्द० ’ & 3·7·6 ‘बुद्धिप्रवृत्तिरूपं च ... अर्थेषु ... परिकल्पना ॥’ प्रत्यक्षमिति मननक्रियाविशेषणं इन्द्रियजज्ञानाभावादिवेति । अर्थेषु बाह्येषु । बौद्धमेव एकस्य शक्तिनानात्वं बाह्ये अध्यस्यते दृश्यज्ञानविषययोः अभेदाध्यासात् । ...

३·७·१३ ‘स्वशब्दैरभिधाने तु ... उपकारः प्रतीयते ॥’ कै (पा 2·3·50) : आख्याभूता इति । ताः शक्तयः संज्ञामेव प्राप्ताः न तु विभक्त्युत्पत्तिं प्रयोजयन्ति इत्यर्थः । तदुक्तं—‘स्वशब्दैः ... ।’ उ संज्ञामेवेति । संज्ञाव्यवहारः करणत्वादिव्यवहारः तमेवेत्यर्थः । विभक्त्यभावेन शास्त्रीयसंज्ञायाः अनुपयोगात् । स धर्मः शक्तिरूपः । नाभिधीयते सामान्यतो विशेषतो वा पृथङ्नाभिधीयते । फलाश्रयत्वादिना एव ततो बोधात् इति भावः । उपकारः स्वप्रकृत्यर्थस्य इतरविशेषणतानियामकः । कर्मादिपदेन सम्बन्धपदेन चोक्तस्य न शक्तिरूपता नापि सम्बन्धरूपता । अत्र ‘कर्मादिशब्दैर्नाभिधीयते’ इत्युक्त्या कृदन्ते सर्वत्र तदनभिधानमिति लभ्यते । न हि कृतकर्मशब्दयोः कश्चिद्विशेषः उभयत्रापि कर्मणि प्रत्ययात् । विभक्त्यादिभिरित्यत्र आदिशब्द आश्रयवाचीति बोध्यम् । **Elsewhere** (पा 6·2·139) कै परमकारकमिति । विचार्यं किंचिदत्रास्ति इत्यस्योपन्यासः । यथा संप्रदानादयः शब्दाः न कारकरूपतां प्रतिपादयन्ति तथा कारकशब्दोऽपि । तदुक्तं—‘स्वशब्दैः...’ इति । एवं च तद्विशेषणमपि परमशब्दः कारकवाची न भवतीति प्रत्युदाहरणम् । उ विचार्यमिति । न्यायव्युत्पादनार्थं एतदुदाहृतमित्यर्थः । स्वशब्दैः कारकसंप्रदानादिशब्दैः । स धर्मः शक्तिलक्षणः । असावुपकारः शक्तिलक्षणः । शब्दशक्तिस्वाभाव्यादिति भावः । आदिशब्दोऽत्राश्रयवाची । विभक्तिरूपैराश्रयैर्वाचकैरित्यर्थः । विशेष्यस्यैवं कारकत्वाभावे विशेषणस्य सुतरां तत्त्वाभाव इत्याह—एवं चेति । नागेश elsewhere (लम 1213) explains : स धर्मः शक्तिरूपः विभक्त्यादिभिरित्यादिना ‘अन्तरा’ इत्याद्यव्ययग्रहणम् । ‘दधि तिष्ठति’ इत्यादौ प्रातिपदिकग्रहणम् । उपकारशब्दो अर्थ-

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

आद्यजन्तत्वेन प्रातिपदिकार्थस्य स्वावेशेन विशिष्टद्रव्यवाचकानि न तु उद्भूतकारकशक्तिप्रतिपादकानि ... ...

३·७·१६,१७ ab लम 1266 पत्ये शेते इत्यादौ शयनादिक्रियाया अपि संदर्शनप्रार्थन-व्यवसायजन्यारम्भक्रियानिरूपितं कर्मत्वम्। ... हरिरप्याह–'संदर्शनं ...' 'पूर्वस्मिन्'. संदर्शनं फलविषयः संकल्पः तत् प्रार्थनायां फलोपायविषये अभिलाषे साधनत्वाय कल्पते। व्यवसायः क्रियाविशेषस्य फलसाधनत्वेन निश्चयः। तत्रानन्तरा प्रार्थना साधनम्। अभिलाषे सति निश्चयकरणात्। व्यवसायश्च आरम्भे मानस्यां प्रवृत्तौ साधनम्। ... पूर्वस्मिन् काले क्रिया सा परस्मिन् उत्तरकालभाविनि साधनम्॥

३·७·१८ हरिणैव समाधानात्। तथाहि—'निष्पत्तिमात्रे ...'। इति तेनोक्तम्। सर्वेषां तद्व्यापारद्वारा स्वातन्त्र्येणैव क्रियाजनकत्वात् कर्तृत्वेन कारकत्वम्। ततः कः केन किं क्व पचति इति विवक्षायां स्वस्वव्यापारवशेन करणादित्वम्। ... (लम 1197)

३·७·२४ab, २५ab भशकौ (पा 2·3·23): 'अनाश्रिते तु ...' 'द्रव्यादिविषये ...' न च लौकिकहेतोरपि करणत्वात् तुल्यो दोष इति वाच्यम्। करणस्य तु क्रियामात्रविषयत्वात् व्यापारनियतत्वाच्च। आह च–'द्रव्यादिविषयो हेतुः' इति 'अनाश्रिते तु' इति च। तथा फलमपीह हेतुशब्देन गृह्यते 'अध्ययनेन वसति' इदं च 'प्रत्ययः' (पा 3·1-1) इति सूत्रे कैयटे स्पष्टम्। लम 1260 reads करणं for निमित्तं in 24 ab & करणं for कारकं in 25 ab. न्त observes: अध्ययनेन वसतीत्यादौ फलस्याप्यध्ययनस्य ज्ञानद्वारा हेतुत्वम्। उक्तं च हरिणा ...। व्यापारानावेशेऽपि योग्यतामात्रेण हेतुत्वम्। आदिना गुणक्रिये। क्रियाविषयं त्वनाश्रितव्यापारमेव। दास्या सं (प्र) यच्छते। सं (प्र) यच्छतेर्दानपूर्वो भोगोऽर्थः। दास्यै दत्त्वा तां भुङ्क्ते इत्यर्थः।

३·७·२४ cd लम 1336. लक्षणपदार्थलक्षणं तु हरिणोक्तं 'आश्रितावधिभावं तु लक्षणे लक्षणं विदुः॥' लक्षणे लक्ष्यवस्तुप्रकाशे। आश्रितावधिभावं आश्रितमर्यादारूपं अनु हरिं सुराः। स्वावधिकापकर्षरूपहीनत्वसम्बन्धोऽनुद्योत्यो द्वितीयोऽर्थः। हरिप्रतियोगिकापकर्षवन्तः इत्यर्थः॥

३·७·३५–३७ वैभू 114 (with variants).

३·७·३९-४१ 'परमार्थे तु ... तत्त्वमेव प्रकाशते॥'

'यत् पृथक्त्वं ...'

'द्यौः क्षमा ...

रामकण्ठ (who reads तत्त्वमेकं for तत्त्वमेव) in his विवृति on स्पन्दकारिका (4·21) quotes these three कारिकाs thus: 'तदनेनात्मन एव शिवस्य स्वेच्छामात्राधीनौ जगतः प्रलयोदयौ जगदपि तत्स्वरूपाभेदात् तस्य स्वशक्तिचक्रमयो विभवः इति यथोपक्रान्तार्थे

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

निर्वाहात् एकमेव तत्त्वं स्वरूपपरामर्शमात्राव्यभिचारधर्मकं परमार्थसत्। अतो व्यतिरिक्तं किञ्चित् न संभवाति इति उपपादितम्। यदुक्तं— 'परमार्थे तु...' इति। अयमेवार्थः उक्त्यन्तरेण स्वस्तोत्रे प्रतिपादितोऽस्माभिः।

'चित्रालोकविकल्पकल्पितनवाकल्पाङ्कनानाकृतिं
नृत्यन्तीं बहुधा बहिः स्ववपुषोऽप्यन्तर्न भिन्नां पुनः।
नित्यं नूतनकौतुकः प्रियतमां स्वां शक्तिमालोकयन्
अच्छिन्नाप्रतिमप्रमोदमहिमा शम्भुर्जयत्येककः॥'

३·७·४५–५१ वैभू 105–106; 45 वैभूसा 159; 46 वैभूसा 159

३·७·४७ 'सती वाऽविद्यमाना ......'

कै (पा 3·2·1): हरिणा निर्वर्त्त्यादीनां विशेषो दर्शितः—'सती वा...' यस्योपादानकारणं नास्ति तन्निर्वर्त्यं यथा 'संयोगं करोती' ति। यस्यापि सदप्युपादानकारणं न विवक्ष्यते तन्निर्वर्त्यं यथा 'घटं करोती' ति। उ यस्य सती परिणामिनी प्रकृतिः नाश्रीयते यस्य च अविद्यमाना तन्निर्वर्त्यमुच्यते इत्यर्थः। तदेवाह— यस्येति। कार्यसामानाधिकरण्येन प्रतीयमानं नास्तीत्यर्थः। यथा 'मृदं घटं करोति'। विवक्ष्यत इति। 'कार्याऽभेदेन' इति शेषः॥

३·७·४९ 'यदसज्जायते सद्वा जन्मना यत् प्रकाश्यते।
तन्निर्वर्त्यं विकार्यं च कर्म द्वेधा व्यवस्थितम्॥'

वैभूसा 159–160 reads प्रकाशते, for प्रकाश्यते, तु for च, & द्वेधा कर्म for कर्मद्वेधा.

३·७·५० 'प्रकृत्युच्छेदसंभूतं...सुवर्णादिविकारवत्॥' कै (पा 3·2·1): यदा तु उपादानकारणमेव परिणामित्वेन विवक्ष्यते 'मृदं घटं करोति' इति तदा विकार्यं कर्म। भेदविवक्षायां तु 'मृदा घटं करोति' इति निर्वर्त्यमेव कर्म। विकार्यमपि द्विविधम्। 'प्रकृत्युच्छेद०...०वत्' इति। उ तत्रा विकार्यं कर्मेति अवस्थाद्वयानुगमेन पूर्वाकारपरित्यागेन आकारान्तरप्राप्त्यवगमादिति भावः। भेदविवक्षायामिति। कर्मणः सकाशात् उपादानस्य भेदविवक्षायामित्यर्थः। मृदा घटमिति। करणत्वविवक्षायां तृतीया नो चेत् सम्बन्धसामान्यविवक्षायां 'मृदो घट' मिति षष्ठीति बोध्यम्। विकार्यमपीति। पूर्वरूपस्य सर्वात्मना परित्यागतद्भावाभ्यामित्यर्थः॥ See वैभूसा 161–162.

३·७·५१ 'क्रियागतविशेषाणां .... तत् प्राप्यमिति कथ्यते' कै (पा 3·2·1): प्राप्यमपीति 'क्रियाकृत...' इति (He reads ० कृत ० for ० गत ० of the text) तत्र प्राप्यत्वं सर्वस्य कर्मणः अस्तिक्रियया प्राप्यमाणत्वात्। अवान्तरविवक्षायां तु त्रैविध्यमुच्यते। उ दर्शनादीति प्रत्यक्षादित्यर्थः।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

निर्वर्त्ये स्वरूपलाभ एव क्रियाकृतो विशेषः विकार्ये विकाररूप एव सः। मृदं घटं करोति स्वर्णं कुण्डलं करोति काष्ठं भस्म करोति। अनुमानात् यथा–पुत्रः सुखं करोतीति। अत्र सुखरूपलाभो मुखप्रसादानुमेयः। नागेश quotes this कारिका elsewhere (पा 1·3·67) with another v. l. लक्ष्यते for गम्यते & remarks :—एवं च निर्वर्त्य-विकार्यकर्मणि निवृत्तिविकारलक्षणः कर्मणि विशेषः। प्राप्ये तु न 'क्रियाकृत-विशेषाणां... ' इति लक्षणादिति भावः। लम 837 says : तदयमत्रानुगमः निर्वर्त्यविकार्यकर्मणि कर्मस्था (क्रिया) प्राप्ये तु नेति। तदुक्तं–'क्रियागतविशेषाणाम्...' इति। निर्वर्त्ये स्वरूपलाभ एव क्रियाकृतो विशेषः। ... See also वैभूसा 163.

३·७·५६ 'निवृत्तप्रेषणं कर्म स्वक्रियावयवे स्थितम्' .. भशाकौ (पा 1·367) (who reads स्वक्रियावयवैः for स्वक्रियावयवे) observes :—'...पश्यन्ति भवं भक्ताः' इति प्रयोगः। चाक्षुषज्ञानेन विषयींकुर्वन्तीत्यर्थः। यदा तु सौकर्यातिशयविवक्षया प्रेरणांशस्त्यज्यते तदा 'पश्यति भवः' इति प्रयोगः विषयीभवतीत्यर्थः। उक्तं च–'निवृत्तप्रेषणं कर्म....' Elsewhere (पा 3·1·87) भ observes :—अस्यां चावस्थायां अकर्मक-त्वात् कर्तरि भावे च लकाराः ... यथा निवृत्तप्रेषणस्य अकर्मत्वम् ...

३·७·५७ 'तानि धात्वन्तराण्येव ...'

उ (पा 1·3·67) observes :—नन्वेवं धातुभेदात् कर्मवद्भावो न स्यादत आह—(कै) "सारूप्यात्तु तत्त्वाध्यवसायः"। तदुक्तं —'तानि ...'।

३·७·५८ 'एकदेशे समूहे च व्यापाराणां पचादयः।
स्वभावतः प्रवर्तन्ते तुल्यरूपसमन्विताः॥'

Quoted by उ on कै (1·3·67) 'अनेकार्थत्वाद् धातूनाम्। भिन्ना एव वा धातवो भिन्नार्थाः।' ... उ comments : क्वचित् फलव्यापारयोः शक्तिः क्वचित् फले इति कथमत आह–अनेकार्थत्वादिति तदुक्तं—'एकदेशे समूहे च...' इति। केचिदर्थभेदात् शब्दभेदमिच्छन्ति। तन्मतेऽप्याह—भिन्ना एवेति। वैभू 40 & 52 and लम quote this कारिका & read वा for च & तुल्यरूपं for तुल्यरूप०.

३·७·५९ 'न्यग्भावना न्यग्भवनं...ण्यन्तेऽपि प्रतिपद्यते॥' भशाकौ (पा 1·3·67) quotes this (with ०भावनं for ०भावना; आह for आहुः; ण्यन्ततत् ० for ण्यन्ते तां) : आरोहन्ति हस्तिनं हस्तिपकाः न्यग्भावय-न्तीत्यर्थः। आरोहति हस्ती न्यग्भवतीत्यर्थः। आह च –'न्यग्भावना...'। and 3·7·60 'अवस्थां पञ्चमीम्...'। उ on the same सूत्र observes :-ननु न्यग्भवनं विना उपरिगमनं असंभवि इत्यत उक्तं "केवलं कर्मणः

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

कारकत्वादवश्यं क्रियया भाव्यमिति क्रियाऽनुमीयते" (कै)। अत एव हरिणाऽपि 'न्यग्भावनं न्यग्भवनं रुहौ शुद्धे प्रतीयते' इत्येवोक्तं न तु रुहिणा प्रतिपाद्यते इति।

३·७·६० 'अवस्थां पञ्चमीमाहुर्ण्यन्ते तां कर्मकर्तरि।
निवृत्तप्रेषणाद् धातोः प्राकृतेऽर्थे णिजुच्यते॥

कै (पा 1·3·67) : पुनः केदारस्य सौकर्यातिशयविवक्षायां ...सम्पद्यते। ...लौकिके तु व्यवहारे .. एवं तावत्–'निवृत्त० ... उच्यते' इत्येतत्पक्षाश्रयेण कर्मकर्ता व्याख्यातः। उ ..इयं प्रायोगिकी पञ्चमी पर्यन्तभूमिः। तदुक्तं–'अवस्थां कर्मकर्तरी'ति। तस्याः पञ्चमीत्वं चैवम्...उभयत्रापि णिज्निर्वाहाय सर्वान्ते हरिणा–'निवृत्तप्रेषणा'दित्युक्तम्। भशकौ (पा 1·3·67) : पश्यन्तं प्रेरयन्ति इति णिचि 'दर्शयन्ति भवं भक्ताः' इति प्रयोगः। पश्यन्तीत्यर्थः। उक्तं च–'निवृत्त०...'। उ (पा 6·1·27) : (कै० श्रातिश्च कर्मकर्तृविषयस्य पचेरर्थे पच्यमानकर्तृकव्यापारे वर्तते। ततः पक्तृव्यापारे णिजुत्पद्यते। ततः पचतीति योऽर्थः स एव श्रपयतीति गम्यते।) श्रातिश्चेति। उभयविधोऽपि पच्यर्थः पाकशब्देनोच्यते। अविशेषात्। अन्तर्भावितण्यर्थपच्यर्थस्तु न गृह्यते तत्त्वस्य गमकसत्त्वे एव स्वीकारादिति भावः। पक्तृव्यापारे इति। 'निवृत्त०' इत्युक्तेः॥

३·७·६६ 'विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता।
क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकाश्यते॥'

कै (पा 1·3·67) : एवं च 'आरुह्यते हस्ती स्वयमेव' इति ये कर्मवद्भावं प्रदर्शयन्ति ते न्यायं भाष्यं च बाधमाना अवधीरणीयाः। तथाहि–'विशेषदर्शनं ... प्रकल्पिता॥' विशेषदर्शनेन शब्दार्थानुसारेण वा तात्स्थ्यं क्रियायाः कथ्यते। ... सर्वाणि हि कारकाणि स्वं स्वं व्यापारमनुतिष्ठन्ति (**This form अनुतिष्ठन्ति is present participle n. Nom. Plu.**) प्रधानक्रियां सम्पादयन्ति। भशकौ (पा 1·3·67) : तस्मादिह वैषम्ये बीजं वक्तव्यमिति चेत् अत्राह भर्तृहरिः–'विशेषदर्शनं यत्र...' इति। अस्यार्थः यत्र क्रियाप्रयुक्तो विशेषो दृश्यते यथा पक्वेषु तण्डुलेषु यथा वा छिन्नेषु काष्ठेषु तत्र क्रिया स्थिता। तेन 'पच्यते ओदनः' 'छिद्यते काष्ठम्' इति कर्मवद्भावः सिद्धः। अन्येषां मते अन्येषां धातूनां घाशब्दैरेव क्रियाव्यवस्था। शब्देन कर्तृव्यापारस्यैव प्राधान्येनावगमात् कर्तृस्थतेत्यर्थः। उ (पा 3·1·87) : यथाश्रुतप्रागुक्तकैयटरीत्या व्याख्याने तु जानात्यादिकर्तर्यपि क्रियाकृतविशेषानुपलम्भेन 'चिन्तयाति' इत्याद्युपक्रमेण एतदुक्त्यसंगातिः। एतेन क्रियायाः क्रियाकृतविशेषाणां इत्यर्थः इत्यपास्तम्। तदुक्तं हरिणा–'विशेषदर्शनं यत्र...' इति। अन्येषामिति। 'मते' इति शेषः। इदमेव मतं युक्तं उक्तयुक्तेः। लम 580 : तद्व्यवस्था चेत्थमुक्ता हरिणा–'विशेषदर्शनं यत्र'। अस्यार्थः— यत्र कर्मणि कर्तरि वा क्रियाकृतो विशेषः कश्चिद् दृश्यते तत्र क्रिया व्यवस्थिता इति। 'उच्यते' इति शेषः। ... अन्येषामिति

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

'मते' इति शेषः।...कारिकापूर्वार्धोक्तार्थपरत्वे ज्ञानादिकर्तर्यपि क्रियाकृत-विशेषानुपलम्भेन 'चिन्तयति गच्छति' इत्याद्युपक्रम्य 'कर्तृस्थभावकानां' इत्युक्त्यसंगतेः।

३·७·६७ 'कालभावाध्वदेशानां...' भशकौ (पा 1·4·51): न चैवं सकर्मकेष्वप्यति-प्रसङ्गः। लक्ष्यानुरोधेन अकर्मकाणामेव उक्तप्रकाराभ्युपगमात्। आह च—'कालभाव०'। हेलाराजस्त्वाह—सकर्मकेष्वपि 'मासमोदनं पचती'ति भवत्येव। अत एवोक्तं सर्वैरिति। अकर्मकैरिति तु अविवक्षितमेव। कैयटोऽप्येवम्। अस्मिन् पक्षे 'मासमास्ते कटे' इति कटादेरपि द्वितीया प्राप्ता तथापि कालादेरेव व्यापनकर्मत्वं न तु कटादेरिति हेलाराजः। अनभि-धानं चेह शरणम्। See वैभू 51.

३·७·६८ 'आधारत्वमिव प्राप्ताः ...' See वैभू 52.

३·७·६९ 'अतस्तैः कर्मभिर्धातुः...' भशकौ (पा 1·4·51): जातिव्यक्तिपक्षयो-र्लक्ष्यानुरोधेन व्यवस्थेति सिद्धान्तात्। उक्तं च हरिणा–'अतस्तैः ...' See वैभू 52.

३·७·७९ 'निर्वर्त्यो वा विकार्यो वा ....' कै (पा 6·1·7): 'कटं करोति' इत्यादौ ....सुबन्तेन सिद्धरूपोऽर्थोऽभिधीयते। शब्दान्तरसंनिधानात्तु साध्यता प्रतीयते। यथोक्तं हरिणा–'निर्वर्त्यो वा ....'। उ साध्यता प्रतीयते इति। सा च न कारकावच्छेदिका इति भावः। साधनाश्रयेति। कर्मत्वलक्षण-शक्त्याश्रयेति। क्रियाणामेव साध्यत्वात्–साध्यत्वेन प्रतीयमानत्वात्। सिद्धरूपः सिद्धत्वेनैव स प्रतीयते इत्यर्थः॥

३·७·८१-८२ गोकुलनाथ (पदवाक्यरत्नाकर—श्लो. २६) says:

"हरिरप्याह–'प्रधानेतरयोर्यत्र...अनुरुध्यते'॥
'प्रधानविषया शक्तिः ... प्रतीयते॥'

यत्रैकस्य द्रव्यस्य गुणप्रधानभावापन्नक्रियाद्वयं निरूपितं शक्तिद्वयं कारकद्वयं पृथक् तत्र गुणशक्तेरभिधानेऽपि प्रधानकारकानभिधानप्रयुक्तं कार्यं भवत्येव। पक्वमोदनं भुङ्क्ते पाचकेनोदनो भुज्यते इत्यादौ पच्यर्थ-कर्मकर्त्रोरभिधानेऽपि भुज्यर्थकर्मकर्त्रोरनभिधानात् द्वितीयातृतीये सूपपदे।

'प्रधानेतरयोर्यत्र ...' 'प्रधानविषया शक्तिः ...' भशकौ (पा 2·3·1) reads प्रतीयते for प्रकाशते in 82 d. प्रधाननिरूपितशक्त्यभिधाने प्रथमैव अभिहिते नेति प्रसज्यप्रतिषेधात्। 'आसने आस्ते' 'शयने शेते। इत्यत्र तु न प्रधानशक्तेरभिधानं येन प्रथमा स्यात्। एतच्च 'स्वादुमि णमुल्' (पा 3·4·26) इति सूत्रे कैयटादौ स्पष्टम्। हरिरप्याह–'प्रधान०' 'प्रधानविषया'। See वैभू 235 & वैभूसा 381. लम 1098 तदुक्तं हरिणा–'प्रधान०' 'प्रधानविषया'। क्रियान्तरसम्बन्धस्य बुद्धिविषयत्वे एव क्त्वः साधुत्वम्। एतेन पूर्वं क्त्वान्तार्थमात्रस्य बुद्धिविषयत्वे तस्य

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

कर्तृकर्माकाङ्क्षासत्त्वात् अन्तरङ्गत्वेन द्वितीयादिकं दुर्वारमित्यपास्तम् । ओदनं पक्त्वा ग्रामो गम्यते देवदत्तेन इत्यादौ द्वितीया भवत्येव कर्मशक्त्योरेकनिष्ठत्वाभावात् । ....

३·७·८४ 'इषेश्च गमिसंस्पर्शात्...' लम 1099 reads गति० for गमि० in both the places. ग्रामो गन्तुमिष्यते इत्यत्र गमिक्रियापेक्षे द्वितीयाचतुर्थ्यौ न कदापि भवतः तदपेक्षकर्मत्वस्यापि अभिहितवत् प्रकाशादिति कैयटोक्तेः । ...संस्पर्शात् इषौ क्रियामुखेनैव द्रव्यसम्बन्धात् । निर्भोगः अभिधानम् । इषिणा तद्विहितलादिना ॥

३·७·८५ लम 1100 अत एव, 'पक्त्वा भुज्यत' इति इत्यत्र 'केषांचित्' इत्युक्तम् । प्रथमान्तौदनपदवाच्यस्यायोग्यत्वात् न पचिक्रियया सम्बन्धः किन्तु भुजिनैव इति न पचिनिरूपिता शक्तिरुपात्ता ओदनपदार्थे किन्तु सामर्थ्यात् द्वितीयान्तौदनपदार्थस्तत्र गम्यते इति केषांचिन्मतमिति तदर्थः...

३·७·८८ 'धातोरर्थान्तरे वृत्तेः...' भशकौ (पा 1·3·29): अथास्मिन् अकर्मकाधिकारे ये सकर्मका हनिगमिप्रभृतयः तेषां कथमकर्मकता । उच्यते । 'धातोः...' 'वहति भारम्' इति प्रापणे सकर्मको वहिः । स्पन्दने तु अकर्मकः । 'वहन्ति नद्यः' इति । प्राणविशिष्टं धारणं जीवतिराह । गात्रविशिष्टं विक्षेपं च नृत्यतिः । अतो द्वावप्यकर्मकौ । प्रसिद्धेर्यथा—'मेघो वर्षति' । कर्मणोऽविवक्षातो यथा – 'हितान्न यः संगृणुते स किं प्रभुः ।' See वैभू 29. लम 569: 'मातुः स्मर्यते' इत्यत्र अविवक्षितकर्मतया 'भावे लः' इति 'अधीगर्थ ...' इतिसूत्रस्थभाष्यविरोधापत्तेः । तत्र फलांशसत्त्वे एव सम्बन्धसामान्येनान्वयः न तु तदविवक्षा । 'धातोरर्थान्तरे....' इति अभियुक्तोक्ताकर्मकसंग्रहकारिकायां 'अविवक्षातः' इत्यस्य पृथगुपादानवैयर्थ्यापत्तेश्च । भवद्रीत्या फलस्य धात्वर्थत्वाविवक्षायां धातोरर्थान्तरे वृत्तेरेव सम्पत्तेः । ... कारिकायां अविवक्षा नाम येन रूपेणान्वयविवक्षया यस्य कर्मसंज्ञा तेन रूपेणान्वयविवक्षाऽभावः । ... धातोरर्थान्तरे वृत्त्या यथा 'नदी स्यन्दते' इत्यर्थके 'नदी वहती'त्यादौ । प्रसिद्धेरित्यस्य प्रसिद्ध्या झटित्यध्याहारेण तल्लाभात् तत्प्रयोगाभाव इत्यर्थः ॥

३·७·९० 'क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा तत्र करणत्वं तदा स्मृतम् ॥'

This puts in mind a verse quoted by दुर्गसिंह on कातन्त्र (2·4·12) (p. 497) when he says:

तथा चाह—'कारकाव्यवधानेन क्रियानिष्पत्तिकारणम् ।
यद्वै विवक्षितं तेषु करणं तत् प्रकीर्तितम् ॥'

'क्रियायाः परिनिष्पात्तिः करणत्वं तदा स्मृतम् ॥'

भशकौ (पा 1·4·42) reads करणं तत् for करणत्वम्. क्रियायां प्रकृष्टोपकारकं करणसंज्ञं स्यात् । यद्व्यापारानन्तरं क्रियानिष्पत्तिः तत् प्रकृष्टम् ।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

उक्तं च – 'क्रियायाः ...'। काष्ठैः पचति। विवक्ष्यते इत्यनेन स्थाल्यादीनामपि वैवक्षिकं करणत्वमस्तीत्युक्तम्। See वैभूसा 172, which reads यत्र करणं तत् for तत्र करणत्वम्. लम 1032 : वृत्तिकृदादिभिः क्रियासिद्धौ प्रकृष्टोपकारकं करणमित्युक्तम्। हरिरप्याह— 'क्रियायाः ..' अत एव करणस्य व्यापारः 'कारके' इति (पा 1·4·23) सूत्रे भाष्ये दर्शितः। तद्व्यापारस्य धात्वर्थत्वे करणस्य कर्तृत्वं च तद्भाष्ये उक्तम्– cf वा 10 & भा thereon :—

"एधाः पक्ष्यन्ति आ विक्लित्तेर्ज्वलिष्यन्ति इति ज्वलनक्रिया करणस्य पाकः। ... काष्ठानि पचन्तीत्युच्यन्ते। तत्र तदा पचिर्वर्तते। एष करणस्य पाकः। एतत्करणस्य कर्तृत्वम्॥"

३·७·९०, ९१ See वैभू 109, लम 1251 : अधिकरणादिव्यापाराव्यवधानेनापि यदा क्रियानिष्पत्तिर्विवक्ष्यते तदा तेषामपि करणत्वमिष्टमेव। तदाह हरिः— 'क्रियायाः ...' 'वस्तुतः...'। विवक्ष्यते इत्यनेन विवक्षैव व्याकरणे अङ्गं न बाह्यवस्तु सत्तेत्युक्तम्। अत एव दात्राद्यनादरेण बलस्य तत्त्वविवक्षायां बलेन लुनातीत्यादि भवति। तदाह—'वस्तुतः' इति। इदमेव वस्तु करणमिति न नियमः। निश्चिताधिकरणत्वाऽपि स्थाली तनुतरकपालत्वात् शीघ्रतरपाकसाधनत्वेन अनुभवति वैवक्षिकं करणत्वमित्यर्थः।

३·७·९१ 'वस्तुतः ...' भशकौ (पा 1·4·23) : नन्वेवमननुगम इति चेत् सत्यम। कस्य कः पिता को भ्राता इत्यत्र इवाननुगतस्यैव लक्ष्यत्वात्। अत एव प्रयोगाणां साध्वसाधुता व्यवतिष्ठते। अन्यथा क्वचित् कर्तुः सर्वत्र कर्तृतापत्तौ सकलप्रयोगाः संकीर्येरन्। उक्तं च हरिणा— 'वस्तुतस्तदनिर्देश्यं...' भशकौ (पा 1·4·42) : 'विवक्ष्यते' (वाप 3·7·90) इत्यनेन स्थाल्यादीनामपि (वाप 3·7·91) वैवक्षिकं करणत्वमस्तीत्युक्तम्। See वैभूसा 173.

३·७·१०१, १०२ 'प्रागन्यतः ...' 'अदृष्टत्वात् ...' See वैभू 108 : माधवाचार्याः पुनर्धातुवृत्तौ 'प्रागन्यतः' 'अदृष्टत्वात्' इति वाक्यपदीयेन समादधिरे॥ लम 1296 reads अविवेके for प्रविवेके in 102 (b). हरिरप्याह— 'प्राक् ...' 'अदृष्टत्वात् ...' करणादिव्यापारात् पूर्वमेव करणादिसंपादकतया शक्तिमत्त्वेन करणादीनां आत्माधीनत्वसंपादनेन च तेषां तदायत्तव्यापारवत्त्वेन अतिप्रवृत्तानां तेषां निवर्तनेन च कर्तुः फलप्राप्तौ स्वत एव निवृत्त्या कर्तुः प्रतिनिध्यभावेन च कारकान्तराभावेऽपि अस्त्यादौ कर्तुर्दर्शनेन च दूरादुपकारित्वेऽपि कर्तुः स्वातन्त्र्यमिति तदर्थः। वस्तुस्थित्या एषां धर्माणां भावेऽपि शब्देन यस्यैते प्रत्याय्यन्ते स कर्ता।

३·७·१०३ See वैभू 107.

३·७·१०४ 'एकस्य बुद्ध्यवस्थाभिः ...'

कै (पा 3·1.87) : एकस्यैव वस्तुनो भेदेन आत्मा कर्मत्वेन कर्तृत्वेन च विवक्ष्यते इत्यर्थः। तदुक्तं–'एकस्य...'। See वैभू 107. लम 1250

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

reads परिकल्पने for परिकल्पिते in (b) & च for वा in both the places; नागेश observes:—योऽपि णेरणौ इत्यादौ भाष्ये शरीरात्माऽन्तरात्मा इति भेद उक्तः सोऽपि व्यावहारिको बौद्ध एवेति बुद्ध्यवस्थाभिरित्युक्तम्। बुद्धिकल्पितावस्थाभिरित्यर्थकम्। करणत्वं च करणताशक्तिमत्त्वं सा च शक्तिः यद्व्यापाराव्यवधानेन क्रियानिष्पत्ति-र्विवक्ष्यते तन्निष्ठा ॥

३·७·१०५-१०७ See वैभू 106.

३·७·११० अभिनवगुप्त in ईप्रविवि (Vol. II p. 137) quotes this कारिका thus :—"किं वहुना। परपुरुषार्थलाभोऽपि तथाभासभेदायत्त इति कोऽन्योऽभिलष्यते अर्थो यो न सिध्येदाभासैः सिध्येच्च आभासबाह्यैः। यदाह तत्रभवान्

'बुद्धिशब्दौ प्रवर्तेते यथाभूतेषु वस्तुषु।
तेषामन्येन तत्त्वेन व्यवहारो न विद्यते ॥' इति।

Our text reads यथा भूतेषु separately, but there being no corresponding तथा, यथाभूतेषु should be taken as one word.

३·७·११८ 'पूर्वामवस्थामजहत् ... धर्ममुत्तमम्।
संमूर्च्छित इवात्मा ... अभिधीयते ॥'

महेश्वर in his comm. on निरुक्तभाष्य (1·3) observes & quotes this कारिका thus :—

जायते इति पूर्वभावस्य इत्यादि। इतिकरणः पदार्थविपर्यासकृत्। सर्वपूर्वो भावोऽस्त्यादिभ्यो व्यापारान्तरेभ्यो जन्माख्य आदिरुपक्रमो बीजस्येव मृदुभावादिः उच्छूनत्वं किञ्चित् उद्भिन्नत्वाद्यपवर्गान्तं पूर्वापरीभूतमाचष्टे जायतेशब्दः। शक्तिस्वाभाव्यात्। आह च—'पूर्वामवस्थामजहत्... अभिधीयते ॥' इति। नापरभावमाचष्टे जातावस्थां नाचष्ट इत्यर्थः। स ह्यपरो भावोऽस्तेर्विषय इत्यर्थः। ......

कै (पा 6·3·46) reads पूर्वावस्थामविजहत् for (a) & संस्पृशात् (obviously wrong) for संस्पृशन्. He explains: महद्वाचीति। अयं भावः—च्व्यन्तोऽत्र महच्छब्दः। च्विप्रत्ययश्च यदा प्रकृतिर्विकाररूपता-मापद्यमाना विवक्ष्यते तदोत्पद्यते परिणामविषयत्वात् च्विप्रत्ययस्य। यदा चैकोऽर्थः प्रकृतिविकारात्मकतया आश्रीयते तदा परिणामव्यवहारो भवति। यथोक्तं—

'जहद् धर्मान्तरं पूर्वमुपादत्ते यदापरम्।
तत्त्वादप्रच्युतो धर्मी परिणामः स उच्यते ॥'

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

(**source untraced**) इति। यदा तु उत्तरावस्था पूर्वावस्था वा नाश्रीयते तदा च्वेरभावः। 'तन्तवो भवन्ति' 'पटो भवती'ति। उक्तं च हरिणा—'पूर्वावस्थाम्...'। उ जहद् धर्मान्तरामिति। क्षीरावस्थायां विद्यमानं धर्मं द्रवत्वादिकं जहत् न तु त्यक्तवान् किञ्चिदन्वयात्। परं (नागेश **reads** परं **instead of** अपरं) दध्यवस्थायामवस्थितं धर्मम्। एवं च धर्मस्यैव त्यागोपादाने धर्मी त्ववस्थित एवेति भावः। तदाह–तत्त्वादिति। स्वस्वरूपादित्यर्थः। पूर्वावस्थामिति। पूर्वां कारणावस्थां अविजहत् उत्तरं धर्मं अवस्थाविशेषरूपं आसादयन् संमूर्च्छित इव उभयरूपतयाऽध्यवसीयमानो जायमानोऽर्थात्मा च्व्यन्तेनाभिधीयते इत्यर्थः। एवं च एकस्यैव वस्तुनः पूर्वोत्तरावस्थोपाधिव्यवच्छिन्नत्वात् प्रकृतिविकृत्योरुभयोरपि कर्तृत्वमुपपद्यते इति भावः। उभयोः कर्तृत्वेऽपि वचनं प्रकृतिसंख्याश्रयं पुरुषोऽपि प्रकृत्याश्रय एवेति बोध्यम्। शब्दशक्तिस्वभावात्।... लम 1565 : तदुक्तं हरिणा–'पूर्वावस्थां....'। पूर्वावस्था कारणावस्था। उत्तरं धर्मम् कार्यावस्थाम्। एवं च अवस्थाद्वयावच्छिन्नं एकं वस्तु पूर्वावस्थानुगुण्येन उत्तरावस्थाप्राप्त्युन्मुखं विकाररूपमिव प्राप्तं जायते इति अभिधीयते।... अत एव प्रकृतिविकृत्योः सामानाधिकरण्यम्॥

३·७·११९ नन्वेवमुभयोः कर्तृत्वापत्तिः। अत उक्तं—

'सव्यापारतरः कश्चित् ... भेदवत्योऽपि शक्तयः॥'

लम 1565 : लक्ष्यानुसारात् वाक्ये विकृतेरेव साक्षात्कर्तृत्वं वृत्तौ तदीयलौकिके च प्रकृतेरेव साक्षात्कर्तृत्वम्।... अयमेव प्रकर्षः तरपोक्तः संसर्गः कर्तृशक्त्योरेकत्वरूपः।.... वाक्ये तु साक्षात् विकारस्यैव 'सुवर्णपिण्डः खदिराङ्गारसदृशे कुण्डले भवतः' इति पस्पशायां भाष्यप्रयोगे विकृतेः कर्तृत्वदर्शनात्। ... द्वयोरपि वस्तुत्वे तु विकारस्यैव मुख्यतया जायमानत्वादिना तस्यैव साक्षात् कर्तृत्वं प्रकृतेस्तु तदभेदेन तद्द्वारा कथंचिदिति न कदापि सुवर्णपिण्डाश्रया विभक्तिरिति बोध्यम्॥

३·७·१२४ 'निमित्तेभ्यः प्रवर्तन्ते सर्व एव स्वभूतये।
अभिप्रायानुरोधोऽपि स्वार्थस्यैव प्रसिद्धये॥'

कै (पा ३·१·२६) : (भाष्य) यदि तर्हि सर्वे इमे स्वभूत्यर्थं प्रवर्तन्ते कः प्रयोज्यार्थः।... आदित्यश्चास्याभिप्राये सज्जते। (प्रदीप) तदुक्तं हरिणा—'निमित्तेभ्यः ...।' सज्जते इति भाष्यकारवचनात् आत्मनेपदम्। परस्मैपदी तु सज्जिः 'ग्लुञ्चु षस्ज गता'विति।

उ निमित्तेभ्य इति। स्वभूतिसाधनत्वज्ञापकप्रेरणादिभ्य इति। ननु स्वभूतिफलकप्रवृत्तिप्रयोजकाभिप्रायानुरोधोऽपि किमर्थ इत्यत आह—अभिप्रायेति। ननु शिष्यादीनां स्वार्थसिद्धये गुर्वाद्यभिप्रायानुरोधेऽपि सूर्यस्य तदनुरोधे मानाभावः फलाभावश्चेति चेन्न, अभिप्रायसम्पत्तिमात्रेण तदुद्देश्यकप्रवृत्त्याश्रयत्वादिरूपप्रयोज्यप्रयोजकभावाध्यारोपेण णिजिति तात्पर्यात्। भाष्यकारवचनादिति। तत्प्रयोगात्। अस्यानुदात्तेत्स्वपि पाठोऽनुमीयते इति भावः।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

लम (1248) : तदुक्तं—'निमित्तेभ्यः ... प्रसिद्धये ॥ '

निमित्तं भृत्यादि तन्निमित्ताऽपि स्वार्थसाधनफलिकैव सा इति स्वाम्याशयानुवर्तनमात्रेण तु प्रयोज्यत्वमिति दिक् इत्याहुः ॥

३·७·१२६ 'द्रव्यमात्रस्य तु प्रैषे पृच्छयादे: ... णिचः ।।' कै (पा 3·1·26) : बुद्धिपरिवर्तिन्यर्थे बहिरसत्यपि शब्दप्रयोगादिति भावः।...तस्यैवाधीयमानत्वात्। तदुक्तं हरिणा–'द्रव्यमात्रस्य तु ...' उ बुद्धीति बुद्ध्या विषयीकृतस्यैव सर्वत्र बोधात्। प्रकृते च क्रियाया इव कर्तृत्वस्यापि तथाभूतस्यैव विधानमिति भावः। आधीयमानत्वादिति विधेयत्वादित्यर्थः। प्रैष इति। द्रव्यमात्रस्य कर्तृत्वरहितस्य प्रयोगः प्रैषः। भशाकौ (पा 3·1·26) reads पृच्छादेः for पृच्छयादेः (perhaps wrongly). तथा च प्रयोज्यप्रवृत्त्युपहिता प्रवृत्तिर्णिजर्थः। केवला तु लोडर्थ इति विवेकः। उक्तं च–'द्रव्यमात्रस्य तु ...' ॥

३·७·१२७ 'गुणक्रियायां स्वातन्त्र्यात् ...' कै (पा 3·1·26) : नियमेन तु प्रधानप्रयुक्तकार्यव्यावृत्तौ गुणनिमित्तकार्यसद्भावात् कर्तृत्वं भवत्येव। तदुक्तं हरिणा–'गुणक्रियायाम् ...'। उ गुणेति प्रेषणे कर्मतां प्राप्तोऽपि पदार्थः कर्मसंज्ञाया नियमात् अप्राप्त्या गुणक्रियायां स्वातन्त्र्याच्च स्वधर्मेण कर्तृत्वेन अभिधीयते इत्यर्थः। 'स्वातन्त्र्येण' इति पाठेऽपि (metre would allow स्वातन्त्र्ये, if at all, and not स्वातन्त्र्येण) 'कर्तृत्वेन' इत्येवार्थः। भशाकौ (पा 1·4·52) : नियमार्थमिदं णिजर्थेनाप्यमानस्य यदि भवति तर्हि गत्यर्थादीनामेवेति। तेन 'पाचयति देवदत्तो यज्ञदत्तेन' इत्यत्र प्रयोज्ये पूर्वप्रवृत्तकर्तृसंज्ञाया एव निरपवादत्वेन अवस्थानात् तृतीया सिध्यति। कर्तुः स्वधर्मेण तृतीययेत्यर्थः। 'गमयति माणवकं ग्रामं' ग्रामकर्मकं यद्गमनं तदनुकूलव्यापाराश्रय इत्यर्थः ॥

३·७·१२९ 'अनिराकरणात् कर्तुः ... प्रेरणानुमतिभ्यां वा....' भशाकौ (पा 1·4·32) : त्रिधा चेदं यदाह–'अनिराकरणात्....' अनिराकर्तृ यथा 'सूर्यायार्घ्यं ददाति'। नात्र सूर्यः प्रार्थयते न वा अनुमन्यते न च निराकरोति। प्रेरकं यथा 'विप्राय गां ददाति'। अनुमन्तृ यथा 'उपाध्यायाय गां ददाति'। ननु दानस्य तदर्थत्वात् तादर्थ्ये चतुर्थी सिद्धैव तत् किं सम्प्रदानसंज्ञया। मैवम्। दानक्रियार्थं हि संप्रदानं न तु दानक्रिया तदर्था कारकाणां क्रियार्थत्वात्। सम्प्रदानार्थं तु दीयमानं कर्मेति वाक्यार्थभूताया दानक्रियाया अतादर्थ्यात् तादर्थ्ये चतुर्थ्या अप्राप्तौ तदर्था सम्प्रदानसंज्ञा न्याय्या इति हेलाराजः। तदेतत् सूचितं त्यागाङ्गं कर्मणेप्सितमिति।.... (This quotation from हेलाराज needs to be corrected as per the critical edition of वाप III part I p. 332 published by the Deccan College, Poona). See वैभू 112 & वैभूसा 190, which reads च for वा in (c) लम 1265 : आद्यं देवता। प्रेरणया याचकः। अनुमत्या उपाध्यायः। खण्डिकोपाध्याय-

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

स्तस्मै चपेटां ददातीत्यत्र संयोगविशेषानुकूलो व्यापारो ददात्यर्थः। चपेटा प्रसृतकरतलम्। 'न शूद्राय मतिं दद्यात्' (मनु 4·80) इत्यादौ बोधनार्थः सः। मतिशब्देन तज्जनकवेदादिरूपं शास्त्रमुच्यते।

This कारिका **of** भर्तृहरि **is probably the source of the following two** कारिका**s, at least of the first, quoted by** दुर्गसिंह **in his** वृत्ति **on** कातन्त्रव्याकरण (2·4·10):—
तथा चाहः:—

'अनुमन्तृ निराकर्तृ प्रेरकं त्यागकारणम्।
व्याप्तेनाप्तं ददातेस्तु संप्रदानं प्रकीर्तितम्॥
संप्रदानं तदेव स्यात् पूजानुग्रहकाम्यया।
दीयमानेन संयोगात् स्वामित्वं लभते यदि॥'

३·७·१३० 'हेतुत्वे कर्मसंज्ञायाम्...' भशकौ (पा 1·4·33) अत्राह हरिः—'हेतुत्वे...' अस्यार्थः—अन्यसमवेतो अभिलाषो रुच्यर्थः। रोचते अभिलाषविषयो भवतीत्यनुगमात् विषयीभवन्तं मोदकं देवदत्तः प्रयुङ्क्ते। लौल्यात् तदानुगुण्यमाचरतीति देवदत्तस्य हेतुसंज्ञायां प्राप्तायां सम्प्रदानसंज्ञा कथ्यते। ... यदा तु देवदत्तस्य योऽभिलाषः तद्विषयो भवति इत्यर्थः तदा शेषत्वात् षष्ठ्यां प्राप्तायां वचनमिति। ...... **See also** लम **1272.**

३·७·१३१–१३४ 'भेदस्य च' 'क्रियाणां' 'भेदाभेद०' 'विकल्पेनैव'. भ **reads** तत् **for** न **in 131 (d);** पदैकत्वं **for** यदैकत्वं **in 131 (b);** कर्म० **for** कर्म **in 132 (c).** भशकौ (पा 1·4·32): गत्यर्थेषु तु भेदोऽभेदश्च इत्युभयं विवक्ष्यते। तत्र भेदविवक्षायां 'ग्रामाय गच्छति' इति प्रयोगः। अभेदविवक्षायां तु 'ग्रामं गच्छति' इति। तथा 'गत्यर्थकर्मणि' (पा 2·3·12) इति सूत्रं प्रत्याख्यास्यते। उक्तं च हरिणा—'भेदस्य च'। अस्यार्थः—कर्म स्वाख्ययैव क्रियेप्सिततत्वप्रयुक्तकर्मसंज्ञयैव उपचर्यते व्यवह्रियते। न तु संप्रदानसंज्ञया। गत्यर्थकर्मणि तु भेदाभेदौ द्वावपि विवक्ष्येते इति रूपद्वयसिद्धिः। व्यभिचारोऽतिप्रसङ्गस्तु न दृश्यते। विवक्षायां व्यवस्थितत्वादेव। एतदेव द्रढयति— विकल्पेनेति। समं तुल्यफलकम्। तस्मात् सूत्रं प्रत्याचक्षाणस्य भगवतो विवक्षानियमोऽभिमतः। ......

३·७·१३६ 'निर्दिष्टविषयं किञ्चिद् उपात्तविषयं तथा।
अपेक्षितक्रियं चेति त्रिधाऽपादानमुच्यते॥'

कै (पा 1·2·24) **without quoting this** कारिका **observes:—** त्रिविधं चेदमपादानम्। निर्दिष्टविषयं उपात्तविषयं अपेक्षितक्रियं चेति। तत्र निर्दिष्टविषयं यत्र धातुनाऽपायलक्षणो विषयो निर्दिष्टः। यथा ग्रामादागच्छतीति। उपात्तविषयं यत्र धातुर्धात्वन्तरार्थाङ्गं स्वार्थमाह। यथा बलाहकात् विद्योतते इति। निःसरणाङ्गे द्योतनेऽत्र द्युतिर्वर्तते। यथा वा कुसूलात् पचति इत्यादौ आदानाङ्गे पाके पचिर्वर्तते। अपेक्षितक्रियं यत्र

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

क्रियावाचि पदं न श्रूयते। केवलं क्रिया प्रतीयते। यथा साङ्काश्यकेभ्यः पाटलिपुत्रकाः अभिरूपतरा इति। भशकौ (पा 1·4·24): यत्र साक्षात् धातुना गतिर्निर्दिश्यते तन्निर्दिष्टविषयम्। 'अश्वात् पतति' यथा। यत्र तु धात्वन्तरार्थाङ्गं स्वार्थं धातुराह तदुपात्तविषयम्। यथा बलाहकात् विद्योतते इति। निःसरणाङ्गे विद्योतने द्युतिर्वर्तते। यथा वा 'कुसूलात् पचति' इति। आदानाङ्गे पाकेऽत्र पचिर्वर्तते। अपेक्षितक्रियं तु तत् यत्र प्रत्यक्षसिद्धमागमनं मनसि निधाय पृच्छति कुतो भवानिति। पाटलिपुत्रादिति च उत्तरयति। अर्थाध्याहारस्य न्याय्यताया उक्तत्वात्। इह 'सार्थात् हीयते' इत्यपि निर्दिष्टविषयस्योदाहरणम्। See वैभू 111 and वैभूसा 184.

३·७·१३८·१३९ (S or A) where S means substitute and A means additional.

'अपाये यदुदासीनं चलं वा यदि वाऽचलम्।
ध्रुवमेवातदावेशात् तदपादानमुच्यते॥'
'पततो ध्रुव एवाश्वो यस्मादश्वात् पतत्यसौ।
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमिष्यते॥'

These कारिकाs are not found in the present वाक्यपदीय but are referred to as from भर्तृहरि & in वाक्यपदीय. Their place is somewhere near 3·7·138–139. These are either substitutes or additional ones.

भशकौ (पा 1·4·24): उक्तं च हरिणा प्रकीर्णकाण्डे—'अपाये...' 'पततो ध्रुवः...' अतदावेशादिति अपायानावेशादित्यर्थः। 'पर्वतात् पततोऽश्वात् पतति' इत्यत्र तु पर्वतावधिकपतनाश्रयो योऽश्वस्तदवधिकं देवदत्ताश्रयं पतनं अर्थः। पञ्चमी त्ववधौ शक्ता। तत्राभेदेन संसर्गेण प्रकृत्यर्थो विशेषणम्। प्रत्ययार्थस्तु क्रियायां विशेषणम्। कारकाणां क्रिययैव सम्बन्धात्। अन्यथाऽसाधुत्वात्। क्रियान्वये सत्येव हि कारकसंज्ञा। तत्पूर्विका विशेषसंज्ञाश्च स्थिताः।

उ (पा 1·4·24) अपाये यदनाविष्टमिति। अपाये सति प्रकृतधातूपात्तया क्रियया यदनाविष्टं इत्यर्थः। एवं च प्रकृतधातूपात्तगत्यनाविष्टत्वमेव ध्रुवत्वमिति तात्पर्यम्। हरिरप्याह—'अपाये यदुदासीनम्....' परं तु सिद्धान्तभाष्याक्षराणां अत्रार्थे न सामञ्जस्यं किं तर्हि ध्रौव्यं विवक्षितम्।... तस्मान्मदुक्त एव सूत्रार्थ उचितो भाष्यार्थश्चेति सुधियो विभावयन्तु॥

३·७·१३९. 'सरणे देवदत्तस्य ध्रौव्यं पाते तु वाजिनः।
आविष्टं यदपायेन तस्याध्रौव्यं प्रचक्षते॥'

कै (पा 1·4·24) perhaps hints at this कारिका of भर्तृहरि, when he says:

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

'ध्रुवमेकरूपमुच्यते। तच्च ध्रौव्यं अपायविषयमाश्रीयते न त्वनवच्छिन्नम्। ततोऽपाये यदनाविष्टं तदपाये ध्रुवमुच्यते।'

३-७·१४०–१४१ See वैभू 110 & वैभूसा 179, which reads ० कर्मके for कर्मजे in 140 (b) and व्यवस्थिते for विवक्षिते in 140 (d). लम 1287–1288 : आत्मानमात्मना हन्तीत्यादौ अन्तःकरणाद्युपाधिभेदवत् प्रकृते शब्दरूपोपाधिभेदेन भेदः शब्दालिङ्गितार्थस्यैव भानात्। स्पष्टा चेयं रीतिः 'कर्मवत् कर्मणा' (पा 3·1·87) इति सूत्रे भाष्ये। हरिणा तु—'उभावप्यध्रुवौ मेषौ...क्रिये तत्र विवक्षिते'॥ इति तत्तद्व्यक्तित्वेन विभागस्य बुद्ध्या प्रविभागे तत्तद्विभागानुकूलक्रियावत्त्वस्य अपरत्राभावात् उभयोरपि ध्रुवत्वमित्यर्थः। तदेवोक्तं—'मेषान्तरक्रियापेक्षं ... कर्तृत्वं च पृथक् पृथक्' अत्र वदन्ति। वस्तुतस्तन्निष्ठयोर्भेदेऽपि सृधातुना निवृत्तभेदस्यैवोपादानात् उभयोरपि तत्क्रियाश्रयत्वेन परत्वात् कर्तृत्वापत्तेः। ...अपसरणं विभागपूर्वकं पृष्ठतो गमनम्...

३-७-१४१ भशकौ (पा 1-4-24) refers to this कारिका thus : उक्तं च हरिणा प्रकीर्णकाण्डे—'मेषान्तरं'. कै (पा 1-4-24) incidentally observes :—'मेषो मेषादपसर्पति' इत्यत्र एकस्य कर्तृत्वविवक्षा अपरस्यापादानत्वविवक्षा। यदा तु 'मेषावपसरतः' इति प्रयोगस्तदाऽवध्यन्तरमपेक्षणीयम्। उ holds a long discussion on this and quotes this कारिका : यदा त्विति। 'परस्परस्मात् मेषावपसर्पतः' इत्यत्र तु 'मेषान्तरक्रियापेक्षं...' (141) इति बोध्यम्। किंच मेषपदोपात्तयोरेव क्रियाश्रयत्वं परस्परपदोपात्तयोर्विभागाश्रयत्वमेवेति तत्र न दोषः। अन्यथा वस्तुतस्तदाश्रयक्रियाभेदेऽपि धातुना विभागद्वयस्य तज्जनकक्रियाद्वयस्य च निवृत्तभेदस्यैवोपादानात् परत्वात् कर्तृत्वं दुर्वारमेव स्यात्। आत्मानमात्मनेत्यादौ अन्तःकरणाद्युपाधिना भेदस्येव शब्दरूपोपाधिकृतभेदस्यात्रापि सत्त्वाच्च। अस्मन्मते शब्दानुविद्धार्थस्यैव भानाच्च। हरिकारिकायामपि अवधित्वमित्यस्य 'परस्परपदोपात्तयोः' इति शेषः। 'कर्तृत्व'मित्यस्य 'मेषपदोपात्तयोः' इति शेषः इति वदन्ति॥

३-७-१४३ 'गतिर्विना त्ववधिना नापाय इति गम्यते।
वृक्षस्य पर्णं पततीत्येवं भाष्ये निदर्शितम्॥'

(भाष्य on 1-4-24 'ध्रुवमपायेऽपादानम्'...ध्रुवग्रहणं किमर्थम्। ... इदं तर्हि वृक्षस्य पर्णं पतति इति।...) उ ध्रुवमपाये अपायोऽत्र विभागजसंयोगानुकूलोऽवधिसाकाङ्क्षो गतिविशेषः। 'गतिर्विना...इति कथ्यते' इति हर्युक्तेः। (ना reads कथ्यते for गम्यते of the text.) भशकौ (पा 1·4·24): ...अवधिनिरपेक्षस्य चलनस्य अपायत्वाभावादिति भावः। लम 1285 reads गतिं for गतिः & कथ्यते for गम्यते. 'गतिं विना....

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

कथ्यते ' इति हर्युक्तेश्च । अवध्यन्वययोग्यविभागं विना इति तदर्थः । तत्र मानमुक्तं ' वृक्षस्य पर्णं पतति इत्येवं भाष्ये निदर्शितम् ॥ ' तत्र हि वृक्षः पर्णविशेषणमिति अपायस्य अविवक्षणात् षष्ठी भाष्ये उक्ता इति हेलाराजः । (नागेश gives the purport of हेलाराज, whose actual words are...पर्णविशेषणत्वेन वृक्षस्य विवक्षितत्वात् वृक्षमत्यजत्यपि पर्णे शाखास्थे भूमिं स्पृशति प्रयोगोऽयं भवत्येव इति अपायविवक्षा उक्ता ।)

३·७·१४८ ' कर्तृकर्मव्यवहितां असाक्षात् धारयत् क्रियाम् ।
उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ॥ '

भशाकौ (पा 1·4·45) reads विदुः for स्मृतम् । साक्षात् क्रियाधारयोः कर्तृकर्मणोरेव कुतो नेयं संज्ञा इति चेन्न । पराभ्यां कर्तृकर्मसंज्ञाभ्यां बाधितत्वात् । अत एव " कर्तृकर्म० " (148) अत एव ' भूतले घटः ' इत्यादौ अस्तीत्यध्याहारो नियतः । यथा ' पुष्पेभ्यः ' इत्यत्र स्पृहयतेः । अत एव च नञा सह कारकान्वयं वदन्तः परास्ताः । See also वैभू, 109 & वैभूसा 177· लम 1323 तदुक्तं हरिणा —' कर्तृकर्मव्यवहितां...' लोके द्रव्यगुणक्रियाविषयं अधिकरणम् । अत्र शास्त्रे कारकाधिकारात् क्रियाविषयमेव तत् । साक्षात् क्रियाऽऽश्रययोः कर्तृकर्मणोः ते संज्ञे बाधिके अतस्तद्व्यवहितामिति । यद्यपि कालः साक्षात् क्रियाधारः तथापि कारकाधिकारे तरतमयोगो नास्तीति परम्परया क्रियाधारस्यापि ग्रहणं, किञ्च तस्य तत्त्वविवक्षायां ' कालः पचति भूतानि ' (quoted by भाष्य on पा 3·3·167 ' कालसमयवेलासु तुमुन् ') इतिवत् कर्तृत्ववत्त्वात् । व्यवहितामित्युक्तेऽपि असाक्षादित्युक्तिः लोकानुसारेण अन्वयोऽपि परम्परयैवेति सूचनाय । ' कटे आस्ते ' ' स्थाल्यां पचति ' इत्यादौ अधृते कर्तृकर्मणी क्रियां न सम्पादयतः इति अधिकरणं क्रियाऽऽधारमुपकुर्वत् क्रियामुपकरोति इत्यर्थः इति हेलाराज ः॥

३·७·१४९, १५० अधिकरणं त्रिधा । औपश्लेषिकं वैषयिकं अभिव्यापकं चेति । तदुक्तं हरिणा—

' उपश्लेषस्य चाभेदस्तिलाकाशकटादिषु ।
उपकारास्तु भिद्यन्ते संयोगिसमवायिनाम् ॥
(लम 1325 reads उपकाराच्चु)
अविनाशो गुरुत्वस्य प्रतिबन्धे स्वतन्त्रता ।
दिग्विशेषादवच्छेद इत्याद्या भेदहेतवः ॥ '

इत्यौपश्लेषिकाभिव्यापकवैषयिकेषु त्रिष्वपि उपश्लेषोऽस्त्येव उपकारः सम्बन्धः । तद्भेदात्तु त्रित्वेन व्यवहारः । ...उपकारादाह । अविनाश इत्यादि । अविनाशस्तिलकृत उपकारः तैलस्य । तिलविनाशे हि तैलं विकीर्णं नश्येत् ।....... इत्येवमाद्या उपकारा ऊह्या इति हेलाराजः । केचित्तु औपश्लेषिकमित्यस्य उप समीपे श्लेषः सम्बन्धः तत्कृतमित्यर्थः । ......(भाष्य on पा 5·2·45·2 has व्यापक & not अभिव्यापक of नागेश :— ' यद्यपि

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

तावद् व्यापके वैषयिके वाधिकरणत्वे सम्भवो नास्ति औपश्लेषिकमधिकरणं विज्ञास्यते[1]। नागेश takes अभिव्यापक from भट्टोजिः See सिकौ on पा 2·3·36 : औपश्लेषिको वैषयिकोऽभिव्यापकश्च इति आधारस्त्रिधा।) Quoted by दुर्गसिंह in his वृत्ति on कातन्त्र (2·4·11) with the following variants'—कटाकाशतिलादिषु for तिलाकाशकटादिषु and प्रतिवन्धेष्वतन्त्रता for प्रतिवन्धे स्वतन्त्रता.

३·७·१५१ cd,१५२,१५३ 'आधारशक्तिः प्रथमा सर्वसंयोगिनां मता॥' (v.1. अयं for मता) इदमत्रेति भावानां अभावान्न प्रकल्पते। (v.l. अभावानां च कल्प्यते for (b) व्यपदेशस्तमाकाशनिमित्तं संप्रचक्षते॥ (v. l. तु for सं०) कालात् क्रिया विभज्यन्ते आकाशात् सर्वमूर्तयः। एतावांश्चैव भेदोऽयं अभेदोपनिबन्धनः॥ (v. l. एतावानेव for एतावांश्चैव)· लम 201·202 इति हरिणैव समाधानात्।...पृथ्व्यादिनामपि परमाणुद्वारा स (आकाशः) एवाधार इति सर्वभावानामाधारशक्तिराकाशाश्रया। आधारशक्तिरयमिति तु शक्तिशक्तिमतोरभेदादुक्तम्। ...इदमाकाशस्याधारत्वं सिद्धस्वभाववस्तु-विषयम्। साध्यस्वभावक्रियाविषयं तु कालस्याधारत्वमित्याह– कालादिति। जन्मस्थितिनिरोधेषु उपकुर्वन् कालः क्रियाधार इति। ... मूर्तिपदं क्रियाति-रिक्तसर्वपदार्थबोधकम्। अयं भेदः आकाशः काल इति भेदः। एतावानेव व्यावहारिक एव। ननु किं तर्हि अयं निर्निबन्धन एव। नेत्याह – अभेदेति। भेदरहितं यद ब्रह्म तदुपनिवन्धनं वस्तुभूतं यस्य स इत्यर्थः। ईश्वर एव तत्तदाधारत्वविशिष्टः तत्तत्संज्ञां लभते इत्यर्थः॥

३·७·१५६ 'सम्बन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः।
श्रुतायामश्रुतायां वा क्रियायां सोऽभिधीयते॥'

कै (पा 2·3·50) "येऽन्येऽर्थां इति। स्वस्वामिभावादयः सम्बन्धा इत्यर्थः। तदुक्तं—'सम्बन्धः...' इति। तत्र 'अश्रुतायां क्रियायां' राज्ञः पुरुष इत्यादौ क्रियाकारकसम्बन्धपूर्वकोऽन्य एव स्वस्वामिभावादिकः सम्बन्धः प्रतीयते। 'मातुः स्मरति' इत्यादौ तु श्रूयमाणे क्रियाशब्दे सदपि कर्मत्वं अविवक्षित्वा विशेषणभाव एव स्मरणं प्रति मातुः प्रतिपाद्यते मातृसम्बन्धि स्मरणमिति। उ क्रियाकारकेति। स्वत्वहेतुदानादिक्रियाकारकत्वपूर्वक इत्यर्थः। यत एवंविधोऽतः कारकेभ्योऽन्य इत्यर्थः। विशेषणभाव एव स्मरणं प्रति मातुरिति। क्रियाकर्मत्वमूलकविशेष्यविशेषणभाव इत्यर्थः। एतेन क्रिया-कारकभाव एव सम्बन्धित्वेन विवक्षित इत्यपास्तम्। ...

लम 1310 reads अभिधीयते for सोऽभिधीयते. अत एव हरिणा–'सम्बन्धः...' इति क्रियाकारकपूर्वकत्वमेव सम्बन्धस्योक्तम्। क्रिया-कारकसम्बन्धः कारणं शेषसम्बन्धस्तु फलभूतः। ... कारकशब्देन च श्लोके करणत्वादिशक्तय उच्यन्ते॥

३·७·१५७ 'द्विष्ठोऽप्यसौ परार्थत्वात् गुणेषु व्यतिरिच्यते।
तत्राभिधीयमानः सन् प्रधानेऽप्युपभुज्यते'॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

कै (2·3·50) reads च for सन् and ० युज्यते for ० भुज्यते. नहि शब्दस्य भावाभावाभ्यां अर्थस्य भावाभावौ क्रियेते । किं तर्हि । अर्थस्य प्रतिपिपादयिषया विषयीकरणाकरणाभ्यां शब्दस्य उच्चारणानुच्चारण-लक्षणौ भावाभावौ इत्यर्थः। तत्र परोपकारित्वेन राज्ञो विवक्षितत्वात् षष्ठी भवति पुरुषस्य तु उपकार्यतया स्वनिष्ठत्वेन विवक्षितत्वात् प्रथमा। तदुक्तं हरिणा- 'द्विष्ठोऽप्यसौ....'। उ comments not on प्रदीप but on कारिका thus :—असौ सम्बन्धः । परार्थत्वात् परं विशेषणत्वं अर्थः प्रयोजनं यस्य तत्त्वात् विशेषणतानियामकत्वादित्यर्थः । व्यतिरिच्यते उद्भूततया प्रतीयते। तत्र विशेषणशब्देन षष्ठ्यादिना प्रतीयमानः। प्रधानेऽप्युपयुज्यते तस्य द्विष्ठत्वस्वभावात् राजादिनिरूपितविशेष्यतायाः राजादिपर-संनिधाने प्रतीयमानायाः उपकारको भवतीत्यर्थः ।....

लम 1313 उक्तं च हरिणा–'द्विष्ठोऽप्यसौ....'। परार्थत्वात् गुणानां परं प्रति विशेषणत्वेन विवक्षितत्वादित्यर्थः । ...

३·७·१५९ 'साधनैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः ।
प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये ॥'

कै (पा 2·3·52) : प्रकरणं चेदं समासप्रतिषेधार्थमिति समासप्रकरणे व्याख्यातम् । तेन 'मातुः स्मृतम्' इति षष्ठीसमासो न भवति। उक्तं च हरिणा—'साधनैः...' इति । उ प्रकरणश्चेति । मण्डूकानुवृत्तेरयुक्तत्वात् पूर्वसूत्रेऽपि 'शेष' इत्यस्य सम्बन्धो बोध्यः। साधनैरिति। करणकर्मकारकैः। व्यपदिष्टे विगतोपदेशे विगतव्यवहारे शेषत्वेन विवक्षित इति यावत्। श्रूयमाणक्रिये इति । स्वरूपकथनम् । ... भशकौ (पा 2·2·10) : तथा च षष्ठीविध्यर्थमेव तत् ('कर्तृकर्मणोः' पा 2·3·65) इति कुतः समास-निवृत्तिप्रसङ्गः। आह च — 'साधनैर्व्यपदिष्टे...' इति।

३·७·१६० 'निष्ठायां कर्मविषया षष्ठी न प्रतिषिध्यते।
शेषलक्षणया षष्ठ्या समासस्तत्र नेष्यते ॥'

भशकौ (पा 2·2·10) एवं च अन्तोदात्तनिवृत्तये प्रकरणं 'मातुः स्मृतम्' इत्यादौ समासाभावार्थं च। नहि तत्र कारकषष्ठी लभ्यते 'न लोक०...' (पा 2-3-69) इति प्रतिषेधादिति निष्कृष्टोऽर्थः। आह च—'निष्ठायां कर्मविषया...' इति।

३·७·१६३, १६४ ab 'सिद्धस्याभिमुखीभावमात्रं संबोधनं विदुः।
प्राप्ताभिमुख्यो ह्यर्थात्मा क्रियासु विनियुज्यते ॥'

'संबोधनं न वाक्यार्थ इति वृद्धेभ्यः आगमः।'

लम 1188 तदुक्तं हरिणा–'सिद्धस्य...' 'संबोधनं...' एवं च केषांचिन्-मतोक्तसंबोधनपदार्थफलभूतोऽभिमुखीभावः एवात्र सम्बोधनपदार्थः। न तु सर्वः। तदुक्तं अभिमुखीभावमात्रमिति। एवं च क्रियासु विनियोगफल-कोऽभिमुखीभावः संबोधनमिति सूचितम् । अत्र सिद्धस्येत्यनेन तस्या-

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

नुवाद्यत्वम् । विनियुज्यते इत्यनेन प्रवर्तनाविषयक्रिया सम्बन्धस्तस्येति बोधितम् ॥ ३-७-१६३ quoted by त्रिलोचनदास in his पञ्जिका on कातन्त्रसूत्र (2·1·5) thus :—तथा चोक्तं—'सिद्धस्य...' Quoted by दुर्गसिंह with सा for तत् in (d) on कातन्त्र (3·1·9) 'क्रियाभावो धातुः'. त्रिलोचनदास comments thus on this कारिका :—

"तथा चोक्तमित्यादि । आत्मोक्तमेव वृद्धमतसंवादेन द्रढयति । आश्रितं क्रमरूपं येन तत् आश्रितक्रमरूपम् । सिद्धमसिद्धं वा तद्भावः तत्त्वं तस्मात् यावत् साध्यत्वेन प्रतीयते सा क्रिया इति सम्बन्धः ॥"

३-७-१६३ ab जयरथ (1170 A. D.) in his विवेक on तन्त्रालोक (17·14) of अभिनवगुप्त (1014 A.D.) observes :—'आवाहनं हि नाम स्वस्वभावव्यवस्थित्या सिद्धस्य भावस्य संबोधः । 'सिद्धस्य... विदुः' इत्यादिनीत्या ...अभिमुखीभावमात्रं न तु आवेश एव...

३-८-१ हरिभास्कर in his परिभाषाभास्कर (p. 347 of परिभाषासंग्रह published by BORI, 1964) on परिभाषा 56 : क्रियाविशेषणानां कर्मत्वं नपुंसकलिङ्गता च says :—'क्रियाशब्देन सिद्धसाध्यावस्थापन्नो धात्वर्थ उच्यते । तदुक्तं वाक्यपदीये—

"यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते" ॥ इति ॥

तत्र आश्रितक्रमरूपत्वात् इति पदं साध्यत्वेन इत्यनेन योज्यम् । एतेन 'साध्यत्वेन प्रतीयमानो धात्वर्थः क्रिया' इति पदमञ्जरीकुसुमविकासोक्तं परास्तम् । स च धात्वर्थः फलं व्यापारश्च ।

'यावत् सिद्धमसिद्धं वा...तत् क्रियेत्यभिधीयते ॥' भशकौ (पा 1·3·1): आसन्नविनाशं कंचिदुद्दिश्य 'किं करोति' इति प्रश्ने 'अस्ति' इति उत्तरस्य सर्वसंमतत्वात् । इतरत्र तु सुस्थतया निश्चिते 'किं करोति' इति प्रश्नः पाकादिविशेषगोचर एव इत्यवधारणात् 'अस्ति' इति नोत्तरम् । एतेन 'यावत्...' इत्यपि व्याख्यातम् । पूर्वापरीभावापन्नानेकक्षणविशिष्टस्योत्पत्तिः 'आत्माऽस्ति' इत्यादावपि सुलभैवेति भावः । भ reads असिद्धे for असिद्धं and सा for तत्. See वैभू 3 and 61 & वैभूसा 10.

३-८-१, ४ 'यावत्....' 'गुणभूतैरवयवैः...व्यपदिश्यते ॥'
लम 544 सर्वकारकाणां धात्वर्थेऽन्वयः...अयमेव च क्रिया । भूवादिसूत्रस्थ भावनार्थप्रतिपादकहरिग्रन्थात् । क्रमजन्मनामेषां व्यापाराणां समूहं प्रति गुणभूतैः तत्तद्रूपेण भासमानैरवयवैर्युक्तः संकलनात्मिकया एकत्वबुद्ध्या प्रकल्पिताभेदरूपः समूहः क्रियेति व्यपदिश्यते इति द्वितीयकारिकार्थः । अत्र अवयवाश्रयं पौर्वापर्यं समुदायाश्रयमेकत्वम् ।

३-८-१-४ अभिनवगुप्त in ईप्रविवि (Vol I p. 184) quotes these four कारिकाs, though not in the same order, as follows :—

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

'कारकस्य फलसिद्धिहेतुभूतक्रियानिमित्तस्य स्वक्रियापेक्षया वा कर्तुः सम्बन्धी तत्समवायी तदात्मा वा व्यापारो रूपं स्वं लक्षणं यस्याः सा क्रिया यस्याः सम्बन्धिनो भागाः पूर्वापरीभूताः क्रमवृत्तय इति यावत्। यदाह तत्रभवान्

"यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात् तत् क्रियेति प्रतीयते ॥ १ ॥
गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।
बुद्धया प्रकल्पिताभेदः क्रियेति व्यपदिश्यते ॥ ४ ॥
श्वेतं श्वेतत इत्येतच्छ्वेतत्वेन प्रकाशिते ।
आश्रितक्रमरूपत्वात् अभिधानं प्रवर्तते ॥ ३ ॥
कार्यकारकभावेन ध्वनतीत्याश्रितक्रमः ।
ध्वनिः क्रमनिवृत्तौ तु ध्वनिरित्येव कथ्यते ॥ २ ॥"

इति। एवंभूता च क्रिया आत्मनोऽस्त्येव इच्छाति जानाति यतते इति पूर्वापरीभूततत्तद्धर्मप्रतीतेरङ्गीकृता च ईश्वरात्मवादिभिः ॥ **Our text reads अभिधीयते for प्रतीयते in 3·8·1 d; श्वेते for श्वेतं, प्रकाशते for प्रकाशिते in 3·8·3 a & b; and ० कारण ० for ० कारक ० in 3·8·2 a.**

३·८·४ 'गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।
बुद्धया प्रकल्पिताभेदः क्रियेति व्यपदिश्यते ॥'

श्रीसोमानन्दनाथ **has this** कारिका **in view when he says in his** शिवदृष्टि **(1·19) :**

"यत इच्छति तज्ज्ञातुं कर्तुं वा सेच्छया क्रिया ।
तस्याः पूर्वापरौ भागौ कल्पनीयौ पुरा हि या ॥"

उत्पलदेव, **in his** वृत्ति **on this, observes :** 'यस्मादिच्छति ईश्वरो ज्ञातुं वा कर्तुं वा इति यदुच्यते तदाख्यातपदं इच्छया इच्छालक्षणां क्रियामाह। तस्या इच्छायाः पूर्वापरौ भागौ कल्पनीयौ पूर्वापरीभूतावयवत्वात् क्रियायाः इच्छायाः क्रियात्वाभिधानेन। ....'

cf निरुक्त **(1·1) :** 'भावप्रधानमाख्यातम्। .... पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति पचति इत्युपक्रमप्रभृति अपवर्गपर्यन्तम्। ... भवति इति भावस्य (उपदेशः)। आस्ते शेते व्रजति तिष्ठति इति। **See** दुर्गटीका **on this, especially the concluding part :—** 'तस्मादुपपन्नं अनेकक्रियाभिनिर्वर्त्यमानो भाव आख्यातेनोच्यते इति। आह च—

"क्रियासु बह्वीष्वभिसंश्रितो यः
पूर्वापरीभूत इवैक एव ।
क्रियाभिनिर्वृत्तिवशेन सिद्ध
आख्यातशब्देन तमर्थमाहुः ॥"

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

'गुणभूतैरवयवै ...' भशकौ (पा 1·3·1): ऐक्यमपि पारिभाषिकम्। एकफलावच्छिन्नत्वात्। उक्तं च 'गुणभूतैः...' इति। तदेवं भवत्यादौ क्रियावाचकं सुवचम्। अत एव 'अभूत्' 'अस्ति' 'भविष्याति' इति कालयोगः। See वैभू 5 which reads प्रकल्पितोऽभेदः for प्रकल्पिताभेदः & वैभूसा 14.

३·८·४, ५ 'गुणभूतैः...' 'समूहः स तथाभूतः प्रतिभेदं समूहिषु। समाप्यते ततो भेदे कालभेदस्य सम्भवः ॥'
कै (पा 3·1·22) सामान्यक्रियेति साधारणी समूहरूपा क्रिया धातुवाच्या इत्यर्थः। यथोक्तं हरिणा–'गुणभूतैः...' 'समूहश्च...' इति। उ साधारणीति सकलावयवसाधारणीत्यर्थः। तदाह–समूहरूपेति। गुणभूतैरिति क्रमजन्मनां अधिश्रयणादीनां बुद्ध्या प्रकल्पितो योऽभेदः तद्रूपसमूहः तैरेव गुणभूतैरवयवैः सह क्रियेति उच्यते इत्यन्वयः। ननु 'प्रकृतः कटं देवदत्तः' इत्यादौ कथं भूते 'क्तः' इत्यत आह—समूहः स इति। तथाभूतः उद्भूतावयवः। समूहिषु अवयवेषु। प्रतिभेदं प्रत्येकम्। अभेदे इति। (नागेश reads ततोऽभेदे and not ततो भेदे) बुद्धिकृताभेदे अपीत्यर्थः।

३·८·५ 'समूहः स तथाभूतः....' कै (पा 3·2·102) न्याय्येति। आदिभूत एव अवयवे समूहरूपस्य समाप्तत्वात् अस्ति भूतत्वोपपत्तिरिति। तदुक्तं हरिणा—'समूहः सः' इति। उ समाप्तत्वात् आरोपितत्वात्। प्रतिभेदं प्रत्यवयवम्। समूहिषु अवयवेषु। समाप्यते आरोप्यते इत्यर्थः। अभेदे अवयवे समूहाभेदे।
भशकौ (पा 3·2·102): आदिभूतः यः क्रियाक्षणः अपवृक्तः तस्मिन्नेवावयवे समूहरूपारोपात् सिद्धः इति भावः। अत एव लुङादयोऽपि प्रयुज्यन्ते। उक्तं च—"समूहः सः—" इति।

३·८·६ अभिनवगुप्त on ईप्रविवि (Vol. I p. 192) remarks :—
"विमतिश्चात्र 'क्रिया नामेयमत्यन्तापरिदृष्टा...' (महाभाष्य on पा 1·3·1 भूवादयो धातवः Vol. I 245[15]) इति तद्वादिनैव परमगुरुणा (= पतञ्जलिना) अभिधानात्। तत्रभवानपि (= भर्तृहरिः) 'क्रमात् सदसतां तेषामात्मनो न समूहिनाम्। सद्वस्तुविषयैर्यान्ति सम्बन्धं चक्षुरादिभिः॥' (Our text reads संभविनां for सदसतां and आत्मानः for आत्मनः) इति।...

'क्रमात् संभविनां तेषाम्...चक्षुरादिभिः॥ कै (पा 3·2·102) reads सदसतां for संभविनां. He observes :—अवयवसमूहस्य युगपदनुत्पादात् अनवस्थानाच्च। तदुक्तं 'क्रमात् सदसतां तेषाम्...' इति। उ अनवस्थानाच्चेति अनेन अवयवस्यापि अप्रत्यक्षत्वं क्षणिकत्वेन अनवस्थानादित्यर्थः। क्रमात् सदसतामिति। भूयोऽवयवसंनिकर्षः समूहप्रत्यक्षे कारणमिति भावः। चक्षुरादिभिरसम्बन्धे हेतुः सद्वस्तुविषयैरिति। See लम 824.

३·८·९,१० अभिनवगुप्त in ईप्रविवि (Vol. I p 185) quotes these two कारिकाs thus : "ननु किमनेन अपेक्षाजन्मना रूपेण लक्षणेन निरूपितेन स्वरूप-

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

मात्रेणैव ते क्रियेति उच्यतामित्याशङ्क्याह अपेक्षमाणानामेव च इति। अन्यथा हि आश्रितक्रमत्वं यत् क्रियायाः प्राणितं तदेव न स्यात्। यत् तत्रभवान्

'यथा च भागाः पचतेरुदकासेचनादयः।
उदकासेचनादीनां ज्ञेया भागास्तथाऽपरे॥
यश्चापकर्षपर्यन्तमनुप्राप्तः प्रतीयते।
तत्रैकस्मिन् क्रियाशब्दः केवले न प्रयुज्यते॥'

इति। चकारः प्रकृतप्रमेयोपयोगित्वेन प्रमेयान्तरं समुच्चिन्वन्नाशङ्कां सूचयतीति तत्प्रशान्तये फलतो हेतुतां तस्य प्रमेयस्य अवद्योतयाति इत्यनया भङ्ग्या उद्घोष्यते चो हेत्वर्थ इति। यथा चैत्राय भोजनं देयं परमश्चाय-मौदरिक इति बृहत्कं भोजनं देयं कस्मादित्येवं प्रमेयं चकारः आक्षिपतीत्यादौ। एवमन्यत्रापि अवधेयम्॥

३·८·११ अभिनवगुप्त in his ईप्रविवि (Vol. III p. 17) quotes this कारिका with variants thus : 'तेषामेव च इति क्रमवताम्। तत्रापि क्रमो यावदेकः क्षणः। स च पूर्वापरमध्यपाती व्यवहार्यो न तु शुद्धः इति तत्रापि क्रमवत्ता एव। यत् तत्रभवान्

"पूर्वोत्तरैस्तथा क्षणैः समवस्थापितक्रमः। एकः सोऽपि तदध्यासा-दाख्यातैरभिधीयते"॥ इति। The Kashmir text of अभिनवगुप्त reads तदाभागैः for तथा क्षणैः; we read भागैः for क्षणैः, असद्ध्यासात् for तदध्यासात्.

३·८·१२ ab 'कालानुपाति यद्रूपं तदस्तीति प्रतीयते।' भशकौ (पा 1·3·1) न हि क्रियात्वं विना असौ (कालयोगः) सम्भवति। तदुक्तं–'कालानुपाती...' इति। See वैभू 50.

३·८·१४ अभिनवगुप्त in ईप्रविवि (Vol. I p. 195) quotes this कारिका thus :—

'पूर्वापरीभूतता' इति कालक्रमवत्तेत्यर्थः। यच्च उच्यते
'आहितोत्तरशक्तित्वात् प्रत्येकं वा समूहिनः। अनेकरूपा लक्ष्यन्ते क्रमवन्त इवाक्रमाः'॥ इति तत्र इवशब्देनैव क्रमिकत्वस्य अवास्तवत्वमावेदितम्। न च उत्तरक्षणेषु पूर्वक्षणैः शक्त्याधानं किञ्चित्। विशिष्टस्तु उत्तरक्षण इति न अधिकमुक्तं स्यात्।

३·८·१५ 'अनन्तरं फलं यस्याः....तदाख्यता॥' कै (पा 3·1·22) अथवा अधि-श्रयणादीनां तादर्थ्येन प्रवर्तनात् गुणत्वात् अवयवत्वं तस्याश्च साधारण-त्वमुच्यते। तदुक्तं–'अनन्तरं–' उ तस्याश्चेति। यदव्यवधानेन फलोत्पत्ति-स्तस्या इत्यर्थः। अनन्तरमिति अव्यवधानेन फलोत्पादिकां प्रधानां क्रियामाहुः। अन्यासां तु तादर्थ्यात् तदाख्यता गौणो व्यवहार इत्यर्थः॥ Elsewhere (पा 3·1·26) कै : याऽसाविति। तदर्थत्वात् कारकग्रामस्य तदनन्तरं च फलोत्पादादिति भावः। तदुक्तं हरिणा–'अनन्तरं...'। इति। उ विक्लित्तेः प्रधानार्थत्वे युक्तिमाह–तदर्थत्वादिति। विक्लित्तिग्रहणं फलाव्यवहितपूर्ववर्ति-व्यापारोपलक्षणम्। स्पष्टं चेदमनुपदं स्वयं वक्ष्यति। तद् ध्वनयन्नाह— तदनन्तरञ्चेति। वैभू ३ reads तदाख्यया for तदाख्यता.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

३-८·१६ 'क्रियाप्रवृत्तौ यो हेतुस्तदर्थं यद्विचेष्टितम् ।
अनपेक्ष्य प्रयुञ्जीत गच्छतीत्यवधारयन् ॥

लम 861 reads तत्समीक्ष्य for अनपेक्ष्य and अविचारयन् for अवधारयन्. क्षणभङ्गनिरासं मनसि निधाय उत्तरदेशसंयोगपर्यन्तं क्रियास्थैर्याभिप्रायेण इदम् । क्रियाप्रवृत्तौ यो हेतुः इच्छाविषय उत्तरदेश-संयोगादिरूपं फलं तस्य विना निमित्तं असम्भवात् तन्निमित्तं यद्विचेष्टितं क्रियासमूहरूपं तत् समीक्ष्य बहिरविद्यमानं बुद्ध्या विषयीकृत्य बुद्धिविषये तत्र बुद्ध्या वर्तमानत्वं विषयीकृत्य अविचारयन् तत्स्वरूपं अविचारित-रमणीयेनैव तेन गच्छतीत्यादिप्रयोगं कुर्यादित्यर्थः ॥ (This कारिका **does not find place in हेलाराजीय & quite correctly, because it is one of the श्लोक्s quoted by पतञ्जलि in his भाष्य on पा 3·2·123 'वर्तमाने लट्' & the readings adopted by लम are those of the भाष्य :—"** अपर आह । नास्ति वर्तमानः कालः इति । अपि चात्र श्लोकानुदाहरन्ति । ...

क्रियाप्रवृत्तौ यो हेतुस्तदर्थं यद्विचेष्टितम् ।
तत्समीक्ष्य प्रयुञ्जीत गच्छतीत्यविचारयन् ॥

अपर आह । अस्ति वर्तमानः कालः इति । आदित्यगतिवन्नोपलभ्यते । अपि चात्र श्लोकमुदाहरन्ति ।... " कै क्रियाप्रवृत्ताविति । परिहारः । हेतुः प्रयोजनं गमनस्य देशान्तरप्राप्तिः तदर्थं फलार्थमित्यर्थः । इह प्रत्यभिज्ञानात् क्षण-भङ्गनिरासे देवदत्तस्य देशान्तरप्राप्तिर्निर्हेतुका न सम्भवति इति गमनक्रियैव तस्या निमित्तम् । तदालम्बनश्च गच्छतीति प्रत्ययोऽबाधित उपपद्यते इति सत्त्वं तावदवगम्यते क्रियायाः । वर्तमानत्वाभावे च भूतभविष्यतोरप्य-भावप्रसङ्गः । वर्तमानो हि भूतत्वं भविष्यत्त्वं च प्रतिपद्यते । तत्रानेकक्षण-समूहात्मकं क्रियाप्रबन्धरूपं बुद्ध्या संकलय्य गच्छतीत्यादि प्रयुज्यते इत्यर्थः । अविचारयान्नीति । कुविकल्पकलङ्करहितमित्यर्थः । उ इदानीं सिद्धान्तमाह—क्रियाप्रवृत्तौ इति भाष्ये । क्रियाऽऽरम्भे यो हेतुः प्रयोजकः फलं तदर्थं यद्विचेष्टितं क्रियासमूहस्तदनुकूलत्वेन समीक्ष्य बुद्धिविषयीकृत्य बौद्धसमूहस्य बौद्धवर्तमानत्वमादाय गच्छतीतिप्रयोगोपपत्तिरित्यर्थः । क्षणभङ्गवादे बुद्धेरप्येकस्या अभावादाह इहेति । कदाऽप्यवर्तमानस्य शश-विषाणादितुल्यस्य भूतभविष्यत्त्वे अपि त्वत्संमते न सम्भवत इति गच्छती-त्यबाधितप्रत्ययस्तत्सत्तायां मानमिति भावः । गच्छतीति प्रत्ययोऽबाधित उपपद्यत इति सत्त्वं तावदवगम्यत इति। एतेनावयवशोऽपि अप्रत्यक्षत्वं सूचितम् । अन्यथा अवयवगतस्य समूहे आरोप इत्येव वदेत् । ननु अवयवानामभावे समूहोऽसम्भवी तत्राह—तत्रानेकेति । बौद्धो वैकल्पिक एवायं समूह इत्यर्थः । 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः' इति पातञ्जलोक्तेः (योसू 1-9) । समूहस्य वर्तमानत्वं तु प्रारब्धापरिसमाप्तत्वमुक्तमेव । तदपि बौद्धमेव । तस्यानेकक्षणसमूहात्मकं तदात्मकत्वेन प्रसिद्धं क्रियाप्रबन्धरूपं तत्त्वेन च

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

प्रसिद्धमविचारितरमणीयमेव बुद्ध्या विषयीकृत्येत्यर्थः। अन्यथा पूर्वं सर्वथा वर्तमानकालाभावस्योक्तत्वेन तमसाध्यैव ईदृशोक्तेरसंगत्यापत्तेः। एवं वास्तववर्तमानक्रियाऽभावमङ्गीकृत्य अनुमितबौद्धसमूहरूपक्रियां तद्वर्तमानत्वं च बौद्धमाश्रित्य प्रयोगानुपपाद्य इदानीं वास्तववर्तमानक्रियां तत्तत्क्षणवर्तिनीं योगिप्रत्यक्षप्रमाणिकामाश्रित्य समाधत्ते – अपर आह अस्ति वर्तमानः कालः इति। क्रियाणां त्रिक्षणावस्थायित्वादिति भावः। आदित्यगतिवन्नोपलभ्यते। प्रत्यक्षेणेति शेषः। क्रियाप्रत्यक्षत्वाभिमानिनो यथा अतिदूरत्ववशात् तद्गतिरनुमेया तथा अतिसूक्ष्मकालावच्छिन्नत्वात् एकैक क्षणावच्छिन्ना क्रियाऽप्यनुमेयैवेति भावः॥ ...

३·८·२१ सर्वदर्शनसंग्रह (XIII lines 218-223) observes :—

'भाववचनो धातुरिति पक्षे भावः सत्तैव इति धात्वर्थः सत्ता भवत्येव। क्रियावचनो धातुरिति पक्षेऽपि "जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्तिनीम्।" इति क्रियासमुद्देशे (वाप ३-८) क्रियाया जातिरूपत्वप्रतिपादनात् धात्वर्थः सत्ता भवत्येव।

वैभू ३ reads ०लक्ष्यते for ० लभ्यते in (d).

३·८·२१–२५ अभिनवगुप्त in ईप्रविवि (Vol I pp 191–192) observes :—

"यत्र साधकं प्रमाणं परेण संभावितद्रढिम उक्तं तत्र तन्निराक्रियायै प्रथमं प्रयत्यते इह तु न तथा। तथा प्रमाणपरिनिश्चिते स्वरूपे न स्वरूपविमतिर्युक्ता नीले इव। इह तु तद्वादिनामेव बहुशाखा असौ। यत् तत्रभवान्।

'जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्तिनीम्
असाध्या व्यक्तिरूपेण सा साध्यैवोपलभ्यते ॥ २१ ॥
'अन्ते या वा क्रियाभागे जातिः सैव क्रिया स्मृता ॥ २२ ab ॥
'स्वव्यापारविशिष्टानां सत्ता वा कर्तृकर्मणाम्।
क्रियाव्यापारभेदेषु सत्ता वा समवायिनी ॥ २३ ॥
'अन्ते वात्मनि या सत्ता सा क्रिया कैश्चिदिष्यते ॥ २४ ab ॥
'बुद्धिं तज्जातिमन्ये तु बुद्धिसत्तामथापरे।
प्रत्यस्तरूपां भावेषु क्रियेति प्रतिजानते ॥ २५ ॥ इति।

विमतिश्चात्र 'क्रिया नामेयमत्यन्तापरिदृष्टा ...' (महाभाष्य of पतञ्जलि Vol I 254[15] on पा 1·3·1 भूवादयो धातवः) इति तद्वादिनैव परमगुरुणा अभिधानात्। तत्रभवानपि 'क्रमात् सदसतां तेषां ... चक्षुरादिभिः॥' (वाप 3·8·6) इति। किंच साधकमपि प्रमाणं बाधकेन विधुरयितव्यम्।

'द्रव्यस्य प्रत्यभिज्ञात ऐक्ये सिद्धे फलं कुतः।' इति क्रियानुमानम्।....

(our text reads साध्येव for साध्यैव in 21; क्रिया व्यापारभेदेषु for क्रियाव्यापारभेदेषु in 23; अन्ते वात्मनि for अन्तरात्मनि in 24).

३·८·४७,४८ 'आख्यातशब्दे भागाभ्यां साध्यसाधनवर्तिता।
प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः॥
'साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।
सत्त्वभावस्तु यस्तस्याः स घञादिनिबन्धनः॥'

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

कै (पा 3·3·18) : भवतौ धातौ वाच्यत्वेनावस्थितं यत् सामान्यं पचादि-धातुवाच्यविशेषसमवेतं तत् प्रत्ययार्थत्वेन निर्दिश्यते इत्यर्थः। तत्र पाक इत्यादौ प्रकृतिभागः साध्यरूपमर्थमाह। प्रत्ययभागस्तु सत्त्वरूपताम्। तदुक्तं हरिणा–'आख्यातशब्दे ...' 'साध्वत्वेन ...' इति। उ वाच्यत्वे-नेति। अनेकार्थत्वाद् धातूनां सिद्धत्वमपि घञन्तभूधातोरर्थे इति भावः। यत् सामान्यमिति। साध्यत्वविशिष्टततत्क्रियात्वरूपविशेषसत्त्वेऽपि यत् सिद्धत्वाख्यं सामान्यं पचाद्यर्थगतं घञन्तभवतिवाच्यं तत् प्रत्ययार्थत्वेन निर्दिश्यते इत्यर्थः। न च तस्य एकत्वात् पुंस्त्वाच्च 'चिकीर्षा' इत्यादौ टाबादि न स्यादिति वाच्यं तस्य भावस्य सिद्धत्वरूपस्य एकत्वपुंस्त्व-विशिष्टस्य विशेषणत्वेन लिङ्गाद्यनियामकत्वात्। विशेषणत्वेन भासमाने-नापि तेन स्वाश्रयस्य लिङ्गाद्ययोग्यताऽपनीयते इति न दोषः। सत्त्वरूपता-मिति। एवं च सिद्धत्वसाध्यत्वरूपोभयधर्मविशिष्टो धात्वर्थः पाकादि-पदार्थ इति भावः। आख्यातशब्दे पचतीत्यादौ। भागाभ्यां प्रकृतिप्रत्ययाभ्याम्। साध्यसाधने क्रियाकारके बोध्येते इत्यर्थः। भशकौ (पा 1·3·1) : पाक इत्यादौ तु प्रकृत्या साध्यावस्थाया असत्त्वरूपाया उपस्थितिः। घञा तु सिद्धरूपायाः। उक्तं च–'आख्यातशब्दे...' 'साध्यत्वेन ...'। लिङ्ग-संख्याकारकाद्यन्वययोग्येन अवस्थाविशेषेण घञादिभ्य उपस्थितिरित्यर्थः।

लम 1084 reads सिद्धभावः for सत्त्वभावः in 3·8·48 d. (वाप) सिद्धभावः सिद्धत्वम्। यथा पचतीत्यादौ कल्पितान्वयव्यतिरेकाभ्यां धातुभागः क्रियायां प्रत्ययः कारके इति कल्पनाऽऽश्रीयते तथा प्रकृतिः साध्यस्वभावमाचष्टे घञ् तस्याः सत्त्वभावमित्यर्थः। इति हेलाराजः। अनेन अत्रापि इयं शास्त्रकृतकल्पनैव इति दर्शयति। (हेलाराजः— पचतीत्यादौ अन्वयव्यतिरेकवशेन धातुभागः क्रियायां प्रत्ययभागस्तु कारकादौ वर्तते इति शास्त्रे परिकल्प्यते।) See वैभूसा 88, 91. These are कारिकाs 14 & 15 of भट्टोजि दीक्षित (वैयाकरणमतोन्मज्जन-कारिका) भ reads सिद्ध० for सत्त्व०.

३-८-५० 'तत्र यं प्रति साध्यत्वं ... न तमेव पुनः प्रति॥'

कै (पा 3·1·67) ननु साध्यत्वात् क्रियायाः कथं क्रियान्तरं प्रति कर्म-कर्तृभावः। विषयभेदात् एकस्याप्यर्थस्य साध्यसाधनभावसम्बन्धसम्भवात् अदोषः। तदुक्तं हरिणा–'तत्र यं प्रति ...'। उ ननु साध्यत्वादिति। आसिद्धस्य जनकत्वासम्भवादित्यर्थः। सिद्धा त्विति यन्निरूपितं सिद्धत्वं तमेव प्रति पुनः साध्यत्वं नेत्यन्वयः। एवं च अन्यनिरूपितासिद्धत्वेऽपि अन्यनिरूपितं साध्यत्वं सम्भवत्येव इति भावः। See वैभू 63.

३-८-५२ 'मृगो धावति पश्येति साध्यसाधनरूपता।
तथा विषयभेदेन सरणस्योपपद्यते॥'

कै (पा 3·1·67) reads यथा for तथा, but उ reads तथा as in the text. कै तत्र कर्तृकर्मत्वं आख्यातवाच्यस्य भावस्य न विरुद्धम् ... उ तथा विषयेति। तथा सति विषयभेदेनेत्यर्थः। See वैभू 63.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

३·८·५३ 'लकृत्यक्तखलर्थानां .... धातुः साधस्य वाचकः ॥' लम 1559 ... इति हर्युक्तेः। अत्र हेलाराजः कृत्यादियोगे कृत्वसुजादयो भवन्त्येवेत्याह। कृत्येत्यादिक्तो नपुंसकविषयः । रूढिशब्दाः ताच्छीलिकाः । घञादयः भावकर्मादिविहिताः। आदिना तृजादयः। ...

३·८·५४ लम 809 हरिरप्याह — 'साध्यस्यापरिनिष्पत्तेः ... उपमानं ततो न तैः॥' तिङन्तार्थस्य साध्यत्वात् अपरिनिष्पत्तेः सिद्धत्वेन अभानात् तदर्थयोरिवमन्तरेण सिंहो माणवक इतिवत् पठति रोदितीव इत्यादौ सोऽयमित्यभिसम्बन्धाभावात् तिङन्तार्थो नोपमानं साधारणधर्मान्वयाभावात्। यस्योपमानस्य इवमन्तरेण उपमेयेन सह सोऽयमित्यभिसम्बन्धः तस्य इवसमभिव्याहारे उपमानत्वेन प्रतीतिरित्यङ्गीकारात् ॥

३·८·५५ ननु रोदितीव पठति इत्यादौ कर्तुरेव तत्त्वं स्यादत आह — 'साधनत्वं प्रसिद्धं च ... उपमा तु न विद्यते ॥' (लम 809 reads कल्पते for विद्यते)। सम्बन्धिनां गुणभूतानाम्। अध्यारोपः उत्प्रेक्षा।

३·८·५६,५७ लम 809 न्यूनत्वोत्कृष्टत्वाभावाच्च नोपमानत्वमित्याह —

'न्यूनेषु च समानार्थमुपमानं विधीयते। ...'
'येनैव हेतुना हंसः पततीत्यभिधीयते। ...'

लम continues: समानार्थं साधारणधर्मवत्। येनैव हेतुना पक्षादिना। हंस इवातिः पततीत्यत्र तु साधनयोरुपमानोपमेयभावो न तिङन्तवाच्ययोः क्रिययोः इति हेलाराजः। पचतिकल्पं देवदत्तः इत्यादौ आख्यातार्थे देवदत्तस्य विशेषणतेति बोध्यम्।

३·८·५७ 'येनैव हेतुना ... आतौ तस्य समाप्तत्वात् ...'

कै (3·1·7): इवशब्दप्रयोगे तु अध्यारोपो विद्यते — 'रोदितीव गायति' 'नृत्यतीव गच्छति' देवदत्त इति। परिपूर्णेन च न्यूनस्योपमानं भवति। क्रिया च सर्वा स्वाश्रये समाप्ता इति न्यूनत्वासम्भवस्तस्याम्। तदुक्तं — 'येनैव हेतुना ...' उ अध्यारोपः उत्प्रेक्षा समाप्तत्वात् पातस्य संपूर्णत्वात् इत्यर्थः। आतिः पक्षिविशेषः। एवं चैकस्यां क्रियायां भेदासम्भवात् नोपमानोपमेयभावः। Use of √पत् with हंस in Veda:

ऋ 5·78·1 हंसाविव पततम्।
ऋ 7·59·7 आ हंसासो नीलपृष्ठा अपप्तन्।
ऋ 8·35·8 हंसाविव पतथः।

३·८·६४ 'आचार्यो मातुलश्चेति यथैको व्यपदिश्यते।
संबन्धिभेदादर्थात्मा स विधिः पक्तिभावयोः॥'

Quoted by कुमारिल in his तन्त्रवार्तिक on जैसू 2·1·5·17 (p. 424 of आनन्दाश्रम edition) thus: तस्माद्देवतान्तरमिति। सत्यपि द्रव्यैकत्वे

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

सगुणनिर्गुणाश्रयणात् देवतान्तरत्वम् । आह च —

'आचार्यो मातुलश्चेति द्रव्यैकत्वेऽपि दृश्यते ।
अपेक्षाहेतुभेदेन व्यवहारः पृथक्तया ॥'

based on भाष्य **on** पा 3·3·18 भावे : अथवा कृभ्वस्तयः ... मातुलं उपाध्यायं ... पचतेर्भवतौ·

कै (पा 3·3·18) : यथैकस्मिन् वस्तुनि मातुलत्वं उपाध्यायत्वं च भिन्नसम्बन्धाश्रयं परस्परं अबाधेन व्यवस्थितं तथा पाकादिषु विशेषरूपता भावशब्दस्य वाच्यं च सामान्यम् । तदुक्तं हरिणा–'आचार्यो' इति । उ विधिरिति । प्रकार इत्यर्थः । यथैकस्यैव आचार्यत्वं मातुलत्वं सम्बन्धिभेदात् तथैकस्मिन्नेव पाकादिषु साध्यत्वविशिष्टतत्-तत्क्रियात्वरूपविशेषरूपता भावशब्दवाच्यं सामान्यं चेत्यर्थः । तच्च तत्र यथा निरूपकभेदादभिन्नं एवं प्रकृतेऽपि वाचकभेदात् कारकनिरूपितं साध्यत्वं क्रियान्तरनिरूपितं च सिद्धत्वमिति बोध्यम् ।

३-९-१ "व्यापारव्यतिरेकेण कालमेके प्रचक्षते ।
नित्यमेकं विभु द्रव्यं परिमाणं क्रियावताम् ॥"

कमलशील **on** तत्त्वसंग्रह **(2300–2301) quotes this** कारिका, **rather differently, thus :—**

ननु च काल एको व्यापी नित्यश्च इति इष्टं कालवादिनाम् । यथोक्तं —

'व्यापारव्यतिरेकेण परिमाणक्रियावताम् ।
नित्यमेकं विभु द्रव्यं कालमेके प्रचक्षते ॥ इति ॥'

तत् कथं तस्य प्रविभागो युज्यते इत्याह —

'कालश्चैको विभुर्नित्यः प्रविभक्तोऽपि गम्यते ।
वर्णवत् सर्वभावेषु व्यज्यते केनचित् क्वचित् ॥
वर्णेषु व्यज्यमानस्य तस्य प्रत्यायनाङ्गता ।
अन्यत्रापि तु सद्भावात् तत्स्वरूपस्य नित्यता ॥'

प्रविभक्तोऽपि इति अपिशब्दः एकोऽपि नित्योऽपि विभुरपि इति सम्बन्धनीयो भिन्नक्रमत्वात् । कथं प्रविभक्त इत्याह—वर्णवत् सर्वभावेष्विति । एतदुक्तं भवति —यथैकोऽपि नित्यो गकारादिवर्णो यदा केनचिद् ध्वनिविशेषेण क्वचित् प्रदेशे वा व्यज्यते तदा देशादिविभागेन प्रविभक्तो गम्यते तथा कालोऽपि । यद्यपि चासौ सर्वपदार्थव्यापी तथापि यदा केनचित् क्रियाविशेषेण क्वचित् पदार्थे व्यज्यते तदा प्रविभक्तो गृह्यते । यदा तु वर्णेषु व्यज्यते तदाऽर्थप्रत्ययाङ्गं भवति । यदि तर्हि प्रविभक्तो नित्यविभुत्वं कथं तस्यावगतमित्याह–अन्यत्रापीत्यादि । अन्यत्रापि लताकिसलयादौ सद्भावात् सत्तावत् तस्य नित्यत्वं विभुत्वं च सिद्धम् । नित्यताग्रहणमुपलक्षणम् ॥

३·९-२ 'दीप्तिप्रस्थसुवर्णादि मूर्तिभेदाय कल्पते ।
क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका ॥'

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

कै (पा 5·1·19) : यच्चापरिमाणमिति अमूर्तमपि आत्मादि गण्यते इत्यर्थः। उन्मानप्रमाणपरिमाणानि तु मूर्तद्रव्यविषयाण्येव। क्वचित् पाठः 'यच्च परिमाणमिति। तत्रायमर्थः—द्रोणादिपरिमाणमपि संख्यया परिच्छिद्यते—द्वौ द्रोणौ इति। परिमाणग्रहणं चोपलक्षणम्। सर्वस्य संख्यापरिच्छेद्यत्वात्। तदुक्तं—'दिष्टिप्रस्थसुवर्णादि....'। भशाकौ (पा 1·3·1) : न हि क्रियात्वं विना असौ (कालयोगः) सम्भवति। तदुक्तं—'क्रियाभेदाय कालस्तु...' इति। उ (पा 3·2·123) क्रियारूपत्वाभावश्चेति यतो भूतभविष्यद्विरोधि-वर्तमानत्वाभावोऽतः क्रियात्वाभाव इत्यर्थः। तदुक्तं—'क्रियाभेदाय...'। उ (पा 1·3·1) (भाष्ये) "अथ वा नान्तरेण क्रियां भूतभविष्यद्वर्तमानाः काला व्यज्यन्ते।" एतन्मूलिकैव 'क्रियाभेदाय कालस्तु' इति वाक्यपदीयो-क्तिः। लम 1495 संख्या च सर्वपदार्थभेदिका स्वस्यापि भेदिका गुण-क्रियादिभेदिका च। 'क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका॥' इत्युक्तेः। एकविंशत्यादयोऽपि संख्यान्तराण्येव न संख्यासमूहः॥ See वैभू 74 & वैभूसा 85.

३-९-४, ५ अभिनवगुप्त in ईप्रविवि (Vol III pp 9–10) quotes these two कारिकाs in support of his explanation about कालशक्ति thus :—

तथाऽन्यत्रापि

'तमस्य लोकयन्त्रस्य ... विश्वं विभज्यते॥'
'यदि न प्रतिबध्नीयात् प्रतिबन्धाच्च नोत्सृजेत्।
अवस्था व्यतिकीर्येरन् पौर्वापर्यविनाकृताः॥' इति।

अनेन हि स्वातन्त्र्यं ... वदता ऐश्वर्यमुक्तम्। We read प्रतिबन्धं च for प्रतिबन्धाच्च.

३-९-६ 'तस्यात्मा बहुधा........वस्तु किञ्चन विद्यते॥'
कै (पा 2·2·5) : परोपाधिक एव सर्वस्य भेदः। तथा चोक्तं हरिणा काल-समुद्देशे 'तस्यात्मा ...'। उ व्यवहारमात्रस्य औपाधिकत्वात् यावद्बाधं प्रामाण्यमङ्गीकार्यमिति भावः। तत्रार्थे वृद्धसंमतिमाह 1 तथाचेति। तस्य क्षणसमूहरूपस्य कालस्य। आत्मा स्वरूपम्। धर्मान्तराश्रयैः धर्मी सूर्यः तद्वृत्ति अन्तरं धर्मान्तरं धर्मविशेषः क्रियारूपः स आश्रयो येषां तैः क्रियाश्रितैः भेदैः विशेषैः। बहुधा अहरादिभेदेन। नहि केवलं कालस्यैव भेद औपाधिकः किंतु सर्वस्यापीत्याह—'नहि' इति।

३-९-७ 'नैको न चाप्यनेकोऽस्ति...एवंरूपः प्रकाशते॥ कै (पा 2·2·5) परोपाधिक एव सर्वस्य भेदः। तथा चोक्तं हरिणा कालसमुद्देशे 'नैको...'। उ भेदा-भेदौ एकत्वानेकत्वे शुक्लत्वकृष्णत्वे इत्यादि सर्वमपि न कस्यचित् स्वाभा-विकमिति। तदुक्तं—'नहि गौः, स्वरूपेण गौः नाप्यगौः गोत्वाभिसम्बन्धात्तु गौः इति। (This is quoted by मम्मट in his काव्यप्रकाश (2·10) as उक्तं हि वाक्यपदीये. Obviously this is prose &

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

could not have been part of वाक्यपदीय; it must be searched for in भर्तृहरि's दीपिका or some other of his lost works; this statement is oft-quoted.) किं त्वौपाधिकमेव इत्याह–द्रव्यात्मेति। द्रव्यपदार्थः ततत्तत्संसर्गात् एकत्वानेकत्वादिनाना-व्यवहारविषय इत्यर्थः। एवं च ब्रह्मैव कल्पिततत्तत्पदार्थससंर्गात् भेदाभेदैकत्वानेकत्वशुक्लत्वकृष्णत्वादिना भासते इति भावः। वस्तुतस्तु सर्व-धर्मविनिर्मुक्तमिति बोध्यम्।

३·९·८ 'संसर्गिणां तु ये भेदाः... कालो भेदाय कल्पते'॥ कै (2·2·5) : परो-पाधिक एव...'संसर्गिणां तु...' उ **reads** स भिन्नः तैर्व्यवस्थानां **for** संभिन्नस्तैरवस्थानां **in (c).** प्रकृते आह—'संसर्गिणां त्विति' आदित्य-क्रियादीनां ये भेदा विशेषाः त एव तस्य कालस्य विशेषा अहरादिविशेष-व्यवहारहेतव इत्यर्थः। तैः भिन्नस्वरूपः कालो व्यवस्थानां अहरादिव्यवहाराणां भेदाय कल्पते इत्यर्थः।

३·९·१८ 'ततस्तु समवायाख्यां...आपादयति कारणैः॥'
लम 1132 तदुक्तं हरिणाऽपि—'ततस्तु...'। ततः कार्यव्यक्त्यनन्तरम्। भेदस्य भेदमात्रप्रतीतेः। कारणैः अयुतसिद्धत्वेन एकदेशस्थित्या अविभाग-रूपैः इत्यर्थ इति हेलाराजः॥

३·९·४८ 'तस्याभिन्नस्य कालस्य व्यवहारे क्रियाकृताः।
भेदा इव त्रयः सिद्धा याँल्लोको नातिवर्तते॥'

लम 853 **reads** वस्त्वभिन्नस्य **for** तस्याभिन्नस्य; इमे **for** इव; यान्न लोकोऽति० **for** याँल्लोको नाति०. तदुक्तं—नित्यो विभुरखण्डः कालः इति वैशेषिकमतोपपादने हरिणा— 'वस्त्वभिन्नस्य ... अतिवर्तते, इति इत्यपास्तम्। तेषां कालमात्रधर्मत्वाच्च।...

३·९·८० 'परतो भिद्यते सर्वमात्मा तु न विकल्प्यते।...' वैभू 74; वैभूसा 121 **reads** विकरूपते **(perhaps wrongly read for** विकल्पते**) instead of** विकल्प्यते.

३·९·८२-८४ 'व्यवधानमिवोपैति निवृत्त इव दृश्यते।
क्रियासमूहो भुज्यादिरन्तरालप्रवृत्तिभिः॥
न च विच्छिन्नरूपोऽपि सोऽविरामान्निवर्तते।
सर्वैव हि क्रियाऽन्येन संकीर्णेवोपलभ्यते॥
तदन्तरालदृष्टा वा सर्वैवावयवक्रिया।
सादृश्यात् सति भेदे तु तदङ्गत्वेन गृह्यते॥'

कै (पा 3-2·123) : न्याय्या त्विति। अध्ययनं यदा प्रवृत्तं न चोपरतं तदा तस्य भोजनादिक्रियानान्तरीयकत्वात् अव्यवधायिका। अथवा अध्ययन-स्यैव अवयवक्रिया इति भावः। तदुक्तं हरिणा-'व्यवधानं' 'न च

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

विच्छिन्नरूपः' 'तदन्तरालदृष्टा वा' इति। उ अथवा अध्ययनस्यैव इति। भोजनादिकं विना तदनिर्वाहात् तदवयवत्वेनैव तस्या ग्रह इति भावः। व्यवधानमिव इति। अव्यवधायकोऽपि व्यवधानमिव प्राप्नोति अनिवृत्तोऽपि निवृत्त इव दृश्यते। अन्तरालप्रवृत्तिभिः हासादिभिः। अविरामात् फलनिर्वृत्त्या विरामाभावात्। विच्छिन्नरूपोऽपि विच्छिन्न इव भासमानोऽपि फलानिर्वृत्तेर्न निवर्तते सर्वथा न निवर्तते इत्यर्थः। सर्वैवेति। तथा च नान्तरीयकत्वात् तासां न व्यवधायकत्वमिति भावः। पक्षान्तरमाह–तदिति। तन्मध्यदृष्टा सर्वा तदवयवक्रियैव इत्यन्वयः। एवं च स्वाऽवयवक्रिया यथा स्वस्याः न व्यवधायिकाः तथा इमा अपि इत्यर्थः। एवं चात्र पक्षे भोजनाद्यपि अध्ययनशब्दार्थत्वेन आश्रितमिति तात्पर्यम्। ननु कथं तदवयवत्वेन ग्रहोऽत आह— सादृश्यादिति तत्फलनिर्वाहकत्वेनेति। सति भेदे त्विति तुः अप्यर्थे। अत्यन्तभिन्नाया अपि क्रियाया मध्यपातितया तदङ्गत्वेन ग्रहात् स्वाङ्गं न व्यवधायकमिति भावः।

३-९-८९ लम 862 तदप्युक्तं हरिणा–'कार्योत्पत्तौ समर्थं वा स्वेन धर्मेण तत्तथा। आत्मतत्त्वेन....'॥ कार्योत्पत्तौ समर्थं समूहरूपम्। स्वेन धर्मेण फलजनकत्वेन। आत्मतत्त्वेन क्रियात्वेन सा तत्क्षणवृत्तितैव।

३-९-९० 'क्रियाप्रबन्धरूपं यत् अध्यात्मं विनिगृह्यते। ...'

लम 861 reads बुद्ध्यात्मनि निगृह्यते for अध्यात्मं विनिगृह्यते. बुद्ध्यात्मनि बुद्धिस्वरूपे। क्रमेण भूतानामपि एकबुद्धौ संकलना भवत्येव। अनुभवपूर्वकं हि स्मरणं न तु क्रमोपलब्धं युगपन्न स्मर्यते इति।

३-९-११२–११३ 'सतामिन्द्रियसम्बन्धात् सैव सत्ता विशिष्यते।
भेदेन व्यवहारो हि वस्त्वन्तरनिबन्धनः॥

अस्तित्वं वस्तुमात्रस्य बुद्ध्या तु परिगृह्यते।
यः समासादनाद् भेदः स तत्र न विवक्षितः॥'

कै (पा 3·3·133) 'कूपोऽभूत्' इति प्रयोक्तव्ये 'कूपो भविष्यति' इत्यपि प्रयुज्येत। ... इन्द्रियव्यापारकालस्य कूपसत्त्वं प्रति भेदकत्वेनाश्रयणात् तस्यापि तत्कालत्वमित्यर्थः। तदुक्तं हरिणा–'सताम्' 'अस्तित्वम्'। उ इन्द्रियव्यापारः तत्प्राप्तिः। इन्द्रियपदेनात्र कर्मेन्द्रियम्। सतां वस्तूनां इन्द्रियसम्बन्धात् तत्कृतप्राप्तिसम्बन्धात् एकैव सत्ता कालभेदमापद्यते। वस्त्वन्तरं इन्द्रियव्यापारः। तदेवाह–यः समासादनादिति। तत्र बुद्धिकर्मव्यवसायविषये।

३-१०-१–२ 'प्रत्यक्ता परभावश्चाप्युपाधी कर्तृकर्मणोः।
तयोः श्रुतिविशेषेण वाचकौ मध्यमोत्तमौ॥
सदसद्वाऽपि चैतन्यमेताभ्यामेव गम्यते।
चैतन्यभागे पुरुषः प्रथमो न तु वर्तते॥'

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

लम 927 reads प्रत्यक्त्वापरभावश्च for प्रत्यक्ता परभावश्च, एताभ्यामवगम्यते for एताभ्यामेव गम्यते and प्रथमपुरुषो for पुरुषः प्रथमो. 'त्वं पचसि' 'अहं पचामि' 'त्वं पाठ्यसे' अहं पाठ्ये' इत्यादौ मध्यमोत्तमयोः प्रत्यक्त्वं अपरत्वं च कर्तृकर्मविशेषणतया बुध्यते शब्दशक्तिस्वभावात्। तदुक्तं पुरुषसमुद्देशे हरिणा –'प्रत्यक्त्वापरभावश्च' 'सदसद्वाऽपि चैतन्यं'। तत्र कर्मविशेषणतया तयोः प्रतीतिः आत्मनेपदेनैव इत्युक्तं श्रुतिविशेषेणेति। वाचकत्वं द्योतकत्वम्। एवं च मध्यमोत्तमौ चैतन्ययुक्ते कर्तृकर्मणी बोधयतः।नन्वेवं 'शृणोत ग्रावाणः' इत्यादौ मध्यमो न स्यात्। अत उक्तं –'सदसद्वा इति। असत् अनभिव्यक्तम्। एवं च ... प्रथमपुरुषस्तु चैतन्यास्पर्शेन साधनभावमात्रमवगमयति न तु चेतनत्वम्।... (पा ३·१·७·१५ सर्वस्य वा चेतनावत्त्वात् (भा०) अथवा सर्वं चेतनावत्।...ऋषिः पठति 'शृणोत ग्रावाणः'. तैसं १·३·१३·१; मैसं १·३·१; काठकसं ३·९).

३·१०·४,६ 'संबोधनार्थः सर्वत्र...' 'युष्मदः प्रथमान्तस्य...' लम 1165 refers to these कारिकाs when it says: परं तु क्रियाविनियोगफलकं अभिमुखीकरणं संबोधनं तद्विषयत्वं च संबोध्यत्वं न चैतत् त्वं पचसीत्यादौ प्रतीयते अभिमुखीभूतेऽपि तत्प्रयोगात्। तस्मात् प्रयोक्तुः अहंकारानास्पदचेतनत्वेन युष्मदः शक्तिः। स्पष्टं चेदं पुरुषसमुद्देशे (वाप ३·१०) हरिग्रन्थे इत्याहुः॥

३·११ (संख्यासमुद्देशः) लम 1184–1185 यद्वा एकत्वादिविशिष्टः प्रकृत्यर्थो विभक्तिवाच्येन एकत्वादिना विशेष्यते। एकत्वादिविशिष्ट एवार्थो न तु गुणान्तरविशिष्ट इति। एवं च वचनग्रहणं न कार्यम्। स्पष्टं चेदं सर्वं अनभिहितसूत्रे भाष्ये संख्यासमुद्देशे हरिग्रन्थे च इति दिक्॥

३·११·१–२ 'संख्यावान् सत्त्वभूतोऽर्थः सर्व एवाभिधीयते।
भेदाभेदविभागो हि लोके संख्यानिबन्धनः॥
स धर्मो व्यतिरिक्तो वा तेषामात्मैव वा तथा।
भेदहेतुत्वमाश्रित्य संख्येति व्यपदिश्यते॥'

लम 819 reads अपि for हि in 3·11·1 (c). नच 'संख्यावान्...' इति संख्यासमुद्देशे हर्युक्तेः कथं असत्त्वभूतक्रियायाः संख्यावत्त्वम्।...लम 1493 भेदमात्रं संख्या आह। भेदो वैलक्षण्यम्। एकत्वस्य अभेदबोधकत्वात्। तदुक्तं हरिणा– 'भेदाभेदविभागोऽपि...' इति द्वित्वादि भेदव्यवहारकृत् एकत्वं अभेदव्यवहारकृत् इति हेलाराजः। लम 1494...समूहरूपत्वं च द्व्यादय आहुः। असमूहरूपत्वं च एकशब्द आह। एवंच हरिणा कथमेकत्वसमुदायरूपत्वमुक्तमिति चेत् सत्यम्। परमतेन तथाऽभिधानात्। अत एवोपक्रमे 'संख्यावान् सत्त्वभूतोऽर्थः सर्व एवाभिधीयते।' 'स धर्मो व्यतिरिक्तो वा तेषामात्मैव वा तथा।' इत्युक्तम्। स धर्मः संख्यारूपो धर्मः। व्यतिरिक्त इति वैशेषिकमते। तेषां हि द्रव्याश्रिता गुणरूपा

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

संख्या । स्वमतमाह—तेषामात्मैवेति । तेषां सत्त्वभूतार्थानां समूहस्य समूहिभिरत्यन्तभेदाभावात् आत्मैव इत्युक्तम् । तथा संख्यात्ववान् ।....

३·११·१५-१८ लम 1489–1490 'द्वित्वादियोनिरेकत्वं...' (१५) तत्र समूह उद्भूतावयवभेद एव वाच्यः । अत एव पञ्चादयो नित्यं बहुवचनान्ता एव । ननु 'द्वित्वादियोनिरेकत्वं' एकत्वेन विना द्वित्वादीनामुत्पत्त्यसम्भवात् । तस्मादेकत्वमाद्यं द्वित्वादयस्तु पदार्थान्तरसंनिधौ तत्पूर्वका जायन्ते । तदेवाह– 'एकत्वे बुद्धिसहिते ...' (१६) एकत्वद्वयविषया बुद्धिर्द्वित्वादेः कारणम्... द्वित्वादिस्वरूपे मतभेदमाह । 'एकत्वसमुदायो वा...' (१७). (cd एकत्वे द्वित्वमित्येवं तयोर्द्विवचनं भवेत् ॥ लम reads for this द्व्येकयोरिति निर्देशे प्राप्ते रामस्तथा सति ॥ (c) in लम resembles 3·11·32 (a) द्व्येकयोरिति निर्देशात् (d) in लम seems to be a corrupt reading). एकत्वाभ्यां नापूर्वं द्वित्वमुत्पाद्यते किन्तु तयोः समुदाय एव द्वित्वम् ...... 'एकोऽपि गुणभेदेन संघो भेदं प्रकल्पयेत् । आश्रयाश्रयिभेदो हि तदाश्रयनिबन्धनः ॥' (१८); लम reads (cd) differently—

'गुणाः समूहावयवाः तेषां भेदेन स्वात्मनः ॥'

ननु द्वित्वादेरेकत्वात् द्वयोर्द्विवचनमित्यादि अनुपपन्नम् । तत्रोक्तं— 'एकोऽपि...'। (१८). एकस्यापि द्वित्वादभेद इति तदुपपत्तिरिति हरिणोक्तम् ॥

३·११·२३ लम 1480 तदुक्तं हरिणा—

'न संख्यायां न संख्येये द्वौ दशेत्यस्ति सम्भवः ।
भेदाभावान्न संख्यायां विरोधान्न तदाश्रये ॥'

द्विरावृत्ता दश द्विदशाः (cf भाष्य on पा 2·2·25 : अथ द्विदशाः त्रिदशाः इति कोऽयं समासः । बहुव्रीहिरित्याह । कोऽस्य विग्रहः । द्विर्दश द्विदशा इति ।) अत्र सुजर्थान्तर्भावेण आवृत्तिक्रियान्तर्भावेण च द्विशब्दस्यावृत्तिविषये वृत्तिः । ... दशत्वसंख्यायाः संख्येयं प्रति उपसर्जनत्वात् एकत्वाच्च न तदन्वयः । संख्येयेष्वपि न । विरोधात् । नहि दश द्वौ भवन्ति ।

३·११·२७ 'निमित्तमेकमित्यत्र विभक्त्या नाभिधीयते ।
तद्वतस्तु यदेकत्वं विभक्तिस्तत्र वर्तते ॥'

कै (पा 2·3·1) : तदुक्तं हरिणा 'निमित्तमेक' इत्यत्र (v. 1. एकः for एकम्) । यथा शतमित्यत्र प्रवृत्तिनिमित्तं शतसंख्याऽन्याऽन्या च विभक्तिवाच्या प्रातिपदिकार्थगतैकत्वसंख्या तथा एक इत्यत्रापि प्रवृत्तिनिमित्तविभक्तिवाच्ये द्वे एकत्वे । ...उ एतद् भाष्यं हरिणाऽपि एवमेव व्याख्यातमित्याह-तदुक्तमिति । निमित्तं प्रवृत्तिनिमित्तम् । द्वे एकत्वे इति । द्वयोरपि तयोः ब्राह्मणौ द्वौ इत्यादाविव एकरूपेणैव भानात् न बोधावृत्त्यनुभवविरोधौ ।

३·१२·१ 'य आत्मनेपदाद् भेदः ... मन्यन्ते तमुपग्रहम् ॥'

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

भशक्तौ (पा 3·1·85): लादेशव्यङ्ग्यः क्रियासाधनविशेषरूपः स्वार्थ-परार्थत्वादिश्च उपग्रहशब्दस्य वाच्यः। यथोक्तं—'य आत्मनेपदात् ...'। आत्मनेपदादिति लादेशादिति च हेतौ पञ्चमी। इह तु तत्प्रतीतिनिमित्ते परस्मैपदे आत्मनेपदे च उपग्रहशब्दो लक्षणया वर्तते। लम 928: अथोपग्रहः कः पदार्थ इति चेत् अत्र हरिः -'य आत्मनेपदात् ...'। लम reads यस्त्वात्मने॰ for य आत्मने॰; अन्यतः परस्मैपदात्। उपग्रह इति तस्य पूर्वाचार्यसंज्ञा। cf उ (पा 3·1·85) व्यत्ययो बहुलम् & कारिका on it 'सुप्तिङुपग्रहलिङ्गनराणाम् where भाष्य takes both आत्मनेपदव्यत्ययः and परस्मैपदव्यत्ययः) explains उपग्रह thus लादेशव्यङ्ग्यं स्वाथत्वादि। इह तत्प्रतीतिनिमित्ते परस्मैपदात्मनेपदे उपग्रहशब्देन लक्षणयोच्येते।

३-१२-२ लम 928: तं (उपग्रहं) विभजते —

"क्वचित् साधनमेवासौ ... व्यक्तिवाचां विशेषणम्॥'

ना reads व्यक्तवाक्त्वं for व्यक्तिवाचां. कर्मादि इत्यादिना कर्ता भावश्च भावोऽपि तिङनुवाद्यः। क्रियाया एकपदवाच्यसाधनावेशमावेदयन् भवति साधनम्। 'व्यक्तवाचां समुच्चारणे' (पा 1-3-48) इति व्यक्तवाक्त्वं स्वविशिष्टस्य कर्तृतामावेदयत् उपग्रहः॥

३-१२-३ क्वचिद्विषयभेदेन क्रियाविशेषे उपग्रह इत्याह –
'क्रियाविषयभेदेन ... लादेशैः ... नियम्यते॥

लम 928 reads लादेशे for लादेशैः & अवगम्यते for नियम्यते त्रिषय-विशेषेण धात्वर्थः क्रिया भिद्यते स च भेदो लादेशैरभिव्यज्यते इति शेषः। यथा पचेर्जीवनोपायत्वेन अनुष्ठीयमानो विक्लित्त्यनुकूलव्यापारेण अन्नसंस्कार-लक्षणः पाकः तदर्थकत्वं परस्मैपदव्यङ्ग्यम्। ... स क्रियाभेदैः 'स्वं यज्ञं यजते यजति' इत्यादौ वाक्ये स्वादिपदेनापि गम्यते 'विभाषा उपपदेन' इति तत्र पदद्वयमित्यर्थे हेलाराजः। (हे on वाप 3·12·3–'विभाषा उपपदेन प्रतीयमाने' (पा 1·3·77) इति लादेशद्वयानुशासनात् स्वामिति पदान्तर-संसर्गरचितवाक्यावसेयं क्रियायाः प्रधानफलस्य कर्तृगामित्वम्।)

३-१२-४ लम 928: क्वचित् क्रियाविशेषे उपग्रह इत्याह —
'धात्वर्थः ... धात्वर्थो गन्धनादिःस्यात् व्यतिहारो॥'

लम reads धात्वर्थे गन्धनादि स्यात् as (c) and व्यतीहारो for व्यतिहारो in (d). तद्विशेषः तद्विशेषणम्। गन्धनावक्षेपणादयः (पा 1·3-32) सन्तोऽपि नात्मनेपदमृतेऽभिव्यक्ता इत्युपग्रहः। यथा 'उत्कुरुते' इति। (काशिका—गन्धने तावत्—उत्कुरुते। उदाकुरुते। सूचयतीत्यर्थः। गन्धनं सूचनं परेण प्रच्छाद्यमानस्य अवद्यस्य आविष्करणम्।) व्यतीहारस्तु क्रियाविशेषणम्। आत्मनेपदव्यङ्ग्य उपग्रहः। 'व्यतिलुनीते' इत्यादौ। व्यतिहार & व्यतीहार are both admissible: the first in कर्म-व्यतिहार (पा 1·3·14; 3·3·43; 5·4·127 & 7·3·6), the second in (पा 3·4·19).

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

३·१२·५-७ 'क्रियाप्रवृत्तावाख्याता...' 'केषांचित् कर्त्रभिप्राये .... ' 'क्रीणिष्व वपते धत्ते'. भशकौ (पा 1·3·72) : 'असती च' in ५ (c) इत्यनेन 'कमलवनोद्घाटनं कुर्वते ये' इत्यादयः प्रयोगाः समर्थिताः। तत्रापि स्वार्थताविवक्षायाः सम्भवात्। ण्यर्थस्य वाचकं द्योतकं वा आत्मनेपदमिति मतद्वयं संगृहीतं केषांचिदित्यादिना श्लोकेन । चिनोति चिनुते इति चिनोति चापयति चेति क्रमेणार्थः। लम 932 on वाप ३·१२·५ सर्वस्य स्वार्थप्रवृत्त्या स्वार्थता सर्वत्र मुख्या। परार्थता त्वसत्येव। सतीवेति तु लौकिकी वाचोयुक्तिः। विवक्षितं विवक्षा । सा निबन्धनं हेतुरस्याः परार्थताया इत्यर्थः।... अत्र कैश्चिदित्यनेन अरुचिर्बोधिता।... इति हेलाराजः॥

३-१२-६ उ (पा 1·3·72) : कर्त्रभिप्रायतासूत्रे नन्वयमर्थः सूत्रानारूढोऽत आह-कर्त्रभिप्राये इति। 'केषांचित् ...' इति च। केषांचित् धातूनां स्वरितञितां केषांचिद् वादिनामिति वा। एवमन्येषामित्यपि बोध्यम्। लम 940 : एवं चैकविषयत्वात् तयोः पर्यायत्वं 'यजते याजयति' इति वदन्ति। तन्मतमाहः— 'केषांचित् .... अन्येषां ...यथा ॥' णिचा सह णिजर्थो प्रकृतिः धातुर्यथा विकल्पते तद्वत् । अन्येषां स्वरिताञिद्व्यतिरिक्तधातूनाम् । .... किञ्च सामान्यविहितस्य णिचः धातुविशेषाद् विहितेन आत्मनेपदेन बाध एवोचितः। एतच्च केषांचित् इत्यनेन सूचितमिति हेलाराजः॥

३-१२·७ लम 940 : अथैतेषां णिजात्मनेपदयोर्विकल्पभ्रमबीजं दर्शयाति 'क्रीणीष्व वपते धत्ते ... अभिधीयते॥' आत्मानं क्रीणीष्वेति विनतां कद्रूराह । तस्य च दास्यात् आत्मनो मोचनाय पुत्रसंविधानं कुरु इत्यर्थः इति तेषां तद् भ्रमबीजम्। तत्र प्रत्युपकाराद्विना दास्यमुक्त्यसम्भवात् अर्थसामर्थ्यात् पुत्रसंविधानं गम्यते न तु स तदर्थः इति स तेषां भ्रमः।...एवमन्यत्राप्यूह्यमिति हेलाराजः।

३-१२-८ 'संविधानं पचादीनां ... क्रियाऽधिश्रयणादिका ॥'

लम 930 : ननु पचादीनां विक्लित्त्यादिवचनत्वात् कथं प्रतिविधानमर्थः। किञ्च तदर्थत्वाभावे कर्त्रभिप्रेतक्रियाफलाप्रसिद्धिरत आह—'संविधानं'। ... संविधानमपि सामग्रीसंघटनरूपं पचाद्यर्थः। ... न हि संविधानमेव णिजर्थः अपि तु तत्पूर्वकं प्रेरणम्। यत्र सति प्रयोजके इत्युच्यते। संविधानं कुर्वन्नपि न यावत् प्रेरयति न तावत् प्रयोजक इति उच्यते इति हेलाराजः।

३-१२-९ 'कर्त्रभिप्रायता सूत्रे ... तत्कर्ता फलभाग् यतः॥'

उ (पा 1·3·72) : नन्वयमर्थः सूत्रानारूढोऽत आह—'कर्त्रभिप्राये क्रियाफले' इत्यनेन संविधानलक्षण एव क्रियाविशेष उपलक्ष्यते। तदुक्तं 'कर्त्रभिप्रायता सूत्रे...' क्रियाभेदः संविधानलक्षणः। तत्कर्ता संविधानकर्ता। लम 931 : कर्त्रभिप्रायक्रियाफलग्रहणेन संविधानक्रिया निर्दिश्यते। 'नक्षत्रं दृष्ट्वा वाचं विसृजेत्' (मैसं 3·6·9) इत्यत्र नक्षत्रदर्शनेन कालविशेषनिर्देशवत्।...

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

३-१२-१६ 'एकत्वेऽपि क्रियाऽऽख्याते .... भेदस्तत्र तदाश्रितः ॥'
कै (पा 4·1·1) reads तदाश्रयः for तदाश्रितः। क्रियाप्रधानत्वादाख्यातस्य क्रियायाश्च असत्त्वभूतत्वात् सत्त्वधर्मेण लिङ्गेनायोगः । नच द्रव्यधर्मलिङ्गग्रहणयोग्यत्वं नियतत्वात् शब्दशक्तीनामिति भावः । तदुक्तं हरिणा—'एकत्वेऽपि ...'। उ भिद्यते आरोपितसंख्यावती भवति । तदाश्रयः तत्संबद्धो लिङ्गाख्यो भेदस्तत्र न–'आरोप्यते' इति शेषः। कस्याचित् शब्दस्य शक्तिः कस्मिंश्चिदुपस्थितेऽप्यर्थे प्रतिवध्यते इत्यन्वयः। लम 816 : तदुक्तं हरिणा–'एकत्वेऽपि' अत्र हेलाराजः— एकपदोपात्तकर्तृकर्मलक्षणसाधनाधारकद्वित्वबहुत्वाभ्यां पचतः पचन्ति, पच्येते पच्यन्ते इति क्रिया विशेष्यते । नहि (v. l. तेन हि) द्विवहुसाधनसाध्यत्वं प्रतीयते क्रियायाः । एवं तद्गतलिङ्गयोगो न । शब्दार्थप्रतीतेः स्वाभाविकत्वेन युक्त्यगम्यत्वात् । अत एव 'देवदत्तः पचति' इत्यादौ द्रव्येण क्रियायाः सामानाधिकरण्यम् । अत एव द्रव्यवादिनां आख्यातार्थोऽपि द्रव्यमिति स्वकार इति ।

३-१२-१७ 'तस्मादवास्थितेऽप्यर्थे ... शब्दस्य शक्तिः स त्वेष ... ॥'
कै (पा 4·1·1) reads उपस्थिते for अवस्थिते & न त्वेष for स त्वेष.

उ एषः प्रकारः। स्वाभाविकत्वात् शास्त्रे न अन्वाख्यायते इत्यर्थः। ...

३-१२-१८ 'यस्यार्थस्य प्रसिद्ध्यर्थं आरभ्यन्ते पचादयाः ।
तत् प्रधानं फलं तेषां न लाभादि प्रयोजकम् ॥'

कै (पा 1·3·72) reads प्रयोजनं for प्रयोजकम्. भा न चान्तरेण यांजिं याजिफलं, वपिं वा वपिफलं लभन्ते । याजकाः पुनरन्तरेणापि यांजिं गा लभन्ते ... कै नचान्तरेणेति । न हि स्वर्गादिफलं यागमन्तरेण भवति तदुद्देशेनैव यागप्रवर्तनात् । याजका इति । प्रतिग्रहेणापीति भावः । तथा च हरिणोक्तम् —'यस्यार्थस्य ...'। उ कारिकायां 'यत्सिद्ध्यर्थं पचादय एवारभ्यन्ते' इत्यन्वयः । एवकाराध्याहारश्च बोध्यः ।

भशकौ (पा 1·3-72) with one more variant प्रधानफलं for प्रधानं फलम् says:—कर्त्रभिप्राये किम् । यजन्ति याजकाः सुन्वन्ति दक्षिणादि तु न फलम् । उक्तं हि हरिणा–'यस्यार्थस्य...'

लम 931 संविधानोपलक्षणं क्रियाफलं किं तत्र आह—'यस्यार्थस्य...' तदेव सूत्रे क्रियाफलशब्देन गृह्यते इति भावः। तच्च पाकस्य भोजनं लोकतोऽवगतम् । यागस्य स्वर्गो वेदतः।....

३·१२·१९ लम 941 अथ सिद्धान्ते शङ्कते।
'यदोभौ स्वामिदासौ तु प्रारभेते सह क्रियाम् ।
युगपद्धर्मभेदेन धातुस्तत्र न वर्तते ॥'

स्वामिसाध्यं संभारघटनरूपं संविधानं दाससाध्यं तु विक्लित्ति पर्यन्तं साधनविनियोगरूपम् । तत्र भिन्नत्वात् व्यापारस्य युगपत् एकधातु-

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

वाच्यत्वासम्भवेन किं संविधानापेक्षं आत्मनेपदं किंवा संस्कारकापेक्षं परस्मैपदं इति संशयः ...... इति हेलाराजः।

३·१२·२१ ab, २२ cd. लम ९४२ समाधत्ते।

'संविधातुश्च सान्निध्यात् दासे धर्मोऽनुषज्यते।
'छत्रिणा चाभिसम्बन्धात् छत्रिशब्दाभिधेयता ॥'

(नागेश reads चापि for चाभि०) उत्तरार्धस्य (21 cd) यथेत्यादिः। दासधर्मस्य तु न स्वामिन्यारोपः। उत्तमे निकृष्टधर्मारोपाप्रतीतेः।

३·१३·४ 'तिस्रो जातय एवैताः केषांचित् समवस्थिताः।
अविरुद्धा विरुद्धाभिर्गोमहिष्यादिजातिभिः ॥'

भशकौ (1·2·64) : तच्च जातित्रयमित्येके। उक्तं च हरिणा—'तिस्रो जातयः...' (with v.l. ० मनुष्यादि० for ०महिष्यादि०) भाष्ये तु 'स्त्रियाम्' (पा 4·1·3) इति सूत्रे प्रकारान्तरमुक्तम्। 'संस्त्यानप्रसवौ... इति। See वैभू 122 (with the same variant) लम 1147 वैशेषिकास्तु पुंस्त्वादयो जातयः 'तिस्रो०' इति हर्युक्तेः। परस्परं विरुद्धाभिः गोमहिष्यादिजातिभिः सह परस्परमविरुद्धा एताः समवस्थिता इत्यर्थः। केषांचित् वैशेषिकाणामिति हेलाराजः। अत एव इदं वस्तु अयं पदार्थः इयं व्यक्तिरिति व्यवहारः सर्वत्र ॥

३·१३·५ 'हस्तिन्यां वडवायाञ्च ... द्रव्यादिसमवायिनीम् ॥'

कै (4·1·3) स्तनकेशवती इति .... स्तनकेशं च प्रसिद्धत्वात् अन्यस्य अपि स्त्रीप्रतिपत्तिनिमितस्य कुमार्यादिगतस्य उपलक्षणम्। तदनेन स्त्रीत्वादीनां स्तनाद्युपव्यञ्जनानां गोत्वादिवत् सामान्यविशेषत्वं दर्शितम्। यथोक्तं हरिणा—'हस्तिन्यां ...' उ ननु कुमार्यां अतिशयितस्तनाद्यभावात् कथं स्त्रीत्वमत आह—अन्यस्यापि इति। योन्यादेः इत्यर्थः। ... स्तनाद्युपव्यञ्जनानां इति बहुव्रीहिः। समन्वयः अनुगमः। द्रव्यादीति। आदिना गुणक्रियाजातीनां संग्रहः। स्तनादि इत्यादिपदेन शब्दगतटाबाद्यपि। शब्दार्थयोरभेदाच्च तदपि अर्थगतस्त्रीत्वादिव्यञ्जकं बोध्यम्। स्तनादीनां व्यञ्जकादेव भाष्ये 'यद् दृष्ट्वा एतद् अवसीयते' इत्युक्तम्। तत्र हि स्वरसतो यच्छब्दैतच्छब्दार्थयोर्भेदः प्रतीयते। लम 1149 ... भिन्नजातीयेष्वपि स्त्र्याद्याकारबुद्धेरनुगमात्। तदुक्तं—'हस्तिन्यां ...' इति। आदिपदेन गुणकर्मसामान्यादिः अत्रापि कश्चिदेकलिङ्गः कश्चिदुभयलिङ्गः ...

३·१३·८ 'यथा सलिलनिर्भासो मृगतृष्णासु जायते।
जलोपलब्ध्यनुगुणात् बीजाद्बुद्धिर्जलेऽसति ॥'

कै (पा 4·1·3) : असत्त्विति। मृगतृष्णाविषया मरुमरीचिका यथा असत्येन जलरूपेण प्रतिभासते तथा खट्वावृक्षौ असता स्त्रीपुंसत्वेन इत्यर्थः। अथोच्यते—मरीचिदर्शनात् सादृश्यात् जलं पूर्वानुभूतं स्मर्यते न तु तत्रासज्जलं चकास्तीति। तत्राह—गन्धर्वनगरं यथेति न हि गन्धर्वनगरं

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

अन्तरिक्षे कदाचिदुपलब्धं न च तत्र तत्सदृशवस्त्वन्तरग्रहणं येन गन्धर्वनगरं स्मर्यंत। तस्मात् असतामपि भावानां अचिन्त्यात् निमित्तसामर्थ्यात् यथोपलम्भः तथा खट्वादावपि स्त्रीत्वादेरित्यर्थः। तदुक्तं हरिणा — 'यथा सलिलनिर्भासो ...।' उ extensively comments on this with some other quotations from his own work परमार्थसारोद्योत ...) भाष्ये – असत्त्विति। तत्राविद्यमानमित्यर्थः। बुद्धौ तु सदिति भावः। मृगेति। पिपासापर्यायतृष्णाशब्देन तत्कृतभावनावशात् उदकत्वेन प्रतिभासमाना मरुमरीचिका उच्यते इति भावः। मरुमरीचिकशब्देन रविकिरणा ऊर्ध्वाधरभावेन नभ आक्रमन्तः तरङ्गाकारप्रतीतिजनका उच्यन्ते। असति जले तद्बुद्धिः। बीजं मिथ्यावासनादि।

लम 258 हरिणाप्युक्तं – 'यथा सलिलनिर्भासो...' बीजं पूर्वपूर्वमिथ्याज्ञानजन्यवासना इति तद्व्याख्यातारः। (not necessarily commentators of वाक्यपदीय but वेदान्तिनः in general; perhaps नागेश refers to हेलाराज who at the end of his comm. on this कारिका observes :-- अनादिमिथ्याभ्यासवासनावशात् भ्रान्तयो भवन्ति।)

३·१३·९ 'तथैवाव्यपदेश्येभ्यो ... भेदा लोके व्यवस्थिताः॥'

कै (पा 4·1·3) quotes this कारिका with reading भेदो लोके व्यवस्थितः but has no remarks to offer. उ अव्यपदेश्येभ्यः अचिन्त्येभ्यः कार्यनिर्वाह इति तात्पर्यम्।

३·१३·१३ 'आविर्भावस्तिरोभावः स्थितिश्चेत्यनपायिनः।
धर्मा मूर्तिषु सर्वासु लिङ्गत्वेनानुदर्शिताः॥'

लम 1144 reads स्थितिश्चेत्यप्यपायिनः & लिङ्गत्वेन व्यवस्थितां in (b) and (d). हरिरपि—'आविर्भाव०...' इत्याह – तत्र अपिना इदं सूचितम्। अपायित्वं प्रतिक्षणनश्वरत्वम्। thus justifies his reading अप्यपायिनः).

३·१३·२०·२१ "संनिधाने निमित्तानां किञ्चिदेव प्रवर्तकम्।
यथा तक्षादिशब्दानां लिङ्गेषु नियमस्तथा॥
भावतत्त्वदृशः शिष्टाः शब्दार्थेषु व्यवस्थिताः।
यद् यद् धर्मेऽङ्गतामेति लिङ्गं तत्तत् प्रचक्षते॥"

कै (4·1·3) विवक्षात इति। लोकव्यवहारानुवादिनी विवक्षा आश्रीयते न तु प्रायोक्त्री। तदुक्तं हरिणा – "संनिधाने ..." "भावतत्त्वविदः..." उ लोकव्यवहारेति। पृषोदरादिसूत्रोक्तशिष्टलोकेत्यर्थः। (नागेश refers to पा 6·3·109 पृषोदरादीनि यथोपदिष्टम् and to भाष्य thereon :-- के पुनः शिष्टाः। वैयाकरणाः। कुत एतत्। शास्त्रपूर्विका हि शिष्टिः। वैयाकरणाश्च शास्त्रज्ञाः। ... एवं तर्हि निवासत आचारतश्च। स च आचार

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

आर्यावर्त एव। कः पुनरार्यावर्तः। प्रागदर्शात् (i e. विनशनात्) प्रत्यक् कालकवनात् (i.e. गङ्गायमुनासंगमात्) दक्षिणेन हिमवन्तं उत्तरेण पारियात्रम् (i.e. विन्ध्य mountain)। एतस्मिन् आर्यनिवासे ये ब्राह्मणाः कुम्भीधान्याः (practically अश्वस्तनवृत्तयः) अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्याश्चिद् विद्यायाः पारगास्तत्रभवन्तः शिष्टाः।...) किञ्चिदेवेति। लिङ्गविशेषरूपं निमित्तमित्यर्थः। शब्दशक्तिवैचित्र्यादिति भावः। प्रवर्तकम् तत्तदर्थे तत्तच्छब्दप्रयोगनियामकम्। यथा तक्षणच्छेदनादि अनेकक्रियासंनिधानेऽपि तक्षणमाश्रित्य 'तक्षाऽयम्' इति व्यवह्रियते। भावतत्त्वविदः (कै & उ read भावतत्त्वविदः instead of भावतत्त्वदृशः) ब्रह्मतत्त्वसाक्षात्कारवन्तः निरुपपदभावशब्दस्य ब्रह्मणि रूढेः। ते शिष्टाः। शब्दार्थेषु व्यवस्थिताः 'प्रमाणत्वेन' इति शेषः। तेषां प्रयोगे यद् यद् लिङ्गं धर्मेऽङ्गतामेति तत्तत् शब्दस्य लिङ्गमित्यन्वयः। एवं च येषां शब्दानां यल्लिङ्गमुपादाय शिष्टाः साधुत्वावगमपूर्वकं धर्मजनकत्वबुद्ध्या प्रयोगं कुर्वन्ति तेषां तदेव लिङ्गमिति नियमः सिद्ध इति भावः। (In this connection compare the famous dictum of पतञ्जलि — लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य)

लम 1143 (नागेश notes other readings :—गतमिति for अङ्गतामेति & तत्तल्लिङ्गं for लिङ्गं तत्तत्) तत्र कश्चिच्छब्दः एकलिङ्गविशिष्टार्थ एव शक्तः कश्चिल्लिङ्गद्वयविशिष्टे कश्चित् त्रितयविशिष्टे इति लिङ्गानुशासनादिभ्यो निर्णेयम्। (See लिङ्गानुशासनम् in सि. को. १ लिङ्गम् ॥ २ स्त्री ॥ अधिकारसूत्रे एते। भैरवमिश्र :—उभयोरधिकारसूत्रत्वेऽपि लिङ्गम् इति आ शास्त्रसमाप्तेः। द्वितीयस्तु 'ताराधारा...' इति यावत् इति विवेकः। अत्रापि लिङ्गं शास्त्रीयं...विवक्षितम्। तच्चार्थनिष्ठं तच्छब्दप्रतिपाद्यम्। तत्रायं विशेषः। शब्दशक्तिस्वभावेन। कस्यचित् सर्वलिङ्गप्रतिपादकता कस्यचिदेकलिङ्गप्रतिपादकता कस्यचिद् द्विलिङ्गयुक्तार्थप्रतिपादकता चेति। यद्यपि शब्दानां अर्थानां च आनन्त्यात् प्रातिस्विकरूपेण तेषां ज्ञानं योगिनां युक्तयुञ्जानत्वेन व्यवहारयोग्यानामेव संभवति न त्वस्मदादीनां अज्ञानां तथापि अस्मदाद्युद्देशेन शास्त्रप्रवृत्तेः यथा लघुना उपायेन अस्मदादीनां ज्ञानं संभवेत् तथाऽऽह– ३ ऋकारान्ता इत्यादिना....) 'भावतत्त्वविदः...' इति हर्युक्तेः तेषां प्रयोगादपि निर्णेयम्। अत्र श्लोके 'शब्दार्थेषु' इति 'लिङ्गम्' इति च सर्वधर्मोपलक्षणम् ॥

३·१४·६ लम 1180 हरिणाऽप्युक्तं—'विशेषणविशेष्यत्वं पदयोः...तत्रैवं व्यतिरिच्यते॥' पदयोः सम्बद्धयोरिति शेषः। वीरः पुरुषः इत्यादौ परस्परसम्बन्धेन गुणप्रधानभावापन्नार्थकत्वेन वाक्यार्थभूतविशेष्यविशेषणभावयुक्तार्थकत्वात् पदयोरपि तत्त्वम्। एवं 'राज्ञः पुरुषः' इत्यादौ प्रातिपदिकार्थस्य राज्ञः विशेषणत्वं पुरुषस्य विशेष्यत्वं स्वामित्वेन स्वत्वेन च यथा तयोर्व्यतिरेकः रूपान्तरेण परिवर्तनात् न तथा प्रकृत इति तदर्थः। (ना reads एव for एवम्).

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

३·१४-२० 'द्रव्यात्मानः त्रयस्तस्मात् .... अयं पूर्वेभ्य आगमः ॥'
लम 1446 उक्तं च हरिणा—'द्रव्यात्मानः ....'

३-१४-२८ 'अनुस्यूतेव भेदाभ्यां ... तदा ... द्वन्द्वैकशेषयोः ॥'
भशकौ (पा 1·2·64) : अत्राहुः — सहविवक्षायामेव एकशेषः। इतरेतरयोगद्वन्द्वस्य विषये इति यावत्। अत्र हि अनेकस्य अर्थस्य मिलितस्य इतरान्वयः स तथाभूतो विषयः। उक्तं च – 'अनुस्यूतेव ...' (भ reads भिन्नानां for भेदाभ्यां & यदा for तदा)

३·१४-४७ 'सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः प्रयुज्यते ।
स्वार्थवत् सा व्यपेक्षाऽस्य वृत्तावपि न हीयते ॥'

कै (पा 2·1·1) उक्तं च — 'सम्बन्धि०...'. उ प्रयुज्यते इति। समस्तत्वेनेत्यर्थः। स्वार्थवदिति। स्वार्थ इव स्वार्थवत्। स्वार्थशब्दो भावप्रधानः। स्वार्थमात्रोपस्थापकवाक्यघटकतादशायामिव वृत्तौ अपि इत्यर्थः। भशकौ (पा 2-1-1) ससम्बन्धिकपदार्थस्य एकदेशत्वेऽपि भवत्येव विशेषणान्वयः 'चैत्रस्य नप्ता' इत्यादौ तथा दर्शनात्। श्वशुरशब्दोपस्थितभार्यायां तत्पतेर्विशेषणत्वाच्च। तदंशे उत्थिताकाङ्क्षत्वात्। उक्तं च – 'सम्बन्धिशब्दः सापेक्षः' इति. See वैभू 160. लम 1420 reads समस्यते for प्रयुज्यते and हि for अस्य. इतरसापेक्षस्वार्थस्यैव तैः प्रतिपादनादित्यर्थः।

३-१४-४८ 'समुदायेन सम्बन्धो येषां गुरुकुलादिना ।
संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह ॥'

कै (पा 2·1·1) तदुक्तं — 'समुदायेन ....'
उ येषामर्थानां गुरुकुलादिरूपसमुदायेन सम्बन्धस्तेऽप्यर्थाः अवयवान् संस्पृश्य सम्बन्ध्य तद्वता युज्यन्ते इति नात्र पक्षेऽवयवानां तत्सम्बन्धालाभ इत्यर्थः। भशकौ (पा 2·1·1) : (भ reads तु for च in c) न चैवं 'देवदत्तस्य गुरुकुलम्' इत्यादौ अनन्वयापत्तिः। तत्रापि कुलेनैव देवदत्तशब्दोत्तरषष्ठ्यर्थस्यान्वयात्। सम्बन्धस्तु उपस्थितगुरुद्वारक एव षष्ठ्यर्थो न तु तदितरः। उक्तं च — 'समुदायेन सम्बन्धः...'
See वैभू 160. लम 1420 reads तु for च. कारिकायां सम्बन्धिशब्द इत्युपलक्षणम्।

३-१४-४९ 'अबुधान् प्रत्युपायाश्च विचित्राः प्रतिपत्तये ।
शब्दान्तरत्वादत्यन्तभेदो वाक्यसमासयोः ॥'

लम 1397 reads अबुधं for अबुधान् and अत्यन्तं for अत्यन्त०
तत्र स्वाभाविकत्वपक्षे श्रोत्रियादिवत् अखण्डा निरवयवा नित्याः शब्दाः तदन्वाख्यानाय कल्पिते रेखागवयस्थानीये शास्त्रप्रवृत्तिः। तदुक्तं — 'अबुधं ...' इति। अत एव गोरथादौ युक्तादीनां लोपाविधानम्। गवां

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

रथ इत्येव वाक्यस्य कल्पनेति । क्रियामन्तरेण अनन्वयात् तत्र तदवगतिः। गोयुक्तरथः इति लौकिकं तु समासस्य पर्यायरूपम् ।

३·१४·५३ 'पदं यथैव वृक्षादि विशिष्टेऽर्थे व्यवस्थितम् ।
नीलोत्पलाद्यपि तथा भागाभ्यां वर्तते विना ॥'

लम 1398 reads पदं for तथा & तथा for विना. भागाभ्यां कल्पिताभ्याम् । सादृश्यमूलकस्तु वाक्यस्थैरत्रत्यानां अभेदभ्रमः बालानां तन्मूलक एव एकार्थीभावव्यवहारोऽत्र पक्षे वास्तवः ।

३·१४·५५ cd 'रूढ्यरूढिविभागोऽपि क्रियते प्रतिपत्तये ॥'

लम 1398 शास्त्रकृद्भिः अबुधानामिति शेषः । पङ्कजादि पदं योगरूढम् । सप्तपर्णादिपदं रूढम् । राजपुरुषादि यौगिकम् इत्यादिरपि काल्पनिकः प्रतिपादनोपाय एवेति तदर्थः ।

३·१४·६५–६७ 'विशेषकर्मसम्बन्धे निर्भुक्तेऽपि कृतादिभिः ।
विशेषनिरपेक्षोऽन्यः कृतशब्दः प्रवर्तते ॥
'अकर्मकत्वे सत्येवं क्तान्तं भावाभिधायकम् ।
ततः क्रियावता कर्त्रा योगो भवति कर्मणाम् ॥
'अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः ।
सम्बध्यते क्रिया तद्वत् कृतपूर्व्यादिषु स्थिता ॥'

कै (पा 2·3·65) reads क्तान्ते भावाभिधायिनि for 66 (b); क्रिया सम्बध्यते in 67 (c). 'कृतः कटोऽनेन' इति वाक्ये कृतकटयोः सामानाधिकरण्यम् । अस्मिंश्चार्थविशेषे न भाव्यं वृत्त्या तस्याः सामान्यविषयत्वात् । तस्मात् कर्मसामान्ये भावे वा क्त उत्पद्यते । तत्र कृतं पूर्वमनेनेत्यस्मिन्नर्थे कृतपूर्वीशब्दो वर्तते । तेन पूर्वं कृतवानित्यर्थः सम्पद्यते । तत्र करोतिवाच्यक्रियापेक्षमास्ति कटस्य कर्मत्वम् । तथाऽऽह हरिः– 'विशेष० ....' ॥ उ कृतपूर्वमनेनेति । अर्थप्रदर्शनमात्रमेतत् न तु अयं प्रयोगः साधुः प्रत्ययोत्पत्तेरनन्तरं भाष्ये सामानाधिकरण्यनिवृत्त्युक्तेः वाक्ये कृतकटयोः सामानाधिकरण्येन प्रयोगस्यैव साधुत्वात् । कर्मत्वमिति । अस्त्यनभिहितं कटस्य कर्मत्वमिति अर्थः । विशेषकर्मेति । कृतः कटोऽनेन इत्यस्यां अवस्थायां कृतशब्देन विशेषकर्मकटादिसम्बन्धे निर्भुक्तेऽपि अनुभूतेऽपि तस्यामवस्थायां असामर्थ्येन वृत्तिविरहात् विशेषनिरपेक्षो भाववचनोऽन्य एव कृतशब्दः प्रवर्तते । वृत्तिं लभते इत्यर्थः । तदेवोपपादयन् अविवक्षितकर्मकतया भावे क्त इत्याह अकर्मकत्वे इति । एवं विशेषनिरपेक्षत्वे विशेषरहितसामान्यस्याभावादित्यर्थः । अत्र 'क्तान्तं भावाभिधायि तत्' इति क्वचित् पाठः । स युक्ततरः । सप्तम्यन्तपाठे भावाभिधायिनि सति समासे तद्धितोत्पत्तिरिति शेषः । एवं सति तद्धितोत्पत्तौ यथाऽसामर्थ्यं न भवति तथा दर्शयति— ततः क्रियावतेति । कर्मणां कटादीनां क्रियावत्कर्त्रर्थकेनिना तदन्तोपस्थाप्य क्रियया योगो भवतीत्यर्थः । तत्रोपपत्तिमाह — अविग्रहेति । विशिष्य प्राधान्येन ग्रहो ग्रहणं तद्रहिता अप्राधान्येन गृह्यमाणाऽपि इत्यर्थः । गुणभूतक्रिययाऽपि

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

कारकाणां सम्बन्धदर्शनादिति भावः। भशकौ (पा 2·3·65) ननु कृतः कटः पूर्वमनेन इत्यस्मिन् विग्रहे क्तस्य कर्मणि विधानात् तेनैव कर्मणाऽभिहितत्वात् द्वितीयया न भाव्यम्। एवं तदपवादभूतया षष्ठ्याऽपि इहाप्यनभिहिताधिकारात्। किञ्च कृतशब्दस्य कटसापेक्षतया समासो दुर्लभः। एवं तद्धितोऽपि इति चेत् अत्रोक्तं हरिणा—'विशेष०' 'अकर्मकत्वे' 'अविग्रहा' इति। अस्यार्थः—कृतादिभिः शब्दैः कटादिसमभिव्याहारात् कर्मसम्बन्धे निष्कृष्य भुक्तेऽपि अनुभूतेऽपि कृतः पूर्वं कटोऽनेनेति अवस्थायामिति भावः। तस्यामवस्थायां वृत्तिविरहात्। कर्मसामान्यवचनोऽन्य एव कृतशब्दः प्रवर्तते वृत्तिं लभते। अविवक्षितकर्मतायां नेह पच्यते इत्यादावपि कर्मसामान्ये प्रत्ययाभ्युपगमात् इति भावः। अविवक्षितकर्मणां भावे प्रत्यय इति मतान्तरमाह—अकर्मकत्व इति। ... तदेतदाह—ततः क्रियावतेति। नन्वेवं क्रिययाऽपि योगाभावे कथं द्वितीयेत्याशङ्क्याह—अविग्रहेति। विशिष्य ग्रहो ग्रहणं तद्रहिता अप्राधान्येन गृह्यमाणाऽपि इत्यर्थः। अयं भावः—गुणभूतयाऽपि क्रियया कारकाणां सम्बन्धो दृश्यते यथा कटं कृतवानिति। कृतपूर्वीशब्दश्चायं पूर्वं कृतमनेनेत्यस्मिन्नर्थे व्युत्पादितः। पूर्वं कृतवानित्यनेन समानार्थः सम्पद्यते। तत्र करोतिक्रियापेक्षमास्ति कटस्य कर्मत्वम्। अनभिहितं च तत्। अतोऽसति कृद्ग्रहणे षष्ठी स्यादेवेति स्थितम्। लम 1320–1321 (ना reads स्थितिः instead of स्थिता in 67 (d)) तदुक्तं हरिणा-...निर्भुक्ते प्राप्ते। वाक्ये इति शेषः। विशेषकर्मनिरपेक्षोऽन्यः भावक्तान्तः प्रवर्तते ... सामान्यकर्म तु नान्तरीयकत्वादविवक्षितम्। तदाह अकर्मकत्वे इत्यादि।.... प्रकारान्तरमाह–अविग्रहेति। कर्तुः पृथक्ग्रहणरहितेत्यर्थः। एवं च प्रधानार्थकर्त्रा संसृष्टयाऽपि क्रियया कारकाणामन्वय इति तदर्थः।

३-१४-६७ 'अविग्रहा...' भशकौ (2–3–36):—

'अधीती व्याकरणे'। अधीतमनेनेति विग्रहः।

...ततः तद्धितार्थेन सह एकार्थीभूतस्य अधीतस्य निष्कृष्य व्याकरणादिना सम्बन्धाभावात्। क्तप्रत्ययेन अनभिहितं व्याकरणम्। तत्र कृतपूर्वीकटमित्यादिना द्वितीया प्राप्ता। गुणभूतयाऽपि हि अध्ययनक्रियया कर्मणः सम्बन्धो न विरुद्धः। 'सहाधीतवान् व्याकरणम्' इत्यादौ यथा। आह च–'अविग्रहा' इति। न विविच्य ग्रहो यस्याः सा अविग्रहा गुणीभूतेत्यर्थः। See वैभूसा 105. This is कारिका 19 of भट्टोजि in his वैयाकरणमतोन्मज्जन.

३-१४-६८ 'मुण्डिसूत्र्यादयो...धातवः कुट्टिचर्विवत्'॥

इति हर्युक्तेः (लम 1515 reads कुद्रि for कुट्टि)। विभक्ताः अन्वाख्याताः। कल्पितात्मानः वस्तुतः कुद्रिप्रभृतिवदखण्डा एवैते। अयं त्वन्वाख्यानोपाय एवेति भावः।

३-१४-६९ लम 1515 तदाह:—'पुत्रीयतौ न पुत्रोऽस्ति ... या पुत्रे व्यवतिष्ठते॥'

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

३-१४-७०,७१ 'प्राणैर्विना यथा धारिः...क्रियान्तरम्' ॥
'तथा विनैषिपुत्राभ्यां...प्रतिपादकाः ॥'

लम 1515 क्रियान्तरं क्रियान्तरत्वमित्यर्थः । भेदाः प्रकाराः सदृशाः पृथग्भूत-पुत्रादिसदृशाः घटिताः प्रतिपादकाः अखण्डधात्वन्तरस्येति शेषः । अन्वाख्यानाय तस्यैव बोधनाय कल्पिता इति शेषः । (नागेश reads विनेषि० which is correct [विना+इषि & not एषि] & भेदास्तु for भेदात्तु.)

३-१४-७२ cd, ७३ 'सदपीच्छाक्यचः कर्म वाक्य एव प्रयुज्यते ॥
प्रसिद्धेन कृतः शब्दौ...प्रयुज्यते ॥'

भशाकौ (पा 3·1·8) reads हृतः for कृतः. उक्तं च प्रकीर्णकाण्डे — 'सदपीच्छाक्यचः कर्म' एतेन यथेति क्रमादिषु यथा वेदादिविषयः अभ्यासो व्यज्यते तथा वाक्ये इच्छाक्यचः कर्म इत्यर्थः । अथवा 'अभ्यासक्रमादिषु' इत्येकं पदं...इति विवरणं प्रत्युक्तम् । उ (पा 3·1·8): अन्यत्रोक्तं हरिणा — 'सदपीच्छाक्यचः कर्म' (v.l. हृतः for कृतः. तुल्यरूपोऽपि for तुल्यरूपत्वात् & प्रवर्तते for प्रयुज्यते) ... एतदेवात्र मुख्यं समाधानं इति ध्वनयितुमस्य पुनरुल्लेखः ।

३-१४-७५ लम 1516 तदुक्तं — 'अर्थस्यानुगमं कञ्चित् दृष्ट्वैव परिकल्पितम् ।
पदं वाक्ये पदे धातुर्धातौ भागश्च मुण्डिवत् ॥'

(नागेश reads दृष्ट्वा च for दृष्ट्वैव; वाक्ये पदं for पदं वाक्ये & धातोर्भागश्च for धातौ भागश्च)

३-१४-७९ 'यथैव डित्थे डयतिः पाचके पचतिस्तथा ।
डयतिश्च पचिश्चैव द्वावप्येतावलौकिकौ ॥'

लम (1516) reads पाचकेऽपि पचिस्तथा which is better; अनर्थकौ for अलौकिकौ.

३-१४-८४ 'सोऽयमित्यभिसम्बन्धात् प्रत्ययेन विना यदि ।
बभ्र्वादयः प्रयुज्येरन्नपत्ये नियमो भवेत् ॥'

कै (3·1·2) reads तद्धितेन for प्रत्ययेन and ० न्नापत्ये for ० न्नप्रत्ये, which seems to be correct. ननु 'सोऽयमित्यभिसम्बन्धात्' अभेदोपचारात् अपत्ये प्रयोगात् कथमसाधुत्वम् ? नैतदस्ति । भृत्यादेरपि साहचर्यादिनिमित्ताभेदाध्यारोपदर्शनात् अपत्यार्थौ नियमेन न प्रतीयेत । तदुक्तं हरिणा — 'सोऽयमित्यभिसम्बन्धात् ... नापत्ये नियमो भवेत् ॥' तस्मादभेदोपचाराद्विना अपत्यविवक्षायां 'गर्गाः' इति बहुवचनान्तवत् एकवचनान्ता बभ्र्वादयो मा प्रयुक्षतेति नियमार्थं वचनम् । उ does not refer to this कारिका at all. भशाकौ (2·4·62) reads तद्धितेन for प्रत्ययेन & अपत्यनियमो for अपत्ये नियमः. नन्वेवं 'परश्च' (पा 3·1·2) इति सूत्रे 'बभ्रुर्मण्डुर्लमक' इत्यादीनां अपशब्दत्वपरं भाष्यं विरुध्येतेति चेत् न भाष्यस्य शक्तिभ्रमप्रयुक्तपरत्वात् । इष्येते हि गोणी-

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

शब्दस्य गोणीसादृश्यशक्तिभ्रमाभ्यां गवि प्रयुक्तस्य साधुत्वासाधुत्वे एतेन 'सोऽयमिति' हरिश्लोकोऽपि व्याख्यातः।

३-१४-१०० लम 1379 तदुक्तं हरिणा—'वाचिका द्योतिका वाऽपि संख्यानां या विभक्तयः। तद्रूपेऽवयवे...॥' (नागेश reads तल्लुकि for तद्रूपे) यत्त्वत्र अभेदैकत्वसंख्या भासते परित्यक्तविशेषसंख्यासामान्यमेव अभेदैकत्वसंख्या यथैकत्वं द्वित्वादीनां निमित्तं तथेदमभेदैकत्वं सर्वेषामेकत्वादीनां निमित्तं इति साऽपि संख्येत्युच्यते द्वित्वाद्यनुस्यूतैकत्वात् एकस्वभावत्वेन अभिन्नमिवेति तेन पदेनोच्यते इति हेलाराजः।

३-१४-१०१-१०४ लम 1381 तदुक्तं हरिणा—'अभेदैकत्वसंख्या वा...' (101) वृत्तावुपसर्जपदार्थानामपि सत्त्वभूतत्वात् संख्यायोगावश्यकत्वेन विशेषसंख्याऽभावेन च सामान्यसंख्यारूपं सर्वसंख्याविशेषाणां संसर्गरूपं तदिति तदर्थः। 'यथौषधिरसाः सर्वे ... तां संख्यां तादृशीं विदुः॥' (102) अनेन यद्वा इति पक्ष उक्तः। आद्यमाह–'भेदानां ... व्यापारात् ... वर्तते॥' (103) (नागेश reads व्यापनात् for व्यापारात्) पूर्वं समस्तभेदसंसर्गरूपं तदित्युक्तम्। इदानीं तु समस्तभेदानुगतं भेदापोहरूपं तदिति विशेषः। ... 'अगृहीतविशेषेण ... प्रख्यायते न शुक्लादिभेदरूपः ... ॥' (104) (नागेश reads शुक्लादिः भेदरूपं for शुक्लादिभेदरूपः) तन्न। तथा बोधाननुभवात्। ... अत एव हेलाराजेन एतन्मतद्वयोपपादकहरिकारिका मतान्तरमाह इति अवतारिता। तस्य च अरुचिग्रस्तत्वं तन्मते भाष्यस्य संकोचेन व्याख्यानं कुर्वता गोषुचरार्थे प्रत्याख्यातमपि जात्याख्यायामिति सूत्रमावश्यकमिति वदता हरिणा कैयटेन च बोधितम्।

३-१४-१०२-४ See वैभू 226 and वैभूसा 363–365.

'यथौषधिरसाः...' कै (2–1–1): संख्याविशेष इति। वाक्ये उपसर्जनपदानि विभक्त्यर्थाभिधायित्वात् संख्याविशेषयुक्तं स्वार्थं प्रतिपादयन्ति। समासे तु अन्तर्भूतस्वार्थं प्रधानार्थं अभिदधति इति अभेदैकत्वसंख्यामवगमयन्ति। संख्याविशेषाणामविभागेनावस्थानं अभेदैकत्वसंख्या। यथोक्तं-'यथौषधिरसाः सर्वे'. उ विभक्त्यर्थेति वाक्ये उपसर्जनबोधकपदानां विभक्त्यन्तत्वेन तदर्थसंख्याविशेयुक्तार्थबोधकत्वामित्यर्थः। अन्तर्भूतेति विशेषणीभूतस्वार्थकमित्यर्थः। अभेदैकत्वेति। विभक्त्यभावेन संख्याविशेषाणां तत्तद्रूपेणाप्रतीतेः संख्यात्वेन सर्वसंख्यानां भानं मधुनि सर्वरसानां रसत्वेन भानवदिति भावः। तदाह–यथौषधि० इति। अथ वेति। अत्र पक्षे संख्यात्वेन सामान्यं भासते न तु विशेषाः इति पूर्वस्माद्विशेषः।... मधुनि सर्वरससत्ताजन्यस्य तत्तद्रोगादिनिवृत्तिरूपस्य फलस्य अनुभवात् तत्सत्ताकल्पनेऽप्यत्र सर्वसंख्याविशेषकल्पने मानाभाव इति तद्भावः।

३-१४-१०३ 'भेदानां वा परित्यागात ... भेदापोहेन वर्तते॥'

कै (पा 2-1-1) अथवा परित्यक्तविशेषं संख्यासामान्यं अभेदैकत्वसंख्या। तदुक्तं–'भेदानां वा' इति। उ भेदानां विशेषाणाम्। संख्यात्मा संख्या-

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

सामान्यम् । तथाविधः अभेदैकत्वसंख्यापदवाच्यः। निर्विशेषसामान्याभावात् इदं कथमत आह – व्यापारादिति । संख्यात्वेनैव तत्प्रतीतेः विशेषरूपाणां तत्तद्रूपेण अप्रतीतेश्च भेदापोह इति भावः।

३-१४-१०४ 'अगृहीतविशेषेण ... भेदरूपस्तु गम्यते ॥'

कै (पा 2-1-1) merely quotes this कारिका. उ तदेव समर्थयति। 'अगृहीत०' शुक्लादिरूपभेदस्तु इति। शुक्लादिरूपविशेष इत्यर्थः। भेदरूप इति पाठे शुक्लादिविशेषरूपोऽर्थस्तु इत्यर्थः। तत्र रूपत्वेन रूपप्रतीतिः सद्वस्तुविषया। अत्र तु संख्यात्वेन प्रतीतिः असद्वस्तुविषया विकल्पात्मिका इति विशेषः। (cf वाप ३-११-२५-६ 'संख्या नाम न संख्याऽस्ति' and 'संख्यात्वजातियोगात्तु')

३-१४-१२७ 'शौर्पिके मासजाते च परिभाणं स्वभावतः।
उपाधिभूतामाश्रित्य संख्यां भेदेन वर्तते ॥'

कै (पा 2-2-5) reads उपाधिभूतं ... संख्या ... for उपाधिभूतामाश्रित्य संख्यां. अनभिधानात्। समासे द्वित्वादेरनवगमात्। एकत्वं त्वत्र प्रातिपदिकार्थस्य तथाभूतत्वात् प्रतीयते वस्त्वन्तरानपेक्षत्वाच्च। द्वित्वादिका तु संख्या वस्त्वन्तरापेक्षत्वात् बहिरङ्गा। तदुक्तं हरिणा–'शौर्पिके ....' ... तथाभूतत्वात् नियतपरिच्छेदकपरिमाणवाचित्वात् ... बहिरङ्गेति। द्वित्वादिप्रतीतेः अनुभवविरुद्धत्वाच्च इत्यपि बोध्यम्। परिमाणं अक्तपरिमाणत्वमुपाधिमाश्रित्य। संख्या एकत्वरूपा। भेदेन तद्रूपेण भासते इत्यर्थः। अक्तपरिमाणवाचकशब्दस्थले तथैव व्युत्पत्तिरिति तात्पर्यम्। वस्तुतः समासे एकत्वमपि नैव भासते किंतु मासत्वेन एकमासस्यैव भानं न त्वनेकस्य अनभिधानात् इति भाष्याशयः। एवं शौर्पिकतावकीनादावपि इदं बोध्यम्।

३-१४-१३४ 'भेदः संख्याविशेषो वा ... नावश्यं तादृशो भवेत् ॥'

कै (पा 4-1-1) क्वचित् आदेशादिवशात् संख्याविशेषोऽपि प्रतीयते यथा तावको मामक इति एवमिहापि फिन् विधीयमानः बहुवचनमन्तरेण वृद्धत्वाभावात् बहुत्वं गमयेत् प्रकरणादिवशाद्वा। तदुक्तं —'भेदः ....'। उ भेदः पृथगुपस्थितिः। संख्याविशेषो द्वित्वादिः। व्याख्यातः वृत्तौ असत्त्वेन वाक्ये सत्त्वेनेत्यर्थः। विशेषस्तु संख्याविशेषस्त्वित्यर्थः। तादृशः असत्त्वविशिष्टः।

३-१४-१५२ 'लिङ्गं लिङ्गपरिज्ञाने सूत्रं प्रत्ययशासकम्।
योऽयमित्यभिसंबन्धात् पुंशब्दे स्त्र्याभिधायिता ॥'

इति हर्युक्तेः (लम 80)। (Our text reads परित्यागे for परिज्ञाने, प्रत्ययशासकं for प्रत्ययशासनं and स्त्र्यभिधायिनि for स्त्र्यभिधायिता गोपीत्यादौ प्रक्रियादशायां गोप इति प्रातिपदिकस्य गोपत्वारोपेण तत्स्त्रीबोधकत्वानुमानं 'पुंयोगादाख्यायाम्' (पा 4·1·49) इति शास्त्रतः। ...

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

अत एव ‘ यदिह परिनिष्ठितं तत् साधु ’ इत्यर्थापत्तिलब्धवाक्यात् साधुत्व-बोधकं व्याकरणमिति भाष्यं संगच्छते ।

३·१४-१८८ ‘ सोऽयमित्यभिसम्बन्धात् आश्रयं प्रतिपद्यते ।
स्त्रीत्वं स्वभावसिद्धो वा गुणभावविपर्ययः ॥ ’

कै (पा 4·1·3) यद्यपि गुणमात्रे प्रत्ययः क्रियते तथापि हि गुणगुणिनोर-भेदविवक्षायां स्वाभाविकत्वाद्वा गुणप्रधानभावव्यवस्थायाः कुमारीशब्देन द्रव्यस्यैवाभिधानात् तद्गतसंख्यानिमित्ता वचनोत्पत्तिः द्रव्यवाचिना च नित्यं सामानाधिकरण्यमिति भावः । तदुक्तं हरिणा — ‘ सोऽयमित्यभि-सम्बन्धात्....’. उ ननु शुक्लादीनां द्रव्यविशेषणत्वात् आश्रयगतलिङ्गादि-युक्तं तस्य प्राधान्यात् इह तु स्त्रीत्वं प्रधानं प्रत्ययवाच्यत्वात् द्रव्यं गुणभूतं प्रकृत्यर्थत्वात् इति कथं गुणधर्माणां प्रधाने प्रतिपत्तिरिति शङ्कते यद्यपीति । अभेदविवक्षायामित्यस्य ‘ द्रव्यस्यैव अभिधानात् ’ इत्यनेनान्वयः । स्वाभाविकत्वाद्वा प्रत्ययार्थप्राधान्यं तु उत्सर्गः इति भावः । द्रव्यस्यैवेति । न कदाचिदपि प्राधान्येन स्त्रीत्वस्य गुणस्येति भावः । ... सोऽयमिति गुणमात्रस्य प्रत्ययार्थत्वेऽपि द्रव्येणोपचरिताभेदं गुणं प्रत्ययोऽभिधत्ते इति स्त्रीत्वं कर्त्राश्रयं अभेदेन प्रतिपद्यते इति तद्गतसंख्यादिलाभ इति अर्थः । अत्रैव पक्षे भाष्यस्वारस्यं गुणवचनदृष्टान्तेन साधनात् । न हि गुणप्रधान-भावविपर्यये अस्योपयोगः सम्भवो वा । वाचकत्वे प्रत्ययार्थस्य प्राधान्यमेव इति एव भाष्याशय इति दिक् ।

३-१४-२१५ ‘ शब्दान्तरत्वात् ... अभिधायकः ॥ ’

कै (पा 2-2-25) reads (d) अर्थान्तरनिबन्धनः for सामान्यस्या-भिधायकः. वाक्ये तु सुचमन्तरेण क्रियाभ्यावृत्तेरनवगमात् । ततश्च अस्वपदविग्रहः क्रियते द्विर्दश द्विदशा इति । अनेनैव न्यायेन द्वौ दशतौ इत्यपि विग्रहः कार्यः । न्यायसाम्यात्तु प्रतीयमानत्वात् भाष्यकारेण पुनर्न दर्शितः । तदुक्तं–‘शब्दान्तरत्वात्...अर्थान्तरानिबन्धनः’. उ वृत्तौ ‘दश’– शब्दः दशदर्थकः सामर्थ्यात् । उद्भूतावयवभेदो वर्ग एव समासार्थे इति नित्यबहुवचनान्तत्वं इति भावः । (उ does not take cognizance of भर्तृहरि’s कारिका·) हेलाराज comments :— “ वाक्यगता विशेषा वृत्तौ नान्तर्भवन्ति ... अभिन्नरूपा हि वृत्तिः ... सर्वथा सामान्यापेक्षमेव वृत्तिपदानुशासनम् ... ”

३-१४-३२३ -३२८ ‘ प्रवृत्तिरिति सामान्यम् ... ’ (323)
‘ प्रवृत्तिमन्तः सर्वेऽर्थाः तिसृभिस्तु प्रवृत्तिभिः । ... ’ (324)
‘ यश्चाप्रवृत्तिधर्माख्यः प्रवृत्तीर्विष्वगाश्रयाः ॥ ’ (325)
‘ तेनास्य चितिरूपं च ... ’ (326)
‘ अचेतनेषु संक्रान्तं ... यत्तच्छब्दनिबन्धनम् ॥ ’ (327)

कै reads च for तु in 324 (b); ०धर्मार्थः for ०धर्माख्यः & विष्वगाश्रयः for विष्वगाश्रयाः in 325 (a) & (d); वाचो निबन्धनम्

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

for शब्दनिबन्धनम् in 327 (d). सत्त्वादीनां आविर्भावादिरूपः प्रवृत्ति-शब्दवाच्यो नित्यः परिणाम इत्यर्थः। पुरुषो यद्यप्यपरिणामी भोक्तृत्वात् तद्धर्मापन्न इव भवति। तदुक्तं हरिणा—'प्रवृत्तिरिति...' सामान्यमपि गोत्वादिकं व्यक्तेः अव्यतिरिक्तत्वात् प्रवृत्तिधर्मः। शशविषाणादावपि उत्तरपदार्थस्य सद्भावात् तद्द्वारको लिङ्गयोगः इति सर्वपदार्थव्यापित्वं प्रवृत्तेः। आविर्भावतिरोभावान्तरालावस्था स्थितिरुच्यते। स्त्रीत्वं स्त्रीता पुंस्त्वमित्यादौ संस्त्यानादेरपि प्रवृत्तिलक्षणलिङ्गयोगः। उ आविर्भावादी-त्यादिना तिरोभावस्थिती। नित्य इति। नित्यत्वं च सर्वदा सर्वत्र च भावात्। ... तद्धर्मापन्न इवेति। भोग्यत्रिगुणात्मकवस्तुधर्मापन्न इत्यर्थः। अयं भावः—भोक्तृत्वावस्थायां भोग्यवस्तुशबलितमेव चैतन्यं प्रतीयते। तदेव च शब्द-गोचरम्। एवं च 'गच्छति पुरुषः' इतिवत् तस्य लिङ्गत्रयोपपत्तिरिति। प्रवृत्तिरिति। अजस्रपरिणामिनां गुणानां परिणामविशेषानादरेण प्रवृत्तिः परिणाम इति सामान्यलक्षणमित्यर्थः। अथ तत् सामान्यं आविर्भावादि-रूपेण त्रिधा भिद्यते। तत्र आविर्भावः पुंस्त्वं तिरोभावः स्त्रीत्वं स्थितिः अन्त-रालावस्था नपुंसकत्वम्। अत एव स्थितेः संस्त्यानप्रसवव्यापित्वेन लिङ्ग-सर्वनाम नपुंसकम्। प्रवृत्तेः सार्वत्रिकत्वं दर्शयति—प्रवृत्तिमन्त इति। यतः तिसृभिः प्रवृत्तिभिः सततं सर्वदा न वियुज्यन्ते अतः सर्वेऽर्थाः प्रवृत्तिमन्त इत्यन्वयः। नित्ययोगे मतुप् नित्यं प्रवृत्तिमन्त इत्यर्थः। (cf कारिका on पा 5·2·94)

'भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः॥'

(भाष्य :—नित्ययोगे क्षीरिणो वृक्षाः। कण्टकिनो वृक्षाः।) सततमित्यनेन सार्वदिकत्वं उक्तम्। वाचश्चैवेति। एवंभूतेषु पदार्थेष्वेव वाचः शब्दस्य सम्भवः। नहि शुद्धं परिणामरहितं वस्तु शब्दविषयं आकारावग्रहेणैव शब्द-वाच्यत्वादिति भावः। अपरिणामिधर्मिणि पुरुषे लिङ्गयोगमुपपादयति यश्चेति। चितिरूपेण केवलचैतन्यरूपेण गृह्यते 'योगिभि'रिति शेषः। अन्येषां भोग्यानाम्। विष्वगाश्रयः सर्वपदार्थानुगतः। 'विश्वगाश्रयाः' इति पाठोऽसङ्गतः 'अन्येषां प्रवृत्तीः' इत्येनन पौनरुक्त्यादित्याहुः। अनुयातीव अनुगच्छतीव। वस्तुतः परिणामाभावेऽपि व्यवहारे भोग्य-शबलितत्वेनैव ग्रहणात् भोग्यनिष्ठप्रवृत्त्यादिना सोऽपि लिङ्गादिमान् इति भावः। तत्तदवस्थतत्तद्वस्त्वाकारवृत्तीनां चैतन्ये प्रतिबिम्बादीति तत्त्वम्। तत्र मानं दर्शयति तेनेति। तेन बुद्धिदर्पणसंक्रान्तेन भोग्यजातेन। भोक्तुश्चितिरूपं भिद्यते विषयाकारेण हि ज्ञानं भेदेन गृह्यते इत्यर्थः। यथा घटज्ञानं पटज्ञानमिति। ० कालश्चेति। ज्ञास्यति ज्ञातः इत्यादौ। तस्य चैतन्यमात्ररूपस्य। स्वरूपभेद इति। स्वरूपतः देशतः कालतो वा न कश्चित् तत्स्वरूपभेदस्तस्य विद्यते इत्यर्थः। ननु शुद्धस्य पुरुषस्य भोग्येनासम्बन्धात् कथं तद्वृत्तिधर्मेण व्यवहारोऽत आह—अचेतनेष्विति। 'चैतन्यं अचेतनेषु संक्रान्तमिव दृश्यते' इत्यन्वयः।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

प्रतिबिम्वकधर्मेणेति । प्रतिविम्वन्यायेनेत्यर्थः । यथा दर्पणे मुखादि गृह्यते न च तत् वस्तुतः तत्रास्ति तद्वत् चैतन्यमपि दर्पणस्थानीयेषु सत्त्वादिगुणमयेषु जडेषु अन्तःकरणादिषु सत्त्वधर्मस्वच्छत्वातिशयवशेन तत्राविद्यमानमपि संक्रान्तमिव दृश्यते अतः तत्संक्रमविशिष्टान्तःकरणवृत्तौ सर्वार्थाकार-समर्पणात् तादृशवृत्तेश्च पुनश्चेतने प्रतिविम्वात् अन्येषां प्रवृत्तिमनुविद्धत् अनुभवति लिङ्गयोगमिति तदेव वाचो निवन्धनमिति भावः ॥

३·१४·५०३ 'न हि ब्राह्मण इत्यत्र ... समुदाये व्यवस्थितः' ॥ लम 1120 'न ब्राह्मण'-मित्यादौ ब्राह्मणत्वोपलक्षिततत्वस्य सर्वव्यक्तिषु सत्त्वान्न दोषः । (Perhaps लम refers to this कारिका.)

३·१४·५६४ 'तदर्हमिति नारब्धं सूत्रं व्याकरणान्तरे ।
सम्भवत्युपमाऽत्रापि भेदस्य परिकल्पनात् ॥'

उ (पा 5·1·117) : तदुक्तं – 'तदर्हमिति नारब्धम्....' इति । इदं चिन्त्यम् । 'त्वमिव त्वम्' इत्यत्र द्वितीयसदृशव्यवच्छेदप्रतीतिरेव नतु सादृश्य-मिति सूत्रभाष्यकृतोरभिप्रायात् ।

३·१४·५८० 'युक्तमौपयिकं राज्ञ इत्यर्थस्य निदर्शने ।
उपमानाविवक्षायां तदर्हमिति पठ्यते ॥'

उ (पा 5·1·117) राजवदयमिति । पृथुकर्तृकवर्तनं पृथुराजयोग्यमित्यर्थः । न तु सादृश्यमिति । तदुक्तं— 'युक्तमौपयिकं राज्ञः...' इति । (औपयिक cf. पा 5·4·34 "विनयादिभ्यष्ठक्" का० विनय । समय । उपायात् ह्रस्वत्वं च).

Supplement to Appendix III

१-१ **Bhatahari and others, who are ब्रह्मवादिन्s, also say : " The beginningless, eternal ब्रह्मन्, whose essence is word and syallable (अक्षर, undestructable) ... from That things have evolved, and the function of the world also has appeared."**

Mark the translation : विवर्ततेऽर्थभावेन = from That things have evolved. The quotation is from आर्यलङ्कावतार-वृत्ति of ज्ञानश्रीभद्र.

१-१ **'Whatever has appeared by dint of imaginary assumption (परिकल्प) does not abide. Imaginary assumptions appear in various forms by dint of ratiocination (तर्क, वितर्क), scriptural dogma (आगम) and reasoning (अनुमान).'**

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

This is a faithful rendering of (क) in स्वोपज्ञटीका of भर्तृहरि (वाप १-१) :—

"यः सर्वपरिकल्पानामाभासेऽप्यनवस्थितः ।
तर्कागमानुमानेन बहुधा परिकल्पितः ॥"

वृषभदेव thus comments :—

"इदानीं सर्वस्यैव कारिकार्थस्य आगमेन अनुगमं दर्शयति यः सर्वपरिकल्पानामिति । प्रधानपरमाण्वादिपरिकल्पानाम् । आभासेऽपि इति । गोचरे । अनवस्थितः न गोचरतां प्रतिपद्यते इति यावत् । कथमनिबन्धनाः परिकल्पा इत्याह तर्कागमानुमानेन इति । लिङ्गमन्तरेण स्वयं उत्प्रेक्षाप्रतिभानं तर्कः । परतः श्रवणं आगमः । परप्रतिपत्तिसाधनं अनुमानम् । बहुधा इति । प्रधानं परमाणवो ज्ञानं तथा नित्यमनित्यमित्यादि । परिकल्पितः इति । सत्यतः तद्व्यतिरिक्तवस्त्वभावात् स एव तैः अविद्यावशात् एवं विकल्पितः ॥" **(See Deccan College Edition, p. 10)**

१-१ **"Separation and connection (संसर्ग), being (भाव) and non-being (अभाव), order (temporal sequence) and non·order (simultaneity), truth and falsehood, various things are manifested from आत्मन्, the Truth."**

This is (ख) of स्वोपज्ञ on वाप १·१ :—

"व्यतीतो भेदसंसर्गौ भावाभावौ क्रमाक्रमौ ।
सत्यानृते च विश्वात्मा प्रविवेकात् प्रकाशते ॥"

On this वृषभदेव has a long commentary :

"के पुनस्ते विकल्पा इत्याह । भेदसंसर्गौ इति । एकत्वनानात्वे । तद्व्यतिरिक्तसंख्याऽभावात् एकत्वमतिक्रान्तः । भेदाभावात् नानात्वं (अतिक्रान्तः) । भावाभावौ इति । अस्तित्वनास्तित्वे । विवृतसंवृताकारोपाहितत्वात् सतो भावरूपताम् । सत्ताकारोपहितरूपनिराकरणरूपत्वात् असतोऽभावरूपताम् । अथवा दृश्यमानस्य असत्यत्वात् अन्यस्य अनवधार्यमाणत्वेन सत्तामतिक्रान्तः, उपलभ्यमानत्वाच्च असत्तां (अतिक्रान्तः) । क्रमाक्रमौ इति । भेदनिबन्धनत्वात् क्रमयौगपद्ययोः अभिन्नत्वाच्च ब्रह्मणः । तथा विचारविषयत्वात् सत्यानृतयोः विचाराविषयत्वाच्च तस्य असम्भवः । यतो विचारो भिन्नधर्मविषयः, ब्रह्मणश्चाभेदात् स नास्ति । कथं तर्हि अयं भेदादिव्यवहार इत्याह । विश्वात्मा प्रकाशते इति । यतो भेदादिरूपेण अतद्रूपोऽपि आभासपरिग्रहेण प्रकाशते तथा हेतुमाह प्रविवेकात् इति । यदा प्रकर्षेण विविच्यन्ते पदार्थव्यक्तयः अविद्यावशात् भेदेन च प्रत्यवभासन्ते ।"

१-१ **"(It is) the internal cause of beings (भूत), which put forth effort and appear in time (temporal sequence). Deliverance is to be saved and relieved. This is taught by those who wish for deliverance."**

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

This is obviously a mistranslation of वाप १-१ (स्वोपज्ञ-टीका–'ग') :—

" अन्तर्यामी स भूतानामाराद् दूरे च दृश्यते ।
सोऽत्यन्तमुक्तो मोक्षाय मुमुक्षुभिरुपास्यते ॥ "

वृषभदेव thus comments :—

'अन्तर्यामी इति । अन्तःस्थितो यमयति सर्वान् भावान् इत्यन्तर्यामी । स हि सकलभुवनव्यापित्वात् सर्वभूतान्तश्चरिष्णुः । तन्निबन्धने च प्रवृत्ति-निवृत्ती पृथिव्यादीनां नियते । तथा चोक्तम्—

तस्य व्यापारशक्तिर्या पृथिव्यादिषु तिष्ठति ।
नियतिः सर्वभूतानामन्तर्यामी स उच्यते ॥

इति । आराद् दूरे च इति । व्यापिन्यपि चास्मिन् आसत्तिविप्रकर्षौ दर्शनवशे-नैव व्यवस्थाप्येते । यथाह दृश्यते इति । सोऽत्यन्तमुक्तः इति । संकल्पकल्पना-विरहात् स्वभावसिद्धत्वाच्च तस्य रूपस्यात्यन्तग्रहणम् । मुमुक्षुभिरुपास्यते इति । अविद्याग्रन्थयस्त्वेनं मोक्षाय उपासते । यदाह —

'ओमित्येतदक्षरमुद्गीथमुपासीत' इति । (छां १-१-१)

१-१ " The sensation (वेदना) of it is divided in a uniform and multiform way. It is like water in contrast with the multitude of waters and like flames which flare and vanish. "

The student can verify if it is a faithful rendering of the original वाप १-१ स्वोपज्ञ (ङ) :—

" तस्यैकमपि चैतन्यं बहुधा प्रविभज्यते ।
अङ्गाराङ्कितमुत्पाते वारिराशेरिवोदकम् ॥ "

वृषभदेव comments :

" तस्य इति ब्रह्मणः । तदेव हि शब्दरूपं ब्रह्म परिशुद्धावस्थायां प्रकाश-रूपतया चैतन्यम् । तस्येति व्यपदेशिवद्भावेन पृथक्त्वोपदेशः । तस्य चायं विवर्तः चैतन्यं यत् त्रय्यन्तविदः परमात्मेत्याहुः । तच्च एकमपि बहुधा प्रतिशरीरं अन्यान्यचैतन्यप्रक्लृप्तेः प्रविभज्यते नानाभूतविषयावग्रहरूपेण वा ग्राह्यग्राहकसंवृतिभेदेन वा । कथमेकरूपस्य भिन्नरूपतेति अनुमानेन प्रतिक्षेपे अनैकान्तिकप्रदर्शनम् । अङ्गाराङ्कितमिति यथैकरूपस्य वारिराशेः समुद्रस्य उत्पाते सति तस्य उदकसंज्ञकाङ्गारमिव रूपं दृश्यते तथाऽ-विद्यावशात् अनेकाकारप्रत्यवभासश्चैतन्यस्येति । "

१-१ " Therefore a man who now belongs to a superior clan. becomes (a member) of a distinctive family (कुल) as when many elouds bearing water are born of winds. '

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

Compare this with वाप १-१ स्पोपज्ञ (च):

"तस्मादाकृतिगोत्रस्थाद् व्यक्तिग्रामा विकारिणः ।
मारुतादिव जायन्ते वृष्टिमन्तो बलाहकाः ॥"

वृषभदेव says :—

"तस्मादिति ब्रह्मणः । आकृतिगोत्रस्थात् इति । आकृतिः सामान्यम् । गोत्रं सादृश्यम् । तेन सामान्यसादृश्यस्थितादित्यर्थः । यथा हि जातिर्भेदेष्वनुगता तथा इदमपि ब्रह्म सर्वविकारानुगतमिति । सांख्यानां सामान्यं परस्मिन् कारणे प्रतीतं सामान्यं मूलकारणं भेदानामिति । विकारा व्यक्तिस्थानीयाः तेषामन्वितत्वात् । अत एवाह व्यक्तिग्रामा इति । इदमपि च तेन सदृशमिति । विकारिणः इति । विकारान्तरयोनयः यथा मारुतात् बलाहकाः । वृष्टिमन्तः इति । वृष्टियोनयः । ननूक्तमेतत्—

'प्रकृतित्वमपि प्राप्तान् विकारानाकरोति सः ।
ऋतुधामेव ग्रीष्मान्ते महतो मेघसंप्लवान् ॥'

इत्यत्र (वाप १-१ स्वोपज्ञ [घ])। दर्शनभेदादिति केचित् । पूर्वत्र ऋतुधाम कारणमिति । इह तु मारुता इति । यद्वा पूर्वत्र विकारान्तरहेतोः विकारजनकत्वं कथितम् । इह तु सामान्यतुल्यता कारणस्य कथितेति विशेषः ॥"

१-१ **"It appears in three forms. (To those thinkers who adhere to) various extremes it (= one of these) becomes the supreme one. They are bound by various heretical opinions (दृष्टि)"**

This is obviously वाप १-१ स्वोपज्ञ (छ):

"त्रयीरूपेण तज्ज्योतिः परमं परिवर्तते ।
पृथक्तीर्थप्रवादेषु दृष्टिभेदानिबन्धनम् ॥"

वृषभदेव comments :—

"त्रयीरूपेण इति । ऋग्यजुःसामरूपेण । तद् इति ब्रह्म । ज्योतिः अन्तःप्रकाशः शब्दरूपतया ज्ञानरूपतया च । यथा वक्ष्यति प्रकाश इति । तदेव ब्रह्म ज्योतीरूपं ऋग्यजुःसामरूपेण व्यवतिष्ठते । परमम् इति । परिशुद्धम् । पृथक्तीर्थप्रवादेषु इति । य एते सांख्यादिप्रवादाः एते त्रयीरूपेण विवृत्ताद् ब्रह्मणः प्रस्तूयन्ते । तेषां हि दृष्टिभेदानां तदेव निबन्धनम् । यथा वक्ष्यति (वाप १-८)

"तस्यार्थवादरूपाणि निश्रिताः ..." इति । न तु ब्रह्मतत्त्वनिबन्धना इति ॥"

१-१ **"ब्रह्मन् is आत्मन्, which is to be known by tranquility, and from which ignorance (अविद्या) appears. By means**

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

of it (it) does not exist like राक्षसs (demons), which are of such a nature as cannot be explained."
This is वाप १·१ स्वोपज्ञ (ज):—

"शान्तविद्यात्मको योंऽशः तदु हैतदविद्यया।
तया ग्रस्तमिवाजस्रं या निर्वक्तुं न शक्यते॥"

वृषभदेव:—

"कथं पुनरवसीयते न ब्रह्मतत्त्वनिबन्धना इति। तत्राह शान्तमिति। सर्वप्रपञ्चविगमात्। यदाह विद्यात्मकमिति। कथं पुनः परविरुद्धविवर्तनिबन्धनमित्याह तदु ह इति। इह उहशब्दौ निपातौ पादपूरणार्थौ। तदेतच्छान्तमपि तया इति अविद्यया। ग्रस्तमिव गृहीतमिव। असत्यत्वाच्च ग्रासस्य इवशब्दोपादानम्। कया इत्युक्तम्। तत्राह या निर्वक्तुं न शक्यते इति। तत्त्वान्यत्वाभ्यामनिर्वचनीतया इति॥

It is clear that वृषभदेव reads शान्तं विद्यात्मकं for शान्तविद्यात्मकः.

१-१ In the शब्दब्रह्मपरीक्षा of the तत्त्वसंग्रह by शान्तिरक्षित (verses 128–152), where the doctrine which admits शब्दब्रह्मन् as the world-principle is attacked, कमलशील, the commentator, explains that the author attacks भर्तृहरि's doctrine यथोक्तम्—

"यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः।
संकीर्णमिव मात्राभिश्चित्राभिरभिमन्यते॥
तथेदममृतं ब्रह्म निर्विकारमविद्यया।
कलुषत्वमिवापन्नं भेदरूपं विवर्तते॥"

These are (ञ) and (ट) of स्वोपज्ञ of वाप १-१; वृषभदेव thus comments:—

"यदि तत् स्वतः शान्तं कथमविद्यया ग्रस्तमिव इत्याह—यथा विशुद्धमिति। आकाशस्य स्वतो विशुद्धया केशादिभिरसंकीर्णतां दर्शयति तिमिरोपप्लुत इति। यथा तिमिरोपप्लुतचक्षुषः केशादिभिरसंकीर्णमपि संकीर्णमिव मन्यन्ते इत्यभिमानमात्रं तत् न वस्तु तथेति। तथेदममृतं ब्रह्म। अमृतमिति भावे क्तः। मरणादिक्रिया यस्य नास्ति इति अमृतं प्रध्वंसाभावरहितम्। निर्विकारम् इति। द्रव्यान्तरे संभेदेन परिणामेन वा न विक्रियते इति संसर्गपरिणामानामनित्यभावमाह। गवादिविकारमात्रा न सन्ति सत्यतया इति कथयति निर्विकारमिति। कथं पुनस्तत्र प्रत्यवभासत इत्याह अविद्यया इति। अविद्यावशादेष प्रत्यवभासाभिमानः। यद्दर्शयाति अविद्यया कलुषत्वमिवापन्न इति। विवर्ततेत्याकारं दर्शयति।"

With the reading विवर्तता (= भेदरूपम्) there would be tautology; the other reading विवर्ततः is adopted by

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

many; perhaps the reading मात्राभिः might have given place to केशोण्डुभिः.

Cf करतलरत्न of भव्य (p. 41; restored into संस्कृत) :—
" अविशुद्धचक्षुष्कस्य तत्तद्बहुप्रतिभासः । (यथा) तैमिरिकस्य दृष्टोऽसत्-केशोण्डुकचन्द्र (द्वयादि) मिथ्याप्रतिभासः प्रत्यक्षं बाधते इति न्यायतो युज्यते । "

१-२ **" Whereas there exist various potentialities (शक्ति) different from the entity of one form yet that is not different from potentialities. They appear as if they were different. "**

This is वाप (१-२) :—

" एकमेव यदाम्नातं भिन्नशक्तिव्यपाश्रयात् ।
अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते ॥ "

१·३ ab **अभिनवगुप्त in ईप्रविवि (Vol II p. 8) quotes this कारिका :—**
' तत्र इति मायाविषये भगवतः सम्बन्धिन्याः कर्तृशक्तेः कालक्रमावभासनं नाम व्यापारः न तु शुद्धसंविन्मात्रत्वे तदवभासनम् । ... एवंरूपश्च व्यापारः कर्तव्यं यस्याः परमेश्वरस्वातन्त्र्यशक्तेः सा कालोत्थापकत्वात् भगवतः कालशक्तिरित्युच्यते ।

' अव्याहतकलां यस्य कालशक्तिमुपाश्रितः ' इत्यादौ । ततः सोपानपद-पङ्क्त्या सैव स्वातन्त्र्यशक्तिः अवरोहन्ती ... अर्थराशौ कर्मणि कृतपद-बन्धा अवभासयति स्मरतीत्येवंप्रायेण क्रियात्मना प्रथते ।

१·३ cd **अभिनवगुप्त in ईप्रविवि (Vol III p. 9) quotes this half-verse thus :—**

यस्मात् क्रियाशरीरान्तरनुप्रवेशवशोन्मिषितशरीरः क्रम एव कालः तत् इति तस्मात् हेतोरेवमवतिष्ठते यत् किल भावविकारषट्कपरमार्थ एव कालः । न हि भावविकाराधिका काचित् क्रिया अस्ति । यथाह तत्र-भवान् ' जन्मादयो विकाराः षड् भावभेदस्य योनयः ॥ ' इति ।

१·८ **स्वोपज्ञ of भर्तृहरि on this कारिका quotes a verse**

" इदं फेनो न कश्चिद्वा बुद्बुदो वा न कश्चन ।
मायेयं बत दुष्पारा विपश्चिदिति पश्यति ॥ '

वृषभदेव, the comm. of वाप, observes :—

' षष्टितन्त्रग्रन्थश्चायम् ... दृश्यमानस्य तुच्छतामाह — फन इति । वस्तु-सद्भावमात्रं कथितं, परमार्थतो निष्पन्नं तदपि नास्तीत्याह — न कश्चिदिति । बुद्बुद इति । सोऽपि नास्तीत्याह — न कश्चन इति । किं तर्हीदम् । मायैषा यतो दृश्यमानतयाऽस्ति, परमार्थतो नास्ति । दुष्पारा इति । अविद्वद्भिः दुःखेन

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

पार्यते, न सुखेन अन्तगमनं क्रियते इति । विपाश्चित् पण्डितः । इति पश्यति । एवं जानाति । ...

The verse closely resembles the following from चन्द्रकीर्ति's प्रसन्नपदा (p. 13 & p. 240, मिथिला edition by Dr. P. L. Vaidya).

तत्त्वदर्शनापेक्षया तु उक्तं भगवता – एतद्धि भिक्षवः परमं सत्यं यदुत अमोषधर्म निर्वाणं सर्वसंस्काराश्च मृषा मोषधर्माणः इति । तथा— नास्त्यत्र तथता वा अवितथता वा। मोषधर्मकमप्येतत् प्रलोपधर्मकमप्येतत् मृषाप्येतत् मायेयं बाललापिनी इति । तथा—

" फेनपिण्डोपमं रूपं वेदना बुद्बुदोपमा।
मरीचिसदृशी संज्ञा संस्काराः कदलीनिभाः
मायोपमं च विज्ञानमुक्तमादित्यबन्धुना" ॥ इति ॥

The पाली of संयुत्तनिकाय (III 142) is as follows :—

" फेनपिण्डूपमं रूपं वेदना बुब्बुलूपमा।
मरिचिकूपमा सञ्ञा संखारा कदलूपमा ।"
मायूपमञ्च विञ्ञानं दीपितादिच्चबन्धुना ॥

१-१४ 'तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ॥"

भर्तृहरि in his स्वोपज्ञवृत्ति on this कारिका glosses thus on पवित्रं सर्वविद्यानाम् :—

... अयमप्रमत्तगीतः श्लोक :—

" आपः पवित्रं परमं पृथिव्यां
अपां पवित्रं परमं च मन्त्राः।
तेषां च सामर्ग्यजुषां पवित्रं
महर्षयो व्याकरणं निराहुः ॥ "

This verse is thus quoted by राजशेखर in his काव्यमीमांसा (ch. VI pp. 81-86) :—

'गुणवदलङ्कृतं च वाक्यमेव काव्यम् । असत्यार्थाभिधायित्वात् नोपदेष्टव्यं काव्यमित्येके। ... न इति यायावरीयः।

" नासत्यं नाम किञ्चन काव्ये यस्तु स्त्युत्येष्वर्थवादः।
स न परं कविकर्मणि श्रुतौ च शास्त्रे च लोके च ॥ "

... शास्त्रीय :— " आपः पवित्रं ... व्याकरणं निराहुः ॥ "

नागेश in his स्फोटवाद (The Adyar Library, 1946, p. 93) refers to this कारिका thus :

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

"... प्रकारान्तरेण तज्ज्ञानसम्भवेऽपि प्रकृतिप्रत्ययव्युत्पादनपूर्वक-विजातीयतज्ज्ञानस्य स्वपूर्वप्रयोगद्वारा शरीरशुद्धिफलकस्य तत्फलत्वेन अदोषात् । तदुक्तं हरिणा—

'तद् द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।' इति । एवं च विजातीयज्ञान एव शास्त्रस्योपयोग इति न तृणादिवत् व्यभिचारः । लघुनोपायेन सकलशब्दप्रतिपत्तौ च शास्त्रस्योपयोगो बोध्यः । ... एवं रेखागवयन्यायेनापि शास्त्रमुपाय इत्याहुः ।"

१-१६ इदमाद्यं पदस्थानं.... अजिह्मा राजपद्धतिः ॥
Quoted by हरदत्त in his पदमञ्जरी (p. 282, The Pandit, New series Vol X) thus :— तदेवम्

'उपासनीयं यत्नेन शास्त्रं व्याकरणं महत् ।
प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम् ॥'

किं बहुना ।

'इदमाद्यं पदस्थानम् ...'

'रूपान्तरेण ते देवा विचरन्ति महीतले ।
ये व्याकरणसंस्कारपवित्रितमुखा नराः ॥'

भोजराज concludes the अष्टमप्रकाश of his शृङ्गारप्रकाश (Vol I p. 304) with this famous and oft-quoted कारिका of भर्तृहरि thus :—

यस्तु तद्रूपरामायणादिप्रबन्धार्थानामवधारणेन उपहितसंस्कारस्य 'रामवत् वर्तितव्यं न रावणादिवत्' इत्यादिविधिनिषेधप्रातिभाविशेष उपजायते स समस्तविश्वव्यापी चतुर्वर्गैकहेतुः परो महावाक्यैकार्थोऽर्थ-मूर्त्या विपरिणतं अनादिनिधनं अखण्डं शब्दब्रह्म इत्युच्यते ।

अखण्डः सैष वाक्यार्थः शब्दब्रह्मेति गीयते ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥
"इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्ष्यमाणानामजिह्मा राजपद्धतिः ॥"

१·२२ "As the one entity is divided into many by means of various creative processes, the hightest ब्रह्मन् will be attained by resorting to (the science of) grammar."

This is वाप १·२२ :—

"यदेकं प्रक्रियाभेदैर्बहुधा प्रविभज्यते ।
तद् व्याकरणमागम्य परं ब्रह्माधिगम्यते ॥"

"So the problem has been discussed in detail."

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

१-२३ ' नित्याः शब्दार्थसम्बन्धाः ... प्रणेतृभिः ॥ '

Quoted by प्रभाचन्द्र in his प्रमेयकमलमार्तण्ड (p. 428) सूत्र (3·101) thus :—

" एवं शब्दार्थसम्बन्धेऽप्येतद्वाच्यम्—स हि न तावदनाश्रितः नभोवदनाश्रितस्य सम्बन्धत्वासम्भवात्। आश्रितश्चेत् किं तदाश्रयो नित्यः अनित्यो वा। नित्यश्चेत् कोऽयं नित्यत्वेनाभिप्रेतस्तदाश्रयो नाम। जातिर्व्यक्तिर्वा। न तावज्जातिः तस्याः शब्दार्थत्वे प्रवृत्त्याद्यभावप्रतिपादनात् निराकरिष्यमाणत्वाच्च। व्यक्तेस्तु तदाश्रयत्वे कथं नित्यत्वं अनभ्युपगमात् तथाप्रतीत्यभावाच्च। अनित्यत्वे च तदाश्रयत्वस्यं सिद्धं तद्व्यपाये सम्बन्धस्यानित्यत्वं भित्तिव्यपाये चित्रवत्। ततोऽयुक्तमुक्तम्—

" नित्याः शब्दार्थसम्बन्धाः ... "

सदृशपरिणामविशिष्टस्यार्थस्य शब्दस्य तदाश्रितसम्बन्धस्य चैकान्ततो नित्यत्वासम्भवात्। सर्वथा नित्यस्य वस्तुनः क्रमयौगपद्याभ्यामर्थक्रियासम्भवतोऽसत्त्वं च अश्वविषाणवत्। ... "

१-३०cd **जयन्तभट्ट in his न्यायमञ्जरी (p. 107 v. s. s. vol 8 part I) quotes this कारिकार्ध thus :—**

" शब्दाद्युपायान्तरविरतौ च जायमानमनवद्यं ज्ञानं मानसं प्रत्यक्षं भवति सुरभि केतककुसुमं मधुरा शर्करा इति ज्ञानवत् इत्यपि उक्तम्। अत एव नानियतनिमित्तकं ज्ञानं प्रत्यक्षातिरिक्तस्य आर्षनाम्नः प्रत्ययस्याभावात्।

' ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम्। ' इति हि वदन्ति। आगमग्रहणं च निदर्शनार्थम्। ...

१-३२ **सुरेश्वराचार्य, the great direct disciple of शंकराचार्य (788–820 A. D.), refers probably to this कारिका in his नैष्कर्म्यसिद्धि (2·89) where he says :**

' अवस्थादेशकालादिभेदो नास्त्यनयोर्यतः।
तस्माज्जगद्धियां वृत्तं ज्योतिरेकं सदेक्षते ॥ '

चन्द्रिका, the comm. of ज्ञानोत्तम on नैष्कर्म्यसिद्धि, observes :—

' आदिशब्देन भेदका गुणादयो गृह्यन्ते तेषामवस्थादीनां साक्ष्यत्वान्न साक्षिभेदकत्वमित्यर्थः।

:सारार्थ, another comm. on नै० सि०, says : अवस्थापदेन ह्रस्वत्वादिपरिमाणमुच्यते कालिकविशेषाङ्गीकारे कालपदेन पुनरुक्त्यापत्तेः। **and suggests : we might also understand वस्तुपरिच्छेद from the word अवस्था here, evidently on the basis of**

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

the classification adopted by his गुरु–शंकराचार्य in the explanation of अनन्तम् in तै. उ. 2-1 :—'सत्यं ज्ञानमनन्तं ब्रह्म ...' 'कथं सत्यं अनन्तं च इत्यत आह–तत्र त्रिविधं हि आनन्त्यं देशतः कालतः वस्तुतश्च । तद्यथा देशतोऽनन्त आकाशः न हि देशतस्तस्य परिच्छेदोऽस्ति । ... ... कार्यं हि वस्तु कालेन परिच्छिद्यते । अकार्यं च ब्रह्म । तस्मात् कालतोऽप्यनन्तम् । तथा वस्तुतः । कथं पुनर्वस्तुत आनन्त्यं, सर्वानन्यत्वात् । भिन्नं हि वस्तु वस्त्वन्तरस्यान्तो भवति । वस्त्वन्तरबुद्धिर्हि वस्त्वन्तरात् प्रसक्तात् निवर्तते । यतो यस्य बुद्धेः निवृत्तिः स तस्यान्तः । तद्यथा गोत्वबुद्धिः अश्वत्वात् विनिवर्तते इति अश्वत्वान्तं गोत्वमिति अन्तवदेव भवति । स चान्तो भिन्नेषु वस्तुषु दृष्टः । नैवं ब्रह्मणो भेदः । अतो वस्तुतोऽप्यानन्त्यम् । कथं पुनः सर्वानन्यत्वं ब्रह्मण इति । उच्यते । सर्ववस्तुकारणत्वात् । सर्वेषां हि वस्तूनां कालाकाशादीनां कारणं ब्रह्म ... तस्मात् आकाशादिकारणत्वात् देशतस्तावदनन्तं ब्रह्म । आकाशो ह्यनन्त इति प्रसिद्धं देशतः तस्य चेदं कारणं तस्मात् सिद्धं देशत आत्मन आनन्त्यम् । तथाऽकार्यत्वात् कालतः । तद्भिन्नवस्त्वन्तराभावाच्च वस्तुतः । ...

वाचस्पतिमिश्र (850 A. D.) in his भामती on शांभा on ब्र. सू. (3·3·53) refers to this कारिका, with देशकालादिरूपाणां for अवस्थादेशकालानां of our text, thus :—'न चाप्रत्यक्षमात्मतत्त्वमनुमानादिभिः शक्यमुन्नेतुम् । न खल्वप्रत्यक्षं प्रमाणमस्ति । उक्तं हि — 'देशकालादिरूपाणां ... अतिदुर्लभा' इति । यदा च उपलब्धिसाध्यनान्तरीयकभावस्य लिङ्गस्य इयं गतिस्तदा कैव कथा दृष्टव्यभिचारस्य शब्दस्य अर्थापत्तेश्च अत्यन्तपरोक्षार्थगोचराया उपमानस्य च सर्वैकदेशसादृश्यविकल्पितस्य । सर्वसारूप्ये तत्त्वात् । एकदेशसारूप्ये चातिप्रसङ्गात् सर्वस्य सर्वेणोपमानात् ॥

१·३४,१४१ अभिनवगुप्त in his ईप्रविवि (Vol. III pp. 94–5) quotes these two कारिकाs together thus :

"इयता मानसीं वृत्तिं विचार्य वाङ्मयीं विचारयति 'वागपि' इति । 'तथा च' इति यतः प्ररूढा सती प्रमाणं ततः परयूथ्येषु प्ररोहाभावलक्षणेन बाधनेन अविमर्शीकृता नैव प्रमाणम् । ननु निरूढत्वात् न प्रमाणं अपि तु प्रमाणोपपन्नत्वात् । नैवमित्याह–'युक्त्यंशस्तु' इति । न तावत् सर्वत्र न्यायो निर्वहति । यत्रापि निर्वहति तत्रापि पूर्वोक्तदृष्ट्या कार्यादिरूपस्य दुर्ज्ञानत्वात् दुर्बलः । स्वगृहे बलवानपि वाद्यन्तरोत्थापितन्यायान्तरदृशि दुर्बलतरीभवति । तथापि च अद्यापि यावदासंसारं प्रवहतां तर्कषट्कतद्भेदसहस्रोत्थाप्यमानानां न्यायानां न पर्यवसानं किञ्चिदपि लभ्यते । यदाह 'यत्नेनानुमितोऽप्यर्थः ....' (वाप 1·34) इति । 'सर्वः फलोचितानर्थान् ... वक्तुमागमे ॥ (वाप 1·141) इति च । We read अदृष्टफलान् for फलोचितान्.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

१·३४ सर्वदर्शनसंग्रह in its शाङ्करदर्शन (pp. 461-2) refers to this कारिका as a न्याय thus:—

" अवाधितत्वेन विशेषणान्न दोष इति चेत् – मैवं भाषिष्ठाः। विशेषणासिद्धेः। तत्रेदं भवान् पृष्टो व्याचष्टाम्। कतिपयपुरुषकतिपयकालाबाधितत्वं हेतुविशेषणं क्रियते सर्वथा बाधवैधुर्यं वा। न प्रथमः।

'यत्नेन ... उपपाद्यते'॥ इतिन्यायेन त्रिचतुरप्रतिपत्तृप्रतिपादितस्यापि प्रतिपत्त्रन्तरेण प्रकारान्तरमुररीकृत्य प्रतिपादनात्। नापि चरमः। सर्वथा बाधवैधुर्यस्य असर्वज्ञदुर्ज्ञेयत्वात्। ...

Compare in this connection the verbatim account of Abū Hātim ar-Rāzī's discussions with Muhammad b. Zakarīyā ar–Rāzī (d. 925 A.D.), in which the former upholds what भर्तृहरि has said in this कारिका: "If the remedies arrived at by the latecomer are at variance with the position of his predecessors ... then this variance is not an advantage; rather, variance is an evil, an increase in blindness, added support for falsehood, a contradiction, a corruption. Indeed, we find that by your many investigations and speculations you philosophers have increased solely the variety and contradictoriness of your opinions. ... You cannot be sure that there will not come after you one striving to dissect what you have been trying to do; who will know what you did, but will add to it and attain through his intelligence and personal effort and reflection what you failed to attain. ..."

(See G. E. von Grunebaum's article, Coneept & funetion of reason in Islamie ethics, Oriens, Vol. 15, 1962)

१-३५ अभिनवगुप्त in his ईप्रविवि (Vol. III p. 110) cites this कारिका thus:—

'न केवलमत्र उदाहरणं यावदुदाहरणेऽपि प्रसिद्धं निदर्शनान्तरमुक्तमिति अपिशब्दः। ननु प्रत्यक्षज्ञानमत्र विचार्यते तत् किं निदर्शने संभवति-इत्याशङ्क्य संभवत्येव इति भर्तृहरिवचनेन दर्शयति

" परेषामसमाख्येमभ्यासादेव जायते।
मणिरूप्यादिषु ... ...॥" इति।

अनेन आप्तोक्तत्वं आनुमानिकत्वं च नेति दर्शयता आभ्यासिकप्रत्यक्षत्वमुक्तम्। ...'

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

१·४० व्यासभाष्य on योसू 2-15 says :—

"सुखसाधनानि च प्रार्थयमानः कायेन वाचा मनसा च परिस्पन्दते। ततः परमनुगृह्णाति उपहन्ति चेति परानुग्रहपीडाभ्यां धर्माधर्मौ उपचिनोति।"

This clearly refers to verses "धार्मिकाधार्मिकत्वाभ्यां पीडानुग्रहकारिणौ." ... and "इदं पुण्यमिदं पापं ..." quoted by कुमारिल in his श्लोकवार्त्तिक on जैसू (1·5·5) the second of which finds place in वाप here.

१-४२ This is in continuation of the reference to भव्य on page 204 (Appendix III).

This माध्यमिक philosopher, commenting upon नागार्जुन's मध्यमकशास्त्र (9-3)

"दर्शनश्रवणादिभ्यो वेदनादिभ्य एव च।
यः प्राग्व्यवस्थितो भावः केन प्रज्ञप्यतेऽथ सः॥"

cites the following verse :— (Eng. tr.) "Just as a (blind) man who is running quickly on a dangerous pass (in the mountains) may fall down if he fails to cling by hand, so it is not impossible for a man who chiefly relies upon his own reasoning (lit. inference) to fall down (into a hell)."

The संस्कृत original is obviously this कारिका :—

"हस्तस्पर्शादिवान्धेन विषमे पथि धावता।
अनुमानप्रधानेन विनिपातो न दुर्लभः॥"

अवलोकितव्रत thus comments upon :

"In order to make the meaning clear the आचार्य भद्रहरि resorts to a simile of a blind man so as to point out the reasons why inference should be refuted ..."

भर्तृहरि here asserts that the knowledge derived from scriptures alone is of absolute value, whereas that derived from other sources is of relative value. He denounces the validity of reasoning (अनुमान).

१·५५ गोकुलनाथमिश्र in his पदवाक्यरत्नाकर (pp. 211–212) :

यदाहुरभियुक्ताः

"ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा।
तथैव सर्वशब्दानां एते पृथगवस्थिते॥'

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

१-७३ नागेश in his स्फोटवाद (p. 73) says :—

"यदि तु वर्णेष्ववयवा न सन्त्येव तदवभासस्तु तत्तदुच्चारणविशेष-जन्यतत्तद्वर्णसमानाकारक्रमिकध्वनिविशेषसन्तानोपरागोपाधिः, तर्हि पदे वर्णावभासोऽपि ध्वनिविशेषसंतानोपरागोपाधिः इति ममापि समम्। तदुक्तं हरिणा—

'पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन॥'

इति। अखण्डरूपधर्मैक्यात् पदवाक्ययोरत्यन्तं भेदो नास्ती-त्यर्थः॥"

१-७५–७६ वादिदेवसूरि quotes and explains these two कारिकाs in his स्याद्वादरत्नाकर (4-10), of which is given here a summary (See चारुदेव's ed. of वाप. p. 77 f. n. 5): न तु वाक्ये पदानि पदेषु वर्णाः वर्णेष्ववयवाः सन्ति। पूर्वादिभागक्रमवर्णपदरूपावसायः पुन-रभिव्यञ्जकानां ध्वनीनां धर्मानुविधानात्। क्रमवतां हि ध्वनीनां ये निष्पाद-कास्ताल्वादयस्तेषां प्रतिध्वनि भिन्ना एव शक्तय इति विभिन्नशक्तिक-ताल्वादिकारणनिष्पादिता ध्वनयः परमार्थतः परस्परमत्यन्तं विसदृशा अपि तुल्यस्थानकरणजन्मतया स्वयं सदृशभावं भजन्तः स्वव्यङ्ग्यानामन्योन्य-विलक्षणानां वर्णपदवाक्यस्फोटानामपि तुल्यतामुपकल्पयन्तो भागवहिर्भूता-नपि तान् भागसंक्रान्तानिव अवभासयन्ति। मुखमिव मणिकृपाणदर्पणादयो नियतस्थानवर्णपदपरिमाणसंस्थानमनुपप्लवं एकमनेकमिव अनेकविध-स्थानवर्णपरिमाणसंस्थानभेदोपप्लवमिवादर्शयन्ति। ... (p. 78 f. n. 9): "द्विधा हि ध्वनयः प्राकृता वैकृताश्च। तत्र प्राकृता नाम ते यैर्विना सामान्यविशेषरूपेण स्फोटात्मा प्रतीतिविषयं न याति। प्रतीतस्तूत्तरकालं यैः स एवायमित्युल्लेखेन चिरकालमुपलभ्यते ते वैकृता इत्युच्यन्ते।

१·७६ वादिदेवसूरि on this कारिका, as quoted by चारुदेव (p. 79 f.n.8):
"यः प्रथमं जातो ध्वनिस्तस्य मात्राकालत्वात् तदुपचारेण तदभि-व्यक्तः स्वतो निरवयवत्वात् अत्यन्तं पूर्वापरभागरहितः स्फोटात्माऽपि मात्राकाल इति व्यपदिश्यते। तन्निमित्ता च ह्रस्वसंज्ञा शास्त्रे व्यवहाराय क्रियते। यः प्रथमं जातो ध्वनिर्यश्च तज्जः ताभ्यामभिव्यक्तः स्फोटोऽपि तयोर्द्विमात्राकालत्वात् उपचारेण मात्राद्वयकाल इत्यपदिश्यते। तन्निमित्ता च दीर्घसंज्ञा क्रियते। प्रथमध्वनिजातध्वनेर्जातो यस्तृतीयो ध्वनिस्तेन पूर्वाभ्यां चाभिव्यक्तः तेषां त्रिमात्राकालप्रमाणत्वात् अत्यन्ताप्रमाणोऽपि शब्दः त्रिमात्र इत्युच्यते। तन्निमित्तां च प्लुतसंज्ञां लभते॥

१·८२,८३,८४ Quoted by मण्डनमिश्र in his स्फोटसिद्धि on श्लोक (18):—

"प्रयत्नभेदतो भिन्ना ध्वनयोऽस्य प्रकाशकाः।
प्रत्येकमनुपाख्येयज्ञानतद्भावनाक्रमात्॥"

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

thus :—' ... यथा रत्नपरीक्षिणः परीक्षमाणस्य प्रथमसमाधिगमानुपाख्यातं अनुपाख्येयरूपप्रत्ययोपाहितसंस्काररूपाहितविशेषायां बुद्धौ क्रमेण चरमे चेतसि चकास्ति रत्नतत्त्वम् । न ह्यन्यथा स्फुटप्रकाश उपपद्यते पुर इव पश्चादपि विशेषाभावात् । तदिदमुक्तम् —

" यथानुवाकः श्लोको वा ... प्रत्यावृत्ति निरूप्यते । "
" प्रत्ययैरनुपाख्येयैः ... ... स्वरूपमवधार्यते ॥ "
" नादैराहितबीजायां ... शब्दोऽवधार्यते ॥ "

अनुपाख्येयाकारस्फोटोपलब्धिजन्मानश्च संस्काराः तत्रैव स्फुटतरपरिच्छेदां धियमुत्पादयन्तीति न वर्णवादिन इवार्थविषये नानात्वदोषः ॥ (pp. 131-132) of स्फोटसिद्धि of आचार्य मण्डनमिश्र, Madras University S. S. No. 6, 1931).

१-८४ ' नादेनाहितबीजायामन्ये (न्त्ये) न ध्वनिना सह ।
आवृत्तिपरिपाकायां बुद्धौ शब्दोऽवभासते ॥ '

Thus quotes प्रभाचन्द्र in his प्रमेयकमलमार्तण्ड (p. 456) सूत्र (3-101) :—

" वायवः स्फोटाभिव्यञ्जकाः इत्यप्ययुक्तम् । शब्दाभिव्यक्तिवत् स्फोटाभिव्यक्तेस्तेभ्योऽनुपपत्तेः । तेषां च व्यञ्जकत्वे वर्णकल्पनावैफल्यम्, स्फोटाभिव्यक्तौ अर्थप्रतिपत्तौ च अमीषां अनुपयोगात् । स्थिते च स्फोटस्य वर्णवायूत्पादात् पूर्वं सद्भावे वर्णानां वायूनां वा व्यञ्जकत्वं परिकल्प्येत । न चास्य सद्भावः कुतश्चित् प्रमाणात् प्रतिपन्नः । यच्चोक्तं— 'नादेनाहित बीजायाम्...' । इति तदपि एतेन अपाकृतम् । नित्यत्वमन्तरेणापि चार्थप्रतिपत्तिर्यथा भवति तथा प्रतिपादितमेव ॥

१-८५,८७,९१,८६ These four कारिकाs are quoted by मण्डनमिश्र in his स्फोटसिद्धि on श्लोक (21) in this order (pp. 150-162) thus :

" उपायत्वाच्च नियमः परदर्शितदर्शिनाम् ।
ज्ञानस्येव च वाचोऽयं लोके ध्रुव उपप्लवः ॥ "

निमित्तमेवेदमीदृशं शब्दतत्त्वोपलब्धेः यत् विपर्यासयदेव शब्दमुपलम्भयतीति नियतसारूप्यत्वात् । न हि शब्दान्तरविषयध्वनिविलक्षणा ध्वनयोऽन्ये तस्य व्यक्तौ नः सन्ति येनाविपर्यासोऽवसीयेत । अत एव च तुल्यरूपः सर्वप्रतिपत्तॄणां विपर्यासः तन्निमित्तस्य समानत्वात् । क्रमनियमश्च नियतक्रमत्वात् । यथा चाविद्यमानात्मभूतसंख्यान्तरज्ञानं संख्यान्तरप्रतिपत्तौ निमित्तं तदुपायत्वात् तथेहापि शब्दान्तरपरिच्छेदः । न हि क्वचित् क्रियायां हि निर्जिज्ञासितसंख्येषु शतादिसंख्यापरिच्छिन्नेषु बस्तुषु पूर्वसंख्यासंभवः संख्यायाः परिच्छेदरूपत्वात् तस्य च तत्रासंभवात् । यथैव चोत्पत्तौ क्षीरबीजादिकार्याणां आनुपूर्वीनियमः तथोपलब्धावपि । तस्मात् परोपदर्शितशब्दतत्त्वग्राहिणां अन्ययोपायतया विपर्यासनियमः । अपर-

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

प्रदर्शितविषयास्तु परमर्षयः साक्षात्कृतधर्माणः अव्याहतान्तःप्रकाशा विधूतविपर्यासक्रमं च वाक्तत्त्वं प्रतिपेदिरे प्रतिपादयामासुरिति च प्रतिज्ञायते। यथोक्तम् – 'साक्षात्कृतधर्माण ऋषयो बभूवुः। तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्यः उपदेशेन मन्त्रान् संप्रादुः। उपदेशाय ग्लायन्तोऽपरे बिल्मग्रहणाय इमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च'। (निरुक्त १·२०) तदुक्तम्—

'असतश्चान्तराले यः शब्दो नास्तीति मन्यते।
प्रतिपत्तुरशक्तिः सा ग्रहणोपाय एव सः॥

'यथाऽऽद्यसंख्याग्रहणमुपायः प्रतिपत्तये।
संख्यान्तराणां भेदेऽपि तथा वर्णान्तरश्रुतिः॥

'यथाऽऽनुपूर्वीनियमो विकारे क्षीरवीजयोः।
तेनैव प्रतिपत्तॄणां नियतो बुद्धिषु क्रमः॥'

यथा च ज्ञानस्य असद्ग्राह्यानुकारविपर्यासोपप्लवः नियतः तथा वागात्मनोऽपि सदृशव्यञ्जकध्वनिभेदानुकारात् क्रमभावी विपर्यासोपप्लवः। तथाहि येषामपि वर्णलक्षणं वाक्तत्त्वं अविद्यमानभागावच्छेदमित्यभ्युपगमः तेऽपि भागक्रमसंसर्गलक्षणं अन्यं च उदात्तदीर्घत्वादिरूपं उपप्लवं नियतं न तस्यावजानते। तथाहि सन्ध्यक्षरेषु अकारैकारौ चान्येष्वपि स्वरेषु स्वरितगुणयुक्तेषु उदात्तानुदात्तगुणभेदविभज्यमानभागभेदभिन्नेषु न भागक्रमसंसर्गप्रख्यापह्नवमर्हति। तदुक्तम्—

'भेदानुकारो ज्ञानस्य वाचश्चोपप्लवो ध्रुवः।
क्रमोपसृष्टरूपा वाक् ज्ञानं ज्ञेयव्यापाश्रयम्॥'

'न ज्ञेयेन विना ज्ञानं व्यवहारेऽवतिष्ठते।
नालब्धक्रमया वाचा कश्चिदर्थोऽभिधीयते॥'

This last कारिका we have given in the foot-notes; it is obviously explanatory of the preceding one.

१·८९-९० **Quoted by मण्डनमिश्र in his स्फोटसिद्धि (श्लोक 19)**

"आरूपालोचितेष्वस्ति ह्यन्यथात्वप्रकाशनम्।
तत्संस्कारक्रमाच्चापि व्यक्तं तत्त्वं प्रकाशते॥"

thus :—

'प्रकृतिस्थेन्द्रिया अपि बहिर्वस्त्वन्तरदर्शनात् अन्यथा प्रतिपद्य यथावदुपलभन्ते ... स्वरूपमात्रख्यातौ इन्द्रियाधीनायां वृक्षादिषु सादृश्यनिमित्तं मानसं स्मरणमिति चेत् शब्दान्तरेष्वपि भागाभिमतेषु तथाऽस्तु। तदुक्तम्—

"यथैव दर्शनैः पूर्वैः ... अन्यथैवाध्यवस्यति॥"

"व्यज्यमाने तथा ....।
भावावग्रहरूपेण ....॥"

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

(See pp. 142-3 of स्फोटसिद्धि of आचार्यमण्डनमिश्र, Madras University S. S. No. 6, 1931).

१-९३ गोकुलनाथमिश्र in his पद्वाक्यरत्नाकर (p. 395) :
तदुक्तमभियुक्तैः

‘ अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता ।
काश्चिद् व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ॥ ’

नागेश in his स्फोटवाद (p. 98) says :—

“ ननु जातेः प्रत्येकं वर्णेषु सत्त्वात् प्रत्येकादर्थबोधापात्तीरिति चेन्न, अनेकव्यक्त्यभिव्यङ्ग्यवर्णसमुदाये तस्या व्यासज्यवृत्तित्वात् अक्षतेः । तदुक्तं हरिणा —

‘ अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता ।
कैश्चिद् व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ॥ ’ इति ।

अनेकाभिर्वर्णव्यक्तिाभिः व्यङ्ग्या जातिरेव स्फोटो वाचिकाभिप्रेता कैश्चित् । तद्व्यञ्जकव्यक्तयश्च ध्वनय एव न तदतिरिक्ता इति तदर्थः । इदमेवाभिप्रेत्योक्तं काव्यप्रकाशे — ‘ बुधैर्वैयाकरणैः प्रधानीभूतस्फोटरूपव्यञ्जकशब्दस्य ध्वनिरिति व्यवहारः कृतः ’ (काप्र १-४)

१-१२० “ This is the transformation (emanation) of शब्दब्रह्मन्. Abiding by the potentialities of Words, they become tranquil in themselves, although they have arisen from Words alone. ”

This is the rendering of वाप १-१२० :—

“ शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः ।
छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्तत ॥ ”

It seems that the tibetan translator took व्यवर्तत in the original for न्यवर्तत.

१-१२१ “ इतिकर्तव्यता ... बालोऽपि प्रतिपद्यते ॥ ”

Quoted by कमलशील in his पञ्जिका on शान्तरक्षित's तत्त्वसंग्रह (1216) :

“ अतीतभवनामार्थभावनावासनान्वयात् ।
सद्योजातोऽपि यद्योगादितिकर्तव्यतापटुः ॥ ”

कमलशील thus comments :—

अतीतो भवः अतीतं जन्म । तत्र नामार्थभावना शब्दार्थाभ्यासः । तेनाहिता या वासना सामर्थ्यं तस्या अन्वयः अनुगमो यतो बालस्याप्यस्ति तेनाभिलापिनी प्रतीतिः तस्यापि भवत्येव । यस्याः कल्पनायाः योगात् इतिकर्तव्यतायां स्मितरुदितस्तनपानप्रहर्षादिलक्षणायां पटुः चतुरो भवति । अतोऽनया कार्यभूतया यथोक्ता कल्पना बालस्याप्यनुमीयत एव । यथोक्तं—

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

'इतिकर्तव्यता... प्रतिपद्यते ॥' सा पुनः संमूर्च्छिताक्षराकारध्वनिविशिष्टं अंतर्भावाविपरिवर्तितं अर्थं बहिरिवादर्शयन्ती तेषां समुपजायते यया पश्चात् संकेतग्रहणकुशला भवन्ति।

Quoted by तर्कसोपान of विद्याकरशान्ति (p. 278, "Minor Buddhist Texts" edited by G. Tucci) thus :—

"कुतः पुनः बालकस्य कल्पना सिद्धा इति चेत्। तत्कार्यस्य प्रवृत्त्यादि-लक्षणस्य प्रदर्शनात्। तथाहि बालकोऽङ्गुर्यादिपरिहारे स्तनादौ प्रवर्तते। तदुक्तम् —

'इतिकर्तव्यता लोके सर्वा शब्दव्यपाश्रया।
तां पूर्वाहितसंस्कारो बालोऽपि प्रतिपद्यते॥' इति॥

बालके पुनः संमूर्च्छिताक्षराकारध्वनिविशिष्टा बुद्धिविपरिवर्तिनी कल्पना ऊह्या यया पश्चात् सङ्केतग्रहणकुशलो भवति। ..."

१-१२३ Quoted by तर्कसोपान of विद्याकरशान्ति (p. 279, "Minor Buddhist Texts" edited by G. Tucci) thus :—

"अन्यार्थं कृतमन्यार्थं भवतीतिन्यायात् परविप्रतिपत्तिरपि निराकृता द्रष्टव्या। तथाहि वैयाकरणैरुक्तम् —

'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन जायते॥' इति॥

सर्वप्रत्ययानां शब्दानुगतरूपत्वे सति कस्यचिदपि ज्ञानस्य अर्थसाक्षात्करण-योगात्। ...."

१-१२३-४ वादिदेवसूरि in his स्याद्वादरत्नाकर (Poona edition, pp 88–90) quotes these two कारिकाs together with three others, which are not included in our text, but printed in the foot-notes :—

अत्राहुः शब्दब्रह्मवादिनः :—

प्रियं प्रियं नः सकलापि बुद्धिः
प्रमाणभूता व्यवसायिनी यत्।
न युज्यते तु व्यवसाय एव
शब्दानुवेधं परिमुच्य जातु॥ ७८॥

शब्दसंपर्कपरित्यागे हि प्रत्ययानां प्रकाशरूपताया एवाभावप्रसक्तिः। वाग्रूपता हि शाश्वती प्रत्यवमर्शिनी च तदभावे प्रत्ययानां नापरं रूपमव-शिष्यते। तदुक्तम्—

"न सोऽस्ति प्रत्ययो लोके ..."
"वाग्रूपता चेत् व्युत्क्रामेत् ..."

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

(See pp. 142-3 of स्फोटसिद्धि of आचार्यमण्डनमिश्र, Madras University S. S. No. 6, 1931).

१-९३ गोकुलनाथमिश्र in his पद्वाक्यरत्नाकर (p. 395) :
तदुक्तमभियुक्तैः

'अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता ।
काश्चिद् व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ॥'

नागेश in his स्फोटवाद (p. 98) says :—

"ननु जातेः प्रत्येकं वर्णेषु सत्त्वात् प्रत्येकादर्थबोधापात्तीरिति चेन्न, अनेकव्यक्त्यभिव्यङ्ग्यवर्णसमुदाये तस्या व्यासज्यवृत्तित्वात् अक्षतेः । तदुक्तं हरिणा —

'अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता ।
कैश्चिद् व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ॥' इति ।

अनेकाभिर्वर्णव्यक्तिभिः व्यङ्ग्या जातिरेव स्फोटो वाचिकाभिप्रेता कैश्चित् । तद्व्यञ्जकव्यक्तयश्च ध्वनय एव न तदतिरिक्ता इति तदर्थः । इदमेवाभिप्रेत्योक्तं काव्यप्रकाशे — 'बुधैर्वैयाकरणैः प्रधानीभूतस्फोटरूपव्यञ्जकशब्दस्य ध्वनिरिति व्यवहारः कृतः' (काप्र १-४)

१-१२० " This is the transformation (emanation) of शब्दब्रह्मन्. Abiding by the potentialities of Words, they become tranquil in themselves, although they have arisen from Words alone. "

This is the rendering of वाप १-१२० :—

" शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः ।
छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्तत ॥ "

It seems that the tibetan translator took व्यवर्तत in the original for न्यवर्तत.

१-१२१ " इतिकर्तव्यता ... बालोऽपि प्रतिपद्यते ॥ "

Quoted by कमलशील in his पञ्जिका on शान्तरक्षित's तत्त्वसंग्रह (1216) :

" अतीतभवनामार्थभावनावासनान्वयात् ।
सद्योजातोऽपि यद्योगादितिकर्तव्यतापटुः ॥ "

कमलशील thus comments :—

अतीतो भवः अतीतं जन्म । तत्र नामार्थभावना शब्दार्थाभ्यासः । तेनाहिता या वासना सामर्थ्यं तस्या अन्वयः अनुगमो यतो बालस्याप्यस्ति तेनाभिलापिनी प्रतीतिः तस्यापि भवत्येव । यस्याः कल्पनायाः योगात् इतिकर्तव्यतायां स्मितरुदितस्तनपानप्रहर्षादिलक्षणायां पटुः चतुरो भवति । अतोऽनया कार्यभूतया यथोक्ता कल्पना बालस्याप्यनुमीयत एव । यथोक्तं–

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

'इतिकर्तव्यता... प्रतिपद्यते ॥' सा पुनः संमूर्च्छिताक्षराकारध्वानिविशिष्टं अंतर्भावाविपरिवर्तितं अर्थं बहिरिवादर्शयन्ती तेषां समुपजायते यया पश्चात् संकेतग्रहणकुशला भवन्ति।

Quoted by तर्कसोपान of विद्याकरशान्ति (p. 278, "Minor Buddhist Texts" edited by G. Tucci) thus :—

"कुतः पुनः बालकस्य कल्पना सिद्धा इति चेत्। तत्कार्यस्य प्रवृत्त्यादिलक्षणस्य प्रदर्शनात्। तथाहि बालकोऽङ्गुर्यादिपरिहारे स्तनादौ प्रवर्तते। तदुक्तम् —

'इतिकर्तव्यता लोके सर्वा शब्दव्यपाश्रया।
तां पूर्वाहितसंस्कारो बालोऽपि प्रतिपद्यते॥' इति॥

बालके पुनः संमूर्च्छिताक्षराकारध्वनिविशिष्टा बुद्धिविपरिवर्तिनी कल्पना ऊह्या यया पश्चात् सङ्केतग्रहणकुशलो भवति। ..."

१-१२३ Quoted by तर्कसोपान of विद्याकरशान्ति (p. 279, "Minor Buddhist Texts" edited by G. Tucci) thus :—

"अन्यार्थं कृतमन्यार्थं भवतीतिन्यायात् परविप्रतिपत्तिरपि निराकृता द्रष्टव्या। तथाहि वैयाकरणैरुक्तम् —

'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन जायते॥' इति॥

सर्वप्रत्ययानां शब्दानुगतरूपत्वे सति कस्यचिदपि ज्ञानस्य अर्थसाक्षात्करणयोगात्। ...."

१-१२३-४ वादिदेवसूरि in his स्याद्वादरत्नाकर (Poona edition, pp 88–90) quotes these two कारिकाs together with three others, which are not included in our text, but printed in the foot-notes :—

अत्राहुः शब्दब्रह्मवादिनः :—

प्रियं प्रियं नः सकलापि बुद्धिः
प्रमाणभूता व्यवसायिनी यत्।
न युज्यते तु व्यवसाय एव
शब्दानुवेधं परिमुच्य जातु॥ ७८॥

शब्दसंपर्कपरित्यागे हि प्रत्ययानां प्रकाशरूपताया एवाभावप्रसक्तिः। वाग्रूपता हि शाश्वती प्रत्यवमर्शनी च तदभावे प्रत्ययानां नापरं रूपमवशिष्यते। तदुक्तम्—

"न सोऽस्ति प्रत्ययो लोके ..."
"वाग्रूपता चेत् व्युत्क्रामेत् ..."

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

सा चेय वाक् त्रैविध्येन व्यवस्थिता वैखरी मध्यमा पश्यन्तीति। तत्र येयं स्थानकरणप्रयत्नक्रमव्यज्यमानाकारादिवर्णसमुदायात्मिका वाक् सा वैखरीत्युच्यते। तदुक्तम्—

'स्थानेषु विधृते वायौ कृतवर्णपरिग्रहा।
वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धना॥

अस्यार्थः। स्थानेषु इति ताल्वादिस्थानेषु। वायौ प्राणसंज्ञे। विधृते अभिघातार्थं निरुद्धे सति। कृतवर्णपरिग्रहा इति हेतुद्वारेण विशेषणं ततः ककारादिवर्णरूपस्वीकारात् वैखरीसंज्ञा वक्तृभिर्विशिष्टायां खरावस्थायां स्पष्टरूपायां भवा वैखरीति निरुक्तेः। वाक् प्रयोक्तॄणां सम्बन्धिनी। यत्र तेषां स्थानेषु तस्याश्च प्राणवृत्तिरेव निबन्धनं तत्रैव निबद्धा सा तन्मयत्वादिति। या पुनरन्तःसंकल्प्यमाना क्रमवती श्रोत्रग्राह्यवर्णरूपाभिव्यक्तिरहिता वाक् सा मध्यमेत्युच्यते। तदुक्तम्—

"केवलं बुद्ध्युपादानात् क्रमरूपानुपातिनी।
प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते॥

अस्यार्थः। स्थूलां प्राणवृत्तिं हेतुत्वेन वैखरीवत् अनपेक्ष्य केवलं बुद्धिरेव उपादानं हेतुर्यस्याः सा प्राणेस्थत्वात् क्रमरूपमनुपतति। अस्याश्च मनोभूमाववस्थानं वैखरीपश्यन्त्योर्मध्ये भावात् मध्यमा वागिति। या तु ग्राह्यभेदक्रमादिरहिता स्वप्रकाशा संविद्रूपा वाक् सा पश्यन्तीत्युच्यते। तदुक्तम्—

"अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा।
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी॥"

अस्यार्थः। पश्यन्ती यस्यां वाच्यवाचकयोर्विभागेन अवभासो नास्ति सर्वतश्च सजातीयविजातीयापेक्षया संहृतो वाच्यानां वाचकानां च क्रमो देशकालकृतो यत्र क्रमविवर्तशक्तिस्तु विद्यते। स्वरूपज्योतिः स्वप्रकाशा वेद्यते वेदकभेदातिक्रमात्। सूक्ष्मा दुर्लक्ष्या। अनपायिनी कालभेदास्पर्शादिति।

'न सोऽस्ति... प्रतिष्ठितम्॥'
'वाग्रूपता... प्रत्यवमर्शिनी॥'

These two कारिकाs are quoted by प्रभाचन्द्र in his प्रमेयकमलमार्तण्ड (p. 39) thus :—

'येऽपि शब्दाद्वैतवादिनः निखिलप्रत्ययानां शब्दानुविद्धत्वेनैव सविकल्पकत्वं मन्यन्ते—तत्स्पर्शवैकल्ये हि तेषां प्रकाशरूपताया एवाभावप्रसङ्गः। वाग्रूपता हि शाश्वती प्रत्यवमर्शिनी च। तदभावे प्रत्ययानां नापरं रूपमवशिष्यते। .... तदुक्तम्—"न सोऽस्ति ...." "वाग्रूपता ..." ... तेऽप्यतत्त्वज्ञाः। ... ननु किमिदं शब्दानुविद्धत्वं नाम। अर्थस्याभिन्नदेशे प्रतिभासः तादात्म्यं वा। तत्राद्यविकल्पोऽसमीचीनः। तद्रहितस्यैवार्थस्याध्यक्षे प्रतिभासनात्। ...नापि तादात्म्यम्। विभिन्नेन्द्रियजनितज्ञान-

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

ग्राह्यत्वात् । ... कथं वा वाग्रूपताऽवबोधस्य शाश्वती यतो 'वाग्रूपता चेदुत्क्रामेत्' इत्याद्यवतिष्ठेत लोचनाध्यक्षे तत्संस्पर्शाभावात् । न खलु श्रोत्रग्राह्यां वैखरीं वाचं तत् संस्पृशति तस्यास्तदविषयत्वात् । अन्तर्जल्परूपां मध्यमां वा तामन्तरेणापि शुद्धसंविदोभावात् । संहृताशेषवर्णादिविभागा तु पश्यन्ती सूक्ष्मा चान्तर्ज्योतीरूपा वागेव न भवति । अनयोः अर्थात्मदर्शनलक्षणत्वात् । वाचस्तु वर्णपदाद्यनुक्रमलक्षणत्वात् । ततोऽयुक्तमेतत् तल्लक्षणप्रणयनम् । 'स्थानेषु विवृते वायौ...' 'प्राणवृत्तिमतिक्रम्य...' 'स्वरूपज्योतिरेवान्तः ...'

१-१२३ 'न सोऽस्ति ... शब्दानुगमादृते ।
अनुविद्धमिव ... सर्वं शब्देन भासते ॥'

The following echo of this famous कारिका is found in शान्तरक्षित's तत्त्वसंग्रह (1217):—

"चिन्तोत्प्रेक्षादिकाले च विस्पष्टं या प्रवेद्यते ।
अनुविद्धेव सा शब्दैरपह्नोतुं न शक्यते ॥"

कमलशील has no comment to offer except by way of introducing the कारिका thus:— चिन्तेत्यादिना भूयः प्रत्यक्षतः कल्पनासिद्धिमाह—

जयन्तभट्ट in his न्यायमञ्जरी (p. 80 Vizianagaram Sanskrit Series Vol 8 Part I) quotes this कारिका thus:— "न च शब्दानुसन्धानरहितः कश्चित् प्रत्ययो दृश्यते । अनुल्लिखितशब्दकेष्वपि प्रत्ययेषु अन्ततः सामान्यशब्दसमुन्मेषसम्भवात् तदुल्लेखव्यतिरेकेण प्रकाशात्मिकायाः प्रतीतेरनुत्पादात् । तथाऽऽह भर्तृहरिः ।

'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गृह्यते ॥'

तस्मात् प्रत्यक्षस्य लक्ष्यस्यासद्भावात् कस्येदं लक्षणमुपक्रान्तमिति असम्भवदोषमाशङ्क्याह सूत्रकारः अव्यपदेश्यमिति ।"

It would have been astonishing if भोजराज, who has quoted profusely from वाक्यपदीय, had not quoted this famous कारिका in his शृङ्गारप्रकाश somewhere; see Vol I p. 218 where he says:—

न च गोत्वादयः कदाचिदपि शब्दानुवेधवन्ध्यबोधाविषयतां प्रतिपद्यन्ते । तथाहि—'आयं गौः पृश्निरक्रमीत्' (ऋ 10·189-1) इत्यादौ यथा जातिगुणक्रियावच्छिन्नविषयावभासिनि सविकल्पके तथा निर्विकल्पके विज्ञाने शब्दविशिष्ट एवार्थःपरिस्फुराति । तदाह—

"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गम्यते ॥"

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

१-१२४ **भोजराज quotes this कारिका in his शृङ्गारप्रकाश (Vol I p. 220) with this preliminary remark :—**

अथ यथा शब्दस्यार्थो विवर्तस्तथाऽर्थस्य शब्दो यदि भवेत् को दोषः स्यात् ? न कश्चित् । किन्तु

" वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती ।
न प्रकाश्यः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥ "

followed by a popular verse which is not found in वाप —

" इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥ "

१-१२८ **हेलाराज on वाप ३·२·१७–१८ quotes** ' प्रविभज्यात्मनाऽऽत्मानम् ... प्रवर्तते, ' **which स्वोपज्ञ quotes under वाप (1-128) thus :—** ' तदाहुः वेदान्ततत्त्वनिपुणाः ' **and explains :—** ' वैकल्पिको हि मनोव्यापारानुसारी संसारी भोक्ता । स च भावतश्चेतनत्वात् ब्रह्मैव । तथा च तावति स्वातन्त्र्यात् निर्मितौ ईश्वरोऽनन्योपादानात् भावान् आभास्य उपभुङ्क्ते प्रियाप्रियरूपतया रागद्वेषादिमयेन संसारमोहेन स्वपरविभागानुसारी परसंकथादिषु । ... भोक्ता इति वचनात् प्रत्यगात्मसृष्टिरियमुक्ता । तस्य च सर्वेश्वरत्वात् ब्रह्मरूपत्वे सृष्टिसामर्थ्यमुक्तम् । सर्वमयत्वाच्च अनन्योपादानविचित्रभावरचनां आत्मोपादानमाहुः । अत एव प्रविभज्यात्मनाऽऽत्मानमिति कर्तृकर्मभेदाभावाच्च वैकल्पित्वमस्याः सृष्टेः स्फुटमुक्तम् । ...

१-१४२ **ab गोकुलनाथमिश्र in his पदवाक्यरत्नाकर (p. 469) :—**

' अनपभ्रष्टतानादिर्यद्वाऽभ्युदयसाधनम् ।
व्याक्रिया व्यञ्जनीया वा जातिः कापीह साधुता ॥ '

इत्यनेन लक्षितस्य साधुत्वस्यानुशासनाय व्याकरणप्रवृत्तिरित्याकरेषु " साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः ॥ " इति वाक्यपदीये च व्यक्तत्वात् ॥

१-१५०–१५३ **गोकुलनाथमिश्र in his पदवाक्यरत्नाकर (Benares edition, p. 63) quotes these कारिकाः :—** यदाह हरिः

' ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः ।
तादात्म्यमुपगम्यैव शब्दार्थस्य प्रकाशकाः ॥
न शिष्टैरनुमन्यन्ते पर्याया इव साधवः ।
न यतः स्मृतिशास्त्रेण तस्मात् साक्षादवाचकाः ॥
अम्मामेति यदा बालः शिक्ष्यमाणः प्रभाषते ।
अव्यक्तं तद्विदां तत्र व्यक्ते भवति निर्णयः ॥
एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते ।
तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते ॥ ' इति ॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

२.१-२ **In continuation of the note on वाप 2-1-2 (pp. 216-217 of Appendix III) we may add :**

पुञ्जराज, the comm. of वाप, lists eight different definitions of वाक्य thus :—

एतेऽष्टौ वाक्यविकल्पा आचार्याणाम्। तत्राखण्डपक्षे १ जातिः संघातवर्तिनी २ एकोऽनवयवः शब्दः ३ बुद्ध्यनुसंहृतिः इति त्रीणि लक्षणानि। खण्डपक्षे तु १ आख्यातशब्दः २ क्रमः ३ संघातः ४ पदमाद्यम् ५ पृथक् सर्वपदं साकाङ्क्षमिति पञ्च लक्षणानि। अत्रापि १ संघातः २ क्रमः इति अभिहितान्वयपक्षे लक्षणद्वयम्। १ आख्यातशब्दः २ पदमाद्यम् ३ पृथक् सर्वपदं साकाङ्क्षमिति अन्विताभिधानपक्षे लक्षणत्रयमिति विभागः॥

For a similar treatment of this subject, see कुमारिल in his श्लोकवार्त्तिक (वाक्याधिकरण-49-54) :—

"एवमाद्यान्तसर्वेषां पृथक्संघातकल्पने।
अन्योन्यानुग्रहाभावात् पदानां नास्ति वाक्यता॥
आद्यं यदि पदं सर्वैः संस्क्रियेत विशेषतः।
ततस्तदेव वाक्यं स्यात् अन्यश्च द्योतको गणः॥
एवमन्त्येषु सर्वेषु पृथग्भूतेष्ववस्थितम्।
स्वतन्त्रेषु हि वाक्यत्वं कथंचिन्नोपलक्षितम्॥
स्फोटजातिनिषेधश्च स्यात् पदस्फोटजातिवत्।
वार्यः पदक्रमो वाक्यं यथा वर्णक्रमः पदम्॥
बुद्ध्या न चोपसंहर्तुं क्रमो निष्कृष्य शक्यते।
पदान्येव हि तद्वन्ति वर्तन्ते श्रोत्रबुद्धिवत्॥
तावत्स्वेव पदेष्वन्यः क्रमोऽन्यश्च प्रतीयते।
तत्र यावत्क्रमं भेदो वाक्यार्थस्य प्रसज्यते॥"

On this पार्थसारथिमिश्र in his comm. रत्नाकर observes :—

"येऽपि वैयाकरणैरुक्ता वाक्यविकल्पाः 'आख्यातं ... न्यायदर्शिनाम्' इति तान् निराकरोति एवमिति। अन्त्यपदवाक्यत्वं परैरनुपन्यस्तमपि सम्भवादुपन्यस्यते, तदनन्तरं हि वाक्यार्थः प्रतीयते। यत्तावत् आद्यस्य अन्त्यस्य सर्वेषां वा प्रत्येकं मिथोऽनुग्रहापेक्षया संघातस्य वा वाक्यत्वकल्पनं तदयुक्तमितरेतरानुग्रहासम्भवादिति। अनुग्रहासम्भवमेव दर्शयति आद्यमिति। न चाद्यस्य इतरैरनुग्रहः कश्चिद् दृश्यते, न स सम्भवति अयौगपद्यादिति। तथाऽन्त्यस्य सर्वेषां वा संहतानां पृथग्भूतानां वा नास्त्यनुग्रह इत्याह एवमिति। मा भूत्तदनुग्रहस्तथापि किमिति वाक्यत्वं न भवति अत आह स्वतन्त्रेष्विति। एवं च व्यस्तोच्चारितानां गौरश्व इत्यादीनां च वाक्यत्वं स्यादिति। 'एकोऽनवयवः शब्दः' इति च 'जातिः संघातवर्तिनी' इति च निराकरोति स्फोटेति। 'क्रमो बुद्ध्यनुसंहृतिः' इत्येतन्निराकरोति वार्य इति। बुद्ध्यनुसंहृतिश्च क्रमस्यासिद्धेति आह बुद्ध्येति। कथमित्याह पदानीति। किं च

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

वर्णक्रमस्य पदत्वं युज्येतापि स हि अर्थप्रतीत्यौपयिकः क्रमान्तरेऽर्थप्रतीत्यभावात्। पदक्रमस्य तु वाक्यार्थप्रत्ययानौपयिकस्य कथं वाक्यत्वं औपयिकत्वे वा क्रमभेदे वाक्यार्थभेदः स्यादित्याह तावत्स्विति ॥ "

कुमारिल takes क्रमो बुद्ध्यनुसंहृतिः as a single definition instead of two; he takes into consideration the definition of a sentence "पदमन्त्यम्" though it is not found in वाप; later भाट्टमीमांसकs follow the same tradition (See युक्तिस्नेहप्रपूरणी on शास्त्रदीपिका, चौखम्बासंस्कृतमाला 43, p. 435):

"नापि क्रमो बुद्ध्यनुसंहतिरिति पक्षः। क्रमस्य बुद्ध्या निष्कृष्योपसंहर्तुमशक्यत्वात्। यथा च वर्णक्रमस्य पदत्वं निराकृतं तथा पदक्रमस्य वाक्यत्वमपि निराकर्तव्यम्। ..."

Among the प्राभाकरमीमांसकs, शालिकनाथ refutes some of these definitions in his वाक्यार्थमातृकावृत्ति (p. 24):

"वाक्यमेकं न निर्भागं वाक्यान्त्यावयवोऽपि वा।
पदवृन्दं स्मृतिस्थं वा प्रथमं पदमेव वा।
आख्यातपदमात्रं वा पदार्था वाऽप्यनन्विताः॥"

According to the जैन tradition (प्रमेयकमलमार्तण्ड), भर्तृहरि's list refers to ten different definitions of a sentence. It reads क्रमो बुद्ध्यनुसंहृती and interprets it as containing three definitions thus :—

"क्रमो वाक्यमित्येतत्तु संघातवाक्यपक्षान्नातिशेते। ... बुद्धिर्वाक्यमित्यत्रापि भाववाक्यं द्रव्यवाक्यं वा सा स्यात्। ... एतेन अनुसंहृतिर्वाक्यमित्यपि चिन्तितम्। ..." सिंहसूरि in his comm. on श्रीमल्लवादिसूरि's द्वादशारनयचक्र (G. O. S. 1952, p. 95) quotes भर्तृहरि's list and says :—

"'आख्यातः शब्दसंघातो जातिः संघातवर्तिनी' इत्यादिषु वाक्यलक्षणविकल्पेषु नयस्य मतेन 'पृथक् सर्वं पदं वाक्यम्'.... इति।" (For details see K. Kunjunni Raja's article in the Adyar Library Bulletin, Vol. XXVI Parts III–IV, pp. 206–210).

प्रभाचन्द्र in his प्रमेयकमलमार्तण्ड introducing these two कारिकाs observes (pp. 458-459):

"तथा च वाक्याभावान्न वाक्यार्थप्रतिपत्तिः कस्यचित् स्यात्। ततो यस्य प्रतिपत्तुर्यावत्सु परस्परापेक्षेषु पदेषु समुदितेषु निराकाङ्क्षत्वं तस्य तावत्सु वाक्यत्वसिद्धिरिति प्रतिपत्तव्यम्। एतेन प्रकरणादिगम्यपदान्तर-

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

सापेक्षश्रूयमाणसमुदायस्य निराकाङ्क्षस्य सत्यभामादिपदवत् वाक्यत्वं प्रतिपादितं प्रतिपत्तव्यम् । यच्चोच्यते—

'आख्यातशब्दः सङ्घातो जातिः संघातवर्तिनी ।
एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृती ॥

'पदमाद्यं पदं चान्त्यं पदं सापेक्षमित्यपि ।
वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायवेदिनाम् ॥'

इति तदप्युक्तिमात्रम् । and so on.

२·३ भोजराज in his शृङ्गारप्रकाश (Vol. I p. 116) quotes the following कारिका with variants thus :—

'.... सूत्रकारस्य भाष्यकारस्य च दर्शने अस्तिक्रियायाः क्रियान्तरेण संबन्धः । वार्त्तिककारस्तु युष्मदस्मदादेशनिघाताद्यर्थमाख्यातं साव्ययकारकविशेषणं वाक्यमेकतिङ् वाक्यमिति अन्यदेव लौकिकात् पारिभाषिकं वाक्यलक्षणमारभते । न च तेन लौकिको व्यवहारः सिध्यतीत्युपेक्ष्यते । तदुक्तम् —

"निघातादिव्यवस्थार्थं शास्त्रे यत् पारिभाषिकम् ।
साकाङ्क्षावयवं तेन न सर्वं तुल्यलक्षणम् ॥"

एतेन भिन्नाभिन्नप्रवक्तृकानेकवाक्योपकल्पितैकवाक्यस्थानामपिक्रियाणां परस्परमभिसंबन्धो व्याख्यातः ॥'

२-५ गोकुलनाथमिश्र in his पदवाक्यरत्नाकर (p. 460) :—
यदुक्तं हरिणा —

"सम्बोधनपदं यच्च तत् क्रियाया विशेषणम् ।
व्रजानि देवदत्तेति निघातोऽत्र तथा सति ॥"

२-६,५,४ भोजराज in his शृङ्गारप्रकाश (Vol. I pp. 111, 112) quotes these कारिकाs in the reverss order thus:—

'आख्यातपदतुल्यधर्मिणो हि क्त्वान्तस्यानेकस्यापि दृष्टः तिङन्तेन सह संबन्धः । स्नात्वा पीत्वा भुक्त्वा व्रजति इति । तथा पूर्वं स्नाति भुङ्क्ते पिबति तु व्रजति इति । तत्र यथैव क्त्वान्तस्य तिङन्तेन एकवाक्यत्वं तथा पूर्वकालक्रियाभिधायिनां आख्यातानां सर्वेषामपि क्रियाविशेषणकत्वाद् भवति । उक्तं च

"यथाऽनेकमपि ... तिङन्तस्य विशेषकम् ॥"

... कः पुनर्बाह्याभ्यन्तरयोः क्रियाविशेषणयोर्विशेषः । अयमस्ति । आन्तरं हि क्रियाविशेषणं कर्मत्वं नपुंसकत्वं च प्रतिलभते । बाह्यस्य तु स्वलिङ्गता न कर्मत्वनियमः । एवं च कृत्वोक्तम्

"संबोधनपदं यच्च .... निघातोऽत्र तथा सति ॥"

ननु च संबोधनपदस्य तिङन्तेन एकवाक्यता युज्यते संबोधनं हि आक्षिप्तक्रियापदं वर्तते । देवदत्त अभिमुखो भवेत्याभिमुख्ये हि युज्यते ।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

तत्र देवदत्तेत्येतावति अर्थस्य परिसमाप्तत्वात् संबोधनपदं एकं वाक्यम्। सोऽभिमुखीभूतः क्रियान्तरो व्यापारः। अन्ये त्वाहुः—

"साकाङ्क्षावयवं भेदे ... एकार्थं वाक्यमुच्यते॥"

एवं च ब्रुवतो यथोक्तलक्षणपदसमूहो वाक्यमित्यभिप्रायः। न च 'देवदत्त' इति पदसमूहः। अथाभिमुखो भवेत्याक्षेपात् अस्य समूहभावः। तथापि साकाङ्क्षत्वात् अवाक्यत्वम्। न हि अभिमुखीभावमात्रमेव कश्चिद्विधत्ते। किं तर्हि अभिमुखीभावं विधाय क्रियान्तरे नियुङ्क्ते। अपि च अभिमुखो भवेत्यध्याह्रियमाणयाऽपि क्रियया संबन्धं मन्यसे व्रजेत्युपात्तयाऽपि न मन्यसे इत्यहो माध्यस्थ्यम्। किंच अभिमुखो भवेत्ययमपि नियोगः। तत्रानभिमुखस्य नियोक्तुमशक्यत्वात्। अभिमुखीकरणाय क्रियान्तराध्याहारेऽनवस्था। तद्भयाच्च अभिमुखीकारगर्भनियोगोऽङ्गीकर्तव्यः। स च व्रजेत्यादावपि तुल्य एवेत्यलमतिप्रसङ्गेन।'

२·१२ भोजराज in his शृङ्गारप्रकाश alludes to this कारिका (Vol I p. 267) with variants thus :—

त्रिविधः शब्दो निर्वर्त्योऽन्वाख्येयः प्रतिपादकश्च। तेषु अधर्महेतुरपभ्रंशो निर्वर्त्यः। धर्महेतुर्लोकवेदयोः प्रयोगार्होऽन्वाख्येयः। प्रकृतिप्रत्ययादिविभागकल्पनया तत्स्वरूपावबोधकृत् प्रतिपादकः। तदर्थं अन्वयव्यतिरेकौ अविद्यमानावपि व्यवस्थार्थं कल्पितौ शास्त्रार्थव्यवहारनिबन्धनं सम्पद्यते। शास्त्रव्यवहारो हि अर्थवत् प्रातिपदिकं क्रियावचनो धातुरित्यादिः अनाश्रितयोः अन्वयव्यतिरेकयोरसुकर एव। तदाह—

"भागैरनर्थकैर्भिन्नाः पचतीत्येवमादयः।
अन्वयव्यतिरेकौ तु व्यवहारनिबन्धनमिति॥"

२·१६ नागेश in his स्फोटवाद (p. 20) says :—

"न हि पदं बोधकारणम्। अपि तु तज्ज्ञानमिति वाच्यम्। अनुमितिं प्रति लिङ्गस्येव स्वज्ञानद्वारा तस्यापि तत्त्वात्। एवं च वाक्यशक्तिरेवाकाङ्क्षेति परपरिभाषामात्रमवशिष्यते। अत एव संसर्गो वाक्यार्थ इति किंवदन्ती संगच्छते। प्राथमिकशाक्तिग्रहस्य च सर्वथा न बाधः। अत एव समासग्रहणं वाक्येऽतिव्याप्तिवारणायेति भाष्यादिग्रन्थाः संगच्छन्ते। तदुक्तं हरिणा—

'अशब्दो यदि वाक्यार्थः पदार्थोऽपि तथा भवेत्' इति।

२·४४,४५ भोजराज in his शृङ्गारप्रकाश (Vol I p. 294) quotes these two कारिकाs thus :—

'... स्वार्थमात्रोपादायिनः सर्वभेदान् प्रति योग्यता। तदेवानुगुण्यमात्रं सामान्यम्। नहि तथा अन्यथा सर्वथा वा इति सामान्यं अवस्थितरूपं किञ्चिदस्ति। सर्वं एव ते विशेषा एव। ... तदुक्तम्—

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

" सर्वभेदानुगुण्यं तु सामान्यमपरे विदुः।
तदर्थान्तरसंसर्गाद् भजते भेदरूपताम् ॥
भेदानाकाङ्क्षतस्तस्य सा परिप्लवमानता ।
अवच्छिनत्ति सम्बन्धं तां विशेषे निवेशयन् ॥ "

अत एव च नानेकवाक्यार्थप्रतीतिः। सर्वेषां कारकाणां कर्मादिभावेन व्यवस्थितानामेव क्रियासम्बन्धात् । ...

२·४७,४८ भोजराज quotes these two कारिकाs in his शृङ्गारप्रकाश (Vol I p. 278) thus :--

पदार्थपर्यन्ताऽपि च भवन्ती व्युत्पत्तिरीदृशी दृश्यते न शुद्धपदार्थविषया। तथाहि

" नियतं साधनं साध्ये क्रिया नियतसाधना।
स संनिधानमात्रेण नियमः संप्रकाशते ॥
गुणभावेन साकाङ्क्षं तत्र नाम प्रवर्तते ।
साध्यत्वेन निमित्तानि क्रियापदमपेक्षते ॥ "

एवं च संनिहितयोग्याकांक्षितोपरक्ते स्वार्थे क्वचित् गृहीतसंबन्धः सर्वत्र गृहीतो भवतीति न आनन्त्यव्यभिचाराभ्यां संबन्धाग्रहणम् । न च कदम्बकार्थप्रतीतेः पदार्थात् प्रविभागः। ...

२·७३ भोजराज in शृप्र (Vol II p. 330) :—

श्रुतिर्हि नामानेकपदनिबन्धन एव शब्दविषयः विध्यादिरर्थः। स च स्वार्थसिद्धये कर्मकरणकर्त्रधिकरणादिकं यदाक्षिपति स सर्वः श्रुत्यर्थो भवति। ... तच्च द्रव्यमेव न गुणः। ... तदुक्तम्—

" सामर्थ्यप्रापितं यच्च वाक्यार्थमनुषज्यते ।
श्रुतिरेवानुषङ्गो सा बाधिका लिङ्गवाक्ययोः ॥ "

२·९५, ९४, ९३, ९१, ९२, ९०, ८९, ८८ भोजराज in शृप्र (Vol. II p. 333) :—

... तस्मात् प्रविभक्तरूपाणां अपि अव्यभिचरितावधिविभागानां चतुर्णां पञ्चानां वा पदजातानां सङ्कीर्णैर्वाच्यद्योत्यगमनीयैः अर्थैः भवितव्यमिति यस्याप्येकः संनिविष्टानेकशक्तिरूपसर्वोपाधिविशिष्टः क्रियात्मा व्यावहारिकाभ्यां प्रकल्पितोद्देशविभागेनैकेन वाक्याख्येन शब्देनाभिधीयते तस्यापि यावानयं पदश्रुतिरूपभेदेन पदार्थरूपभेदेन च व्यवहारः परस्तादुपन्यस्तः स सर्व एकस्मादर्थात् शब्दरूपाणि बुद्ध्यन्तरैः कृतप्रविभागानि अपोद्धृत्य अपोद्धृत्य प्रकृतिप्रत्ययादिवत् श्रुतिरूपप्रविभागे क्रियमाणे न विरुध्यते। तत्र च

" रूपनाशे पदानां स्यात् कथं चावधिकल्पना।
अगृहीतावधौ शब्दे कथं चार्थो विविच्यते ॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

तथाहि भागे सादृश्यं भागे भेदोऽवसीयते ।
भागाभावेऽपि वाक्यानामत्यन्तं भिन्नधर्मणाम् ॥
एकस्य भागे सादृश्यं भागे भेदश्च लक्ष्यते ।
निर्भागस्य प्रकाशस्य निर्भागेनैव चेतसा ॥
अप्रसिद्धं तु यं भागमदृष्टमनुपश्यति ।
सर्वत्रासंविदं मूढस्तावति प्रतिपद्यते ॥
यतः पिकादियोगेन वाक्येऽत्यन्तविलक्षणे ।
सदृशस्येव संज्ञानमसतोऽर्थस्य मन्यते ॥
गवये नरसिंहे वाप्येकज्ञानावृते यथा ।
भागं जात्यन्तरस्यैव सदृशं प्रतिपद्यते ॥
यथैवैकस्य गन्धस्य भेदेन परिकल्पना ।
पुष्पादिषु तथा वाक्येऽप्यर्थभेदस्य कल्पना ॥
अतोऽखण्डेऽपि वाक्यार्थे शक्तिभेदादपोद्धृते ।
वाक्यान्तरविभागेन यथोक्तं न विरुध्यते ॥ "

तस्माद्युक्तमेव पदगतदोषगुणनिरूपणमिति ॥

२·१३६-१३७ "The first syllables (अक्षर) have each of them something to be seen (visible aspect) and express (meaning) in such a way, that the capability (of hearers to interpret them) is multiple. There are many kinds of those expressing ways."

This is वाप 2·136-137 :—

" एकस्मिन्नपि दृश्येऽर्थे दर्शनं भिद्यते पृथक् ।
कालान्तरेण वैकोऽपि तं पश्यत्यन्यथा पुनः ॥
एकस्यापि च शब्दस्य निमित्तैरव्यवस्थितैः ।
एकेन बहुभिश्चार्थो बहुधा परिकल्प्यते ॥ "

२-१८३, १८४, १८५, १८६; १८०, १८१; १८८; १८९; १८७. Quoted by भोजराज in his शृङ्गारप्रकाश (Vol I. pp. 61-62) in the order given above with variants and in the case of २-१८१ the श्लोकार्धs having changed their places :—

" प्रयोगार्हेषु सिद्धः सन् भेत्तव्योऽर्थो विशिष्यते ।
प्राक् च साधनसम्बन्धात् क्रिया नैवोपजायते ॥
" धातोः साधनयोगस्य भाविनः प्रक्रमाद् यथा ।
धातुत्वं कर्मभावश्च तथाऽन्यदपि दृश्यताम् ॥
बीजकालेषु सम्बद्धा यथा लाक्षारसादयः ।
वर्णादिपरिणामेन फलानामुपकुर्वते ॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

बुद्धिस्थादभिसम्बन्धात् तथा धातूपसर्गयोः ।
अभ्यन्तरीकृतो भेदः पदकाले प्रकाशते ॥ ”

“ अडादीनां व्यवस्थार्थं पृथक्त्वेन प्रकल्पनम् ।
धातूपसर्गयोः शास्त्रे धातुरेव हि तादृशः ॥
क्रियाविशेषाः संघातैः प्रक्रम्यन्ते क्वचित्तयोः ।
तथा हि संग्रामयतेः सोपसर्गाद्टो विधिः ॥ ”

“ स वाचको विशेषाणां संभवात् द्योतकोऽपि वा ।
शक्त्याधानाय धातोर्वा सहकारी प्रयुज्यते ॥ ”

“ स्वादिभिः केवलैर्यत्र गमनादि न गम्यते ।
तत्रानुमानात् द्विविधात् तद्धर्मा प्रादिरुच्यते ॥ ”

“ क्वचित् संभाविनो भेदाः केवलैरभिदर्शिताः ।
उपसर्गेण संबन्धे व्यज्यन्ते प्रपरादिना ॥ ”

२-१८८ भोजराज in his शृङ्गारप्रकाश (Vol I. p. 303) quotes this कारिका thus :—

... अत्र च प्रादिः प्रकर्षादिकमर्थं ब्रुवाणः क्रियां सामान्येन उपगृह्णाति। न क्रियासामान्यविशेषयोरात्मानं नियमयति । परस्परोपश्लेषे तु तयोर्विशेषणविशेष्यभावो नीलोत्पलादिवत् भवति । ... आहुश्च —

“ स वाचको विशेषाणां स भवेद् द्योतकोऽपि वा ।
शक्त्याधानाय धातोर्वा सहकारी प्रयुज्यते ॥ ”

२-२०४ भोजराज in his शृङ्गारप्रकाश (Vol I p. 186) quotes this कारिका thus :—

‘ प्रतीयते च लोके कर्मप्रवचनीययोगः ... सम्बन्धस्य निमित्तविशेषावच्छेदः । तस्मात् स तस्य प्रयोजक इत्यवसीयते । तदुक्तम् —

“ क्रियाया द्योतको नायं न संबन्ध स्य वाचकः ।
नापि क्रियापदाक्षेपी संबन्धस्य तु भेदकः ॥ ” इति । ...

२-२३८ गोकुलनाथमिश्र in his पदवाक्यरत्नाकर (p. 334) :
यदाह हरिः

‘ उपायाः शिक्ष्यमाणानां बालानामुपलालनाः ।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते ॥ ’

२-२५३, २५२ भोजराज in his शृप्र (Vol II pp 358–9) says :—

ननु च गौणमुख्ययोर्विवेको युज्यते । तथाहि एक एवायं गोशब्दो वाक्ये न क्वचित् जातिविशेषाभिधायी गौरनुबन्ध्य इति, क्वचित् जात्युपसर्जनद्रव्यमात्रवाची गौरानीयतामिति, क्वचित् परिच्छिन्न एव द्रव्यविशेषे वर्तते अन्यत्र काञ्चित् गां पश्यसीति, क्वचित्तु रूढसंबन्धेषु क्रियागुणेषु गोशब्दः प्रयुज्यमानो दृश्यते यथा जाड्यात् औच्छिष्ट्यात् सर्वसहत्वात्

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

महाशनत्वात् वा गौर्वाहीक इति । एवं सर्वशक्तेर्गोशब्दस्य अर्थप्रकरणादिभिरवच्छिद्यमानसामर्थ्यस्य पृथिव्यादाविव वाहीकेऽपि वर्तमानस्य गौणत्वमुपपद्यते । तदाह —

" सर्वशक्तेस्तु तस्यैव शब्दस्यानेककर्मणः ।
वृत्त्यभावान्न गौणत्वं मुख्यत्वं वा प्रकल्प्यते ॥

तथा हि —

" यथा सास्नादिमान् पिण्डो गोशब्देनाभिधीयते ।
तथा जाड्यादिगुणवान् वाहीकोऽप्याभिधीयते ॥ "

२-२६४ भोजराज in his शृप्र (Vol II. p. 362) says : -

एवं तर्हि केवलादेव शब्दात् योऽर्थः प्रतीयते स मुख्यो यस्तु सोपपदात् स गौणः। नहि यथा केवलादग्निशब्दात् ज्वलनप्रत्ययो भवति एवं माणवकप्रत्ययः पदान्तराधीनत्वात्। यत्रापि पदान्तरं न श्रूयते तत्रापि अर्थप्रकरणापेक्षं तदेव व्याप्रियते । तदुक्तम् —

" अर्थप्रकरणापेक्षो यो वा शब्दान्तरैः सह ।
प्रयुक्तो गमयत्यर्थं स गौण इति गीयते ॥ "

२-२७४ भोजराज in his शृप्र (Vol II p. 361) :—

तस्मात् एक एव शब्दोऽनेकमर्थं यौगपद्येन पर्यायेण वाऽभिधत्ते न तु स्वार्थमुत्सृज्यार्थान्तरे प्रवर्तते। प्रसिद्ध्यप्रसिद्धिभ्यां च तस्य मुख्यगौणव्यपदेशो जायते । तत्र यौगपद्येऽपि यदा प्रसिद्धेनार्थेनावच्छिद्यते शब्दस्तदा मुख्यव्यपदेशं लभते । अप्रसिद्धेन त्वर्थेन प्राप्तावच्छेदस्य गौणव्यपदेशो भवति। पर्यायेणापि यस्मिन् वाक्ये प्रसिद्धार्थः शब्दस्तत्र मुख्योऽन्यत्र तु गौणः। तदाह —

" विपर्यासादिवार्थस्य यत्रार्थान्तरतामिव ।
मन्यते स गवादिस्तु गौण इत्युच्यते क्वचित् ॥ "

२-२९३, २८६, २८७, २९१, २८९, २९२, २९४, २८५, २८१, २८२ भोजराज cites these कारिकाs in the above order in his शृप्र (Vol II pp. 364-366) with intervening explanations and comments thus :—

ननु च सादृश्येन प्रवर्तमानो गौण इत्यभ्युपगमे प्रकृतिषु मृद्गवकादयः इति, प्रतिमासु वासुदेवादय इति, चित्रेषु पर्वतादय इति, शुक्तिकायां रजतमिति, रज्जावहिरिति, मृगतृष्णायां तोयमिति, अलातसम्पाते चक्रमिति, पयःपृषत्सूर्यरश्मिषु सुरायुधामिति, क्षुपातपादिषु गन्धर्वनगरमिति प्रतिबिम्बे स्तम्बेरम इति, कर्णक्ष्वेडायां घोष इति, आलोकाभावेऽन्धकार इति च यो व्यपदेशस्तस्यापि गौणत्वं प्राप्नोति । एतेषामपि हि प्रवृत्तौ सादृश्यमेव निमित्तम् । तथाहि मृगपश्वादयः कस्यचिदेव सदृशस्य धर्मस्य भावात् उपमानोपमेयसम्बन्धे सति इवे प्रतिकृतावित्येव प्रकरणविहितानां प्रत्ययानामुत्पत्तौ निमित्तत्वं लभन्ते । युक्तं चैतत् । यतः—

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

" मृगपश्वादिभिर्यावान् मुख्यैरर्थः प्रसाध्यते ।
न तावान् मृन्मयेष्वस्ति तस्मात्ते विषयाः कुतः ॥ "

एतेन प्रतिमादिषु वासुदेवादयो व्याख्याताः । यथा हि ते मुख्यावरप्रदानदानवोच्छेदादिकर्मसु साधनत्वेन व्यवतिष्ठन्ते न तथा ग्रावमया वा दारुमया वा । तदुक्तम्—

Here are quoted two श्लोकs which are not found in the present वाप; भोजराज continues :—

शुक्तिकायां तु प्रत्ययाधीनेऽपि रजतरूपावधारणे क्वचित् तद्विषयाणां प्रत्ययानां व्यभिचारेण या प्रवृत्तिः सैव अमुख्यभावं व्यवस्थापयति । यदाह—

" यद्यपि प्रत्ययाधीनमर्थतत्त्वावधारणम् ।
न सर्वः प्रत्ययस्तस्मिन् प्रसिद्ध इव जायते ॥ "

रज्जुद्रव्ये यद्यपि वर्णसंस्थानद्वारेण सर्पबुद्धिः पुनःपुनरुत्पद्यते तथापि यत् साधारणं कार्ष्ण्यदैर्घ्यादि तदपास्य श्वासदंशादिभिरसाधारणधर्मैर्मुख्यविषयं परिच्छिद्य गौणत्वमवधार्यते । उक्तं च—

" यदसाधारणं कार्यं प्रसिद्धं रज्जुसर्पयोः ।
तेन भेदः परिच्छेदस्तयोः स्वल्पेऽपि दर्शने ॥ "

मृगतृष्णायां पुनर्यद्यपि सलिलनिर्भासा चक्षुर्द्वारिका तथाभूतैव बुद्धिरुत्पद्यते । तथापि स्पर्शनस्नानपानादीनामभावात् तद्देशप्राप्तौ चादर्शनात् नेदं सलिलमिति प्रत्ययेन बाधते । आहुश्च—

" दर्शनं सलिले तुल्यं मृगतृष्णादिदर्शनैः ।
भेदात्तु स्पर्शनादीनां न जलं मृगतृष्णिका ॥ "

अलातचक्रेऽपि चक्रबुद्धौ चक्षुषा रूपप्रबन्धावग्रहवत् न हस्तेन स्पर्शप्रबन्धोऽवगृह्यते । क्रियाविरामे च तस्य ज्योतिषश्चक्रवदाकारो नोपलभ्यते । अविच्छिन्नाभिनिपातेनैव हि ज्योतिषा नित्यावरुद्ध इव प्रायेण तत्र रूपग्रहणदेशो रूपग्रहणकालश्च विभाव्यते । तस्मादपार्थं तदग्रहणं अविषयो मुख्यस्य शब्दस्येति । उक्तं च—

" स्पर्शप्रबन्धो हस्तेन यथा चक्रस्य संततः ।
न तथालातचक्रस्य विच्छिन्नं स्पृश्यते हि तत् ॥ "

एवमिन्द्रायुधेऽपि तथा रात्रौ प्रदीपदीप्तिसंनिपातात् नीलोत्पलादीनां वर्णभेदो लक्ष्यते । तथाहि न सूर्यरश्मिसंपर्कात् घनारघट्टपयःपृषतामिति मिथ्यात्वाङ्गमुख्यत्वम् । तदाह—

" प्रसिद्धार्थविपर्यासनिमित्तं यच्च दृश्यते ।
यस्तस्माल्लक्ष्यते भेदस्तमसत्यं प्रचक्षते ॥ "

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

एतेन क्षुपातपादिषु गन्धर्वनगरादयो व्याख्याताः। देशविशेषेषु क्षुपग्रावादौ विप्रकीर्यमाण आतप उपर्यवस्थिताभ्रनिघातात् प्रतिनिवृत्तिः क्षुपादीनां अपचितपरिमाणानां परिमाणोपचयमावहत् गृहप्राकारतोरणोपवनसंनिवेशेनावभासमानो गन्धर्वनगरमित्युच्यते । तत्र यथा वप्रादिभिर्मुख्येषु नगरेषु गच्छतां प्रतिघातो दस्युभयरक्षादीनि च कार्याणि च प्रकल्पन्ते न तथा गन्धर्वनगरेषु तद्देशस्थैरेव च तानि न दृश्यन्ते इति न तेषां मुख्यशब्दविषयत्वम् । तदाह—

" वप्रप्राकारतल्पैश्च स्पर्शनावरणे यथा ।
नगरेषु तथा नैवं गन्धर्वनगरेषु ते ॥ "

प्रतिबिम्बं तु हस्त्यादिसरूपमादर्शनादिषु दृश्यमानमपि प्रमाणभेदेन अयथार्थमवसीयते । हस्त्यादिप्रमाणेन प्रकृष्टदेशव्यापिना भवितव्यम् । न च आदर्शस्यान्तरीयो देशः संभवति । तदुक्तम् —

" महानाव्रियते देशो मुख्यैः स्तम्बेरमादिभिः ।
अल्पदेशान्तरावस्थं प्रतिबिम्बं तु दृश्यते ॥ "

कर्णक्ष्वेडायामपि अश्रवणत्वेन घोष इति व्यपदेशो न मुख्यः । तदाह —

Then here follow two श्लोकs which are not found in the present वाप; भोजराज continues :—

... शुक्तिकारज्जुमृगतृष्णादिषु विपर्ययज्ञानतो य एते रजतोरगजलादिव्यपदेशास्तेऽपि भ्रान्तिमुख्यत्वेन तत्तद्भावापत्तयो न गौणाः । यतः—

" अत्यन्तविपरीतोऽपि यथा योऽर्थोऽवधार्यते ।
यथासम्प्रत्ययं शब्दस्तत्र मुख्यः प्रयुज्यते ॥ "

आचार्याश्च पूर्वेऽपि सर्वत्र तुल्यमेव शब्दस्य प्रवृत्तिनिमित्तं भवितुमर्हतीति मन्यमाना बुद्धिप्रतिभासमात्रेणैव शब्दस्यार्थेषु प्रवृत्तिं मन्यन्ते । तद्यथा —

Then follows a श्लोक which is absent in the present वाप; भोजराज says further :—

अलातचक्रादिषु च त्रिषु चक्रमिव चक्रं, आयुधमिवायुधं, नगरमिव नगरमित्यवयवशब्दानां यद्यपि गौणत्वं घटते तथापि समुदायशब्दानां एतेष्वेवार्थेषु स्वरूपासङ्गात् मुख्यत्वमेव ।

" यथा ह्यग्न्यादयः शब्दा ये स्वरूपपदार्थकाः ।
संज्ञिभिः संप्रयुज्यन्ते तेषां सर्वत्र मुख्यता ॥
अग्निदत्तस्तु योऽग्निः स्यात्तत्र स्वार्थोपसर्जनः ।
शब्दभेदार्थवृत्तित्वात् गौणत्वं प्रतिपद्यते ॥ "

एवं गन्धर्वनगरादयोऽपि यदा दृष्टनगरादिपदार्थेषु तत्साधर्म्यात् प्रयुज्यन्ते तदा गौणा भवन्ति ।

... कर्णक्ष्वेडायामपि यदा श्रोत्रेन्द्रियस्य अग्निवृत्तिनिरोधात् जाठराग्निपच्यमानान्नरसादिशब्दः श्रूयते अनाहताख्यं वा शब्दब्रह्मोन्मिषति तदा

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

तयोः घोषव्यपदेशो मुख्य एव। किं पुनरनाहताख्यं शब्दब्रह्म । उच्यते। शब्दब्रह्मणः चतस्रोऽवस्थाः वैखरी मध्यमा पश्यन्ती सूक्ष्मेति । तत्र येयं स्थानकरणप्रयत्नक्रमव्यज्यमानगकारादिवर्णसमुदायात्मिका वा सा वैखरी तत्र विशिष्टं खं सुखमिति दुःखमिति वा राति प्रयच्छति इति विखरो देहेन्द्रियसंघातः। तथा च श्रुतिः 'न ह वै सशरीरस्य सतः प्रियाप्रिययो-रपहतिरस्ति। अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' इति। तत्र भवा वैखरी। या पुनः अन्तःसञ्जल्परूपा क्रमवती श्रोत्रग्राह्यवर्णाभिव्यक्तिरूपा सा मध्यमा। या तु वर्णविभागाभावात् अक्रमा स्वयंप्रकाशा च सा पश्यन्ती। या पुनः अनाद्यविद्यावासनोपप्लवमानशब्दार्थभेदरहितावबोध-रूपब्रह्मशब्दवाच्या स्वरूपज्योतिरेवात्मनोऽन्तरनपाया प्रकाशते सा सूक्ष्मा। तदुक्तम् —

"स्थानेषु..." "केवला ..." "अविभागा तु". श्रुतिरप्याह--'चत्वारि ... गुहा त्रीणि निहिता...नेङ्गयन्ति...वदन्ति' तत्र गुहाशयेषु त्रिषु यदेतत् सूक्ष्मेति गीयते ते तदनाहतमित्यामनन्ति॥

These three कारिकाs are not included in our text.

२-२७०, २७१ भोजराज **quotes these two** कारिकाs **in his** शृङ्गारप्रकाश **(Vol I p. 276) thus :—**

... तत्राभिधानवादिन आहुः। व्युत्पत्तिबलेन हि शब्दोऽर्थमवबोधयति। वृद्धव्यवहाराद् व्युत्पत्तिश्च । वृद्धाश्च वाक्येनैव व्यवहरन्ति न पदेन। यच्चार्थप्रकरणादिगम्यपदार्थान्तरसहकृतं पदं प्रयुञ्जते तदपि वाक्यमेव—

"यद्प्येकं पदं दृष्टं चरितार्थक्रियं क्वचित्।
वाक्यं तदपि मन्यन्ते सम्बोधनपदादिवत्॥
यच्च कोऽयमिति प्रश्ने गौरश्व इति वोच्यते।
तत्र लभ्यत इत्यादिः प्रश्नोक्तैव क्रियेष्यते॥"

वाक्यं चैकार्थपदं पदसमूहसंहत्याऽर्थमभिदधाति। स तानि पदान्यु-च्यन्ते। समूहश्चैवमेकार्थः स्यात् एवं च संहत्यार्थमभिदध्युः पदानि ...

२-२८० भोजराज **in his** शृङ्गारप्रकाश **(Vol I p. 159) quotes this** कारिका **thus :—**

'प्रकृतिर्हि काचित् उपचरितविकाररूपा यथा इन्द्रस्थूणा उपेन्द्रो ग्राव इति। क्वचित् परिणामिनी यथा दुग्धं दधि भवति। हेम कुण्डलीभवति। तत्र विपरिणामिनीषु प्रकृतिषु संघमहत्त्वादिभिर्मुख्यैरपि योगे पूर्वस्या अवस्थायाः प्रच्युतस्य उत्तरामवस्थां प्राप्तस्य पूर्वोत्तरयोः अवस्थयोः आश्रितयोः सव्यापारत्वात् पूर्वस्यां अवस्थायां कर्तृत्वविवक्षायाः। संघमह-दादेः विकारशब्दस्य प्रकृत्युपग्राहिणो गौणत्वं विज्ञायते। तदुक्तम्—

"महत्त्वं संघभावं च प्रकृतिः प्रतिपद्यते।
भेदेनापेक्षिता सा तु गौणत्वस्य प्रसाधिका॥"

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

२-२९६ भोजराज in his शृप्र (Vol II p. 369) cites this कारिका :—

"देशकालेन्द्रियगतैर्भेदैर्यद् दृश्यतेऽन्यथा।
यथा प्रसिद्धिर्लोकस्य तथा तदपदिश्यते॥"

२·३१२ वाचस्पतिमिश्र in his भामती on ब्रह्मसूत्रशांकरभाष्य (1·4·3) quotes this कारिका as under :—

"न च मुख्यया वृत्त्याऽतत्परमिति औपचारिकं न भवति। यथोपहन्तृमात्रनिराकरणाकाङ्क्षायां काकपदं प्रयुज्यमानं श्वादिसर्वहन्तृपरं विज्ञायते। यथाहुः—

'काकेभ्यो रक्ष्यतामन्नमिति बालोऽपि नोदितः।
उपघातप्रधानत्वात् न श्वादिभ्यो न रक्षति॥' इति॥

(Mark the reading नोदितः for चोदितः; वाचस्पति generally follows कुमारिल's readings than those of भर्तृहरि.)

रघुनाथ, the wellknown collector of लौकिकन्यायs, applies this as follows :—

'तदुक्तमीश्वरगीतायाम्—

"ये त्विमं विष्णुमव्यक्तं
मां च देवं महेश्वरम्।
एकीभावेन पश्यन्ति
न तेषां पुनरुद्भवः" ॥ इति॥

अत्र हरिहरयोर्ग्रहणं काकदधिघातकन्यायेन विधेरप्युपलक्षणम्।" The ईश्वरगीता forms part of the उत्तरभाग of the कूर्मपुराण and the vere here quoted is xi-8. In the 4th chapter of. वेदान्तपरिभाषा this is given as an example of जहदजहल्लक्षणा :—

"जहदजहल्लक्षणोदाहरणं तु काकेभ्यो दधि रक्ष्यतामित्यादिकमेव। तत्र शक्यकाकपरित्यागेन अशक्यदध्युपघातकत्वपुरस्कारेण अकाके काके च काकशब्दस्य प्रवृत्तेः॥"

२-३१५-६ इन्दुव्याख्यान, the टीका of अष्टाङ्गसंग्रह of वाग्भट, at the end of 50 th chapter (वाजीकरणविधि) of उत्तरस्थान (pp. 474-475 of Vol III edited by T. Rudraparashava and published at Trichur, 1924) quotes these two कारिकाs thus:—

"वाक्यार्थयोजनादेता युक्तयस्त्विष्टसिद्धिदाः।
असद्वादिप्रयुक्तानां वाक्यानां प्रतिषेधकाः॥
लीनव्यत्यासलेशोक्तिगदितानां प्रकाशकाः
वाक्यन्यायोदधेः सारं गृहीत्वैव व्यवस्थिताः॥"

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

(इन्दु goes on to comment on these verses from अष्टाङ्गसंग्रह)

'एता युक्तयो वाक्यार्थस्य योजनात् हेतोः स्वेष्टसिद्धिं ददति। यानि च असद्वादिनां अर्थासम्बन्धप्रदर्शनपराणि वाक्यानि तेषां प्रतिषेधकाः। लीनगदितानां व्यत्यासगदितानां लेशगदितानां च प्रकाशकाः। लीनं तत् यत् स्फुटं वक्तुं न पार्यते। व्यत्यासः परस्परविवर्तनम्। लेशोंऽशेन स्पर्शः। उक्तिर्वचनभङ्गिः। एताश्च युक्तयो वाक्यन्यायोदधेः असंख्यप्रकारसंभविनो गेयस्येव जातयः सारं गृहीत्वा एवं व्यवस्थिताः। पदार्थयोजनास्तु व्युत्पन्नानां प्रसिद्धा एव इत्यत आचार्येण नोक्ताः। तासु च तत्रभवतो हरेः श्लोकौ—

"संसर्गो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥" इति॥

अनयोरर्थः। येषां पक्षे अनेको गोशब्दो वागादिविषयः तेषां विशेषावच्छेदे संसर्गादीनि हेतवः। येषामपि एक एव गोशब्दो वागाद्यनेकविषयाभिधानोऽनेकशक्तियुक्तः तेषामपि शक्त्यनवच्छेदे संसर्गादीनि विशेषस्मृतिहेतवः। तत्र संसर्गो यथा। धेनुरानीयतामित्यत्र सर्वत्र प्रत्यग्रप्रसवाभिधायित्वात् धात्वर्थसंदेहे सवत्सतरेत्यादिनोक्तः किशोरतराद्यन्यतमसंसर्गः। संदेहविच्छेदे हेतुः। क्वचिद् विप्रयोगः। यथा करभरहिता धेनुरानीयतामित्युक्ते यैव निर्ज्ञातकरभसम्बन्धा धेनुः सैव करभरहिताऽऽनीयते। अन्यस्यास्तु करभरहितत्वाव्यभिचाराद् विशेषणं नोपपद्यते। क्वचित् साहचर्यम्। यथा शिला आनीयतां गन्धद्रव्याणि च इत्यत्र पेषणशिलैवानीयते। यथा रामलक्ष्मणावित्यत्र रामो दाशरथिरेव उच्यते। क्वचिद् विरोधः। यथा रामार्जुनावित्यत्रार्जुनः कार्तवीर्य एव। क्वचिदर्थः। यथा गोपालकमानयाध्यापयेत्यत्र अर्थात् यस्य अध्यापनं संभवति स नाम्ना गोपालक आनीयते न गवां पाता। क्वचित् प्रकरणम्। यथा भोज्याङ्गेषु अम्लादिशब्दकेषु उपसंह्रियमाणेषु एतावदुच्यते सैन्धवमानयेति, उक्ते च प्रदीयते लवणं न चाश्वादिकम्। क्वचित् लिङ्गम्। यथा अक्ताः शर्कराः उपनय इत्यस्मिन् वाक्ये कस्यापि अञ्जनद्रव्यस्य संभवे तेजो वै घृतमित्यस्मिन् वाक्यान्तरे दृष्टात् लिङ्गात् घृतसाधितत्वं शर्कराघुटिकाया अजिक्रियया निर्धार्यते। क्वचित् शब्दान्तरसंनिधिः। यथाऽर्जुनः कार्तवीर्यः, रामो जामदग्न्य इति। क्वचित् सामर्थ्यम्। यथाऽनुदरा कन्या इति उदरविशेषप्रतिषेधो गम्यते। अभिरूपाय कन्या दीयतामित्यत्र च अभिरूपतमायेति गम्यते। क्वचिदौचिती। तथा च केषांचित् प्रयोक्तॄणां औचित्यात् शब्दस्य निन्दाप्रशंसाद्यभिधायित्वं गम्यते। यथा भद्रमुखेति दस्युराक्षसादौ। यथा वणिजो वाराणसी जित्वरा इति च

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

वदन्ति । क्वचित् देशः । यस्यैव शब्दस्य क्वचिद्देशे निन्दितवाचित्वं तस्यैवान्यत्र प्रशंसावाचित्वं प्रसिद्धमेवंरूपम् । क्वचित् कालः । यथा पूर्वाह्णे पच्यतामित्युक्ते विशिष्टसाधनैश्च विक्लित्तिर्गम्यते सा च विशिष्टसाधनादिवाचमगृहीत्वा पचनविशेषावगतिः । रात्रौ तु निद्राक्षयो गम्यते । क्वचित् व्यक्तिः । यथा पुँल्लिङ्गो धर्मशब्दः आत्मगुणं वक्ति नपुंसकस्तु यज्ञम् । क्वचित् स्वरादयः । यथाऽस्थण्डिलेष्वित्यत्र पूर्वपदप्रकृतिसाधारणतत्पुरुषावगतिः अस्थण्डिलेष्वित्यत्र च अन्तोदात्तेन बहुव्रीहिः । आदिग्रहणात् क्वचित् विभक्तिः । यथा अर्धं अर्धः । अर्धमिति द्वितीयया कर्म प्रतीयते । अर्धः इति प्रातिपदिकार्थमात्रम् । क्वचित् तद्धितः । यथा दात्तः कूपः इत्यत्र तद्धिते न विपाशातः उत्तरकूलभवत्वम् । दक्षिणकूलभवत्वं न कूपस्येति स्पष्टम् । क्वचित् व्यञ्जनम् । यथा सुसिक्तमित्यत्र षत्वस्य भावाभावाभ्यां सुशब्दस्य उपसर्गत्वं कर्मप्रवचनीयत्वं च गम्यते । एवमनेकमपि ऊह्यमिति श्लोकार्थः ॥

२-४१९ जयन्तभट्ट in his न्यायमञ्जरी (p. 31 Vizianagaram S. S. Vol 8 part I) quotes this कारिका in the following context thus :—

"यदि च प्रत्यक्षविषये शब्दानुमानयोरपि वृत्तिरिष्यते तर्हि प्रत्यक्षसंवित्सदृशीमेव ते अपि बुद्धिं विदध्यातां न चैवमस्ति । तदाहुः ।

'समानविषयत्वे च जायते सदृशी मतिः ।
न चाध्यक्षधिया साम्यमेति शब्दानुमानधीः ॥' ...

आह च । 'अन्यदेवेन्द्रियग्राह्यमन्यः शब्दस्य गोचरः ।
शब्दात् प्रत्येति भिन्नाक्षो न तु प्रत्यक्षमीक्षते ॥'

अपि च ।

'अन्यथैवाग्निसम्बन्धाद् दाहं दग्धोऽभिमन्यते ।
अन्यथा दाहशब्देन दाहार्थः संप्रतीयते ॥'

तस्मादुक्तेन वर्त्मना विषयद्वैविध्यनिश्चयात् न तृतीयं प्रमाणमस्ति ।"

प्रभाचन्द्र in his प्रमेयकमलमार्तण्ड twice quotes this कारिका (p. 443 and p. 447) thus :

"न खलु यथा इन्द्रियबुद्धिः स्पष्टप्रतिभासा प्रतिभासते तथा शब्दबुद्धिः । प्रयोगश्च — यो यत्कृते प्रत्यये न प्रतिभासते न स तस्यार्थः यथा रूपशब्दप्रभवप्रत्यये रसाप्रतिभासने नासौ तदर्थः, न प्रतिभासते च शाब्दप्रत्यये स्वलक्षणमिति । उक्तं च —

"अन्यथैवाग्निसम्बन्धाद्दाहं दग्धो हि मन्यते ।
अन्यथा दाहशब्देन दाहार्थः संप्रतीयते ॥"

न चैकस्य वस्तुनो रूपद्वयमस्ति । येनास्पष्टं वस्तुगतमेव रूपं शब्दैरभिधीयेत एकस्य द्वित्वविरोधात् । ..."

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

"क्वचिद् विसंवादात् सर्वत्र शाब्दस्य अप्रामाण्ये प्रत्यक्षस्यापि क्वचित् विसंवादात् सर्वत्राप्रामाण्यप्रसङ्गः । ततो निराकृतमेतत् —

'अन्यदेवेन्द्रियग्राह्यमन्यच्छब्दस्य गोचरः ।
शब्दात् प्रत्येति भिन्नाक्षो न तु प्रत्यक्षमीक्षते ॥
'अन्यथैवाग्निसम्बन्धात् दाहं दग्धोऽभिमन्यते ।
अन्यथा दाहशब्देन दाहार्थः संप्रतीयते ॥'

सामग्रीभेदात् विशदेतरप्रतिभासभेदो न पुनर्विषयभेदात्, सामान्यविशेषात्मकार्थविषयतया सकलप्रमाणानां तद्भेदाभावात् इत्यग्रे वक्ष्यमाणत्वात् । ...

३-१-१ 'द्विधा कैश्चित् पदं भिन्नम्...'

Quoted by प्रभाचन्द्र in his प्रमेयकमलमार्तण्ड (p. 464) on सूत्र (3-101) thus :—

'वाक्यस्यैवं तात्त्विकत्वप्रसिद्धेः तद्व्युत्पादनार्थं ततोऽपोद्धृत्य पदानामुपदेशाद् वाक्यस्यैव लोके शास्त्रे वाऽर्थप्रतिपत्तये प्रयोगार्हत्वात् । तदुक्तं— 'द्विधा...प्रकृतिप्रत्ययादिवत् ॥' इति ॥ ततः प्रकृत्याद्यवयवेभ्यः कथंचिद् भिन्नं अभिन्नं च पदं प्रातीतिकमभ्युपगन्तव्यम् । न तु सर्वथाऽनंशं वर्णवत् तद्ग्राहकाभावात् । तद्वत् पदेभ्यः कथंचिद् भिन्नं अभिन्नं च वाक्यं द्रव्यभाववाक्यभेदे भिन्नं प्रोक्तलक्षणलक्षितं प्रतीतिपदमारूढमभ्युपगन्तव्यम् । अलं प्रतीत्यपलापेनेति ॥

३-१-६ **Bhadrahari says :—**

"Spoken words, having been gathered, are classified into classes (जाति). A single, undifferentiated word is put in a class by the mind (of hearers).

This can be the rendering of the following :—

"स्वा जातिः प्रथमं शब्दैः सर्वैरेवाभिधीयते ।
ततोऽर्थजातिरूपेषु तदध्यारोपकल्पना ॥"

It is obvious that अर्थजाति is left untranslated; the idea of अध्यारोप is not clearly expressed.

३-१-१५ **"Likewise there exists ether alone for ether. The object (place) is regarded as differing with adjuncts and with desires of various kinds. Although there exist many things in ether, there is ether alone in reality"**

... So spoke Bhadrahari.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

This is भर्तृहरि's वाप 3·1·15; mark how the different words suffer in translation :—

"संयोगिधर्मभेदेन देशे च परिकल्पिते ।
तेषु देशेषु सामान्यमाकाशस्यापि विद्यते ॥"

In fact, there are no corresponding words for "with desires of various kinds" unless धर्म is taken to mean them.

३-१-२९-३१ **भो in his शृप्र (Vol I p. 206) quoted these three कारिकाs thus :—**

यथा काचादर्शोदकादिषु प्रतीयमानभेदो मुखादिरर्थः काचादिदर्शनापेक्षो न प्रतयिते । न च काचादिभिरुपदर्शितमर्थमभिद्धानाः शब्दाः काचादीनुपाददते तथा व्यक्तिभिरुपदर्शितरूपविभागा जातयस्ताभिरसंस्पृष्टा एव शब्दैः प्रत्याय्यन्ते । कथं पुनराश्रयाः शब्देन असंस्पृश्मानभेदा अपि जातिभेदावगमाय कल्पन्ते । यथा चक्षुरादयोऽप्रतीयमाना अपि रूपादिविषयविशेषप्रतिपत्तये । तदुक्तम् —

"यथा जलादिभिर्व्यक्तं मुखमेवाभिधीयते ।
तथा द्रव्यैरभिव्यक्ता जातिरेवाभिधीयते ॥
यथेन्द्रियगतो भेद इन्द्रियग्रहणादृते ।
इन्द्रियार्थेष्वदृश्योऽपि ज्ञानभेदाय कल्पते ॥
विनात्मरूपग्रहणाद् व्यञ्जिका व्यक्तयस्तथा ।
सामान्ये ज्ञानभेदानामुपयान्ति निमित्तताम् ॥" इति ।

व्यक्तिरेव शब्दार्थ इति व्याडीयाः । शब्दो हि पदं तच्च विभक्त्यन्तमेव न प्रातिपदिकमात्रम् । विभक्तिः प्रातिपदिकादुच्चरन्ती प्रातिपदिकार्थगतमेव स्वार्थमाचष्टे । युगपच्च त्रितयं विभक्त्यर्थः — लिङ्गं संख्या कारकं च । न चैतत् त्रितयं प्रातिपदिकार्थे जातौ अन्वेति । न हि जातेः कारकत्वं अमूर्तत्वात् । न संख्यासंबन्धित्वं अभेदात् । न स्त्रीत्वादिसामान्ययोगो निःसामान्यत्वात् । ...नैतत् सारम् । अमूर्तस्याप्यात्मनो ज्ञानप्रयत्नादियोगे कारकत्वमुपपद्यते । जातेस्तु न मनागपि व्यापारसंस्पर्श इति ॥

३-१-३२-३४ **गोकुलनाथमिश्र in his पदवाक्यरत्नाकर (pp. 395-399)**

'न चैवं स्फोटस्य जातिरूपत्वे ब्रह्मत्ववादविरोधः ।
तदुक्तम् —
"सत्यासत्यौ तु यौ भावौ प्रतिभावं व्यवस्थितौ ।
सत्यं यत् तत्र सा जातिरसत्या व्यक्तयो मताः ॥" इति ॥
वाक्यपदीये तु (च)
"सम्बन्धिभेदात् सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ॥ ”

इति वदन्ति तद् व्यवहारदशायामुपेक्षणीयम् ॥

३-१-३३–३४ नागेश in his स्फोटवाद quotes these two कारिकाs thus :—

“ सा च जातिर्ज्ञातैव वाचिका । एतेन स्फोटस्य सदातनत्वात् सदार्थबोधापत्तिरिति परास्तम् । जातिश्चाविद्यको धर्मविशेषः । यद्वा तत्तदुपाध्यवच्छिन्नब्रह्मसत्तैव जातिः । तदुक्तं हरिणा —

‘ सम्बन्धिभेदात् सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ।
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ॥ ” इति ।

एवं च वाच्यं वाचकं च ब्रह्मैवेति ध्येयम् । शास्त्रीयप्रक्रिया तु जातिव्यञ्जकबोधार्था प्राग्वदेवेति सर्वेष्टसिद्धिः ।

३-१-३८ गोकुलनाथमिश्र in his पदवाक्यरत्नाकर (p. 504) :—
यदाह हरिः ।

‘ तिरोभावाभ्युपगमे भावानां सैव नास्तिता ।
लब्धक्रमातिरोभावे नश्यतीति प्रतीयते ॥

३-१-५३ ab भो in his शृप्र (Vol 1 p. 193) quotes this कारिका thus :—

अन्ये मन्यन्ते—‘ जात्याख्यायामेकस्मिन् अन्यतरस्याम् ’ इति ज्ञापकात् एकबहुवचनं च न विवक्ष्यते । द्विवचनं तु विवक्ष्यते । यथा सारस्वतो भवन इति । तदप्ययुक्तं द्विवचनस्यापि अविवक्षादर्शनात् । यथा —

“ यद्येतौ व्याधितौ स्यातां देयं स्यादिदमौषधम् । ”

यतस्तदौषधमेकस्यापि दीयमानं वातादिविकारं शमयितुं शक्नोति एवं तर्हि यत्र पराङ्गतया जातिर्विधीयते तत्र संख्या विवक्ष्यते । ...

३-१-७८ भोजराज in शृङ्गारप्रकाश (Vol II p. 315) :—

... अप्रतिनिधेया च क्रियेति । ननु व्रीहित्वादयोऽप्यप्रतिनिधेया एव ॥ यदाह —

“ जातीनां च गुणानां च तुल्येऽङ्गत्वे क्रियां प्रति ।
गुणाः प्रतिनिधीयन्ते भागादीनां न जातयः ॥ ”

मैवं वोचः । कर्तापि नाम नाप्रतिनिधेयः । किं पुनरन्ये ।

३-२-३-५ Quoted by भोजराज in his शृङ्गारप्रकाश (Vol. I p. 207) thus : तदुक्तम् —

“ अध्रुवेण निमित्तेन देवदत्तगृहं यथा ।
गृहीतं गृहशब्देन शुद्धमेवाभिधीयते ॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

सुवर्णादि यथा युक्तं स्वैराकारैरुपाधिभिः ।
रुचकाद्यभिधानानां शुद्धमेवैति वाच्यताम् ॥ ”

and then follows a verse “तथोपलक्षणे जातौ etc.” which is not found in वाप; भोजराज continues :—

एतेन यदुक्तं व्यक्त्यभिधानपक्षे सर्वे शब्दाः सर्वार्था भवेयुरिति तदपि निरस्तं भवति । .... उक्तं च ।

“आकारैश्च व्यवच्छेदात् सार्वार्थ्यमवरुध्यते ।
यथैव चक्षुरादीनां सामर्थ्यं नलिकादिभिः ॥ ”

३-३-२९ गोकुलनाथमिश्र in his पदवाक्यरत्नाकर (Benares edittion p. 61) refers to this कारिका thus :—

यदाहुरभियुक्ताः

‘इन्द्रियाणां ... योग्यता तथा ॥ ’

सा च बुद्धिजननयोग्यता भाषायामसत्यपि आधुनिकैरारोपिता गाव्यादि-शब्देभ्यो बोधं जनयति । व्युत्पन्नास्तु गाव्यादिशब्दैः गवादिशब्दमनुमाय, स्मृत्वा वा तत एव गवादिकं प्रतियन्ति ।

३-४-३ ‘वस्तूपलक्षणं यत्र ... विवक्षितः ॥ ’ Quoted by न्यास on पा 1-4-57 चादयोऽसत्त्वे thus :—

“सत्त्वशब्दोऽयमिह सत्तायां वर्तत इति कस्यचिद् भ्रान्तिः स्यात् । अतस्तां निराकर्तुमाह–सत्त्वमिति च द्रव्यमुच्यत इति । चशब्दोऽवधारणे । द्रव्यमेव न सत्तेत्यर्थः । यदि ह्यत्र सत्त्वशब्देन सत्तोच्यते प्रतिषेधोऽनर्थकः स्यात् । नहि चादिषु मध्ये शब्दः सत्तावाची कश्चिदस्ति । तस्माद् द्रव्यमेवोच्यते । इदं तर्हि सर्वनामप्रत्यवमर्शयोग्यो योऽर्थस्तद् द्रव्यमिति । तथा चोक्तम्

‘वस्तूपलक्षणं ... विवक्षितः’ ॥ इति ॥ भेद्यत्वेन विशेष्यत्वेनेत्यर्थः । अत एवावसीदति यत्र गुणो विशेषणभावेनेति सत्त्वं तद् द्रव्यमुच्यते । ”

भोजराज in his शृङ्गारप्रकाश (Vol I p. 284) refers to this wellknown कारिका thus :—

ननु च जातिगुणक्रियापाकेन जीवति इति । नैवम् । अत्र जात्यादीनां विशेष्यते न द्रव्यरूपत्वात् । तदुक्तम् —

“वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते ।
द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः ॥ ”

कृदभिहितश्च भावो द्रव्यवत् प्रकाशत इति । एवं च मुख्यवृत्तीनां जघन्यवृत्तीनां च शब्दानां प्रयोगे योऽर्थो यत्र संबन्धित्वेन उपलम्भात् ।

३-५-१ भोजराज in his शृङ्गारप्रकाश (Vol I p. 226) quotes this कारिका thus :—

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

गौणी द्विधा गुणनिमित्ता उपचारनिमित्ता च । ... सा गुणव्यवहितार्था गुणनिमित्ता । तत्र च

" संसर्गि भेदकं यद्यत् सव्यापारं प्रतीयते ।
गुणत्वं परतन्त्रत्वात् तस्य शास्त्र उदाहृतम् ॥ "

गुणः स्वार्थो विशेषणं प्रवृत्तिनिमित्तम्, इति चैकोऽर्थः । स धर्मगुण-क्रियाऽऽकृतिजातिस्वरूपादिभेदादनन्तः । तत्संबन्धेन यद्यपि तन्निमित्ता वृत्तिरनन्तप्रकारैव कल्प्यते तथापि तस्याः षडेव विकल्पा भवन्ति । मुख्यविषयः, अमुख्यविषयः, भेदविषयः, अभेदविषयः, विशेषणविषयः, अविशेषणविषय इति ।

३-७-१,२ भोजराज in his शृङ्गारप्रकाश (Vol I p. 145) quotes these two कारिकाs along with many others with the brief introduction thus :—

" किं पुनः साधनं स्वपराश्रितक्रियाभिनिर्वृत्तिहेतुः शक्तिमद्द्रव्यं यद्द्रव्यं कारकमित्याचक्षते । कारकशब्दश्चायमव्युत्पन्नः क्रियानिमित्तवचनो लोकतः सिद्धः करोतीति वा कारकशब्देन शक्तिमत् द्रव्यमुच्यते । तथाहि —

" स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे ।
क्रियाणामभिनिष्पत्तेर्निमित्तं शक्तिरिष्यते ॥ "
" शक्तिमात्रा समूहस्य विश्वस्यानेकधर्मिणः ।
सर्वथा सर्वदाभावात् क्वचित् किञ्चिद् विवक्ष्यते ॥ "

३-७-२ भोजराज in his शृङ्गारप्रकाश (Vol I p. 238) refers to this कारिका in connection with विवक्षा thus :—

'... विवक्षा वक्तुर्विवक्षितपूर्विका शब्दप्रवृत्तिः । त्रिधा हि वाङ्मयम्— अपौरुषेयं, आर्षं, पौरुषेयं च । तत्र शब्दप्रधानं अपौरुषेयं मन्त्रो ब्राह्मणं च । तत्र वक्तुरभावात् विवक्षा नोपपद्यते । अर्थप्रधानं आर्षं स्मृतिरितिहासश्च । तत्र विवक्षामात्रं प्रवर्तते —

' लौकिकानां हि साधूनां वागर्थमनुवर्तते ।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुवर्तते ॥ '

अर्थप्रधानं पौरुषेयं च तदुभयमपि अभिनिविष्टबुद्धीनां विशिष्ट-विवक्षाभ्यो जायते । तद्यथा विवक्षातः कारकाणि भवन्ति । अक्षात् दीव्यति अक्षैर्दीव्यति अक्षेषु दीव्यत इति । बलाहको विद्योतते बलाहकस्य विद्योतत इति ।

" शक्तिमात्रा समूहस्य विश्वस्यानेकधर्मणः ।
सर्वदा सर्वथा भावात् क्वचित् किञ्चिद् विवक्ष्यते ॥ "

कारकेष्वपि अकारकविवक्षा यथा—मातुः स्मरति सर्पिषा जानीते न माषाणामश्नीयात् । ...

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

३-७-५ भोजराज in his शृङ्गारप्रकाश (Vol I p. 97) quotes this कारिका with variants thus :—

कथं पुनः कंसं घातयति कथकः, बलिं बन्धयति गाथकः इत्यादौ प्रयोजकव्यापारेण णिजुत्पत्तिः। उच्यते।

" शब्दोपहितरूपांस्तान् बुद्धेर्विषयतां गतान्।
प्रत्यक्षमिव कंसादीन् साधकत्वेन मन्यते ॥ "

३-७-१५ भो in his शृप्र (Vol I p. 198) quotes this कारिका, the first half of which is hardly recognizable, thus :—

" स्वरूपं स्वरूपमिति यद् ब्रूषे तत्र किमिदं स्वरूपं नाम। न तावद् द्रव्यम्। द्रव्यस्य स्वरूपमिति भेदेनाभिधानात्। किं पुनस्तत्। सजातीयेभ्यो विजातीयेभ्यश्च भेदको धर्म इति नस्तर्कः। तं हि भवन्तोऽपि अर्थतत्त्वं भावतत्त्वमिति भावप्रत्ययेन भाषन्ते। स च यस्य गुणस्य भावात् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलाविति गुणाभिधाने स्मर्यते। गुणो धर्म सामर्थ्यं अर्थक्रियाकारित्वं आतिशयः शक्तिरिति चैकोऽर्थः।

" स तु द्रव्याद् विभिन्नो वा द्रव्यस्यात्मैव वा तथा।
व्यतिरेकमुपाश्रित्य साधनत्वाय कल्पते ॥ "

३-७-१८–२३ Quoted by भोजराज in his शृङ्गारप्रकाश (Vol I pp. 145, 146) :—

" निष्पन्नमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके।
व्यापारभेदापेक्षायां करणादित्वसंभवः॥
पुत्रस्य जन्मनि यथा पित्रोः कर्तृत्वमुच्यते।
अयमस्मादियं त्वस्मदिति भेदविवक्षया ॥ "

" गुणक्रियाणां कर्तारः कर्त्रा न्यक्कृतशक्तयः। "
" व्यस्तायामपि संपूर्णैः स्वव्यापारैः समन्वितः। "
" कारणत्वादिभिर्जाताः क्रियाभेदानुवादिभिः ॥ "
" स्वातन्त्र्यमुत्तरं लब्ध्वा प्रधाने यान्ति कर्तृताम् ॥ "

३-७-२४ भोजराज in his शृङ्गारप्रकाश quotes this कारिका (Vol 1 p. 101) thus :—

अथ लक्षणस्य का वार्ता। लक्षणमपि तादर्थ्यवत् हेतुविशेष एव। सिद्धो हि हेतुः कारको ज्ञापकश्च। तत्र कारकस्य स्वव्यापारानाश्रयणे हेतुरित्याख्या। ज्ञापकस्य लक्षणम्। इति पदार्थान्तरपरिच्छेदहेतुता हि लक्षणार्थः।

" अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्यते।
आश्रयावधिभावं तु लक्षणे लक्षणं विदुः ॥ "

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

क्वचित्तु हेतुरपि लक्षणम् । जटाभिस्तापस इति इत्थंभूतलक्षणम् । अक्ष्णा काण इति विकारलक्षणम् । कपिला विद्युत् इति उत्पातलक्षणम् । गोषु दुह्यमानासु गतः इति भावलक्षणम् । पचन्नास्ते इति क्रियालक्षणम् । ...

३-७-२६ भोजराज in his शृङ्गारप्रकाश quotes this कारिका with variants (Vol I p. 100) thus :—

'हेतोः पुनराश्रितव्यापारस्यापि तृतीयादिभिः स विधीयत इति क्रियाविषयः करणात् कथं भिद्यत इति चेत्

"क्रिया यैः करणं तस्य दृष्टः प्रतिनिधिस्तथा ।
हेत्वर्थोऽपि क्रियाहेतुर्न च प्रतिनिधीयते ॥"

तर्हि तादर्थ्यादभेदः । किमिदं तादर्थ्यं नाम । कार्यस्य कारणं प्रति प्रयोजकत्वं तादर्थ्यम् । विशिष्टः कार्यकारणभाव इति यावत् । ... '

३-७-२७ भोजराज in his शृङ्गारप्रकाश quotes this कारिका (Vol I p. 101) thus :—

'तस्मै तदर्थमिति सर्वनाम्ना योऽर्थः प्रतिपद्यते स एव स्वकारणापेक्षया प्रापितव्यतिरेकश्चतुर्थ्या संबध्यते । यथा यदर्थमस्य मन्त्रः तदनेनाधिगतमिति सर्वनामार्थ एव कार्ययोगी तथा इहापि तच्छब्दोपात्त एवार्थः प्रयोजनतया विपरिणतः । तदर्थं शब्दो नाभिधीयते । भावप्रत्ययान्तोऽप्यसौ कार्यगतमेव रूढविशेषमाचष्टे । कार्यस्य कारणं प्रति प्रयोजकत्वं तादर्थ्यमिति । तत् कथं कारकस्य तादर्थ्यविभक्तिराशङ्क्येत । कार्यस्थयाऽपि चतुर्थ्या उभयगतस्यापि संबन्धस्यावगतत्वात् अव्यतिरिक्तप्रातिपदिकार्थाभिन्नः कारणशब्दाद् भवति । न तु व्यतिरेकलक्षणा तृतीयेति । अयं च हेतुतादर्थ्ययोर्विशेषः ।

"प्रातिलोम्यानुलोम्याभ्यां ... हेतुत्वानुगतं तु तत् ॥"

३-७-२८ Quoted by भो in his शृप्र (Vol I p. 145) :—

"सर्वत्र सहजा शक्तिः यावद्द्रव्यमवस्थिता ।
क्रियाकाले त्वभिव्यक्तिराश्रयः परकारिणी ॥"

३-७-३०,३१ Quoted by भो in his शृप्र (Vol I p. 145) with variants thus :—

"साङ्गसंयोगिनः पाशादन्यानां वारणा यथा ।
व्यज्यन्ते विजिगीषूणां द्रव्याणां शक्तयस्तथा ॥
तैक्ष्ण्यगौरवकाठिण्यसंस्थानैः स्वैरसिर्यदा ।
भेद्यं प्रति व्याप्रियते शक्तिमारुह्यते तदा ॥"

३-७-३३ cd, ३४

"शक्तिरेवाधिरकणे स्रोतोवदुपकर्षति ॥"

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

" अपूर्वं कालशक्तिं वा क्रियां वा कालमेव वा ।
तमेवंलक्षणं भावं केचिदाहुः कथंचन ॥ "

Quoted by भोजराज in his शृङ्गारप्रकाश (Vol I p. 57)

भोजराज in his शृङ्गारप्रकाश (Vol I p. 140) quotes these very कारिकाs thus :—

" शक्तिरेकाभ्रिकरणे स्रोतोवदपकर्षति ॥ "

" अपूर्वं कालशक्तिं वा क्रियायाः कालमेव वा ।
तमेकं लक्षणं भावं केचिदाहुः कथञ्चन ॥ "

भोजराज wrongly tacks on वाप 3-7-33 cd with वाप 3-8-39 ab, or perhaps that was the text of the वाक्यपदीय in that sequence before him.

३-७-३८ Quoted by भो in his शृप्र (Vol I p. 145) thus :—

" तत्त्वे वा व्यतिरेके वा व्यतिरिक्तैव सोच्यते ।
शब्दप्रमाणको लोकः स शास्त्रेणानुगम्यते ॥ "

३-७-४१ The Tibetan version of अस्वभाव's टीका on असङ्ग's महायान-सूत्रालङ्कार (a Buddhist work in संस्कृत of which the original is lost) cites this कारिका thus (translation in English) :

" As was declared by Bhadrahari,

Ether, earth, wind, the sun, the sea, continents and directions ... they exist like external things, having been manifested from the innermost, proper portions of the interior intelligence (= अध्यात्मज्ञान). "

Then follows अस्वभाव's annotation :—

" So everything which has been manifested as an object is regarded as nothing but mind, and objects are not regarded as separate from mind. " ... This is something similar to the thought of Buddhist Idealism (विज्ञप्तिमात्रता). Note that अस्वभाव translates सरितः by continents.

३-७-४७–५० गोकुलनाथमिश्र in his पदवाक्यरत्नाकर (pp. 514, 516) :—
हरिस्तु

' सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी ।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते ॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

प्रकृतेस्तु विवक्षायां विकार्यं' इत्येकं पक्षं उदाजहार। ...

पक्षान्तरमप्याह हरिरेव 'कैश्चिदन्यथा' निरुच्यमानं

'निर्वर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितम्
यदसज्जायते यद्वा जन्मना यत् प्रकाशते।
तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितम्॥
प्रकृत्युच्छेदसंभूतं किञ्चित् काष्ठादिभस्मवत्।
किञ्चिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्'॥ इति॥

३·७-४९ ab भोजराज in his शृङ्गारप्रकाश (Vol I p. 92) quotes this श्लोकार्ध thus :—

"कर्तुः क्रियया्ऽनन्यार्थया यदाप्यते तत् कर्म। तदपि त्रिधा—निर्वर्त्यं, विकार्यं प्राप्यञ्च। तेषु निर्वर्त्यं द्विधा—

'यदसज्जायते सद्वा जन्मना तत् प्रकाश्यते।'

... विकार्यमपि द्विधा प्रकृत्युच्छेदात् गुणान्तराधानाच्च। ... प्राप्यमपि द्विधैव। कथितमकथितं च। तत्र यत् कृत्यक्तखलर्थादिभिरभिधीयते तत् कथितम्। यत् तैर्नाभिधीयते तदकथितम्। ...

३-७-४९–५१, ५३-५४ Quoted by भो in his शृप्र (Vol I p. 147), with the accompanying few remarks, thus :—

'... क्रियाप्यं कर्म यदाह–कर्तुरीप्सिततमं कर्मेति। तत्तु त्रिविधं निर्वर्त्यं विकार्यं प्राप्यमिति। तत्र यत् अविद्यमानं उत्पाद्यते विद्यमानं जन्मादिना प्रकाश्यते तन्निर्वर्त्यं, यदभिनिर्वृत्तमेव प्रकृत्युच्छेन गुणान्तराधानेन वा विकारमापद्यते तद् विकार्यं, यस्य क्रियाकृतानां विशेषाणां सर्वथाऽनुपलब्धिस्तत् प्राप्यम्। तदुक्तम्—

"यदसज्जायते सद्वा जन्मना यत् प्रकाशते।
तन्निर्वर्त्यं विकार्यं तु कर्म द्वेधा व्यवस्थितम्॥
प्रकृत्युच्छेदसंभूतं किञ्चित् काष्ठादिभस्मवत्।
किञ्चिद् गुणान्तरापत्त्या सुवर्णादिविकारवत्॥
क्रियाकृता विशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद्वा तत् प्राप्यमिति कथ्यते॥"

तत्र निर्वर्त्येति विकार्यप्राप्यधर्मः स्वधर्मश्च, विकार्ये प्राप्यधर्मः स्वधर्मश्च प्राप्ये तु स्वधर्म एव। कः पुनरसौ—

"आभासोऽवगमो व्यक्तिः सोढत्वमिति कर्मणः।
विशेषाः प्राप्यमाणस्य क्रियासिद्धौ व्यवस्थिताः॥"

निर्वर्त्यविकार्ययोस्तु निवृत्तिकार्यवेव। यथोच्यते—

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

" निर्वर्त्यादिषु तत् पूर्वमनुभूय स्वतन्त्रताम् ।
कर्त्रन्तराणां व्यापारे कर्म संपद्यते पुनः ॥ "

तत्र निर्वर्त्यं उत्पाद्यं प्रकाश्यं उपसर्जनं विशेषणं व्यवहितं अप्राप्यं च । ...

३-७-५१ गोकुलनाथमिश्र in his पदवाक्यरत्नाकर (p. 520) :
प्राप्यलक्षणमाह हरिरेव—

" क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते ।
दर्शनादनुमानाद्वा तत् प्राप्यमिति कथ्यते ॥ " इति ॥

तत्र क्रियाकृतविशेषा उत्पत्तिक्षयोपचयादयो भावविकारा एव गणनीयाः ॥

३-७-५८ गोकुलनाथमिश्र in his पदवाक्यरत्नाकर (p. 508) :—
यत्तु

" एकदेशे समूहे वा व्यापाराणां पचादयः ।
स्वभावतः प्रवर्तन्ते तुल्यं रूपं समास्थिताः ॥ "

इति वाक्यपदीयवाक्यस्य— ' एकदेशे फलमात्रे व्यापारमात्रे समूहे वा धातवः प्रवर्तन्ते । तेन व्यापाराविवक्षायां फलमात्रे फलविवक्षायां व्यापारमात्रे च धातुप्रयोगाः । यथा पच्यत ओदनः स्वयमेव, पचति चैत्र इत्यादौ ' इत्यर्थं व्याकुर्वाणाः " अधिगच्छति शास्त्रार्थः — " इत्यादौ विषयतारूपफलमात्रं गमिर्वदति । अत एवायमकर्मको धातुरिति वदन्ति । तन्न । तथा सति " अधिगच्छति..." धातूनां पर्यायताप्रसङ्गात् । तस्मादधिगमव्यापारविशेषिता विषयता धात्वर्थ इति सारम् ॥

३-७-६७-६८ Quoted by भो in his शृप्र (Vol I p. 148) thus :—

" कालाध्वभावदेशानामन्तर्भूतः क्रियान्तरैः ।
सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते ॥ "

सकर्मिकाऽपि क्रिया द्रव्यादिकर्मण्येव निविशते ।
कालादिकर्मणि यथा — मासमोदनं पचति ।
क्रोशमनुवाकमधीते ।

" आधारत्वमिव प्राप्तास्ते पुनर्द्रव्यकर्मसु ।
कालादयो भिन्नकक्ष्या यान्ति कर्मत्वमुत्तरम् ॥ "

३-७-७३ Twice quoted by भो in his शृप्र (Vol 1 p. 146 and p. 152) thus :—

कथं पुनः दुहिकर्तो कर्तृप्रयोजकस्य हेतुत्वं दुहेरन्तर्भूतणिजर्थत्वात् वक्ष्यति हि

" अन्तर्भूतणिजर्थानां दुहादीनां णिजन्तवत् ।
सिद्धं पूर्वेण कर्मत्वं णिजन्तनियमस्तथा ॥ "

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

कथं समान एव योगक्षेमे गवादीनामप्राधान्यं अजादीनां च प्राधान्यं। कथं वा प्रधानं गवादि लादिभिः अजादीवदेव अभिधीयते? किञ्च,

"अन्तर्भूत० ... ... णिजन्तनियमस्तथा॥"

३-७-८१-८२ गोकुलनाथमिश्र in his पदवाक्यरत्नाकर (p. 244):

हरिरप्याह:—

'प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते॥
प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते।
यदा तदा गुणे तद्वत् अनुक्ताऽपि प्रतीयते॥'

also on p. 671 उक्तं च and so on.

३-७-९०, ९१ Quoted by भो in his शृप्र (Vol I pp. 150–151) thus:—

"क्रियायाः परिनिष्पत्तिः यद्व्यापारादनन्तरम्।
यदा विवक्ष्यते तस्य करणत्वं तदा स्मृतम्॥"

न च करणस्य वास्तवं रूपमस्ति विवक्षानिबन्धनत्वात्। तदुक्तम्—

"वस्तुतस्तदनिर्देश्यं न हि तद् वस्तुनि स्थितम्।
स्थाल्या पच्यत एषाऽपि विवक्षा दृश्यते यतः॥"

गोकुलनाथमिश्र in his पदवाक्यरत्नाकर (pp. 642–3):

तदाहु:—

"क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्।
विवक्ष्यते यदा तत्र करणं तत्तदा स्मृतम्॥
वस्तुतस्तदनिर्देश्यं नहि वस्तु व्यवस्थितम्।
स्थाल्या पचत इत्येषा व्यवस्था दृश्यते यथा॥ इति॥

३-७-९८, ९९ Quoted by भो in his शृप्र (Vol I p. 151) thus:—

निष्किञ्चनत्वस्तोकादीनां सद्भावासत्त्वरूपत्वात् असाधकत्वमिति चेत् तन्न।

"यथैव संनिधौ तस्य तथैवासंनिधावपि।
भावस्य करणत्वेन क्रियासिद्धिः प्रतीयते॥
स्तोकत्वस्याभिनिर्वृत्तेरनिर्वृत्तेश्च तस्य वा।
प्रसिद्धिं करणत्वस्य स्तोकादीनां प्रचक्षते॥"

३-७-१०१–१०२ कैयट, while commenting on महाभाष्य on पा 1-4-23, practically paraphrases these two कारिकाऽ of भर्तृहरिऽ वाप thus:—

The relevant भाष्य passage is as follows:—"... प्रधानेन समवाये स्थाली परतन्त्रा। व्यवाये स्वतन्त्रा। तद्यथा। अमात्यादीनां राज्ञा सह समवाये पारतन्त्र्यम्। व्यवाये स्वातन्त्र्यम्। किं पुनः प्रधानम्।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

कर्ता। कथं पुनर्ज्ञायते कर्ता प्रधानमिति। यत् सर्वेषु साधनेषु संनिहितेषु कर्ता प्रवर्तयिता भवति।" कैयट **observes :—**

किं पुनः प्रधानमिति। सामग्रीतः क्रियोत्पादात् सर्वेषां तत्र सामान्यात् न कस्यचित् प्राधान्यमिति भावः। कर्ता प्रवर्तयिता इति। तदधीनप्रवृत्तिनिवृत्तित्वात् करणादीनां, तस्य च प्रागन्यतः शक्तिलाभात्, प्रतिनिध्यदर्शनात्, करणाद्यभावेऽपि 'आस्ते शेते' इत्यादौ केवलस्य कर्तुर्दर्शनात् कर्तृरहितानां करणादीनामदर्शनात् प्राधान्यं कर्तुरित्यर्थः।"; **for comparison, the two** कारिकाs **bear repetition here :**

"प्रागन्यतः शक्तिलाभात् न्यग्भावापादनादपि।
तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्तनात्॥
अदृष्टत्वात् प्रतिनिधेः प्रविवेके च दर्शनात्।
आरादप्युपकारित्वे स्वातन्त्र्यं कर्तुरुच्यते॥

हेलाराज **thus summarises his comment :—**

एतेन चेदं भाष्यं व्याख्यातं — "एत् सर्वेषु साधनेषु संनिहितेषु कर्ता प्रवर्तयिता भवति" इति। एतच्च भाष्यं गर्भीकृतनान्तरीयकार्थं संक्षिप्योक्तमिति गर्भीकृतार्थव्यक्तीकारेणात्र व्याख्यातम्। तथाहि 'तदधीनप्रवृत्तित्वात्' इत्यनेन साक्षात् प्रवर्तकत्वं व्याख्यातम्। सामर्थ्याक्षिप्तं च न्यग्भावनादि निर्दिष्टम्। तथाहि प्रयोक्त्रधीनत्वात् प्रवृत्तेर्न्यग्भावः करणादीनां तत्रार्थोक्तः। सा प्रवर्तना च फलार्थमिति तत्प्राप्तौ अतिप्रवृत्तौ निवर्तनाप्याक्षिप्ता। प्रवर्तयिता चावश्यं प्रवर्त्यादन्यतः शक्तिं प्राग् लभत इति तदपि व्याख्यातम्। असम्भवे च प्रवर्तयितुरेवाभाव इति प्रतिनिध्यभावः सामर्थ्योक्तो विवृतः। साक्षात् समर्थस्य क्वचिदन्यानपेक्षणात् प्रविवेके च दर्शनं सामर्थ्यलभ्यं व्याख्यातमिति समस्य अभिहितं भाष्यं व्यस्य व्याख्यातम्॥'

Quoted by भो **in his** शृप्र **(Vol 1 p. 145) with the following preliminary remarks thus :—**

तत्र शक्तिमतो द्रव्यस्य कारकाख्यायां अवान्तरव्यापारनिबन्धनाः षड् उपाख्या भवन्ति। कर्ता कर्म करणं संप्रदानं अपादानं अधिकरणं चेति। तेषु स्वतन्त्रः कर्ता। किं पुनस्तस्य स्वातन्त्र्यम्। यत् करणादीनि प्रयुङ्क्ते न तैः प्रयुज्यते। तानि न्यक्करोति न तैर्न्यक्क्रियते। न तैर्निर्वर्त्यते तानि तानि निर्वर्तयति। तानि प्रतिनिधत्ते न तैः प्रतिनिधीयते। तेभ्यः स प्रथमात्मानं लभते न तानि। तस्मात् स तैर्विनाऽपि दृश्यते। न तानि तेनेति। तदाह —

"प्रागन्यतः शक्तिलाभात् न्यग्भावापादनादपि।
तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्तना॥
अदृष्टत्वात् प्रतिनिधेः प्रविवेके च दर्शनात्।
आरादभ्युपकारित्वे प्राधान्यं कर्तुरुच्यते॥"

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

३-७-१२७ गोकुलनाथमिश्र in his पद्वाक्यरत्नाकर (p. 597) :
तदाहु :—

'गुणक्रियायां स्वातन्त्र्यात् प्रेरणे कर्मतां गतः।
नियमात् कर्मसंज्ञायाः स्वधर्मेणाभिधीयते ॥'

३-७-१३० Quoted by भो in his शृप्र (Vol I p. 152) thus :—

'कर्मग्रहणेन क्रियाया अपि सङ्ग्रहात् क्रियया यदाप्यते तदपि संप्रदानं क्रियाव्याप्यमिति च भवति। कर्मणोऽस्मात् को विशेष इति चेत् ईप्सिततमं नाम। तदपि (संप्रदानं) षोढा शेषः कर्मशेषः कर्म व्यवहितकर्म हेतुः निमित्तहेतुरिति च। यदाह —

"हेतुत्वे कर्मसंज्ञायां शेषत्वे वाऽपि कारकम्।
रुच्यर्थादिषु शास्त्रेण संप्रदानाख्यमुच्यते ॥"

तत्र शेषो यथा देवदत्ताय रोचते देवदत्ताय स्वदते देवदत्ताय तिष्ठते देवदत्ताय नमते। कर्मशेषो यथा देवदत्ताय गां प्रतिशृणोति देवदत्ताय सन्तं धारयति देवदत्ताय दैवमीक्षते। कर्म यथा देवदत्ताय राध्यति पुष्पाय स्पृहयति ग्रामाय गच्छति देवेभ्यो नमति। व्यवहितकर्म यथा छात्राय श्लाघते चैत्राय शपते होत्रे प्रतिगृह्णाति पोत्रे अनुगृह्णाति। हेतुर्यथा देवदत्ताय क्रुध्यति देवदत्ताय द्रुह्यति देवदत्तायेर्ष्यति देवदत्तायासूयति। निमित्तहेतुर्यथा एधेभ्यो व्रजति श्राद्धाय निगदते युद्धाय संनह्यति पत्ये शेते॥

३-७-१३५ भोजराज quotes this कारिका in his शृङ्गारप्रकाश (Vol I p. 149) thus :—

'विश्वजिता यजेत' इत्यादौ धात्वर्थनामधेयेभ्यो विश्वजिदादिभ्यः करणविभक्तिदर्शनात् अग्निष्टोमयाजीत्यादिसिद्ध्यर्थं करणे यजेति च सूत्रारम्भात्। अग्निष्टोमादयो हि स्वर्गादिफलभावनायां करणम्। कार्यं अविनाश्यं विनाश्यं ईप्सितं अनीप्सितं आस्थितं कर्तृकर्म च। तत्राविनाश्यं यथा – सुवर्णं कुण्डलीकरोति काण्डं लुनाति कान्तां सादयति प्रियं सादयति। विनाश्यं यथा – कुसूलं भिनत्ति काष्ठं दहति धानाः पिबति उदपेषं पिनष्टि। ईप्सितं यथा – स्त्रियं गच्छति पयः पिबति। अनीप्सितं यथा – चोरान् पश्यति धनं त्यजति विषं भक्षयति अहिं लङ्घयति। कः पुनरेषां विकारः? प्रकृतेरन्यथात्वं, नहि चोरादयो दर्शनादिविषया भवन्ति। आस्थितं यथा– पन्थानं गच्छति नदीं तरति पर्वतमारोहयति। गर्तमुत्तराति। कः पुनरन्यतोऽस्य भेदः। उच्यते —

"त्यागरूपं प्रहातव्ये प्राप्ये संदर्शनादिके।
आस्थितं कर्म यत्तत्र द्वैरूपं भजते क्रिया॥"

कर्तृकर्म यथा–लूयते केदारः स्वयमेव पच्यत ओदनः स्वयमेव भिद्यते कुसूलः स्वयमेवेति।

"त्यागरूपं प्रहातव्येऽप्यर्थे संसर्गदर्शनम्।
आस्थितं कर्म यत्तत्र द्वैरूप्यं भजते क्रिया॥"

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

Quoted by भोजराज in his शृङ्गारप्रकाश (Vol. I p. 49)

३-७-१३६ **भोजराज quotes this कारिका in his शृङ्गारप्रकाश (Vol I p. 152), along with another कारिका 'अपाये यदुदासीनं etc.' which is missing in the present text of वाप :—**

'अपादानमुच्यते "ध्रुवमपायेऽपादानम्" कायसंसर्गपूर्वके बुद्धिसंसर्गपूर्वके वा अपाये यद् ध्रुवं अवधिभूतं विवक्षितं तस्यापादानमिति संज्ञा।' यथोच्यते –'अपाये ... तदपादानमुच्यते ॥'

तदपि त्रिविधं निर्दिष्टविषयं उपात्तविषयं अपेक्षितक्रियं चेति। तदुक्तम्—

"निर्दिष्टविषयं किञ्चिदुपात्तविषयं तथा।
अपेक्षितक्रियं चेति त्रिधाऽपादानमुच्यते ॥"

३-७-१३८–१३९ **गोकुलनाथमिश्र in his पदवाक्यरत्नाकर (p. 759) refers probably to these two कारिकाs when he observes :—**

"ध्रुवमपायेऽपादानम्" इति सूत्रं अपाये विभागे ध्रुवमवधिभूतं अपादानसंज्ञमिति व्याख्येयम्। योगविभागादिति वाक्यपदीये हरिचरणाः॥

३-७-१४०–१४१ **गोकुलनाथमिश्र in his पदवाक्यरत्नाकर (p. 743) quotes these two कारिकाs along with the usual अपाये यदुदासीनं and पततो ध्रुव एवाश्वो which are not found in the वाप :—**

यत्तु हरिणा

'अपाये यदुदासीनं चलं वा यदि वाऽचलम्।
ध्रुवमेवातदावेशात् तदपादानमुच्यते ॥
पततो ध्रुव एवाश्वो यस्मादश्वात् पतत्यसौ।
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमुच्यते ॥'
"उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मजे।
विभागे प्रविभक्ते तु क्रिये तत्र विवक्षिते ॥
मेषान्तरक्रियापेक्षं अवधित्वं पृथक् पृथक्।
मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक् ॥"

इत्युक्तं तत्रापाये विभागे सति इति शेषः। उदासीनं विभागजनकक्रियानधिकरणम्। अतदावेशात् विभागजनकक्रियानधिकरणत्वात्।

ननु परस्परस्मात् मेषावपसरत इत्यादौ उभयकर्मजन्ये विभागे विभागजनकक्रियानधिकरणत्वं न कस्यापि मेषस्य इत्याशङ्कते—"उभावपि ..." इत्यादिना। न विभागजनकत्वेन क्रिया प्रकृते निवेशनीया किन्तु ताद्रूप्येणेति नानुपपत्तिरिति समाधत्ते—'प्रविभक्ते....' इत्यादिना। तुः तथापिपर्यायः। ननु अपादानसंज्ञावरुद्धे कथं कर्तृसंज्ञा मेषयोः आकडारात् एकसंज्ञाप्रतिज्ञानादित्याशङ्क्य भिन्नभिन्नक्रियानिरूपितकारकान्तरसमावेशो न विरुद्ध इत्यभिप्रायेणाह—"मेषान्तर ..." इत्यादि। विवरणवशात् कथित एवार्थे पर्यवसानम् ॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

३-७-१४७, १४८ भोजराज in his शृङ्गारप्रकाश (Vol I p. 154) quotes these two कारिकाs thus :—

'अन्ये तु ध्रुवमपायेऽपादानमिति निर्दिष्टविषयं; भीत्रार्थानां भयहेतुः पराजेरसोढः, अन्तर्धौ येनादर्शनमिच्छति, आख्यातोपयोगे, जनिकर्तुः प्रकृतिः, भुवः प्रभवः, ल्यब्लोपे कर्मण उपसंख्यानं, सप्तमीपञ्चम्यौ कारकमध्ये इत्यादियोगोक्तं उपात्तविषयं; पञ्चमीविभक्ते, अन्यारादितरर्ते-दिक्शब्दाञ्चूत्तरपदाजाहियुक्ते, प्रतिः प्रतिनिधिप्रतिदानयोः, प्रतिनिधिप्रतिदाने च यस्मात् इत्यादिकं तु अवधिभावात् अपेक्षितक्रियामिति त्रिधाऽपादानं मन्यन्ते । आहुश्च —

" निर्धारणे विभक्ते यो भीत्रादीनां च यो विधिः ।
उत्पातापेक्षितापायः स ध्रुवः प्रतिपद्यते ॥ "

उक्तमपादानम् । अधिकरणमुच्यते–' आधारोऽधिकरणम् ' । कर्तुः कर्मणो वा क्रियाश्रयस्य क्रियां प्रति य आधारस्तदधिकरणम् । तदुक्तम् —

" कर्तृकर्मव्यवहितामसाक्षाद् धारयत् क्रियाम् ।
उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ॥ "

तत् त्रेधा – वैषयिकं, औपश्लेषिकं, नैमित्तिकं चेति । ...

३-७-१४८ गोकुलनाथमिश्र in his पदवाक्यरत्नाकर (p. 829) :

' यदाहुः :—

" कर्तृकर्मव्यवहितामसाक्षात् धारयत् क्रियम् ।
उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ॥ " इति ॥

दैशिककालिकान्यतरसंसर्गावच्छिन्नं अधिकरणत्वं आधयेत्वं वा सप्तम्यर्थः । तादृशं च क्रियाधिकरणत्वं कर्तृकर्माधिकरण एव स्वीक्रियते नान्यत्रेत्यपि वदन्ति ॥

३-७-१५७ " द्विष्ठोऽप्यसौ परार्थत्वाद् गुणेषु व्यतिरिच्यते ।
तत्राभिधीयमानश्च प्रधानेऽप्युपयुज्यते ॥ "

Quoted by भोजराज in his शृङ्गारप्रकाश (Vol I p. 53)

३-७-१५९-१६० गोकुलनाथमिश्र in his पदवाक्यरत्नाकर (pp. 795–797) refers to these two कारिकाs thus :—

" कारकैः (साधनैः of our text) व्यपदिष्टे च श्रूयमाणक्रिये पुनः ।
प्रोक्ता प्रातिपदं षष्ठी समासस्य निवृत्तये ॥ " इति ॥

' ज्ञो विदर्थस्य ' ... इत्यादिसूत्राष्टकेन पदमुपलक्ष्य विहिता षष्ठी समासनिषेधार्था इति तदर्थः॥ ... हरिस्तु अष्टसूत्र्या मातुः स्मृतमित्यादौ समासनिषेध एव प्रयोजनम्, न हि कृद्योगषष्ठी सम्भवति कृत्सु निष्ठायाः पर्युदासादित्यभिप्रायेण

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

निष्ठायां कर्मविषया षष्ठी च प्रतिषिध्यते ।
शेषलक्षणया षष्ठ्या समासस्तत्र नेष्यते ॥
इत्यनुशशास ॥

३-७-१६५ भो in his शृप्र (Vol I p. 198) quotes this कारिका thus :—

"विभक्त्यर्थेऽव्ययीभाववचनादवसीयताम् ।
अन्यो द्रव्याद् विभक्त्यर्थः सोऽव्ययेनाभिधीयते ॥"

३-८-१ "यावत् सिद्धमसिद्धं वा साध्यत्वेन विवक्षितम् ।
आश्रितक्रमरूपत्वात् तत् क्रियेत्यभिधीयते ॥"

(Mark the variant विवक्षितम् for अभिधीयते). Quoted by भोजराज in his शृङ्गारप्रकाश (Vol I p. 133)

In the आर्यलङ्कावतारवृत्ति of ज्ञानश्रीभद्र, this कारिका is thus referred to :—

"There it was told in a treatise written by Bhadrahari,

In so far as a thing attained or a thing not yet attained should be denoted in order to be established, on aceount of its essence being the order to be resorted to, it is declared to be an action."

३-८-९, १२, ४, ५, ६, ७, ८, ११, १०, ३७, ३८, ३९ ab Quoted in this order by भोजराज in his शृङ्गारप्रकाश (Vol I pp. 136-138 and p. 140) with many variants :

"यथा च भागाः पचतेश्चलनज्वलनादयः ।
चलनज्वलनादीनां ज्ञेया भागास्तथापरे ॥ ९ ॥"
"कालानुपाति यद्रूपं तदस्तीत्यपदिश्यते ।
परितस्तु परिच्छिन्नं भाव इत्येव कथ्यते ॥ १२ ॥"
"गुणभूतैरवयवैः समूहक्रमजन्मनाम् ।
बुद्ध्या प्रकल्पितो भेदः क्रियेति व्यपदिश्यते ॥ ४ ॥"
समूहः स तथाभूतः प्रतिभेदं समूहिषु ।
समाप्यते ततो भेदे कालभेदस्य संभवः ॥ ५ ॥
क्रमात् सदसतां तेषामात्मनो न समूहिताः ।
सद्वस्तुविषयैर्यान्ति सम्बन्धं चक्षुरादिभिः ॥ ६ ॥
यथा गौरिति संघातः सर्वो नेन्द्रियगोचरः ।
भागशस्तूपलब्धस्य बुद्धौ रूपं निरूप्यते ॥ ७ ॥
इन्द्रियैरन्यथाप्राप्तौ भेदांशोपनिपातिभिः ।
अलातचक्रवद्रूपं क्रियाणां परिवर्तितम् ॥ ८ ॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

" पूर्वोत्तरैर्यदा भागैः समवस्थापितक्रमः।
एकः सोऽप्यसदध्यासादाख्यातैरभिधीयते ॥ ११ ॥ "
" यश्चापकर्षपर्यन्तमनुप्राप्तः प्रतीयते।
तत्रैकस्मिन् क्रियाशब्दः केवले न प्रयुज्यते ॥ १० ॥
" क्रियामन्ये तु मन्यन्ते क्वचिद्प्यनपाश्रिताम्।
सा नैवार्थाविभासत्वे प्रवृत्तिरनपायिनी ॥ ३७ ॥
सामान्यभूता धात्वर्थैः सा पुनः प्रविभज्यते।
ततो व्यापाररूपेण साध्ये पर्यवतिष्ठते ॥ ३८ ॥
प्रकृतिः साधनानां सा प्रथमान्तमकारकम् ॥ ३९ ॥ "

३-८-१२ कालानुपाति यद्रूपं धात्वर्थस्य क्रियेति तत्।
परितो यत् परिच्छिन्नं तद् भाव इति कथ्यते ॥

Quoted by भोजराज in his शृङ्गारप्रकाश (Vol I p. 38)

३-८-३७, ३८, ३९ ab " क्रियामन्ये तु मन्यन्ते क्वचिद्प्यनपाश्रिताम्।
साधनैकार्थभावित्वे प्रवृत्तिमनपायिनीम् ॥
सामान्यभूता सा पूर्वं धात्वर्थैः प्रविभज्यते।
ततो व्यापाररूपेण साध्ये च व्यवतिष्ठते ॥
प्रकृतिः साधनानां सा प्रथमं तच्च कारकम्। "

Quoted by भोजराज in his शृङ्गारप्रकाश (Vol I p. 57)

३-९-४ ab " तमस्य लोकयन्त्रस्य सूत्रधारं प्रचक्षते। "

Quoted by भोजराज in his शृङ्गारप्रकाश (Vol I p. 142) with the following general introducation, to the different कारिकाs of भर्तृहरि, quoted in extenso, thus :—

" अन्ये पुनः क्रियाव्यतिरिक्तं अनुदयास्तमयं अभिन्नं अनवच्छिन्नदेशं च द्रव्यं पृथग्विधानानेकशक्तिशतसहस्रपाकायतनं जगत्प्रवृत्तिनियमकारणं क्रियापरिच्छेदहेतुं अदृष्टाद्यपेक्षं कालमाचक्षते। स च क्रियापरिच्छेद्यः किल इति। केचिदाहुश्च — "नित्यो व्यापी संप्रतिभूतभविष्यत्क्रियासमावेशात्। आकाशकल्पः एक द्रव्यात्मा भिद्यते कालः"। तच्च असमीचीनमेवेति ब्रूमः। क्रिया हि साध्यत्वात् साधनमेवापेक्षते। न च क्रियाविशिष्टस्यापि द्रव्यात्मनः कालकारकेण सम्बन्धो घटते द्वयोरपि सिद्धत्वात्। तस्मात् द्रव्यरूपे क्रियारूपे वा कालः क्रियामेव विशेषयति। सा च तद्विशिष्टा कारकविशेषमुपातिष्ठते। यदाह—

' गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते।
प्रधानस्योपकारित्वे तथा भूयसि वर्तते ॥ '

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

(A कारिका often quoted but not available in the extant वाप).

३-९-८ "संसर्गिणां तु ये भेदा विशेषास्तस्य ते मताः ॥
संभिन्नस्तैर्व्यवस्थानां कालो भेदाय कल्पते।"

(Thus broken into two different कारिकाs, with variants to be compared with our text) Quoted by भोजराज in his शृङ्गारप्रकाश (Vol I p. 143).

३-९-३० प्रतिबन्धाभ्यनुज्ञाभ्यां वृत्तिर्या तस्य शाश्वती ॥
तया विभज्यमानोऽसौ लभते क्रमरूपताम्।

Quoted by भोजराज in his शृङ्गारप्रकाश (Vol I p. 142)

३-९-३२ क्रियाभेदाद्यथैकस्मिंस्तक्षाद्याख्या प्रवर्तते ॥
क्रियाभेदात्तथैकस्मिन् ऋत्वाख्या चोपजायते।

Quoted by भो in his शृप्र (Vol I p. 142)

३-९-३७ भोजराज in his शृङ्गारप्रकाश (Vol I p. 162) quotes this कारिका thus :—

'यथा च धात्वर्थः क्रियोपाधिरेवं कालोऽपि। यदुक्तम् —

"क्रियोपाधिश्च संभूतभविष्यद्वर्तमानताः।
परापरविभागार्थाः सशक्तीः प्रतिपद्यते ॥"

स भूतादिभेदाद् द्वादशधा। ...

क्रियोपाधिः स या भूतभाविष्यद्वर्तमानता ॥
परावरविभागार्थं सा शक्तिः प्रतिपाद्यते।

Quoted again by भो in his शृप्र (Vol I p. 142)

३-९-४०, ४१ भूतानां चैव यद्रूपं रूपं यद् भाविनामपि ॥
सुदुर्दश इवादर्शे काल एवोपलभ्यते।

तृणपर्णलतादीनि यथा स्रोतोऽवकर्षति ॥
प्रवर्तयति कालोऽपि मात्रा मात्रावतां तथा।

Quoted by भो in his शृप्र (Vol I pp. 142–143)

३-९-४७ दूरान्तिकव्यवस्थानं अध्वादिकरणं यथा ॥
चिरक्षिप्रव्यवस्थानं कालादिकरणं तथा।

Quoted by भो in his शृप्र (Vol I p. 142)

३-९-५७ कलाभिः पृथगर्थाभिः प्रविभक्तं स्वभावतः।
केचिद् बुद्ध्यनुसन्धानलक्षणत्वं प्रचक्षते ॥

Quoted by भो in his शृप्र (Vol I p. 142)

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

३-९-६८ विशिष्टमपि धत्तं तमुपादायावकल्पते ॥
कालः कालविदामेकः कालादिप्रविभक्तये ।

Quoted by भो in his शृप्र (Vol I p. 142).

३-९-७३, ७४ तृणराजस्य या वृद्धिस्त्वचिसारस्य वा दधत् ॥
चिरक्षिप्रादिभेदे च कालकत्वं विकल्पते ।
व्यतिक्रमेऽपि मात्राणां न तस्यास्ति व्यतिक्रमः ॥
नियन्तृगतिभेदेन मार्गभेदोऽस्ति कश्चन ।

Quoted by भो in his शृप्र (Vol I p. 142).

३-९-७६ आदित्यग्रहतारादिपरिस्पन्दमथापरे ।
भिन्नमावृत्तिभेदेन कालं कालविदो विदुः ॥

This कारिका (with तारादि for नक्षत्र of our text) is quoted by जिनेन्द्रबुद्धि, the author of the commentary न्यास on काशिकावृत्ति of जयादित्य and वामन on पा 1·1·70 तपरस्तत्कालस्य thus : " तत्कालस्येति बहुव्रीहिः । स कालोऽस्येति । अयुक्तोऽयं निर्देशः । तथाहि तच्छब्देन तपरः परामृश्यते । तपरश्च वर्णः । कालस्तु क्रियाविशेष इष्यते । तथा ह्युक्तम् —

'आदित्य०...विदुः' इति । तत् कुतो वर्णक्रियाविशेषाभिधायिनोः तपर-कालशब्दयोः सामानाधिकरण्यम् । .... "

३-११-२७ भोजराज **in his** शृप्र **(Vol I p. 191) quotes this** कारिका **thus :—**

' विभक्त्यर्थस्त्रिधा-संख्या कारकं शेषश्च । तेषु कारकसम्बन्धिगतैकत्व-द्वित्वबहुत्वानि संख्या । सा षोढा – आभिधानिकी वैवक्षिकी नैमित्तिकी पारिभाषिकी वैभाषिकी पारिशेषिकी च । ... पारिशेषिकी यथा – एकः द्वौ बहवः उभौ द्वित्राः अर्धतृतीया इति । अत्र एकाद्युक्तसंख्यापरिशेषे स्वादय इति पारिशेषिकी । तदुक्तम् —

" निमित्तमेकमित्यत्र विभक्तानामधीयते ।
तद्वतस्तु यदेकत्वं विभक्तिस्तत्र वर्तते ॥ "

३-१४-१; ४, ५; २, ३

" कुत्साप्रशंसातिशयैः समासार्थं तु युज्यते ।
पदं स्वार्थादयः सर्वे यस्मात् कुत्सादिहेतवः ॥ "
" कुत्सितत्वेन कुत्स्यो वा न सम्यग्वा विकुत्सितः ।
स्वशब्दाभिहिते केन विशिष्टोऽर्थः प्रतीयते ॥
न च साम्प्रतिकी कुत्सा शब्दाभेदे प्रतीयते ।
पूज्यते कुत्सितत्वेऽपि प्रशस्तत्वेऽपि कुत्स्यते ॥ "

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

"देवदत्तादिकुत्सायां वर्तते कुत्सितश्रुतिः ।
कुत्सितस्था तु या कुत्सा तदर्थे को विधीयते ॥
प्रकृष्ट इति शुक्लादिप्रकर्षस्याभिधायकः ।
प्रकृष्टस्य प्रकर्षे तु तरबादिर्विधीयते ॥"

Quoted by भोजराज in his शृङ्गारप्रकाश (Vol I pp. 58-59)

३-१४-२८ अनुस्यूतेव भेदाभ्यां एका प्रख्योपजायते ।
यस्यां सहविवक्षां तामाहुर्द्वन्द्वैकशेषयोः ॥

Quoted by भोजराज in his शृङ्गारप्रकाश (Vol I p. 66)

३-१४-४७ सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः प्रवर्तते ।
स्वार्थवत् सा व्यपेक्षाऽस्य वृत्तावपि न हीयते ॥

Quoted by भोजराज in his शृङ्गारप्रकाश (Vol I p. 26, and p. 55, Mysore, 1955).

३-१४-४८ **भोजराज in his शृङ्गारप्रकाश (Vol I p. 274) quotes this कारिका thus :—**

सर्वेऽपि च समुदायसम्बन्धिनोऽवयवस्पर्शेनैव तद्वता समुदायेन संबध्यन्ते । तदुक्तम् —

"समुदायेन सम्बन्धो येषां गुरुकुलादिना ।
संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह ॥"

व्यपेक्षादिभिरेकार्थपरतया उपात्तानां पदार्थानां मिथोऽभिग्रथनमन्वयः । स त्रिधा — शाक्तो वैभक्तः शक्तिविभक्तिमयश्च ।

३-१४-५६ या सामान्याश्रया संज्ञा विशेषविषया च या ।
बहुलग्रहणान्नास्ति प्रवृत्तिरुभयोस्तयोः ॥

Quoted by भोजराज in his शृङ्गारप्रकाश (Vol I p. 27)

३-१४-५७ सुसूक्ष्मजटकेशादौ समासावयवो यदि ।
स्यात् स्यात् तत्रान्तरङ्गत्वात् बाधकोऽवयवस्वरः ॥

Quoted by भोजराज in his शृङ्गारप्रकाश (Vol I p. 27)

३-१४-६७, ६५, ६६, ६४ **These four कारिकाs are quoted by भोजराज in his शृङ्गारप्रकाश (Vol I pp. 51 and 52) in the above order thus :—**

"अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः ।
सम्बध्यते क्रिया तद्वत् कृतपूर्वादिषु स्थिता ॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

" विशेषकर्मसम्बन्धे विनिर्मुक्ते कटादिभिः ।
विशेषनिरपेक्षोऽन्यः कटशब्दोऽवकल्पते ॥
" अकर्मकत्वे सत्येवं क्रान्तं भावाभिधायि तत् ।
तेन क्रियावता कर्त्रा योगो भवति कर्मणाम् ॥
" विशेषः श्रूयमाणोऽपि प्रधानेषु गुणेषु वा ।
शब्दान्तरत्वाद्वाक्येषु वृत्तौ नित्यं न विद्यते ॥ "

The several variants should be noted; भोजराज generally introduces भर्तृहरि's कारिकाs by तदुक्तम्; but in the case of 65 and 66 above he says हरिरप्याह.

३-१४-६६ cd, ६७ गोकुलनाथमिश्र in his पद्वाक्यरत्नाकर (p. 810):
' यदाह हरिः
" ततः क्रियावता कर्त्रा योगो भवति कर्मणाम् ॥
अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः ।
क्रिया सम्बध्यते तद्वत् कृतपूर्व्यादिषु स्थिता ॥ इति ॥

क्रिया भावना । कर्त्रा योगः कर्त्रैकदेशे क्रियायामन्वयः । अविग्रहा प्रधानकारकान्वयिनी इति भाट्टैरुक्तम् । तच्चिन्त्यम् । भावकृतां भावना-बाधकत्वस्य अनुभवविरुद्धत्वात् ॥

३-१४-९८, ९९ भो in his शृप्र (Vol I pp 203-4) quotes these two कारिकाs thus :—

यदि वा
" उपायमात्रान्नानात्वं समूहस्त्वेक एव सः ।
विकल्पाभ्युच्चयाभ्यां तु भेदसंसर्गकल्पना ॥ "
" वृत्तिं वर्तयतामेवमबुधप्रतिपत्तये ।
भिन्नाः सम्बोधनोपायाः पुरुषेष्वनवस्थिताः ॥ "

न हि परमार्थतः पराकृतपूर्वोत्तरविभागसंस्पर्शेन संघातेन अतिशय-वत्यर्थेऽभिधीयमाने भेदसंसर्गदर्शनावकाशः कश्चिदस्ति । तस्मादसत्येन भेदसंसर्गदर्शनेन सत्यः समुदायार्थो निरूप्यत इति ॥

३-१४-५४५ " इवशब्दप्रयोगे तु बाह्यात् सम्बन्धिनो विना ।
नाधिक्यमुपमानेऽस्ति द्योतकः संप्रयुज्यते ॥ "

Quoted by भोजराज in his शृङ्गारप्रकाश (Vol I p. 53)

३-१४-५६२ Cf in this respect भोजराज's शृङ्गारप्रकाश (Vol 1 p. 47)
' अर्हतो या क्रिया कर्तुस्तत्रापि वतिरिष्यते '

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

Second Supplement to Appendix III

१-१ 'अनादिनिधनं ब्रह्म .... प्रक्रिया जगतो यतः ॥'

The following two verses in the स्वोपज्ञटीका of भर्तृहरि on वाप 1-1 :—

"यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः ।
संकीर्णमिव मात्राभिश्चित्राभिरभिमन्यते ॥

"तथेदममृतं ब्रह्म निर्विकारमविद्यया ।
कलुषत्वमिवापन्नं भेदरूपं विवर्तते ॥"

(See pp 13 and 14 of the forthcoming Deccan College edition of सवृत्ति वाक्यपदीयम् by Dr. K. A. Subramania I yer) have been paraphrased by दिङ्नाग in his त्रैकाल्यपरीक्षा (Verses 31–32) "which is available only in Tibetan translation and not in Sanskrit. It is intersting to note that दिङ्नाग has paraphrased भर्तृहरि's verses. It is closely to be examined. ... It is likely that शब्दब्रह्मवाद of भर्तृहरि is not of his own innovation" according to N. A. Shastri, the great Buddhist scholar of विश्वभारती, शान्तिनिकेतन.

These two verses are quoted by कमलशील on तत्त्वसंग्रह (144) as a पूर्वपक्ष thus :—

"... परमतमाशङ्कते —

अथाविभागमेवेदं ब्रह्मतत्त्वं सदा स्थितम् ।
अविद्योपप्लवाल्लोको विचित्रं त्वभिमन्यते ॥ १४४ ॥"

अथापि स्यात् अविभक्तमेव सदा ब्रह्मात्मकं तत्त्वमविकारि परमार्थतोऽवस्थितम् । न तस्य परमार्थेन परिणामः किन्तु अविद्यातिमिरोपहत-बुद्धिलोचना नीलादिभेदेन विचित्रमिव मन्यन्ते । यथोक्तं —
"यथा विशुद्धमाकाशं...विवर्तते" ॥ इति ॥

तेन सर्वेषामेकदेशत्वप्रसङ्गो न भविष्यति तेषामवस्तुरूपत्वात् । संविद्-भेदश्च भविष्यति अविद्योपप्लवकृतत्वादिति भावः । ...."

About हरिस्वामिन्'s reference to भर्तृहरि's वाप (1-1) [See p. 198], the following from Dr. Mangaldeo Shastri's article (p. 599, A. I. O. C. Vol V) will be of interest to scholars. हरिस्वामिन्, while commenting on शब्रा 1-3-2-16 "(वाग्वा अनुष्टुभ्) वाचो वा इदं सर्वं प्रभवति।"

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

observes :— 'तस्माच्च शब्दात्मिकाया अनुष्टुभः इदं सर्वं विकारजातं प्रभवति जायते च। जातं च विवर्तते इत्यर्थः। कथम्। शुष्कतर्केण तावत्-शब्देन प्रकाशिते अर्थे प्रवृत्तिः, ततः सर्वार्थानामात्मलाभ इति। तथा चाह—

"नाम रूपं च भूतानां कृतानां च प्रवर्तनम्।
वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे ॥" इति॥

(Of this verse the first half is untraced; the second half is मनु 1·21 cd). आगमेन तु—तस्माद्वा एतस्मादात्मन आकाशः (संभूतः) (तैउ 2-1). अन्ये तु—शब्दब्रह्मैवेदं विवर्ततेऽर्थभावेन प्रक्रिया इत्यत आहुः। ... The manner in which हरिस्वामी introduces the quotation at the end of the discussion and by the words अन्ये तु shows that he regarded the source of the quotation as the latest & the most recent authority on the topic."

श्रीसोमानन्दनाथ (880 A. D.) in his शिवदृष्टि (2-2) obviously refers to this कारिका.

"इत्याहुस्ते परं ब्रह्म यदनादि तथाऽक्षयम्।
तदक्षरं शब्दरूपं सा पश्यन्ती परा हि वाक्॥

उत्पलदेव (910 A. D.) comments ihus :—

'तथा च त एवमाहुः ... यदनादि अनन्तं च परं ब्रह्म चिद्रूपं तदक्षरं निर्विकारं शब्दरूपम्। सा एव च पश्यन्तीसंज्ञा परा वाक्। वाग्रूपतां विना परब्रह्माख्यः चित्प्रकाशोऽपि न प्रकाशेत। सा हि प्रत्यवमर्शिनी। प्रत्यवमर्शनमेव च प्रकाशनमुच्यत इत्याहुस्ते।' He evidently refers to वाप (1·124):

'वाग्रूपता चेदुत्क्रामेत् अवबोधस्य शाश्वती।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥'

श्रीसोमानन्दनाथ actually quotes this and other कारिकाs in his शिवदृष्टि (2·9-10) for refutation as a पूर्वपक्ष thus :—

'यस्मात्तैरुच्यते सद्भिरेवं वस्तुप्रवृत्तये' (शि. दृ. 2·8 cd); उत्पलदेव says :—

'यस्मात् तैः वैयाकरणैः सद्भिः साधुभिर्मुग्धैः एवमुक्तरूपं प्रतिपादितं पश्यन्तीरूपं शब्दतत्त्वं अक्षरं अनाद्यन्तं ब्रह्म विश्वार्थभावेन विवर्तते तदसत्यरूपमात्मन्युपगच्छति। असत्यविभक्तान्यरूपोपग्राहिता विवर्तः। तस्यास्तद्विवर्तते यतो विवर्तनात् प्रक्रिया भावभूतभुवनादिविन्यासवैचित्र्यमिति।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

Here उत्पलदेव actually quotes from स्वोपज्ञ of भर्तृहरि (वाप 1-1) thus — ' विवर्ततेऽर्थभावेन । एकस्य तत्त्वादप्रच्युतस्य भेदानुकारेण असत्यविभक्तान्यरूपोपग्राहिता विवर्तः । स्वप्नविषयप्रतिभासवत् । उक्तं च — ' मूर्तिक्रियाविवर्तौ अविद्याशक्तिप्रवृत्तिमात्रम् । तौ विद्यात्मनि तत्त्वान्यत्वाभ्यामनाख्येयौ । एतद्धि अविद्याया अविद्यात्वम् । इति । '

उत्पलदेव on शिवदृष्टि (2-21 cd and 22 ab) which says :—

' यद्याभासान् बहिर्भूतांस्तत्सतोऽप्यसतोऽपि वा ।
सत्यत्वे दर्शनभ्रंशो ह्यसत्ये सत्यता कथम् ॥ '

observes and quotes from स्वोपज्ञ of भर्तृहरि (वाप 1-1) his standard definition of विवर्त्त thus : –

" यद्याभासान् घटपटादिरूपान् इदन्तया पश्यति तत् तेषां सत्यासत्यताविचारे सत्यता तावत् असत्यविभक्तान्यरूपोपग्राहितात्मकं विवर्तं इच्छद्भिः दर्शनभ्रंशभयान्न वाच्या असत्ये पुनर्दृश्ये नासत्यार्थदर्शित्वे पश्यन्त्याः सत्यतायोगः ॥ "

Refutation of Grammarian's views regarding शब्द continues in शिवदृष्टि of सोमानन्द (2-81–82); its comm. उत्पलदेव thus :—

" शब्दस्य विषयाख्यस्य मिश्रत्वेनेन्द्रियस्य तु ।
सर्वदर्शनविज्ञानशून्यता पदवेदिनाम् ॥ 2-80 ॥

" यस्मादनादिनिधनं शब्दतत्त्वं परा हि वाक् ।
पश्यन्त्या वर्ण्यमानत्वे हस्ते ग्राह्यैकता पतेत् ॥ 2-81 ॥

उत्पलदेव explains :—

' विषयरूपत्वेन कर्मतया यस्य आख्या प्रतीतिः शब्दस्य तस्य इन्द्रियस्य च करणतया प्रसिद्धस्य वाग्रूपस्य मिश्रत्वेन एकीकारेण यस्मात् तैरुक्तं अनादिनिधनं इत्यादिकं अभेदाभिधायि तयोः तस्मात् तेन मिश्रीकारेण सर्वदर्शनाज्ञानता पदवेदिनां वैयाकरणानां प्राप्ता । न हि क्वचिदपि सांख्यादिदर्शनेषु व्यावहारिकयोः इन्द्रियविषययोः अभेदः इष्टः । एवं च वा शब्दस्य परत्वेन अनादिनिधनत्वेन अद्वयवादादैक्येन वर्ण्यमानत्वे हस्तेऽपि कर्मेन्द्रिये तद्ग्राह्येण विषयेण एकता प्रसज्येत ॥

अभिनवगुप्त in ईप्रविवि (Vol III p. 14) quotes a quotation from स्वोपज्ञवृत्ति of भर्तृहरि on वाप 1·1 विवर्ततेऽर्थभावेन ... thus :—

क्रियारहितमिति । न अत्र देशक्रमे क्रिया उपयुक्ता । सा अस्तु मा वा भूत् । वेद्यस्वरूपं तु यत् तदेव मूर्तिर्देशभेदक्रमोपकाराय आलम्ब्यते इत्यर्थः । अनेकस्य इति पदेन अनेन मूर्तिर्विवृता वेद्यवस्तुरूपत्वेन । लक्षणे इति

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

इत्थंभूतलक्षणे तृतीया ज्ञापकस्य वा लक्षणया हेतुत्वाविवक्षायां हेतौ। न च इयं स्वमनीषिका इत्याह तत्रभवत् इति। इच्छन् इति अन्यैरपि 'मूर्तिक्रियाविवर्तौ अविद्याशक्तिप्रवृत्तिमात्रम्' इत्यादिभिः श्रुत्यन्त-(=वेदान्त) वाक्यैः व्यवहृतं अभ्युपगच्छन् इत्यर्थः। (The quotation is : उक्तं च। मूर्तिक्रियाविवर्तौ अविद्याशक्तिप्रवृत्तिमात्रम्। तौ विद्यात्मनि तत्त्वान्यत्वाभ्यां अनाख्येयौ। एतद्धि अविद्याया अविद्यात्वम्। इति।)

अभिनवगुप्त in his ईप्रविवि (Vol III p. 236) refers to स्वोपज्ञ of भर्तृहरि's वाप (1-1) and explains :—

"एवं परिणामवृत्तान्तं प्रदर्श्य विवर्तवृत्तान्तं परोपगतमाह— 'ब्रह्मणस्तु' इति। 'एकस्य' इति। 'तत्त्वादप्रच्युतस्य' इत्यपि एकत्वेनैव आक्षिप्तमिति पृथङ् न लिखितम्। 'भेदानुकारेण' इति तु असत्य-विभक्तताभिधानेनैव स्वीकृतम्।..."

प्रभाचन्द्र (825 A. D.) in his प्रमेयकमलमार्तण्ड, a comm. on माणिकनन्दिन्'s परीक्षामुखसूत्र (1-3) (निर्णयसागर edition, p. 39), observes :—

'येऽपि शब्दाद्वैतवादिनो निखिलप्रत्ययानां शब्दानुविद्धत्वेनैव सविकल्पकत्वं मन्यन्ते ... ... सकलं चेदं वाच्यवाचकतत्त्वं शब्दब्रह्मण एव विवर्तो नान्यविवर्तो नापि स्वतन्त्रमिति'

"अनादिनिधनं शब्दब्रह्मतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥"

अनादिनिधनं हि शब्दब्रह्म उत्पादविनाशाभावात् अक्षरं च अकाराद्यक्षरस्य निमित्तत्वात् अनेन वाचकरूपता, 'अर्थभावेन' इत्यनेन तु वाच्यरूपताऽस्य सूचिता। प्रक्रियेति भेदाः। शब्दब्रह्मेति नामसङ्कीर्तनमिति। तेऽप्यतत्त्वज्ञाः शब्दानुविद्धत्वस्य ज्ञानेषु अप्रतिभासनात्। तद्धि प्रत्यक्षेण प्रतीयतेऽनुमानेन वा।.... ....

वादिदेवसूरि (about 1140 A. D.) in his स्याद्वादरत्नाकर (Poona edition p 90) thus quotes this famous कारिका:—

अपि च सकलमेवेदं वाच्यवाचकतत्त्वं शब्दब्रह्मण एव विवर्तो नान्यविवर्तो नापि स्वतन्त्रमिति। यथोक्तम् —

"अनादिनिधनं शब्दब्रह्मतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यथा॥"

अनादिनिधनं हि शब्दब्रह्म उत्पादविनाशाभावात्। अक्षरं चाकाराद्यक्षरस्य निमित्तत्वात् अनेन वाचकरूपता। अर्थभावेन इत्यनेन तु वाच्यरूपता सूचिता। प्रक्रिया इति भेदाः। शब्दब्रह्म इति नामसंकीर्तनमिति। व्यवहारोऽपि सकलः शब्दानुविद्ध एवानुभूयते।...... यथैव हि तिमिरतिरस्कृतलोचनो

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

जनो विशुद्धमप्याकाशं विचित्ररेखानिकरकरम्बितमिव मन्यते तथाऽनादिनिधनं अभिन्नस्वभावं ... प्रादुर्भावतिरोभावादिभेदप्रपञ्चान्वितमिव प्रतिपद्यते। तदुक्तम्

"यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः।
संकीर्णमिव मात्राभिश्चित्राभिरभिमन्यते ॥
तथेदममलं ब्रह्म निर्विकारमविद्यया।
कलुषत्वमिवापन्नं भेदरूपं तु पश्यति ॥" इति ॥

... यथा च वीचीबुद्बुदफेनरूपो वारिविकारः सारभूतं अमलं जलं आविर्भावतिरोभावार्थमपेक्षते तथा व्यावहारिकः स्थूलोऽयं अकारादिशब्दभेदप्रपञ्चः परमसूक्ष्मप्रतिभासमात्रैकरूपं सर्वशब्दविषयविज्ञानप्रसवनिमित्तं क्वाप्यनियमितैकनिजस्वभावं शब्दमयं ब्रह्मापेक्षते। उक्तं च

"अनुविद्धैकरूपत्वात् वीचीबुद्बुदफेनवत्।
वाचः सारमपेक्षन्ते शब्दब्रह्मोदकाद्वयम् ॥"

The two कारिका's quoted in the middle are found quoted in the स्वोपज्ञटीका of भर्तृहरि, but the last is not traced to any source.

राजशेखर in his काव्यमीमांसा (Ch. III, p. 32 of the Benares Edition, 1934) has probably this कारिका in view, when he says :—

'पुरा पुत्रीयन्ती सरस्वती तुषारगिरौ तपस्यामास। प्रीतेन मनसा तां विरिञ्चिः प्रोवाच — पुत्रं ते सृजामि। अथैषा काव्यपुरुषं सुषुवे। सोऽभ्युत्थाय सपादोपग्रहं छन्दस्वतीं वाचमुदचीचरत् —

"यदेतद्वाङ्मयं विश्वं अर्थमूर्त्या विवर्तते।
सोऽस्मि काव्यपुमानम्ब पादौ वन्देय तावकौ ॥"

जयन्तभट्ट in his न्यायमञ्जरी (Vizianagaram Sanskrit Series No. 10, p. 531) thus refers to and quotes this oft-quoted कारिका :—

अविद्यायामसत्यां सर्व एवायं यथोदाहृतो व्यवहारप्रकारस्तत्कृत इति नावतिष्ठते। सत्यां तु तस्यां नाद्वैतमिति। अत एवाह सूत्रकारः (न्यासू ४-१-४१) "संख्यैकान्तासिद्धिः प्रमाणोपपत्त्यनुपपत्तिभ्यामिति (v. l. कारणानुपपत्त्युपपत्तिभ्याम्) यदि तावदद्वैतसिद्धौ प्रमाणमस्ति तर्हि तदेव द्वितीयमिति नाद्वैतम्। अथ नास्ति प्रमाणं तथापि नतरामद्वैतमप्रमाणिकायाः सिद्धेरभावादिति।

'मन्त्रार्थवादोत्थविकल्पमूलं
अद्वैतवादं परिहृत्य तस्मात्।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

उपेयतामेष पदार्थभेदः
प्रत्यक्षलिङ्गागमगम्यमानः ॥'

एतेन शब्दाद्वैतवादोऽपि प्रत्युक्तः।

'अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥' इति।

उच्यते। तत्रानादिनिधनपदनिवेदिता पूर्वापरान्तरहिता वस्तुसत्ता नित्यत्वं ब्रह्मपदप्रतिपादितं च व्यापित्वमित्युभयमपि शब्दस्य प्रागेव निरस्तम्। निरवयवश्च स्फोटात्मा शब्दः प्रतिक्षिप्त एव। यत्तु नित्यं वा किञ्चिदुच्यते तच्छब्दतत्त्वमित्यत्र का युक्तिः। आह — "शब्दोपग्राह्यतया च शब्दतत्त्वम्।" This refers to स्वोपज्ञटीका of भर्तृहरि (वाप १-१).

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

Appendix IV

The following are some of the verses which are given by grammarians as from भर्तृहरि but which are not found in the present editions of वाक्यपदीय; either the वैयाकरण्स have wrongly quoted the name of the author, or portions of वाक्यपदीय are not extant; it may as well be that they quote from some work of भर्तृहरि which is lost. The verses are arranged alphabetically for easy reference.

१ हरिणाऽप्युक्तम् —

अत्यन्तासत्यपि स्वार्थे ज्ञानं शब्दः करोति हि। इति। (लम 379) बालंभट्ट in his कला on this completes this verse thus :

" ... ह्यर्थे .... ह।

प्रमाबाध्याऽप्रमा तत्र ह्यतः प्रामाण्यनिर्णयः ॥ "

इति खण्डनकारोक्तेः।

This verse occurs in the श्लोकवार्तिक of कुमारिल (चोदना-सूत्र–श्लो ६; p. 46 चौखम्बा edition) :—

'अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि।
तेनोत्सर्गे स्थिते तस्य दोषाभावात् प्रमाणता ॥'

लम (512) again quotes the first श्लोकार्धं with the reading ह्यर्थे for स्वार्थे & introduces it by saying merley तदुक्तम्; and yet again लम (1118) with त्वर्थे for ह्यर्थे.

लम (380) has this comment to offer on this :—'अत्यन्तेत्यस्य बहिरित्यादिः। ज्ञानं अवष्टभ्य शब्दः स्वप्रयोगं करोतीत्यपि तदर्थः। अत एव 'पुरुषस्य चैतन्यम्' इति तदुदाहरणं पातञ्जलभाष्ये दत्तम् (See व्यासभाष्य on योगसूत्र 1·9)। न हि तस्मादस्य कश्चिद्विशेषः।

२ 'अपाये यदुदासीनं चलं वा यदि वाऽचलम्।
ध्रुवमेवातदावेशात् तदपादानमुच्यते ॥'

भट्टोजि definitely attributes this verse to भर्तृहरि when he says in his शब्दकौस्तुभ on पा 1·4-24 'ध्रुवमपायेऽपादानम्' :— 'उक्तं च हरिणा प्रकीर्णकाण्डे — " अपाये यदुदासीनं ... तदपादान-मुच्यते " ॥ अतदावेशात् इति अपायानावेशादित्यर्थः।

कैयट before भट्टोजि hints at the existence of this verse in his comment on the above सूत्र : ध्रुवमेकरूपमुच्यते। तच्च

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

ध्रौव्यं अपायविषयं आश्रीयते न त्वनवच्छिन्नम्। ततोऽपाये यद्नाविष्टं तदपाये ध्रुवमुच्यते।

नागेश in his उद्योत explicitly refers to this कारिका as from भर्तृहरि thus: अपाये यदानाविष्टमिति। अपाये सति प्रकृतधातूपात्तया क्रियया यद्नाविष्टमित्यर्थः। एवं च प्रकृतधातूपात्तगत्यनाविष्टत्वमेव ध्रुवत्वमिति तात्पर्यम्। हरिरप्याह—'अपाये...अतदावेशा'दिति।

वैभू (कारिका 24; p. 110) refers to this कारिका, as also वैभूसा (p. 179):

"उक्तं च वाक्यपदीये—'अपाये यदुदासीनं...उच्यते॥' अपाये इति सतिसप्तमी। तथा च विश्लेषवत्त्वे सति विश्लेषहेतुक्रियायां उदासीनं अनाश्रयः। अतदावेशात् विश्लेषहेतुक्रियानाश्रयत्वात्। एवं च विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वं फलितम्। See also लम (1280). This कारिका is not found in the वाक्यपदीय, but it is often quoted as from हरि; its place can be said to be immediately before वाप 3·7·141–142.

२ 'अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः।
शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु॥'

Quoted by कै on पा 4·1·96 thus: यद्यपि क्रियाशब्दोऽपि नित्यः तथापि प्रसिद्धतरः संबन्धिलक्षणोऽर्थः इति तस्यैव ग्रहणं युक्तम्। उक्तं च हरिणा—'अभिव्यक्तपदार्था ये...' But this is not found in वाप though कै expressly says उक्तं च हरिणा. उ comments: अभिव्यक्तेत्यनेन अनाद्यर्थाभिधायित्वमुक्तम्। तेन आधुनिकसंज्ञानिरासः। तत्र तत्र 'असंज्ञायाम्' इत्युक्तेः अत्रैव भाष्ये उक्तत्वाच्च पदकार्यविषयोऽयम्। तत्रापि विशिष्टरूपोपादन एव। स्वतन्त्रा इत्यनेन गौणनिरासः। स हि संबन्धात् प्रवर्तते। लोकविश्रुता इत्यनेन अप्रयुक्तं निरस्तम्। तदुक्तिषु इति। तत्सदृशेषु इति। See also कै on पा 7·1·23:— यद्यपि 'अभिव्यक्तपदार्था ये ...' इति संज्ञाशब्दानामप्रसङ्गः तथापि न्यायानुसरणे गौरवप्रसङ्गात् नपुंसकानुवृत्तिराश्रीयते। .... शकौ on शिवसूत्र (2) 'ऋलृक्' refers to this न्यायः 'न ह्यत्र अतिदेशं विना त्यदाद्यत्वं लभ्यते 'अभिव्यक्त' इतिन्यायेन लोकप्रसिद्धार्थपरतायामेव तत्प्रवृत्तेः।

वैभू (225) says about this verse: इति वाक्यपदीयेनैव निरस्तत्वात्।

हरिभास्कर in his परिभाषाभास्कर (BORI edition of परिभाषासंग्रह p. 365) quotes this कारिका as of हरि: "मुख्यं प्रसिद्धं तदन्यद् गौणम्। यदुक्तं हरिणा:—'अभिव्यक्तपदार्था ये ...' ॥ इति॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

परिभाषेन्दुशेखर of नागोजीभट्ट (under परिभाषा 15 गौणमुख्ययोः मुख्ये कार्यसंप्रत्ययः) observes : ... पाठनक्रियान्वयकाले पदस्यैव गौणार्थत्वप्रतीतिः प्रयोक्तुरपि । एवमेतन्मूलको 'अभिव्यक्तपदार्था ये' इति श्लोकोऽपि पदकार्यविषयकः ।

तत्त्वप्रकाशिका justifies every पद of this श्लोक thus :— 'अभियुक्त०' इति अनेन गौणलाक्षणिकव्यावृत्तिः । 'लोकविश्रुता' इत्यनेन अप्रसिद्धस्य व्यावृत्तिः। 'स्वतन्त्रा' इत्यनेन अप्रधानस्य व्यावृत्तिः । 'शब्देषु न तदुक्तिषु' शास्त्रं न अनभिव्यक्तपदार्थकेषु शब्देषु प्रवर्तते ॥

४ 'अस्ति प्रवर्तनारूपं अनुरूपं चतुर्ष्वपि ।
तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया' ॥

लम 983 thus introduces this verse :— अत एव भगवान् पाणिनिः 'विधिनिमन्त्रण –' इति सूत्रे (3·3·161) विधिपदार्थं तद्विशेषनिमन्त्रणादिभिर्विवृतवान् । निमन्त्रणं नाम श्राद्धादिभोजनानुकूलो व्यापारः प्रयोजकनिष्ठो निमन्त्रयते इत्यादितः तथा प्रतीतेः । न चेष्टसाधनत्वं तन्निष्ठमित्युक्तम् । उक्तं च हरिणा 'अस्ति प्रवर्तनारूपम्....'

५ 'उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः ।'

Quoted by भ in शकौ (प्रस्तावना, p. 5) as expressly said by हरि :—

गौस्तिष्ठति देवदत्तः पचाति इत्यादयः शृङ्गग्राहिकया तावत् जन्मसहस्रेणापि बोधयितुं बोद्धुं चाशक्याः आनन्त्यात् । अतः प्रकृतिप्रत्ययविभागकल्पनारूपो लघुभूत उपायः समाश्रीयते लिपिवत् । आरोपित एव च तत्र संबन्धः । ... तात्पर्यविषयाबाधाच्च प्रामाण्यम् । एषैव हि अर्थवादेष्वपि गतिः । ... उक्तं च हरिणा —

'उपायाः ... समीहते ॥' इति ॥
'उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः ॥' इति च ।

शकौ on पा 3-1·51 refers to this again in general terms :— न च वैयाकरणानामुपायेषु आग्रहः । 'उपेयप्रतिपत्त्यर्थाः ...' इत्युक्तेः ।

वैभू (कारिका 67) reads :—

" पञ्चकोशादिवत् तस्मात् कल्पनैषा समाश्रिता ।
उपेयप्रतिपत्त्यर्था उपायाः अव्यवस्थिताः ॥ "

हरिभास्कर in his परिभाषाभास्कर (p. 319 परिभाषासंग्रह published by BORI) on परिभाषा 4 : आगमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ॥ says :—

" उपायस्योपायान्तरादूषकत्वादितिन्यायात् । उक्तं हि भर्तृहरिणाऽपि – 'उपेय० ... अव्यवस्थिता' इति ॥ "

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

६ वैभू (XV p. 61) quotes the following as from वाक्यपदीय :-
उक्तं च वाक्यपदीये —

क्रियायाः सिद्धतावस्था
साध्यावस्था च कीर्तिता ।
सिद्धतां द्रव्यमिच्छन्ति
तत्रैवेच्छन्ति घञ्विधिम् ॥ '

७ " गुणकर्मणि लादिविधिः पूर्वं गुणकर्मणा भवति योगः ।
मुख्यं कर्म प्रेप्सुर्यस्माद् गव्येव यतते प्राक् ॥ "

कै on भा on पा 1·4·51 introduces this कारिका thus :— पयोविवक्षायां च प्राधान्येऽपि अन्तरङ्गत्वात् गुणे लादयः । उक्तं च 'गुणकर्मणि ... '. नागेश supplies : 'हरिणा' इति शेषः । But it is not found in the extant वाप. As the meter differs from the usual अनुष्टुभ् of the वाप, it is not likely that this कारिका formed part of वाप. If नागेश is to be believed, it must be from some other work of भर्तृहरि, which is lost to us. The कारिका appears to be an easy rendering of the श्लोकवार्त्तिक on पा 1·4·51. उ comments :– अन्तरङ्गत्वादिति । प्रधानन्यायान्तरङ्गन्याययोः समत्वात् । पूर्वं गुणकर्मणा इत्यस्य 'यतः' इति शेषः । एवं गुणकर्मयोगे हेतुमाह – मुख्यं कर्मेति ।

८ " तस्माच्छुद्धस्य दुहेर्भवति गवा पूर्वमेव सम्बन्धः ।
गोदुहिना पयसस्तु प्राक् तस्माल्लादयस्तस्मिन् " ॥

As in the case of गुणकर्मणि लादिविधिः कै introduces this कारिका in भाष्य on पा 1·4·51; while ना supplies 'हरिणा' इति शेषः perhaps inadvertently.

९ " धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते " । Quoted by भ in शकौ on पा 1·3·1 thus : " यदि तु ' धातुना ... इष्यते ' इति भर्तृहरिप्रतिपादितरीत्या प्राधान्येन धातूपात्तव्यापारत्वरूपं कर्तृत्वं तवापि संमतं कस्तर्हीदानीमाख्यातार्थः । व्यापारस्य धातुनैवाभिहितत्वात् । (This श्लोकार्ध is not found in वाप). Again on पा·1·4·54, शकौ quotes this : ' क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात् । धातूपात्तव्यापाराश्रयत्वं स्वातन्त्र्यम् । आह च – ' धातुना ... ' (Although not specifically said, हरिरपि is to be taken for granted here as elsewhere.) वैभूसा (p. 167) quotes the half-verse as from वाप— ' ... इति वाक्यपदीयात् '. This श्लोकार्ध is the second half of कुमारिल's मीमांसाश्लोकवार्त्तिक (वाक्याधिकरण) – श्लोक 71 (p. 865 चौखम्बा edition).

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

१० " धातुसाधनकालानां प्राप्त्यर्थं नियमस्य च।
अनुबन्धविकाराणां रूढ्यर्थं च निपातनम् ॥ "

Quoted by कै on पा 5-1-14 but not found in वाप; शकौ on पा 3-1-101 observes :—पणेर्व्यवहारार्थत्वात् ण्यति प्राप्ते 'यत्' विधीयते। पण्यः कम्बलः पण्या गौः। पाण्यमन्यत् स्तुत्यर्हमित्यर्थः। पणितव्यशब्दस्य साधारणत्वेऽपि निपातनस्य रूढ्यर्थत्वात् पण्यशब्दस्य व्यवहर्तव्ये एव रूढत्वात् अर्थनियमो लभ्यते। उक्तं च–" धातु०... " It can almost be taken for granted that हरिणा is meant.

१० a धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते। " Quoted by क्षीर-स्वामिन्, as from हरिकारिका acc. to the editor, on अमरकोशः– भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु। स्यादुत्पादे फले पुष्पे " thus : चेष्टा क्रिया यथा— ' धात्वर्थः ... अभिधीयते. '

दुर्ग on यास्क (1-1) perhaps refers to this when he explains :—अपरे पुनर्भावप्रधानमाख्यातमिति प्रकृत्यर्थप्रधानमिति मन्यन्ते— प्रकृत्यर्थविशेषणं हि प्रत्ययार्थादय इति। भावः कर्म क्रिया धात्वर्थः इति अनर्थान्तरम्।

११ न हि किञ्चित् पदं नाम रूपेण नियतं क्वचित्।
पदानामर्थरूपं च वाक्यार्थादेव जायते ॥

लम (412) cites this along with वाप (2·410) ' यथैवानर्थकैः ... " and hence perhaps, in his view, this verse is from वाप but it cannot be traced. स्वोपज्ञ on वाप (1·26) cites this as from संग्रह of व्याडि thus :

' संग्रहेऽप्युक्तं —

**" नहि किञ्चित् पदं नाम ...।
पदानां रूपमर्थो वा ... ॥ "**

१२ **न हि गौः स्वरूपेण गौः नाप्यगौः गोत्वाभिसंबन्धात्तु गौः।**

उ on पा 2.2.5 while commenting on वाप 3·9·6 and 7 referred to by कै says :— ' भेदाभेदौ एकत्वानेकत्वे शुक्लत्वकृष्णत्वे इत्यादि सर्वमपि न कस्यचित् स्वाभाविकमित्यर्थः। तदुक्तं — ' न हि गौः स्वरूपेण गौः ... गौ 'रिति। किं तु औपाधिकमेव।' हेलाराज on वाप 3-9·7 probably refers to this thus :— एवं गोत्वादिसमवायात् गौरित्यादिव्यवहारा बोद्धव्याः।

मम्मट, the famous आलंकारिक, says in his काव्य-प्रकाश (2·8):—

' संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा '। स्वोपज्ञटीका follows— यद्यपि अर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव तथापि आन-

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

न्यात् व्यभिचाराच्च तत्र संकेतः कर्तुं न युज्यते इति गौः शुक्लः चलो डित्थ इत्यादीनां विषयविभागो न प्राप्नोति इति च तदुपाधावेव संकेतः।

उपाधिश्च द्विविधः। वस्तुधर्मो वक्तृयदृच्छासंनिवेशितश्च। वस्तुधर्मोऽपि द्विविधः। सिद्धः साध्यश्च। सिद्धोऽपि द्विविधः। पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च। तत्राद्यो जातिः। उक्तं हि वाक्यपदीये—"न हि गौः स्वरूपेण गौः नाप्यगौः गोत्वाभिसम्बन्धात्तु गौः" इति। and so on. Being obviously a prose-passage, it could not have formed part of the वाक्यपदीय in verse; it may be found in his दीपिका on महाभाष्य or in some other work of his, which has not yet seen the light of day.

जयरथ in his व्याख्या on अभिनवगुप्त's तन्त्रालोक (1·82; Vol 1 pp 123–4)

'तत्त्वग्रामस्य सर्वस्य धर्मः स्यादनपायवान्।
आत्मैव हि स्वभावेति उक्तं श्रीत्रिशिरोमते॥'

probably refer to this :—

'द्विविधो हि धर्मः पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च। आद्यो यथा सामान्यं — न हि गोत्वमन्तरेण गौर्गौरेव भवति। द्वितीयो यथा गुणः शुक्लादिर्हि लब्धसत्ताकं वस्तु विशिनष्टि। एवमिह आत्मैव तत्त्वसमूहस्य प्राणप्रदत्वात् स्वभावभूतो धर्मः, अत एव अनपायवान् नित्यावियुक्तः इत्युक्तम्।'

He in his विवेक (1150 AD) on तन्त्रालोक (10·74-5) of अभिनवगुप्त (1014 AD) quotes this passage & possibly something more : 'तत्र यथैव द्रव्यादयस्त्रयः स्वरूपेण न सन्तो नासन्तः सत्तासमवायत्तु सन्तः। सत्ता तु स्वरूपेणैव सत्त्वात् सती असती वा इति पर्यनुयोगपात्रम् (० मात्रं–इति पाठः)। अनेनापरमपि सामान्यमुपलक्षितम्। यतो "गौः स्वरूपेण न गौः नागौः गोत्वाभिसम्बन्धात्तु गौः गोत्वं तु स्वत एव तथात्वात् न जात्यन्तरयोगमावहति।" ...'

१३ लम (984) : उक्तं च हरिणा—

'न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा।
विध्यादीनामुपादानं चतुर्णामादितः कृतम्॥'

न्यायेत्यस्य प्रागुक्तन्यायेत्यर्थः। नन्वस्य लोकव्युत्पत्त्यैव सिद्धिः। अतः प्रपञ्चार्थमिति। चतुर्णामिति उपलक्षणं प्रार्थनस्यापि। But this is not traced in the extant वाप.

१४ 'पततो ध्रुव एवाश्वो यस्मादश्वात् पतत्यसौ।
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमुच्यते॥'

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

This कारिका, along with अपाये यदुदासीनं ..., is often quoted as from हरि immediately before वाप 3-7-141–2; वैसू (XXIV 110) and वैभूसा (179) quote this; लम (1286) observes :—

'धावतोऽश्वात् पतति कुड्यात् पततोऽश्वात् पतति' इत्यादौ पततीत्युपात्तक्रियानाश्रयत्वेन तां प्रति अश्वस्यापादानत्वमक्षतम् । तदुक्तं हरिणा 'अपाये ...'

१५ 'पदात् पदार्थस्मरणम्'. शकौ on पा 2·2·10 observes :—
'कथं तर्हि हरिस्मरणं — "विशेषस्मृतिहेतवः" (वाप 2·316) "पदात् पदार्थस्मरणम्" इत्यादि इति चेत् कर्मणि षष्ठ्या समासस्यानिषेधादिति गृहाण ।

१६ 'प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ् ।'

शकौ on पा 1-1·4 says :—

... कारकविशिष्टा क्रिया वाक्यार्थ इति सिद्धान्तात् । आह च — 'साकाङ्क्षावयवं...वाक्यमुच्यते' ॥ (वाप 2·4) किञ्च सिद्धान्ते प्रसज्यप्रतिषेधे सर्वत्र क्रिययैव सह नञोऽन्वयो न तु नामार्थेन । तदुक्तं — 'प्रसज्यप्रतिषेधोऽयम्...' अत एव पुरुषवचनयोरसङ्करः ।

हरिभास्कर in his परिभाषाभास्कर (BORI edition of परिभाषासंग्रह p. 335-6) says:—तदेतदाहुर्भट्टपादाः 'प्रसज्यप्रतिषेधोऽयम्...' attributug this कारिका to कुमारिल; untraced

१७ 'प्रसिद्धन्यायकरणो युजिर्भाष्ये उदाहृतः' This is quoted by अभिनवगुप्त in his ईप्रविवि (Vol III p. 86) with the words : तथा च तत्रभवान्, by which he generally means भर्तृहरि; is the reference to भाष्य in respect of पा 3-1-87 वा 15 : युजेस्तु न्याय्ये कर्मकर्तरि यकोऽभावाय । युज्यते ब्रह्मचारी योगम् । ?

१८ 'बुद्धिभक्षार्थयोः शब्दकर्मणां च निजेच्छया ।
प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः ॥'

उ quotes this on पा 1·4·51; but the topic dealt with in the कारिका has to do with पा 1·4·52 गतिबुद्धिप्रत्यवसानार्थशब्दकर्म ... & वार्त्तिकs thereon.

१९ 'भेद्यभेदकसंबन्धोपाधिभेदनिबन्धनम् ।
साधुत्वं तदभावेऽपि बोधो नेह निवार्यते ॥'

This is कारिका XXI of भट्टोजि दीक्षित (See वैभूसा 110); although it is attributed to हरि by नागेश it is not found in वाप.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

लम (746) : न च व्याकरणं साधुत्वमात्रतात्पर्यकं न अर्थव्यवस्थापकं इति वाच्यम् । व्याकरणं शक्तिग्राहकमिति त्वद्वृद्धोक्त्यसङ्गतेः ।

अर्थविशेषपुरस्कारेणैव साधुत्वस्य भाष्यसंमतत्वाच्च । 'पदसमयज्ञानार्थं व्याकरण'मिति न्यायभाष्योक्तेश्च । तदुक्तं हरिणा—'भेद्यभेदकसम्बन्ध० ...', and again लम (799) : किञ्च तव पचति व्रजति इत्यस्य साधुतापत्तिः । स्वस्वव्युत्पत्त्यनुसारेण बोधस्य दुर्वारत्वेऽपि तत्र साधुत्वस्यापाद्यत्वात् । साधुत्वं च तत्तदर्थनिरूपणाभियुक्तवैयाकरणसंमते एव अर्थे नान्यत्र इति 'भेद्यभेदकसंबन्धे'त्यादिना स्पष्टमेव हरिणोक्तम् ।

२० 'यत् संज्ञास्मरणं तत्र न तदप्यन्यहेतुकम् ।
पिण्ड एव हि दृष्टः सन् संज्ञां स्मारयितुं क्षमः ॥'

This verse, along with

संज्ञा हि स्मर्यमाणाऽपि प्रत्यक्षत्वं न बाधते ।
संज्ञिनः सा तटस्था हि न रूपाच्छादनक्षमा ॥

occurs in वाचस्पतिमिश्र's (850 A. D.) भामती on शांकरभाष्य on ब्रह्मसूत्र (1·3·10) (p. 284 of निर्णयसागर edition) as a quotation. Quoted by शकौ under स्फोटस्वरूपव्युत्पादन at the outset of his comm. on the महाभाष्य, along with वाप (1-123 and I·55); शब्दरत्न of हरिदीक्षित (a commentary on प्रौढमनोरमा of भट्टोजि दीक्षित) quotes the second श्लोकार्ध thus :—

'पिण्ड एव हि दृष्टः सत्संज्ञां स्मारयितुं क्षमः ।'

इति वाक्यपदीयोक्तरीत्या ... (p. 66 of the Deccan College edition, just now in the press); mark the reading सत् for सन् of शकौ.

२१ 'यथा मणिकृपाणादौ रूपमेकमनेकधा ।
तथैव ध्वनिषु स्फोट एक एव विभिद्यते ॥'

वैभू LXVI 252 quotes this; also गोकुलनाथमिश्र in his पदवाक्यरत्नाकर (p 393);

'तदुक्तं वाक्यपदीये—'

This कारिका occurs in स्फोटतत्त्वनिरूपण of शेषकृष्ण. The reason why एकत्व of स्फोट has to be accepted is thus given by वादार्थसंग्रह :—

'तत्र वर्णा न प्रत्येकमर्थमभिदधाति । प्रथमवर्णादेवार्थप्रतीतौ वर्णान्तरवैयर्थ्यापत्तेः । नापि मिलिताः । उच्चरितप्रध्वंसिनां क्रमिकाणां मेलनाभावात् ।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

नाप्येकस्मृतिगोचराः। नदी रस इत्यादौ दीन सर इत्येकस्मृतिविषयत्वेन अविशेषापत्तेः। अतो वर्णाभिव्यङ्ग्यः पदस्फोटो वाक्यस्फोटो वाऽनवयवः एकः नित्यः अर्थवाचकः' (Bombay Sanskrit and Prakrit series, No LXX वैयाकरणभूषण of कोण्डभट्ट pp. 714–715.)

२२ 'व्यक्तौ कार्याणि संसृष्टा जातिस्तु प्रतिपद्यते।' कदाचिदेकेनैव शब्देन द्रव्यगताद्वित्वादिमत्त्वेन प्रतीतिरित्यादि ऊह्यम्। हरिश्चाह—'व्यक्तौ...' इति केचित्। वस्तुतस्तु सम्बन्धात् स्मृतव्यक्तेर्भानमित्येव न्याय्यम्।

२३ 'शक्तिप्रमाणसंख्यादेर्द्रव्यधर्माद्विशिष्यते।
क्रियासु कालयोगोऽतः प्राग्योगो द्रव्यकर्मणा॥'

हेलाराज on वाप 3-7-67 'कालभाव०' remarks :—'द्विविधं कर्म। अन्तरङ्गं बहिरङ्गं च। तत्र द्रव्यकर्म अन्तरङ्गं तेनैव च पूर्वं सम्बन्धः। बहिरङ्गं कालादिलक्षणं कर्म। यद् वक्ष्यते—'शक्तिप्रमाण०' इत्यादि-श्लोकेन। तत्र सकर्मकत्वाकर्मकत्वव्यपदेशोऽन्तरङ्गेणैव न्याय्यः and then under वाप 3-7-68 'आधारत्वं ....' he continues : 'द्रव्य-कर्मणा च पूर्वं क्रियायोगः। तद्द्वारेण तु कालादिकर्मणा इति भिन्ना कक्ष्या अवस्थाऽस्य कर्मत्वस्य। तथाहि—'शक्ति०' इत्युक्तम्। From words वक्ष्यते (3-7-67) and उक्तम् (3-7-68,), it can be surmised that शक्ति० was in वाप in between the two कारिकाs.

कै on भा on पा 1-4-52 introduces the topic thus :—

'अथवेति। अकर्मकश्रुत्या अन्तरङ्गं द्रव्यकर्म निषिध्यते। न बहिरङ्गं कालादिकर्म। तथाहि—पूर्वं क्रियाया द्रव्यकर्मणा सह सम्बन्धो भवति। पश्चात् कालादिभिः परिमाणनिर्धारणाय। तथा चोक्तं—'शक्ति०...'' उ comments on this कारिका :— शक्तिप्रमाणेति। द्रव्यधर्मरूपात् शक्त्यादेः सकाशात् क्रियासु कालयोगः प्रवर्तते इत्यर्थः। तत्र शक्तेः यथा वसन्तादिकालयोगः पल्लवजन्मादेः। प्रमाणवशात् यथा दीर्घशष्कुल्यादि-चर्वणस्य दण्डादिकालयोगः। संख्यावशात् यथा नानाद्रव्यकर्मकपाकस्य।... Neither कै nor ना says हरिणोक्तम्. It is only शकौ (पा 1·4·51) which expressly attributes this कारिका to हरि :—'जाति-व्यक्तिपक्षयोर्लक्ष्यानुरोधेन व्यवस्था इति सिद्धान्तात्। उक्तं च हरिणा—"शक्ति० ..."

२४ लम (71): तदुक्तं हरिणा—

'शब्दतत्त्वविदः शिष्टाः शब्दार्थेषु व्यवस्थिताः।'

आर्याणां शिष्टत्वात् तत्प्रसिद्धेर्बलवत्त्वमिति बोध्यं न तु अनार्यप्रसिद्धेऽर्थेऽशक्तत्वेऽसाधुत्वे वा तात्पर्यम्।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

२५ ‘सदपीच्छाक्यचः कर्म तदाचारक्यचा हृतम् ।
वाक्यवाच्यमतोऽव्यक्तेर्यथाऽभ्यासः क्रमादिषु ॥’

कै on पा 3·1·8 quoted this thus : ‘तदुक्तं हरिणा—सदपीच्छाक्यचः ...’ (It is not in the extant वाप except for the first ... पाद in 3·14·72 c) with the opening remark—‘व्यापारो नारम्भणीयः यत्नमन्तरेणापि इष्टस्य सिद्धत्वादित्यर्थः । क्यच् तु अगमकत्वात् न भवति ।’ उ comments : ‘सापेक्षेभ्योऽपि मुण्डादिसूत्रारम्भसामर्थ्यात् इत्येवंरूपो, धातव इत्येवंरूपो वा, नेदमुभयं इत्यादिरूपो वा इत्यर्थः । अगमकत्वात् इति ण्यन्तवृत्तौ मुण्डशब्दो भावप्रधान इत्युक्तन्यायेन भवति वृत्तिः । क्यजन्तवृत्तौ तु धर्मिपर एव अतस्तत्र नेच्छाक्यच् असामर्थ्यात् । अत एव क्यजन्तात् तस्मात् आचारार्थप्रतीतिरेव । तदाह- ‘सदपी’ति । न्यायतः सम्भवदपि इत्यर्थः । आचारक्यचा हृतम् निरवकाशीकृतं निरूढतया तदर्थस्यैव प्रतीतिरित्यर्थ इति भावः । अतः तत् वाक्यवाच्यमेव—‘माणवकं मुण्डमिच्छति’ इत्यनेनैव बोधनीयं न तु क्यजन्तेन । तत्र हेतुमाह—अत इति । क्यजन्तात् अव्यक्तेः इत्यर्थः । यथा क्रमादिधातुषु अभ्यासः पौनःपुन्यं वाक्येनैव गम्यते न तु यङा तत्प्रकृतिकस्य तस्य कौटिल्ये निरूढेरिति भावः । अन्यत्रोक्तं हरिणा—‘सदपीच्छाक्यचः कर्म...’। एतेन वेदादिविषयोऽभ्यासः यथा क्रमादिषु व्यज्यते इत्यर्थः । यद्वा विसर्गरहितपाठेन (i. e. अभ्यासक्रमादिषु) अभ्यासेन वर्णक्रमादिविषयाभिव्यक्तिः इत्यर्थो विवरणकारोक्तोऽपास्तः । ...

शकौ on पा 3-1-8 quotes this कारिका as from हरि thus :—

‘...क्यच्प्रत्ययस्तु अनभिधानात् न भवति । माणवकं मुण्डीयति इत्युक्ते मुण्डमिव आचरति इति अर्थान्तरमेव गम्यते । तदुक्तं हरिणा—‘सदपीच्छा०...’। अस्यार्थः—सदपि न्यायतः सम्भवदपि इच्छाक्यचः कर्म वाक्यवाच्यं माणवकं मुण्डमिच्छति इत्येवंरूपेण बोधनीयं न तु क्यजन्तेन यत आचारक्यचा हृतं निरवकाशीकृतं तदर्थस्यैव निरूढेः । आचारक्यचा हरणे वाक्यवाच्यत्वे वा हेतुमाह— अतो व्यक्तेरिति । अतो अस्मात् क्यचो व्यक्तेः आचारार्थस्यैव प्रतीतेः । अतो वाक्यात् इच्छाकर्मणः प्रतीतेरिति वा । यथा क्रमादिषु गत्यर्थेषु अभ्यासः पौनःपुन्यं वाक्येनैव गम्यते न तु यङा । कौटिल्ये निरूढेः । ... अथवा अभ्यासक्रमादिषु इत्येकं पदम् । अभ्यासेन वर्णक्रमादिविषयाभिव्यक्तिर्भवति । तथा वाक्येन कर्मत्वविषयाभिव्यक्तिरित्यर्थः इति विवरणं प्रत्युक्तम् ।

२६ लम (1546) :

“सर्वत्र समासादौ सम्बन्ध एव भावप्रत्ययं” वदता हरिणा विभक्त्यर्थमात्रस्य षष्ठ्यर्थवत् सम्बन्धतया भानमिति सूचितम् ; untraced.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

२७ लम (३१२) :

"सर्वशब्दानां ब्रह्मैव वाच्यं वाचकं च" इति हरिणा सिद्धान्तितम्। Perhaps वाप 1-131 & 132 are referred to or वृषभदेव's comm. on वाप 1-1 : 'प्रतीयमानमसत्यं ब्रह्मैव सर्वशब्दानां अर्थः इति अभिधेयसङ्करः स्यात्'.

२८ 'सामान्यान्यभिधीयन्ते सत्ता वा तैर्विशेषिता।
संज्ञाशब्दस्वरूपं वा प्रत्ययैस्त्वतलादिभिः ॥"

Quoted in शकौ on पा 1-1-1 thus : आह च—'सामान्यानि ... त्वतलादिभिः ॥' इत्थं पदविभागः पदसाधुत्वं चोक्तम्। वाक्यार्थस्तु संज्ञासंज्ञिभावः। वैभू L 223 quotes this कारिका, by saying उक्तं च हरिणा.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

Appendix V

Glossary of important words in the Vākyapadīya.

(Note : Exhaustive references to all the places of occurrence are not attempted ; figures in brackets opposite the words show that the words are taken from the commentary.)

अ

अकथित III. 7.70, 71. (Lit. unmentioned). The word is used in connection with such an object of activity (कर्मन्) as is not expressed by any other case-relation such as अपादान, संप्रदान or अधिकरण which, in fact, is a proper relation there, but which is set aside for the time being. This unmentioned object is different from the main (प्रधान) object which is directly required by the verbal activity, and hence it is called indirect (गौण). Cf गां दोग्धि पय इत्यत्र अपादानादिविशेषकथाभिरकथितं द्रव्यकर्मापि गवादि पयःप्रभृतिप्रधानकर्मापेक्षया उपायभूतं नान्तरीयकत्वाद् भिन्नकक्ष्यम् । (हे).

अकर्मकैर्योगे कर्म III. 7.67. An object governed by an intransitive root by virtue of the activity of a transitive root which is suppressed; as, for instance, in मासमास्ते where the word व्याप्य which governs मासं as an object, is suppressed, See p. 257 and p. 340. Cf अन्तर्भूतक्रियान्तरैरिति । अन्तर्भूतं प्रधानक्रियापेक्षया क्रियान्तरं येषामिति ते तथा । तैर्योगे संबन्धे सति कर्मत्वं सिध्यति। (हे).

अकर्मिका क्रिया III. 7.88. The activity of a transitive root like that of an intransitive root by virtue of the suppression of its object as, for instance, in नदी वहति and the like. (See p. 258.)

अकृत्रिम II. 366. Natural, not brought about; inherent. See p. 236. Cf कृत्रिमत्वमाधुनिकत्वमिति भावः । यथा गुणद्रव्ययोर्गुणे विशेषणत्वं द्रव्ये विशेष्यत्वम् । अकृत्रिममनादिसिद्धमेव न त्वाधुनिकम् (कै. on पा. IV. 1.162.).

अङ्गिरस् I.21. Name of an ancient sage-family believed to have seen the Atharvaveda hymns; the word is used here in the sense of the hymns of the Atharvaveda in juxtaposition with साम्नामृग्यजुषस्य च.

अतिदेश II. 78. Transferred treatment; extended application; use of the epithets of one in the case of another. Cf अन्यत्र अन्यधर्मपरिप्रापणमतिदेशः (पु). It is of two kinds सामान्यातिदेश and विशेषातिदेश.

अतीताख्या शक्तिः III. 9.51. Potency which is known by the name 'past' and which stops the notion of 'present'. Cf. जन्मशक्तिर्वर्तमानाख्या एव अतीतशक्त्या तु निरुध्यते (हे).

वा. ४७

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

अतुल्यविभक्ति (समास) III. 14.478. A compound having its members in different cases. Cf यथा कायस्य पूर्वः परो वा भाग इति । (हे).

अथर्वन् I. 21. Name of an ancient sage-family believed to have seen the Atharvaveda. Here the word is applied to the hymns of the Atharvaveda, in juxtaposition with साम्नामृग्यजुषस्य च. (See अङ्गिरस्).

अधिकरण (1) II. 116. Topic under consideration विचारस्थानम् (पु).
(2) III. 7.148,155. A case-relation of the type of locus shown generally by the locative case-affixes. See p. 345.

अधिकार II. 79 Jurisdiction, region of application. Cf प्रतिपाद्येषु शब्देषु व्याकरणशास्त्रस्याधिकारः । अभिधेये एवार्थे शब्दस्याधिकारः (पु).

अधिक्रतु II. 254. In a sacrifice; at the time of a sacrifice यजनसमये (पु). Cf अधियज्ञ in the same sense; the pair अध्यात्म and अधिदैव is common in the Upanishads. अधिक्रतु is a new word.

अध्यारोप III. 11.10 Superimposition, as that of a word upon the object denoted by it which leads to their identity. Cf. अर्थजातीनां गोत्वादीनामात्मसु तस्याः शब्दजातेः समारोपस्य कल्पना, न परमार्थः । (हे).

अध्याहित (variant for अव्याहत) I.3. Superimposed, imagined as existing.

अनवस्था III. 14. 220. Fault of endlessness of the type of infinite repetition, (lit-disorder); absense of finiteness.

अनवस्थित I. 106 Repeating or going on without interruption.

अनागम II. 188. Without any known cause; instinctive.

अनिबन्धन I. 138. Without prop or support; शुष्कतर्कः (पु.); without any real object as its foundation; निर्विषयः (वृ.).

अनुकार (1) I. 5. Prototype; image. Cf अनुकार इति प्रतिच्छन्दकः । (वृ.)
(2) I. 86. Supposition as the same; false coalescence; false identification; प्रत्यवभासनम् (पु.). Cf "भवेदभिनयोऽवस्थानुकारः स चतुर्विधः ॥" (साहित्यदर्पणः)

अनुतन्त्र I·23. Lit. subsidiary to an authoritative scientific work. The Vārttikas which supplement the sūtras of Pāṇini. अनुतन्त्रं वार्तिकम् (वृ.).

अनुनिष्पत्ति II·362. Subsequent occurrence. See p. 235.

अनुनिष्पादिन् (1) II·121, 124, 360. Occurring subsequently; words which come to be used after the principal word as दत्त, for instance, for देवदत्त or भामा for सत्यभामा.
(2) III. 9.67. Produced afterwards; the word is used in connection with sounds which remain in the brain after a word is heard.

अनुप्रयोग III·14·233. Use of a word immediately after another as that of a form of the perfect

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

tense of the roots कृ, भू and अस् after a verbal form ending in आम्. e.g. कारयांचकार, कारयांबभूव कारयामास.

अनुप्रवृत्ति III-1-14. Application after an application as in the case of जाति (genus) which having been completely applied to one individual becomes appiicable to another similar individual.

अनुवाद II-115. Restatement of what has been told, which is for the purpose of clarification, or for restriction of sense (नियम). Cf. आवृत्तिरनुवादो वा. (वाप)

अनुषङ्गिणी II-122 Necessarily accompanying.

अनुसंहृति II-1 Recapitulation; grasp (by the mind). Cf 'विज्ञातस्यानुसंहारः' । भा (अनुसंहारः उपसंहारः उ. on पा. I. 1.52).

अन्तःकरणतत्त्व III-7-41. Lit. essence of the mind; internal thinking principle. Cf यदन्तर्ज्ञेयतत्त्वं तद्वहिर्वद्भासते; mental conception to which the external appearances of objects like the earth, the sun, the moon and the like correspond so as to coincide with it. See pp. 253, 254, 338.

अन्वाख्यान II-170, 231, 440, 448; III-14,171, 272. Lit. restatement; expression of what is already in existence; explanation of what is known or current. The word is used in connection with grammatical explanation by finding out the base and the affix or affixes, augments, substitutes of words which are already in use etc.

अन्वाख्यानस्मृति II-231 The traditional work on the explanation of words by finding out the base and the affix; a treatise on grammar. अन्वाख्यानस्मृतौ शब्दानुशासनस्मृतौ (पु.)

अन्वाख्यायक II. 362; III. 14.615. Lit. explanatory. The word is used in connection with the science of grammar when it qualifies the word शास्त्र. When it qualifies the word वाक्य it refers to what is termed प्रक्रियावाक्य. See p. 235.

अन्वाख्येय I. 24; III, 14.74. What is to be explained by its division into a base and an affix; the word अन्वाख्येय as qualifying the word शब्द is taken to mean 'fit for use', 'which can be used.' अन्वाख्येयाः प्रयोगार्हाः साधवः (वृ.)

अन्वाख्येयत्व III.14,277. Explanation; grammatical explanation.

अन्विताभिधानपक्ष [II. 1.]. The view or theory of connected denotation. The view that the various words constituting a sentence give connected meanings. The view is propounded by the Prābhākara Mīmāmsakas in contrast with the view called अभिहितान्वयपक्ष which is advocated by the followers of कुमारिलभट्ट who are known as Bhaṭṭa Mimamnsakas.

अपभ्रंश I. 148, 153, 154. Lit. dropped or gone astray; a word which

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

although grammatically incorrect, gives or expresses a sense by presenting the correct word to the mind. See p.216. Cf. शब्दप्रकृतिरपभ्रंशः (संग्रह); सर्वस्य ह्यपभ्रंशस्य साधुरेव प्रकृतिः (पु).

अपवर्ग I. 14. Absolution, freedom from bondage; trasmigration. See p. 200. अपवर्गः कैवल्यम् (पु)

अपवाद II. 349. A sentence or an expression forming an exception to the general rule which is termed न्याय or न्याय्य or प्राप्य and with which a connected explanation of the अपवाद sentence has to be given. See p. 235. Cf प्राप्यापवादयोरुत्सर्गापवादयोराख्यातभेदेपि एकवाक्यतैवेष्यते (पु).

अपादान III. 7. 136. Lit. removal detachment; technically explained as that which is stationary on the removal or detachment of something which was previously attached to it. Cf ध्रुवमपायेऽपादानम् (पा. 1.4.24) अपादान is an instrument of activity (कारक) to denote which, the ablative case is used. See p.344. Cf ध्रुवं यदपाययुक्तं अपाये, साध्ये यदवधिभूतं तत्कारकं अपादानसंज्ञं भवति (का०).

अपाय III. 7.4 Removal; detachment; separation.

अपोद्धार I. 24; II. 10, 269, 442; III. 13.6, III. 14.145. Separation, division, detachment. Cf अपोद्धारो विभागः (वृ). The word is used, rather technically, in the sense of the separation of the base from the affix. The word also means a separated part of a word, such as the base separated from the affix, or the affix separated from the base, to which an individually separate sense is attributed by grammarians.

अपोद्धृत II. 88; III 14.170. Lit. taken away (as a part) from the whole; part of the sense of a word taken out from the composite sense possessed by the whole word.

अपोह in भेदापोह III 1,98; removal (of difference); अनालीढभेदं तदननुस्यूतं वा (हे).

अभिख्या I. 146. Consciousness; knowledge.

अभिघात (in द्रव्याभिघात) I. 105. Lit. stroke; the striking of the place of the production of sound by the instrument producing the sound. स्थानस्य करणेन प्रहारः (वृ)

अभिजल्प II. 128. A word standing as identical with the object denoted by it. See p. 222,223.

अभिधा II. 402, The activity of a word in showing its sense; the power of denotation; a relation between the word and its sense, viz. the object denoted by it. Cf अभिधानाभिधेययोर्वाच्यवाचकभावलक्षणः संबन्धः अभिधाख्येन शब्दव्यापारेण नियम्यते (पु).

अभिधान II. 160, 165, 168, 402, 403, 405, etc. III. 3.4. III. 8.2. Denotation of sense which is looked

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

upon as a natural function of a word. Cf अभिधानं पुनः स्वाभाविकम् given as a very general dictum by the author of the Mahābhāsya.

अभिधानक्रिया II. 106. Function of denotation which is effected in language by the use of words related to each other. Cf अभिधान-क्रिया संहितयोच्चारणमेव (पु.)

अभिधेय II. 113.402, III. 3. 4, 34; III. 14.336, 337. Sense conveyed by a word.

अभिव्यक्ति III. 1. 26. Manifestation, clear presentation.

अभिसंधान [II. 401]. Concentration of mind or of mental activity.

अभिसंहित II. 401. Lit. carefully directed towards. The word is used in connection with a word which is carefully directed towards its power of denotation with a view to communicate the intended sense.

अभिहितान्वयपक्ष [II. 1; II. 41, 42] Theory of denotation by words possessed of individually separate senses giving rise to a different kind of sense known as purport or तात्पर्य when they are taken together. This view propounded by the Bhāṭṭa school of the Mīmāṃsakas is opposed to the other view viz. अन्विताभिधानपक्ष propounded by the Prābhākara School.

अभ्यास II.117,235. (1) Approach to a subject, close application. The word is used in the sense of practice for a long time. (2) Repetition of a word or a word-base such as a noun-base or a root as noticed in the case of the perfect tense and the frequentative.

अभ्युच्चय III. 14. 90,96,98 Lit. accumulation or addition of sense brought about by the addition of adjectives or qualifying words.

अर्थ (1) II. 79. Sense of a word; the object shown by a word. This sense of a word is described as having 18 kinds. Cf अर्थोऽष्टादशधा। तत्र वस्तुमात्रमभिधेयश्च। अभिधेयोपि द्विधा। शास्त्रीयो लौकिकश्च ....(पु) (2) II. 264, 268, 315, 331. Purpose as a means to decide the meaning of a word.

अर्थक्रिया III. 11.14 Purpose of existence as noticed in every object in nature. Cf पृथिव्यादिषु भूतेषु प्रतिष्ठा-संग्रहपङ्क्तिव्यूहावकाशदानलक्षणा अर्थक्रिया ...(पु)

अर्थजाति III. 1·6, 8, 11 Genus or general nature possessed in common with others by individual objects, on which the corresponding genus of the word denoting the object is superimposed.

अर्थप्रवृत्तितत्त्व I. 13. Underlying principle in the use of a word in language; the desire on the part of a speaker to communicate his

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

thought. Cf अर्थप्रवृत्तितत्त्वं विवक्षा; न तु वस्तुतः स्वरूपेण सत्त्वमसत्त्वं वा। विवक्षैव हि शब्दप्रयोगनिबन्धनम् (हे).

अर्थवाद I 8. A sentence of Vedic literature which directly does not enjoin or prohibit an activity, but supports the injunction or prohibition. अर्थार्थः प्रयोजनार्थः वादः.

अर्थविभागहेतु, अर्थावच्छेदहेतु [II.314, 316] A factor which determines the intended sense out of the various senses that arise in the mind. See pp. 232, 235.

अर्थित्व II. 79. The conditon of being needy, desire to possess, described as a cause of being entitled to do a thing.

अर्धह्रस्व [II. 308] Lit. half of the short vowel, the initial part of a long or a protracted vowel measuring half a matra. Cf. ह्रस्वस्यार्धं च अर्धमात्रात्मकम् (पु).

अलातचक्र II. 291, III. 8·8 A small firework with a burning end giving the appearance of a burning circle when it is moved in a circle.

अवग्रह I. 91. Knowledge, conception, form of knowledge. Cf विशिष्टावग्रहः विशिष्टाकारयुक्तं ज्ञानम् (पु)

अवच्छेद III. 14·11, 297. Lit. limitation; specification; specific or definite knowledge. Cf अवच्छेदो विशेषणम् (पु)

अवधारण II. 268. Determination, decision. Cf अवधारणं निर्णयः (पु)

अवयवस्वर III. 14·57, 61. Accent occurring in the case of a part of a compound word; accent for a compound word within a compound word.

अवयवाश्रया क्रिया [II. 372–75, 378]. Activity residing individually separate in the various parts. The word is equivalent to the maxim प्रत्येकं वाक्यपरिसमाप्तिः and is in contrast with समुदाये वाक्यपरिसमाप्तिः which can be stated as समुदायाश्रया क्रिया.

अविद्या II. 233, III. 9-62, III. 14·78. Lit. nescience, erroneous knowledge, false knowledge.

अविभाग I. 128. Absence of division, equilibrium.

अविवक्षा I. 137, Absence of keenness to state; ignoring, disregard. Cf अविवक्षायां शब्दोपात्तस्य नान्तरीयकमुपादानमिति न तस्योपयोगः (पु)

अव्यपवर्ग III. 3·8. Absence of separation, complete mixture.

अव्यय III. 14·105. Lit. non-losing; remaining intact; an indeclinable which shows no variation of form by the application of any gender or case affix.

अव्ययीभाव III. 7·165. A compound which generally has its first member an indeclinable, and which bears the nature of an indeclinable as far as declension is concerned.

अश्वकर्ण II. 36. Name of a creeper which has its leaves similar to the ears of a horse.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

असंविद् II. 91. Absence of clear understanding; nescience; misconception. (See अविद्या)

असंसृष्ट II. 248, 249. Unblended; unmixed, just as the sense of one word with that of another according to the view of scholars who follow the पदवादपक्ष.

असिद्धि II. 263. Lit. absence of accomplishment; absence of being understood, not being already known. Cf असिद्धिरप्रसिद्धिः (पु).

आ

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

३-७-६३; ५९-६०; ६६ **Vol XII 338–339; 343**

"आरोहयते हस्ती स्वयमेवेति"। आङ्पूर्वो रुहिः न्यग्भवनोपसर्जने न्यग्भावने वर्तते। न्यग्भवन्तं हस्तिनं न्यग्भावयतीत्यर्थः। यदा तु हस्तिनः सौकर्यातिशयप्रतिपादनाय हस्तिपकव्यापारो न विवक्ष्यते तदा न्यग्भावमात्रे रुहिर्वर्तते। तत्र च हस्तिनः कर्तृत्वम्। उक्तं च

"निवृत्तप्रेषणं कर्म स्वक्रियावयवे स्थितम्।
निवर्तमाने कर्मत्वे स्वकर्तृत्वेऽवतिष्ठते" ॥ इति ॥

अस्य च कर्तुः कर्मस्थक्रियेषु कर्मकार्याणि अतिदिश्यन्ते। .... सुष्ठु न्यग्भवति। उक्तं च

"न्यग्भावनं न्यग्भवनं रुहौ शुद्धे प्रतीयते।
न्यग्भावनं न्यग्भवनं ण्यन्तेऽपि प्रतिपद्यते ॥"

"अवस्थां पञ्चमीमाहुः ण्यन्तानां कर्मकर्तरि।
निवृत्तप्रेषणाद् धातोः प्राकृतेऽर्थे णिजुच्यते ॥"

गतिविशेष एव रुहेरर्थः। कस्तर्हि क्रियाणां कमकर्तृस्थतायां हेतुः। उक्तमेव

"विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता।
क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पिता ॥" इति ॥

३-७-८१–८२ **Vol XV 318. On पा 3-4-26 स्वादुमि णमुल्**

"अभ्युपेत्यापि शक्तिभेदविवक्षां परिहारमाह 'प्रधानशक्त्यभिधाने च' इति। आख्यातपदवाच्या क्रिया विशेष्यत्वात् प्रधानम्। विशेषणभूता तु अप्रधानम्। तद्द्वारेण तद्विषययोः शक्त्योरपि गुणप्रधानभावः। तत्र प्रधानानुवर्तित्वात् गुणानां तन्मुखप्रेक्षित्वात् तद्विरुद्धस्वकार्यारम्भाभावात् यथायथं विभक्तिसिद्धिरित्यर्थः। उक्तं च

"प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते ॥

प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते।
यदा गुणे तदा तद्वदनुक्ताऽपि प्रतीयते ॥"

३-७-८८ **Vol XII 230. On पा 1-3-29**

समो गम्यृच्छिप्राच्छिस्वरत्यर्तिश्रुविदिभ्यः ....
अथास्मिन्नकर्मकाधिकारे ये सकर्मकाः हनिगमिप्रभृतयः तेषां कथमकर्मकत्वम्। उच्यते

"धातोरर्थान्तरे वृत्तेः धात्वर्थेनोपसंग्रहात्।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥"

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

३-७-९०-९१ **Vol XII 617. On पा 1·4-42— साधकतमं करणम्**

" दात्रादेः छेद्यद्रव्यानुप्रवेशो व्यापारः काष्ठादेः पाके प्रज्वलनजनितोष्णस्पर्शानुप्रवेशः। तदनन्तरेण क्रियासिद्धिः, नैष कारकान्तरेषु अनुप्रवेशः तद्व्यापारान्तरं वा क्रियानिष्पत्तिः समस्ति '।

अतः —

" क्रियायाः परिनिष्पत्तिः यद्व्यापारादनन्तरम्।
विवक्ष्यते यदा तत्र करणत्वं तदा स्मृतम् ॥ "

विवक्ष्यते इत्यनेन एतद्दर्शयति देशकालावस्थादिवशेन यस्य क्रियां प्रति उपयोगातिशयेन व्यापारः प्रत्यासीदन् विवक्ष्यते, तदा तस्य करणत्वं भवतीति। ... उक्तं च

" वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यथा ॥ "

३-७-१०१-१०२ **Vol XIII 8.**

' अगुणीभूत ' इति। तेन यस्य गुणभावो नास्ति स कर्ता कारकान्तरविवक्षायामपि चागुणभावोऽस्त्येव। कः पुनरत्र कारकाणां गुणगुणिभावः यदा एकापायेऽपि क्रिया न निवर्तते। उक्तमत्र

" प्रागन्यतः शक्तिलाभात् न्यग्भावापादनादपि।
तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्तनात् ॥

" अदृष्टत्वात् प्रतिनिधेः प्रविवेकेऽपि दर्शनात्।
आरादप्युपकारित्वात् स्वातन्त्र्यं कर्तुरिष्यते ॥ "

३-७-११८ **Vol XVIII 118. On पा 6-3-46**

आन्महतः समानाधिकरणजातीययोः

" ... अतो मृद्वस्त्वेव तेन तेन पिण्डादिरूपेण परिणमते इति युक्तम्। एवमामूलप्रकृतितः, सा तु प्रकृत्यन्तरनिरपेक्षैव तेन तेन पृथिव्यादिरूपेण परिणमते इति। तदेवं स्थितमेतत्। संमूर्च्छितोऽर्थात्मा सम्पद्यकर्ता। तद्भेदाच्च पूर्वोत्तरावस्थयोरपि कर्तृत्वमिति। उक्तं च

" पूर्वावस्थामभिजहत् संस्पृशन् धर्ममुत्तरम्।
संमूर्च्छित इवार्थात्मा जायमानोऽभिधीयते ॥ " इति ॥

३-७-१२६ **Vol XIII 9** उक्तं च

" द्रव्यमात्रस्य तु प्रैषे पृच्छादेर्लोङ् विधीयते।
प्रवृत्तस्य यदा प्रैषः तदा स विषयो णिचः ॥ "

३-७-१२७ **Vol XIII 6. On पा 1-4-52**

गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ

' प्रयोजकव्यापारेणाप्यमानस्य यदि भवति गत्यर्थादीनामेव नान्येषामिति, तेन पाचयत्योदनं देवदत्तो यज्ञदत्तेन इत्यत्र पूर्वं प्रवृत्ताया एव कर्तृसंज्ञाया अवस्थानात् कर्तरि तृतीया भवति '। उक्तं च

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

" गुणक्रियायां स्वातन्त्र्यात् प्रेषणे कर्मतां गतः ।
नियमात् कर्मसंज्ञायाः स्वधर्मेणाभिधीयते ॥ " इति ॥

कर्तुः स्वधर्मो तृतीया । अथ कथम्
'अयाचितारं न हि देवदेवं
अद्रिः सुतां ग्राहयितुं शशाक' । (कु. सं. १.५२)

स्वतन्त्राः कवयः । यद्वा सुतां प्रति किञ्चिदुद्वाहविषये ग्राहयितुं बोधयितुं न शशाक इत्येवं व्याख्येयं तत्र बुद्ध्यर्थत्वात् सिद्धम् ॥

३-७-१३० Vol XII 567 उक्तं च

" हेतुत्वे कर्मसंज्ञायां शेषत्वे चापि कारकम् ।
रुच्यर्थादिषु शास्त्रेण संप्रदानाख्यमुच्यते ॥ "

Here immediatety (p. 568) हरदत्तमिश्र **quotes** भट्टिकाव्य **thus :—**

' तथा च भट्टिकाव्यम् (8-73) :—
" श्लाघमानः परस्त्रीभ्यस्तत्रागाद्राक्षसाधिपः ॥ "

३-७-१४१ cd Vol. XII 512
(३-७-१४१–१४२ Vol. XII 511)
In between these two
३-७-१४३ ab Vol. XI 512
३-७-१३६ Vol. XII 512

} एवं च 'सार्थात् हीनो, रथात् पतितः, धावतः (अश्वात्) पतितः' इत्यादौ सत्यपि क्रियान्तरावेशात्

चलत्वे तत्तद्धावनादिक्रियाऽनावेशात् तन्निमित्तमपायं प्रति औदासीन्यात् अस्त्येव ध्रुवत्वमिति भवत्येव संज्ञा । उक्तं च

" अपाये यदुदासीनं चलं वा यदि वाऽचलम् ।
ध्रुवमेवातदावेशात् तदपादानमुच्यते ॥ " इति ॥

'पततः पतितः' इत्यत्रापि परगतपातापेक्षया (धावतः) ध्रौव्यमेव तथाहि

" पततो ध्रुव एवाश्वो यस्मादश्वात् पतत्यसौ ।
तस्य त्वश्वस्य पतने कुड्यादिर्ध्रुव उच्यते ॥ "

इह तु परस्परस्मात् मेषावपसर्पत इति मेषान्तरक्रियापेक्षं अवधित्वं पृथक् पृथक् ।

" मेषयोः स्वाक्रियापेक्षं कर्तृत्वं च पृथक् पृथक् । "
" गतिर्विना त्ववधिना नापाय इति कथ्यते ॥ "

The last कारिका **is on** पा **1-4-24** ध्रुवमपाये अपादानम् वा १ जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् ।

" धर्मात् प्रमाद्यति धर्मात् मुह्यति " इति । य एष नास्तिकः पुरुषः स पश्यति-'नानेन धर्मेण किञ्चिदाप्यते, नैनं करिष्यामि' इति स बुद्ध्या

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

तं प्राप्नोति । प्राप्य च ततो निवर्तते । तत्र 'ध्रुवमपाये' इत्येव सिद्धम् इति । तच्चैतत्—

"निर्दिष्टविषयं किञ्चित् उपात्तविषयं तथा ।
अपेक्षितक्रियं चेति त्रिधाऽपादानमुच्यते ॥"

यत्र धातुनाऽपायलक्षणो संज्ञाविषयो निर्दिश्यते यथा ग्रामादागच्छतीति तन्निर्दिष्टविषयम् । यत्र धातुर्धात्वन्तरार्थाङ्गं स्वार्थमाह ... तदुपात्त-विषयम् । अपेक्षिताक्रियं तु यत्र क्रिया न श्रूयते, प्रमाणान्तरेण तु प्रतीयते ॥

३-७-१५६-१५७ Vol XIV 37–38. यदि च परस्परं उपकार्योपकारकभावाभावे सम्बन्धानुपपत्तेः क्रियाकारकसम्बन्धोऽपि सर्वत्र वस्तुस्थित्याऽस्ति इत्युच्येत, अस्तु तथा, न कश्चिद्दोषः । न हि यत् यत् वस्तुस्थित्याऽस्ति तत् तत् अभिधातव्यम् । यदेव तु विवक्षितं तदेव स्वनिमित्तां विभक्तिं प्रसूते । तत्र स्वस्वामिभावादिसम्बन्धविवक्षायां सन्नपि क्रियाकारकसम्बन्धो न विवक्ष्यते इति द्वितीयाद्यभावे षष्ठी भविष्यति । एवं च मातुः स्मरति, न माषाणामश्नीयात्, अनुकरोति भगवतो नारायणस्य इत्यादौ श्रूयमाणेऽपि क्रियाशब्दे मातृसम्बद्धं स्मरणं इति सम्बन्धमात्रं विवक्षितं, कर्मत्वं तु सदपि अविवक्षितं इति षष्ठी भवति । उक्तं च

"सम्बन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः ।
श्रुतायामश्रुतायां च क्रियायां सोऽभिधीयते ॥" इति ॥

न हि शब्दस्य भावाभावाभ्यां अर्थस्य भावाभावौ क्रियेते । किं तर्हि । विद्यमान एवार्थः प्रतिपिपादयिषितश्च वाचकपदप्रयोगे हेतुर्भवति । तत्र गुणस्य परोपकारकत्वेन विवक्षितत्वात् तदन्ते षष्ठी भवति । पुरुषस्य तु उपकार्यत्वात् स्वनिष्ठत्वेन विवक्षितत्वात् प्रथमा भवति । तत्र च सम्बन्धो गुणे पदं निधाय प्रधानमपि स्पृशति । गुणश्च प्रधानोपकाराय प्रवृत्तोऽन्यथा-नुपपत्तेः रूपान्तरमाश्रयति । प्रधानं तु स्वनिष्ठत्वेन न रूपान्तरं भजते । उक्तं च

द्विष्ठोऽप्यसौ परार्थत्वात् गुणेषु व्यतिरिच्यते ।
तत्राभिधीयमानः सन् प्रधानेऽप्युपयुज्यते ॥"

३-८-१ Vol XII 116. On पा 1·3·2 भूवादयो धातवः

क्वाचित्तु 'भू इत्येवमादयः शब्दाः' इत्यनन्तरं 'क्रियावचनाः' इति पठ्यते । तस्मिन् पक्षे याऽस्य ग्रन्थस्य शङ्का सा तस्य द्रष्टव्या, अस्य तु कथं पुनः सूत्रेऽनुपात्तः 'क्रियावचनः' इत्ययं विशेषो लभ्यते, अत आह । 'धातुशब्दः पूर्वाचार्यसंज्ञा' इति । ततः किमित्याह । 'ते च' इति । ततोऽपि किमित्याह— 'तदिहापि' इति । महत्याः पूर्वाचार्यसंज्ञाया आश्रयणं तदीयोपाधिपरिग्रहार्थमेवेति भावः ।

"यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते ॥"

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

एकैकस्यापि क्रियाक्षणस्य प्रत्यक्षत्वेपि समूहरूपा धातुवाच्या क्रिया न प्रत्यक्षा इत्यर्थः। क्रमवन्त एव क्षणाः एकफलोद्देशेन सम्पाद्यमानत्वात् ऐक्यमिवापन्नाः धातुवाच्याः। तद्यथा – पचतीत्यधिश्रयणादयोऽधःश्रयणान्ताः क्लेदनफलावच्छिन्नाः, एवं अपचत् इत्यत्रापि क्रिया साध्यैव; तादृशस्यैव हि रूपस्य तत्रात्ययः प्रतीयते यत् पूर्वापरीभूतं क्रियते। घट इत्यत्र तु घटशब्देन चक्रोदरगतोऽपि घटः सिद्धरूप उच्यते। एकस्मिन्नेव क्षणे यत् दर्शनयोग्यं रूपं तेन रूपेणेत्यर्थः। तदेवं क्रियावचनो धातुरित्याश्रयणात् अतिप्रसङ्गो नास्तीति स्थितम् ॥

३-८-४७-४८ **Vol XV 259–260 On पा 3-3·18 भावे**

"नित्यानामेव शब्दानां साङ्कर्यस्य निवृत्तये।
अन्वाख्यानात् भावशब्दे घञि नान्योन्यसंश्रयः॥"

This कारिका is not found in वाप; source unknown.

'धात्वर्थश्चेति'। यथा पचति पाचकः इत्यादौ प्रकृतिभागेन क्रियोच्यते प्रत्ययभागेन तु तदीयं साधनं, तथा पाकादिषु प्रकृतिभागः साध्यरूपमर्थमाह प्रत्ययभागस्तु तस्यैव सिद्धरूपतां द्रव्यधर्मैः लिङ्गसङ्ख्याकारकशक्तिभिः सम्बन्धयोग्यमाकारमाह इत्यर्थः। उक्तं च

"आख्यातशब्दे भागाभ्यां साध्यसाधनवर्तिता।
प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः॥"
"साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।
सत्त्वभावस्तु यस्तस्याः स घञादिनिबन्धनः॥"

इति बहु वक्तव्योऽयमर्थः। ...

३-८-५० **Vol XX 902 On पा 8·1·28 तिङतिङः**

'भवति पचति' इति। पचतीत्येतद् भवति, पाकक्रिया भवतीत्यर्थः। तत्र साध्यसाधनभावेन द्वयोः क्रिययोः अन्वयात् अस्ति सामर्थ्यम्। यथोक्तं पच्यादिक्रियाः भवतिक्रियायाः कर्त्र्यो भवन्तीति। तत्र पाकस्य स्वंसाधनानि प्रति साध्यस्यापि भवनं प्रति सिद्धत्वम्। यथाह भर्तृहरिः

"तत्र यं प्रति साध्यत्वं असिद्धं, तं प्रति क्रिया।
सिद्धा तु, यस्मिन् साध्यत्वं न तमेव पुनः प्रति॥

३-९-१ **Vol XVI 124–125. On पा 4-2-3 नक्षत्रेण युक्तः कालः**

इह पारमर्षाः कालं क्रियात्मानामिच्छन्ति। यथोक्तम् —

"आदित्यग्रहनक्षत्रपरिस्पन्दमथापरे।
भिन्नमावृत्तिभेदेन कालं कालविदो विदुः॥" इति॥

(**This is वाप 3-9-76**). वैशेषिकास्तु द्रव्यमाकाशकल्पम्। उक्तं च।

"व्यापारव्यतिरेकेण कालमेके प्रचक्षते।
नित्यमेकं विभुं द्रव्यं परिमाणं क्रियावताम्॥"

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

३-९-२ Vol XII 10

यद्यपि वैशेषिकपरिभाषिता सङ्ख्या जातेर्न विद्यते तस्या द्रव्यधर्मत्वात् तथापि भेदगणनरूपा सङ्ख्या विद्यते एव। यथोक्तम्—

" दिष्टिप्रस्थसुवर्णादि मूर्तभेदाय कल्पते।
क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका॥ "

वैशेषिकाश्च व्यवहरन्ति 'पञ्च कर्माणि। चतुर्विंशतिर्गुणाः' इति॥

३-९-७६ Vol XVI 124–125.

See under ३-९-१ above.

३-९-११२–११३ Vol XV 288. On पा 3·3·132 आशंसायां भूतवच्च

.... तस्मात् यथास्वं एताः विभक्तयः कालेषु प्रयुज्यन्ते। कथम्। इन्द्रियव्यापारस्य कूपसत्तां प्रति भेदकत्वेन आश्रयणात् तस्याः अपि तत्कालत्वं ततश्च इन्द्रियव्यापारे भाविनि भविष्याद्विभक्तिः, वर्तमाने वर्तमानविभक्तिः

भूते भूतविभक्तिरिति सिद्धमिष्टम्। उक्तं च।

" सत्तामिन्द्रियसम्बन्धात् सैव सत्ता विशेष्यते।
भेदेन व्यवहारो हि, वस्त्वन्तरनिबन्धनः॥ "

" अस्तित्वं वस्तुमात्रस्य बुद्ध्या तु परिगृह्यते।
यः समासादनात् भेदः स तत्र न विवक्षितः॥ " इति॥

३-१०-४, ६ (cd, ab) Vol XIII 212

न वा युष्मदर्थत्वात् अलिङ्गः सम्बोधनविषयश्च युष्मदर्थः। भवदर्थस्तु लिङ्गवान्। न च सम्बोधनैकविषयः। यथैव हि 'माणवक, अधीष्व' इति अभिमुखीभावो गम्यते, एवं 'त्वममधीष्व' इत्यपि। तथा च युष्मदः सर्वत्रैव सम्बोधने प्रथमा आमन्त्रिताद्युदात्तत्वं च भवति। पदात्परत्वे च निघातः इति केचिदाहुः। उक्तं च—

" सम्बोधनार्थः सर्वत्र मध्यमे कैश्चिदिष्यते।
तथा सम्बोधने सर्वां प्रथमां युष्मदो विदुः॥ "

" युष्मदर्थस्य सिद्धत्वात् नियता वाऽऽद्युदात्तता। "

" युष्मदः प्रथमान्तस्य परश्चेन्न पदादसौ। "

३-१२-१ Vol XIV 161

लादेशव्यङ्ग्यः क्रियासाधनाविशेषः स्वार्थपरार्थव्यक्तत्वात् क्वादिको यः स मुख्यः उपग्रहः। यथोक्तम्—

" य आत्मनेपदाद् भेदः क्वचिदर्थस्य गम्यते।
अन्यतश्चापि लादेशात् मन्यन्ते तमुपग्रहम्॥ " इति॥

आत्मनेपदात् हेतोरित्यर्थः। एवमन्यतश्चापि लादेशादिति। इह तु तद्व्यक्तिनिमित्तत्वात् परस्मैपदात्मनेपदयोः उपग्रहशब्दो वर्तते॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

३-१२-१६ **Vol XV 3. On पा 4-1-1** ङ्याप्प्रातिपदिकात्
स्वभावतो हि तिङन्तानि साधनाश्रयां संख्यामेवोपाददते न लिङ्गम् । उक्तं च
"एकत्वेऽपि क्रियाख्याते साधनाश्रयसंख्यया ।
भिद्यते न तु लिङ्गाख्यो भेदस्तत्र तदाश्रयः ॥"

३-१२-१८ **Vol XII 346. On पा 1-3-72** स्वरितञितः कर्त्रभिप्राये क्रियाफले
तदुक्तं हरिणा —
"यस्यार्थस्य प्रसिद्ध्यर्थं आरभ्यन्ते पचादयः ।
तत्प्रधानं फलं तेषां न लाभादि प्रयोजनम् ॥"

३-१३-४–५ **Vol XV 14–16**

वृत्तिकारस्तु लौकिकानामेवं प्रतिपत्तेः अभावतत्तत्प्रतिपत्त्यनुगुणं पक्षं दर्शयति 'सामान्यविशेषा' इति । कानिचित् सामान्यानीत्यर्थः ।

यद्वा सत्ताव्यतिरिक्तेषु सामान्येषु सामान्यविशेषशब्दो रूढः । तिस्रोऽवान्तरजातय इत्यर्थः । उक्तं च ।
"तिस्रो जातय एवैताः केषांचित् समवस्थिताः ।
अविरुद्धा विरुद्धाभिर्गोमहिष्यादिजातिभिः ॥"
"हस्तिन्यां वडवायां च स्त्रीत्वबुद्धेः समन्वयः ।
अतस्तां जातिमिच्छन्ति द्रव्यादिसमवायिनीम् ॥"

३-१३-१३, १४, १६, १५ **Vol XV 14-16**
"आविर्भावस्तिरोभावः स्थितिश्चेत्यनपायिनः ।
धर्मा मूर्तिषु सर्वासु लिङ्गत्वेनानुदर्शिताः ॥"

आविर्भावः उपचयः पुंस्त्वम् । तिरोभावः अपचयः स्त्रीत्वम् । अन्तरालावस्था स्थितिः नपुंसकत्वमित्यर्थः । कस्य पुनराविर्भावादिकं लिङ्गम् ... । उक्तं च
"सर्वमूर्त्यात्मभूतानां शब्दादीनां गणे गणे ।
त्रयः सत्त्वादिधर्मास्ते सर्वत्र समवस्थिताः ॥
"क्वथितोदकवच्चैषां अनवस्थितवृत्तिता ।
अजस्रं सर्वभावानां भाष्य एवोपवर्णिता ॥" इति च ॥

तथा
"रूपस्य चात्ममात्राणां शुक्लादीनां प्रतिक्षणम् ।
काचित् प्रलीयते काचित् कथंचिदभिवर्धते ॥" इति ॥

३-१३-२० **Vol XV 14–16.**

... तद्यथा तक्षा युवा कृष्णः कामुक इति तक्षादिशब्दानां एकार्थपर्यवसितानामपि व्यवस्थित एवाकारो वाच्यः, तथा लिङ्गेष्वपि द्रष्टव्यम् । उक्तं च
"संनिधाने पदार्थानां किञ्चिदेव प्रवर्तकम् ।
यथा तक्षादिशब्दानां लिङ्गेषु नियमस्तथा ॥" इति ॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

उपचीयते कुमारी इत्यत्रापि कुमारीशब्दः स्वमहिम्ना कस्यचिद् धर्मस्यापचयमेवाह, शब्दान्तरप्रयोगात्तु धर्मान्तरस्योपचयः प्रतीयते, एवं क्षीयते वृक्षः इत्यत्रापचयः। तदेवं सर्वं अनाकुलमिदं दर्शनम्।

३-१४-४८, ४७ Vol XIII 276

यद्यप्यत्र वाक्यावस्थायां व्यपेक्षालक्षणसामर्थ्यमस्ति वृत्त्यवस्थायां तु नैकार्थीभावः संभवति, इत्यवोचाम। कथं तर्हि 'देवदत्तस्य गुरुकुल' मिति सापेक्षस्य वृत्तिः। नात्र गुरुणा देवदत्तस्य सम्बन्धः, किं तर्हि, समुदायेन गुरुद्वारकश्च कुलेन सम्बन्धः इति अर्थात् गुरुणाऽपि योगो भवति। उक्तं च

"समुदायेन सम्बन्धो येषां गुरुकुलादिना।
संस्पृश्यावयवांस्तेऽपि युज्यन्ते तद्वता सह॥"

अथवा परिपूर्णार्थस्य अन्येन सह एकार्थीभावः स्वार्थपरिपूर्तिश्च सम्बन्धिशब्दस्य प्रतियोगिना इति भवति तदपेक्षस्यापि वृत्तिः। उक्तं च

"सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः प्रयुज्यते।
स्वार्थवत् सा व्यपेक्षाऽस्य वृत्तावपि न हीयते॥

३-१४-१०२, १०३ Vol XVIII 579 On पा 6·3·2 पञ्चम्याः स्तोकादिभ्यः

ननु वृत्तौ उपसर्जनपदानि एकादिसंख्यां विहाय अभेदैकत्वसंख्यां प्रतिपद्यन्ते। का पुनरियमभेदैकत्वसंख्या। विशेषाणामविभागेनावस्थानम्। यथा 'मधुनि ओषधिरसानाम्'। न हि तत्रास्या ओषधेरयं रसोऽस्या अयमिति विभागो दृश्यते, अथ च त एव रसा अनुभूयन्ते न पुना रससामान्यं तद्वदत्रापि राजपुरुष इति राजार्थो नैकत्वादिविशेषाः। उक्तं च

"यथौषधिरसाः सर्वे मधुन्याहितशक्तयः।
अविभागेन वर्तन्ते तां संख्यां तादृशीं विदुः॥" इति॥

यद्वाऽनुपात्तसंख्याविशेषं एकत्वादिष्वनुगतं सामान्यं अभेदैकत्वसंख्या। यथा संतमसे रूपमात्रं गृह्यते, न पुनः शुक्ल इति वा कृष्ण इति वा। तद्वदत्रापि इति। संख्यावान् राजार्थो न चाव्ययार्थवत् निःसंख्य इति एतावत् प्रतीयते। उक्तं च

"भेदानां वा परित्यागात् संख्यात्मा स तथाविधः।
व्यापाराज्जातिभागस्य भेदोपोहेन वर्तते॥"

For the simile of ओषधिरस and मधु compare the following passage from छान्दोग्योपनिषद् (6·9·1–2):

"यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणां रसान् समवहारम् एकतां रसं गमयन्ति॥ ते यथा तत्र न विवेकं लभन्ते ऽमुष्याहं वृक्षस्य रसोऽस्मि, अमुष्याहं वृक्षस्य रसोऽस्मीति। एवमेव खलु सोम्य इमाः सर्वाः प्रजाः सति संपद्य न विदुः 'सति संपद्यामहे' इति॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

३-१४-२५२ Vol XIII 554 उक्तं च

"प्राक् समासात् पदार्थानां निवृत्तिर्द्योत्यते नञा ।
स्वभावतो निवृत्तानां रूपभेदादलक्षिता ॥"

३-१४-३२४, ३२७,३२५ Vol XV 14-16

"प्रवृत्तिमन्तः सर्वे हि तिसृभिश्च प्रवृत्तिभिः ।
सततं न वियुज्यन्ते वाचश्चैवात्र संभवः ॥" इति च ।

टावाद्यन्तः शब्द एव एताः अवस्थाः गोचरयतीत्यर्थः । पुरुषो यद्यपि अपरिणामी तथापि

"अचेतनेषु संक्रान्तं चैतन्यमिव दृश्यते ।
प्रतिबिम्बकधर्मेण यत्तद्वाचो निबन्धनम् ॥"

ततश्च

"यश्चाप्रवृत्तिधर्मार्थश्चितिरूपेण गृह्यते ।
अनुयातीव सोऽन्येषां प्रवृत्तिर्विष्वगाश्रया ॥"

And then follow three verses, which are not found in वाप and whose source remains untraced :—

"सामान्यमपि गोत्वादि व्यक्तेरव्यतिरेकतः ।
प्रवृत्तिधर्मं तद्द्वारा शशशृङ्गादिवाश्नु तु ॥

"तस्मादुक्तपदार्थस्य संभवाल्लिङ्गयोगिता ।
प्रवृत्तेरपि विद्यन्ते तिस्रो ह्येताः प्रवृत्तयः ॥
"पुंनपुंसकता स्त्रीत्वं तेन स्यादन्यलिङ्गता ॥"

तदेवं सर्वपदार्थव्यापित्वात् उपचयापचयान्तरालावस्थाः त्रीणि लिङ्गानि ।

३-१४-५६४ Vol XVII 271

"तदर्हमिति नारब्धं सूत्रं व्याकरणान्तरे ।
संभवत्युपमाऽत्रापि भेदस्य परिकल्पनात् ॥"

३-१४-५८० Vol XVII 271. On पा 5-1-117 तदर्हम्

विनीतवदुपस्थितं, चिच्छेद कृतहस्तवत् इति विनीतानामिदं योग्य-मुपस्थानं, कृतहस्तानामिदं योग्यं छेदनमिति गम्यते, न तु सादृश्यम् । उक्तं च

"युक्तमौपयिकं राज्ञः इत्यर्थस्य निदर्शनम् ।
उपमानविवक्षायां तदर्हमिति पठ्यते ॥" इति ॥

यदा तु एकमेव वस्तु अवस्थाभेदपरिकल्पितभेदं उपमानोपमेयत्वेन विवक्ष्यते तदा नार्थोऽनेन ॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

Appendix VII

Passages from ancient works directly or indirectly referred to by Bhartrhari in his वाक्यपदीय including his स्वोपज्ञवृत्ति forming a basis of his statements.

१-१ अनादिनिधनम् । वाचा विरूप नित्यया । ऋग्वेद १०।१९।९. अनादिनिधनाय च नमः । मै. उ. ५।१. "अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा । आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः" quoted in शां. भा. on ब्र. सू. १।३।२८. ब्रह्म शब्दतत्त्वम् । "सूक्ष्मामर्थेनाप्रविभक्ततत्त्वामेकां वाचमनभिष्यन्दमानाम् । उतान्ये विदुरन्यामिव चैनां नानारूपामात्मनि संनिविष्टाम्" quoted in स्वोपज्ञवृत्ति. शब्दब्रह्म परं च यत् । शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति । ब्र. वि. उ. १७. शब्दब्रह्मातिवर्तते. भ. गी. ६।४४ विवर्ततेर्थभावेन । तेनेशितं कर्म विवर्तते ह । श्वे ६।२. "मूर्तिक्रियाविवर्तौ अविद्याशक्तिप्रवृत्तिमात्रम् । तौ विद्यात्मनि तत्त्वान्यत्वाभ्यामनाख्येयौ । एतद्धि अविद्याया अविद्यात्वम्" quoted in स्वो. प्रक्रिया जगतो यतः । "यः सर्वपरिकल्पानामाभासेप्यनवस्थितः । तर्कागमानुमानेन बहुधा परिकल्पितः ॥ १ ॥ व्यतीतो भेदसंसर्गौ भावाभावौ क्रमाक्रमौ । सत्यानृते च विश्वात्मा प्रविवेकात् प्रकाशते ॥ २ ॥ अन्तर्यामी स भूतानामाराद् दूरे च दृश्यते । सोत्यन्तमुक्तो मोक्षाय मुमुक्षुभिरुपास्यते ॥ ३ ॥ प्रकृतित्वमपि प्राप्तान् विकारान् आकरोति सः । ऋतुधामेव ग्रीष्मान्ते महतो मेघसंप्लवान् ॥ ४ ॥ तस्यैकमपि चैतन्यं बहुधा प्रविभज्यते । अङ्गाराङ्कितमुत्पाते वारिराशेरिवोदकम् ॥ ५ ॥ तस्मादाकृतिगोत्रस्थात् व्यक्तिग्रामा विकारिणः । मारुतादिव जायन्ते वृष्टिमन्तो बलाहकाः ॥ ६ ॥ त्रयीरूपेण तज्ज्योतिः परमं परिवर्तते । पृथक्तीर्थप्रवादेषु दृष्टिभेदनिबन्धनम् ॥ ७ ॥ शान्तविद्यात्मकं योंशस्तद्‌ हैतदविद्यया । तया ग्रस्तमिवाजस्रं या निर्वक्तुं न शक्यते ॥ ८ ॥ सर्वतः परिवर्तानां परिमाणं न विद्यते । तस्या या लब्धसंस्कारा न स्वात्मन्यवतिष्ठते ॥ ९ ॥ यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः । संकीर्णमिव मात्राभिश्चित्राभिरभिमन्यते ॥ १० ॥ तथेदममृतं ब्रह्म निर्विकारमविद्यया । कलुषत्वमिवापन्नं भेदरूपं विवर्तते ॥ ११ ॥ ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम् । विवृत्तं शब्दमात्राभ्यस्तास्वेव प्रविलीयते ॥ १२ ॥ quoted in स्वो.

१-२ एकमाम्नातम् । सर्वे वेदा यत्पदमामनन्ति .... ओमित्येतत् । कठ उ. २।१५. सलिल एको द्रष्टाऽद्वैतो भवति । बृ. उ. ४।३।३२ quoted in स्वो. सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् । छा. उ. ६।२।१. प्रणव एवैकस्त्रेधा व्यभज्यत quoted in स्वोप. असद्वा इदमग्र आसीत् । किं तदसदासीत् । ऋषयो वाव तेऽग्रे तदसदासीत् के ऋषयः प्राणाः । श. ब्रा. ६.१.१.१. शक्तिव्यपाश्रयात् । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च । श्वे. ६।८. मायामेतां शक्तिं विद्यात् । नृ. पू. उ. ३।१.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

१·३ अव्याहतकलां कालशक्तिम्। यावत्यो वै कालस्य कलाः। मै. उ. ६।१४. विकाराः षड् भावभेदस्य योनयः। षड् भावविकाराः। भवन्तीति वार्ष्यायणिः। जायते अस्ति विपरिणमते वर्धते अपक्षीयते विनश्यतीति। जायते इति पूर्वभावस्यादिमाचष्टे। नापरभावमाचष्टे। न प्रतिषेधति। अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणम्। विपरिणमते इत्यप्रच्यवमानस्य तत्त्वात् विकारम्। वर्धते इति स्वाङ्गाभ्युच्चयम्। सांयोगिकानां वाऽर्थानाम्। वर्धते विजयेनेति वा। वर्धते शरीरेणेति वा। अपक्षीयते इत्येतेनैव व्याख्यातः प्रतिलोमम्। विनश्यतीत्यपरभावस्यादिमाचेष्ट। न पूर्वभावमाचष्टे। न प्रतिषेधाति। नि. १।३.

१·५ प्राह्युपायः ब्रह्मराशिः। स्वो. सोयमक्षरसमाम्नायः... वेदितव्यो ब्रह्मराशिः। भा. ख. १ पृ. ३६ प ६-७. वेदाभ्यासात् परमान्तरं शुक्लमजरं ज्योतिरस्मिन्नेवापारे तमसि वीते प्रवर्तते quoted in स्वो. अनुकारः ओमित्येतदनुकृति। तै. उ. १।८।१. अनेकवर्त्मा। एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेद एकविंशतिधा बाह्वृच्यं नवधाथर्वणो वेदः। भा. ख. १ पृ. ९ प. २१-२२. साक्षात्कृतधर्माण ऋषयो बभूवुस्ते अपरेभ्यः असाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् संप्रादुः। नि. १।२०. समाम्नातः। समाम्नायः समाम्नातः। स व्याख्यातव्यः। नि. १।१,

१-६ भेदानां बहुमार्गत्वम्। तत्र चतुर्धा भेदे सति 'एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेद एकविंशतिधा बाह्वृच्यं पञ्चदशधेत्येके। नवधाथर्वणो वेदः' इत्येवं प्रतिभागं बहवो मार्गाः। कर्मण्येकत्र चाङ्गता सर्वशाखाप्रत्ययमेकं कर्म। स्वो. ... तस्य शाखासु दृश्यते। देवसुम्नयोर्यजुषि काठके। पा ७।४।३८. सिमस्याथर्वणेन्त उदात्तः। फि. सू. ७९. 'देवाय', 'सुम्नाय' इति क्यजन्तधात्वोर्बहवः प्रयोगा न केवलं काठकसंहितायाम् (८।१७, ४०।११, १८।२०, १०।१३, २।९, २५।६) इत्यादिस्थलेषु, किं तु मैत्रायणीसंहितातैत्तिरीयसंहितातैत्तिरीयारण्यकेषूपलभ्यन्ते। ऋग्वेदेपि (२।३२।२, ५।८।७, १।४०।१) कतिपये प्रयोगा दृश्यन्ते। अत्र विषये देवसुम्नसूत्रस्थाः (पा. ७।४।३८) काशिकान्यासपदमञ्जर्यादयोवलोकनीयाः।

१-७ तमेवाश्रित्य लिङ्गेभ्यः। येषां हि श्रुतिविहितैर्दृष्टादृष्टप्रयोजनैः कर्मभिरधिकारस्ते श्रुत्यैव स्मृतिविहितानामपि कर्मणां कर्तृत्वेनाख्यायन्ते। तद्यथा। 'यजमानोतिथये आगताय महाजं वा महोक्षं वा पचेत् इति।' (श. ब्रा. ३।४।१।२; याज्ञ. स्मृ. १।४९) स्वो.

१-८ प्रवादा बहुधा मताः। असद्वा इदमग्र आसीत् (श. ब्रा. ६।१।१।१); नासदासीन्नो सदासीत्। (ऋग्वेद १०।१२९।१). तम एव खल्विदमग्र आसीत् (मै. उ ५।२). इदं फेनो न कश्चिद्वा बुद्बुदो वा न कश्चन। मायेयं बत दुष्पारा विपश्चिदिति पश्यति। अन्धो मणिमविन्दत्तमनङ्गुलिरावयत्। तमग्रीवः प्रत्यमुञ्चत्तमजिह्वोभ्यपूजयत् (तै. आ. १।११।५). द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते। तयोरन्यः पिप्पलं स्वादु अत्ति अनश्नन्नन्यो अभिचाकशीति। (ऋ. १।१६४।२०.) तदेजति तन्नैजाति तद् दूरे तदु अन्तिके। तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः। (ई. उ. ५) स्वो.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

१-९ सत्या विशुद्धिस्तत्रोक्ता ... । प्रदेशोऽपि ब्रह्मणः सार्वरूप्यमनतिक्रान्तश्चाविकल्पश्च । तथा सर्वं दर्शनमन्यूनमविकल्पं सविकल्पमिव अयमत्रान्तरः पुरुषोऽभिमन्यते इति । स्वो. तदेतदेकं नैकं च तथोभे नाप्युभे न च । कर्मस्था विषमं ब्रूयुः सत्त्वस्थाः समदर्शिनः ॥ महाभारत शान्तिपर्व अ. २३८।६०. प्रणवरूपेण । अत्र प्रणवः सर्वाभ्यनुज्ञाविषयः सर्वश्रुतिरूपः प्रकृतिसर्वनाम ...... । स्वो.

१-१० विधातुस्तस्य...विद्याभेदाः प्रतायन्ते । प्रणव एव वेद इत्येके । स हि सर्वशब्दार्थप्रकृतिरिति । सर्वा वाचो वेदमनुप्रविष्टाः । नावेदविन्मनुते ब्रह्म किंचित् । स्वो.

१-११ प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः । प्रधानं च षट्स्वङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान् भवति । महाभाष्य ख. १ पृ. १ प. १९-२०.

१-१२ प्राप्तरूपविभागायाः...रसः । तथा एके कार्यकारणभावमेव शब्दार्थयोः संबन्धं मन्यन्ते । एवं ह्याह— नामैवेदं रूपत्वेन ववृते रूपं चेदं नामभावेवतस्थे । एके तदेकमविभक्तं विभेजुः प्रागिवान्ये भेदरूपं वदन्ति ॥ ... ऋजीषमेतद्वाचो यः संस्कारहीनः शब्दः । पुण्यतमं ज्योतिः । योयं...प्रकाशयिता शब्दाख्यः प्रकाशः । तत्रैतत्सर्वमुपनिबद्धं यावत्स्थास्नु चरिष्णु च । स्वो. तस्य मार्गोऽयमाञ्जसः । शिष्टज्ञानाच्च पृषोदरप्रकाराणां शिष्टप्रयोगत्वात्साधुत्वप्रतिपादने निमित्तं व्याकरणम् । तथा चोक्तम् । शब्दार्थसंबन्धनिमित्ततत्त्वं वाच्याविशेषेपि च साध्वसाधून् । साधुप्रयोगानुमितांश्च शिष्टान्न वेद यो व्याकरणं न वेद सः ॥ स्वो.

१-१४ पवित्रं सर्वविद्यानाम् । तन्निमित्तत्वात् संस्कारस्य । शब्दोपगृहीतो हि विद्यास्वर्थः । उक्तं च 'यदधीतमविज्ञातं निगदेनैव शब्द्यते । अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ।' नि. १।१८; भा. ख. १ पृ. २ प. १५-१६. तथाऽयमप्रमत्तगीतः श्लोकः— आपः पवित्रं परमं पृथिव्यामपां पवित्रं परमं च मन्त्राः । तेषां च सामर्ग्यजुषां पवित्रं महर्षयो व्याकरणं निराहुः ॥ अधिविद्यं प्रकाशते । सर्वो हि प्रायेण स्वस्यां विद्यायां व्याकरणमनुगच्छति । अपभ्रंशप्रयोगेण च नियतमपत्रपते । स्वो.

१-१७ छन्दस्यः । एष वै सप्तदशाक्षरश्छन्दस्यः प्रजापतिर्यज्ञमनुविहितः । भा. ख. २ पृ. ३३५ प. ५८; पृ. ४३४ प. ४.

१-२३ नित्याः शब्दार्थसंबन्धाः समाम्नाता महर्षिभिः । सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभिः ॥ नित्यो ह्यर्थवतामर्थैरभिसंबन्धः । ... द्रव्यं हि नित्यम् । आकृतिरनित्या । ... आकृतावपि पदार्थे एष विग्रहो न्याय्यः सिद्धे शब्दे अर्थे संबन्धे चेति । नित्याऽऽकृतिः । न क्वचिदुपरतेति कृत्वा सर्वत्रोपरता भवति । द्रव्यान्तरस्था तूपलभ्यते । ... तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते । भा. ख. १ पृ. ७ प. १०-२२. औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः । औत्पत्तिक इति नित्यं ब्रूमः । उत्पत्तिर्हि भाव उच्यते लक्षणया । अविभक्तः शब्दार्थयोर्भावः संबन्धः, नोत्पन्नयोः पश्चात्संबन्धः । शाबरभाष्य जै. सू. १।१।५।५. नित्यमविच्छिन्नपारम्पर्यः कार्यकारणभावः शब्दार्थयोः

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

संवन्धः। तथा ह्युक्तम्। — 'तेपि हि तेषामुत्पत्तिप्रभृति आ विनाशात् वृद्धीर्व्याचक्षाणाः सतो बुद्धिविषयान् प्रकाशयन्ति'। भा. ३।१।२६ ख. २ पृ. ३६ प. १७–१८. अपरे तु तदशिष्यं संज्ञाप्रमाणत्वात् (पा. १।२।५३) इत्यादीनि सूत्राणि नित्यत्वं प्रति समर्थयन्ते। अनुतन्त्रेषु खल्वपि सिद्धे शब्दार्थसंबन्धे। भा. पस्पशा वा. १. इति। स्वो. स्फोटः शब्दो ध्वनिस्तस्य व्यायामादुपजायते। महाभाष्य-दीपिका पृ. ४ प. २२. युक्तं पुनर्यन्नित्येषु नाम शब्देषु आगमशासनं स्यात्। ... बाढं युक्तम्। ... सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः। एकदेशविकारे हि नित्यत्वं नोपपद्यते। भा. १।१।२० वा. ५; ख. १ पृ. ७५ प. ८–१४. संग्रहे एतत् प्राधान्येन परीक्षितम्। नित्यो वा स्यात् कार्यो वा इति। महाभाष्य पस्पशा भा. ख. १ पृ. ६ प. १२-१३. नित्या एव च स्वस्मिन् विषये आम्राः, नित्याश्च न्यग्रोधाः। बुद्धिस्त्वस्य विपरिणम्स्यते। भा. १।१।५६ वा. १४, ख. १ पृ. १३७ प. २२–२३.

१·२४ अन्वाख्येयाश्च ये शब्दाः। यदप्युच्यते कृत्तद्धितसमासाश्चेत्यन्तग्रहणं कर्तव्यमिति। न कर्तव्यम्। अर्थवदिति वर्तते। कृत्तद्धितान्तं चैवार्थवन्न केवलाः कृतस्तद्धिता वा। भा. १-४-१४; ख. १ पृ. ३१९ प. ५-६. न वा एष दोषः। किं कारणम्। पदस्यार्थे प्रयोगात्। पदमर्थे प्रयुज्यते। विभक्त्यन्तं च पदम्। रूपं चेहाश्रीयते। रूपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकिकं प्रयोगम्। तस्मिंश्च लौकिके प्रयोगे प्रातिपदिकानां प्रयोगो नास्ति। भा. १-२-६४ वा. १९; ख. १ पृ. २३७ प. १२-१८। आविष्टलिङ्गा जातिः। यल्लिङ्गमुपादाय प्रवर्तते उत्पत्तिप्रभृति आ विनाशान्न तल्लिङ्गं जहाति। भा. १।२।५२ ख. १ पृ. २२८ प. १८-२० तद्यथा गुणवचनानां शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति। शुक्लं वस्त्रम्। शुक्ला शाटी। शुक्लः कम्बलः। शुक्लौ कम्बलौ। शुक्लाः कम्बला इति यदसौ द्रव्यं श्रितो भवति गुणः तस्य यल्लिङ्गं वचनं च तद् गुणस्यापि भवति। एवमिहापि यदसौ द्रव्यं श्रिता आकृतिः तस्य यल्लिङ्गं वचनं च तदाकृतेरपि भविष्यति। भा. १।२।६४ वा. ५४; ख. १ पृ. २४३ प. १९-२३.

नेदं वाचनिकमलिङ्गता असंख्यता वा। किं तर्हि स्वाभाविकमेतत् ... यत् प्राक् समासात् चार्थस्य लिङ्गसंख्याभ्यां योगो नास्ति समासे च भवति स्वाभाविकमेतत्। भा. २।२।२९; ख. १ पृ. ४३० प. ११-१५.

ते लिङ्गैश्च ...। कथमिदं विज्ञायते हेतुमत्यभिधेये णिज् भवति इति। आहोस्वित् हेतुमति यो धातुर्वर्तते इति। युक्तं पुनरिदं विचारयितुम्। ननु अनेन असंदिग्धेन प्रत्ययार्थविशेषणेन भवितव्यम्। यावता हेतुमति (पा. ३।१।२६) इत्युच्यते। ... कथं पुनरिदं विज्ञायते स्त्रियामभिधेयायां टाबादयो भवन्ति इति आहोस्वित् स्त्रीसमानाधिकरणात् प्रातिपदिकादिति। भा. ४।१।३; ख. २ पृ. १९८ प. २०-२१. सिद्धं तु स्त्रियाः प्रातिपदिकत्वात् स्वार्थे टाबादयः। भा. ४।१।१ वा. २१; ख. २ पृ. १९५ प. १६.

योपि चाभिधाता श्रोता वा विभागेन मात्रासु प्रतिपत्तिं लभते तस्यापि प्रत्यासत्त्या महाविषयत्वेन अभिव्यक्तिनिमित्तोपव्यञ्जनप्रकर्षेण उपलिप्सया

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

व्यवतिष्ठते। तथा ह्याह—"एकोयं शक्तिभेदेन भावात्मा प्रविभज्यते। बुद्धिवृत्त्यनुकारेण बहुधा ज्ञानवादिभिः॥" स्वो

ये चार्थाः स्थितलक्षणाः। स्थितलक्षणस्तु शास्त्रे पदार्थो वाक्यार्थो वा। तथा ह्युक्तम्। "न वा पदस्यार्थे प्रयोगात्" (पा. १।२।६४ वा. १९)। "यदत्राधिक्यं वाक्यार्थः सः।" (भा. २।३।५० वा. ४) ... संग्रहेप्युक्तम्–'न हि किञ्चित् पदं नाम रूपेण नियतं क्वचित्। पदानां रूपमर्थो वा वाक्यार्थादेव जायते'। अन्वाख्येयस्य खल्वपि पदस्वरूपस्य कृतेपि रूपपरिग्रहे प्रकृतिप्रत्ययादीनां विभागे रूपपरिग्रहान्नियमो दृश्यते मरुत्तेन्द्राण्यैकागारिकगिरिशश्रोत्रियक्षेत्रियादिषु वाक्यावधिकेन्वाख्याने। तदुक्तम्–अर्थात्पदं साभिधेयं पदाद् वाक्यार्थनिर्णयः। पदसंघातजं वाक्यं वर्णसंघातजं पदम्॥

१-२५ कार्यकारणभावेन। कार्यकारणभावेन खल्वपि संबन्धो निदर्शितः। तद्यथा। तेपि हि तेषामुत्पत्तिप्रभृति आ विनाशाद् वृद्धीर्व्याचक्षाणाः सतो बुद्धिविषयान् प्रकाशयन्ति। (भा. ३।१।२६) स्वो.

योग्यभावेन। योग्यभावेनापि संबन्ध उपवर्णितस्तत्र तत्र। अभिधानं पुनः स्वाभाविकम्। समाने वर्णे शोणकर्कहेमादीनामश्वविषयत्वं गवादिषु चाप्रवृत्तिः Cf भा. २।२।२९ तथेदमुक्तम्–'समानमीहमानानामधीयानानां च केचिदर्थैर्युज्यन्ते अपरे न' (भा. माहेश्वरसूत्र ५ वा. १५) इत्येवमादि। तथाजातीयकाः खल्वपि आचार्येण स्वरितञितः पठिताः ये उभयवन्तः येषां कर्त्रभिप्रायं चाकर्त्रभिप्रायं च क्रियाफलमस्ति। (भा. १।३।७२)। संग्रहकारः पठति—'शब्दार्थयोरसंभेदे व्यवहारे पृथक्क्रिया। यतः शब्दार्थयोस्तत्त्वमेकं तत्समवस्थितम्'। स एव पुनराह–संबन्धस्य न कर्तास्ति शब्दानां लोकवेदयोः। शब्दैरेव हि शब्दानां संबन्धः स्यात् कृतः कथम्' स्वो. स्वशब्दैश्च। प्रत्यक्षव्याख्यानमुपदेशः। भा. १।३।२ ख. १ पृ. २५९ प. १७; e.g अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुव ... गोष्ठश्वाः (पा. ५।४।७७) स्वो.

१·२७ शिष्टेभ्य आगमात् सिद्धाः। के पुनः शिष्टाः। वैयाकरणाः। कुत एतत्। शास्त्रपूर्विका हि शिष्टिर्वैयाकरणाश्च शास्त्रज्ञाः। यदि तर्हि शास्त्रपूर्विका शिष्टिः शिष्टिपूर्वकं च शास्त्रं तदितरेतराश्रयं भवति। इतरेतराश्रयाणि च न प्रकल्पन्ते। एवं तर्हि निवासत आचारतश्च। स चाचार आर्यावर्त एव। ... यदि तर्हि शिष्टाः शब्देषु प्रमाणं किमष्टाध्याय्या क्रियते। शिष्टज्ञानार्थोष्टाध्यायी। भा. ६।२।१०९; ख ३ पृ. १७४ प. ४–१५.

१·२८ व्यवस्थानित्यतोच्यते। सिद्धे शब्दार्थसंबन्धे। भा. पस्पशा वा. १ ख. १ पृ. ६ प. १६। सा चेयमनादिरविच्छिन्ना प्रवृत्तिनित्यता। तथा ह्युक्तम् 'तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते' (भा. पस्पशा ख. १ पृ. ७ प. २२)। स्वो.

१·३४ यत्नेनानुमितोप्यर्थः....अन्यथैवोपपाद्यते। तर्काप्रतिष्ठानात्...ब्र. सू. २-१-११

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

१·३५ ...अभ्यासादेव...मणिरूप्यादिविज्ञानम्...न हि रूपतर्कादयः सूक्ष्मान् अप्रसिद्ध-संविज्ञानपदान् कार्षापणादीनां कल्पयित्वापि समधिगमहेतून् परेभ्यः आख्यातुं शक्नुवन्ति। षड्जऋषभगान्धारधैवतादिभेदं वा प्रत्यक्षप्रमाण-विषयमप्यभ्यासमन्तरेणाभियुक्ताः प्रणिधानवन्तोपि न प्रतिपद्यन्ते। स्वो. पश्यति रूपतर्कः कार्षापणम्। दर्शयति रूपतर्कं कार्षापणम्। भा. १-४-५२; ख. १ पृ. ३३७ प. १२-१३.

१·४२ हस्तस्पर्शादिवान्धेन...विनिपातो न दुर्लभः। यस्य हि स्थालीपुलाकन्यायेनैक-देशं दृष्ट्वा शिष्टेऽर्थे प्रतिपत्तिः सोऽन्ध इव...विनाशं लभते। "पर्याप्तो ह्येकः पुलाकः स्थाल्या निदर्शनाय।" भा. १।४।२३, ख. १ पृ. ३२५ प. २२-२३ लिङ्गस्य पूर्ववत्त्वाच्चोदनाशब्दसामान्यादेकेनापि निरूप्येत् यथा स्थाली-पुलाकेन। जै. सू. ७-४-१२.

१-४३ आरभ्यते शिष्टैः शब्दानामनुशासनम्। अथ शब्दानुशासनम्। भा. पस्पशा-प्रारम्भ; ख. १ पृ. १ प. १.

१·४४ द्वावुपादानशब्देषु...। उपादीयते येनार्थः स्वरूपेऽध्यारोप्यते तद्भावमिवा-पद्यते स उपादानशब्दः। एवं हि संग्रहे पठ्यते 'वाचक उपादानः स्वरूप-वानव्युत्पत्तिपक्षे। व्युत्पत्तिपक्षे त्वर्थावहितं समाश्रितं निमित्तं शब्दव्युत्पत्ति-कर्मणि प्रयोजकम्। उपादानो द्योतक इत्येके। सोऽयमिति व्यपदेशेन संबन्धोपयोगस्य शक्यत्वात् इति। उपादेयो वा समुदाय उपादानः। तथाहि। स्वरूपपदार्थकेषु अवयवानामनुपादेयत्वात् विभागानामप्रतिपत्तिः। एको निमित्तं शब्दानाम्। यदधिष्ठाना यदुपाश्रया यदाधाराः श्रुतयः प्रत्याय्यमर्थं प्रतिपद्यन्ते तस्य निमित्तत्वम्। अपरोऽर्थे प्रयुज्यते। कारणव्यापारात्तु प्रतिलब्ध-विक्रियाविशेषः श्रोत्रानुपाती प्रकाशकभावेन नित्यं प्रत्याय्यपरतन्त्रोऽर्थेषु प्रयुज्यते। लब्धानुसंहारो निमित्तम्। उपजनितक्रमस्तु प्रत्यायक इत्येके। तस्यापि क्रमरूपप्रत्यस्तमयेनैव प्रतिपत्तिषु प्राप्तसमावेशस्य प्रत्यायकत्वमा-चक्षते। अपर आह-क्रमवानक्रमनिमित्तम्। अक्रमे तु वागात्मनि श्रुत्यर्थशक्ती संसृज्येते। एवं ह्याह—अविभक्तो विभक्तेभ्यो जायतेऽर्थस्य वाचकः। शब्दस्तत्रार्थरूपात्मा संभेदमुपगच्छति॥ स्वो.

१-४७ वितर्कितः पुरा बुद्ध्या...। बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरस्तत्वन्नीतिः। शब्देनार्थान्वाच्यान् दृष्ट्वा बुद्धौ कुर्यात् पौर्वापर्यम्॥ बुद्धिविषयमेव शब्दानां पौर्वापर्यम्। इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति—अस्मिन्नर्थे अयं शब्दः प्रयोक्तव्यः अस्मिंस्तावच्छब्देयं तावद्वर्णस्ततोयं ततोयमिति। भा. १।१।१०९ वा. १० ख. १ पृ ३५६ प. ९-१३.

१·४९ स धर्मः स्फोटनादयोः। स्फोटश्च तावानेव भवति ध्वनिकृता वृद्धिः। ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते। अल्पो महांश्च केषांचिदुभयं तत्स्वभावतः। भा. १।१।७० वा. ५ ख. १ पृ. १८१ प. २१-२३.

१-५१ वृत्तिस्तस्य क्रियारूपा भागशो लभते क्रमम्। बुद्धिविषयमेव शब्दानां पौर्वापर्यम् ... भा.१।१।१०९ वा. १० ख. १ पृ. ३५६ प. ११.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

१.५९ आदैच्प्रत्यायितैः शब्दैः संबन्धं यान्ति संज्ञिभिः। वृद्धिरादैच् (पा १।१।१) नित्येषु शब्देषु सतामादैचां संज्ञा क्रियते न संज्ञया आदैचो भाव्यन्ते। भा. १।१।१ वा. ८, ख. १ पृ. ४० प. २८

१.६० अग्निशब्दः अग्निश्रुत्या ....। अग्नेर्ढक्। पा ४।२।३३. स्वं रूपं शब्दस्याशब्दसंज्ञा। पा. १-१-६८

१.६२ उच्चरन् परतन्त्रत्वात्। शब्देनोच्चारितेनार्थो गम्यते। गामानय दध्यशान इति अर्थ आनीयते अर्थश्च भुज्यते। अर्थस्यासंभवात्। इह व्याकरणे अर्थे कार्यस्यासंभवः। अग्नेर्ढक् इति न शक्यते अङ्गारेभ्यः परः ढक् कर्तुम्।

१.६३ सामान्यमाश्रितं ... तेन तुल्यं क्रिया चेद्वतिः पा. ५-१-११५. तत्र ब्राह्मणवदधीते क्षत्रियः इत्युपमेये श्रूयमाणं सामान्यमुपमानेऽपि प्रतीयते। स्वो. ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमिति सामान्यं यद् ब्राह्मणकार्यं तत् क्षत्रिये अतिदिश्यते। यद् विशिष्टं माठरे कौण्डिन्ये वा न तदतिदिश्यते। भा. १।१।५६ वा. ३; ख. १ पृ. १३४ प. १७-१९.

१.६४ गुणः प्रकर्षहेतुर्यः। अतिशायन इत्युच्यते। किमिदमतिशायन इति। देश्याः सूत्रनिबन्धाः क्रियन्ते। यावद् ब्रूयात् प्रकर्षे अतिशय इति तावदतिशायन इति। कस्य पुनः प्रकर्षे प्रत्यय उत्पद्यते। ... ङ्याप्प्रातिपदिकस्य प्रकर्षे। ङ्याप्प्रातिपदिकं वै शब्दो न च शब्दस्य प्रकर्षापकर्षौ स्तः। शब्देऽसंभवादर्थे कार्यं विज्ञास्यते। कः पुनर्ङ्याप्प्रातिपदिकार्थः। द्रव्यम्। न वै द्रव्यस्य प्रकर्ष इष्यते। एवं तर्हि गुणः। भा. ५-३-५५ ख. २ पृ. ४१३ प. १–७.

१-६५ तस्याभिधेयभावेन यः शब्दः समवस्थितः। तस्याप्युच्चारणे रूपमन्यत्तस्माद्विविच्यते। केचिदाहुः अभिधानमावर्तते॥ तदेव तु अभिधेयत्वात् न प्रच्यवते। एवं हि संग्रहे उक्तम्—न हि स्वरूपं शब्दानां गोपिण्डादिवत् करणे संनिविशते। तत्तु नित्यमभिधेयमेव अभिधानसंनिवेशे सति तुल्यरूपत्वात् असंनिविष्टमपि समुच्चार्यमाणत्वेन अवसीयते इति। स्वो.

१.६६ संज्ञा रूपपदार्थिका। रूपग्रहणं किमर्थं न स्वं शब्दस्याशब्दसंज्ञा भवतीत्येव रूपं शब्दस्य संज्ञा भविष्यति। न ह्यन्यत् स्वं शब्दस्यास्ति अन्यदतो रूपात्। भा. १-१-६८; ख. १ पृ. १७५ प. २०-२१.

१-६७ तत्रार्थवत्त्वात्प्रथमा। इदं खल्वपि भूयः सामानाधिकरण्यमेकविभक्तित्वं च द्वयोश्चैतद्भवति। कयोः। विशेषणविशेष्ययोर्वा संज्ञासंज्ञिनोर्वा। भा. १।१।१ वा.७; ख. १ पृ. ३९ प. २२–२३. अस्येति व्यतिरेकश्च। प्रातिपदिकार्थव्यतिरेकः षष्ठीप्रवृत्तिहेतुः स्वरूपाभिधेयेन अर्थवता तद्वतां संज्ञाशब्देन योगात् संज्ञिशब्दानामुपजायते। एवं ह्याह – 'अर्थवता व्यपदेशः सोयं तस्येति वा यतो भवति। नानर्थकेन तस्मान्नित्यः शब्दार्थसबंधः' इति। स्वो.

१.६८-६९ स्वरूपमिति कैश्चित्तु ...॥ संज्ञिनीं व्यक्तिमिच्छन्ति ... प्रदेशेषूपतिष्ठते॥ इह केचिद् वृत्तिकाराः पठन्ति–स्वं रूपं शब्दस्य ग्राहकं भवति द्योतकं प्रत्यायकमिति। अपरे तु स्वं रूपं शब्दस्य ग्राह्यं द्योत्यं प्रत्याय्यमिति। तदनेन श्लोकद्वये

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

नोपन्यस्तम् । जातावपि द्वयी प्रतिपत्तिराचार्याणाम् । केचिदाहुः – प्रतिनियतस्वरूपभेदा व्यक्तयः । ... अन्ये तु मन्यन्ते – जातौ प्रतिलब्धस्वरूपाः शब्दास्तद्रूपतयैव व्यक्तिमव्यपदेश्यस्वरूपां प्रत्याययन्ति । ... स्वं रूपं शब्दस्येत्यत्र बहुविकल्पो वैयाकरणाधिकरणेष्वागमः । तद्यथा । रूपमात्रमेकदेशोर्थवतो रूपार्थसमुदायस्य सामान्यविशेषादिशक्तियुक्तस्य शब्दस्य शब्दत्वेनाश्रितस्य संज्ञा । रूपवान् वा संसर्गिणीभिः शक्तिभिर्भिन्नः सार्थकः समुदायः श्रुतिमात्रस्य ग्राहकः । मात्राकलापो हि शब्दः । तदेकदेशाः स्वरूपादयो मात्राः । मात्राभिश्च मात्रावतामप्यस्ति भेदव्यपदेशव्यवहारः । वार्क्षी शाखेति यथा । स्वो. दृश्यते हि समुदायादवयवस्य पृथक्त्वम् । तद्यथा । वार्क्षी शाखेति । भा. ५।१।२; ख २ पृ ३३८ प ९.

१-७० एकत्ववादिनः । एकत्वादकारस्य सिद्धम् । शि. सू. १ वा. ५ एकोयमकारो यश्चाक्षरसमाम्नाये यश्चानुवृत्तौ यश्च धात्वादिस्थः । भा. ख. १ पृ. १६ प. २३-२४.

१-७१ पदभेदेपि...न निवर्तते । आन्यभाव्यं तु कालशब्दव्यवायात् । शि. सू. १ वा. ११. आन्यभाव्यं त्वकारस्य । कुतः । कालशब्दव्यवायात् ।... दण्ड अग्रम् । ...दण्डः । न चैकस्यात्मनो व्यवायेन भवितव्यम् । भवति चेद्भवति आन्यभाव्यमकारस्य ॥ युगपच्च देशपृथक्त्वदर्शनात् । वा १२. युगपच्च देशपृथक्त्वादर्शनान्मन्यामहे आन्यभाव्यमकारस्येति । यदयं युगपद् देशपृथक्त्वेषु उपलभ्यते । अश्वः अर्कः अर्थ इति । न ह्येको देवदत्तो युगपत् स्रुघ्ने च भवति मथुरायां च ॥ भा. ख. १ पृ. १८ प. ५–११.

१-७३ पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च । वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन ॥ वर्णपदाभावे कुतो वाक्यस्य व्यतिरेकः । तथा चोक्तम् 'अनित्यत्वमेवं संप्राप्नोति ।' स्वो. यदि पुनरिमे वर्णाः शकुनिवत् स्युः ।.... नैवं शक्यम् । अनित्यत्वमेवं स्यात् । नित्याश्च शब्दाः । भा. ख. १ पृ. १८ प. २–१४. यथा तर्हि वर्णसमुदायः पदम्, पदसमुदाय ऋक्, ऋक्समुदायः सूक्तमित्युच्यते । भवति चैतदेकस्मिन्नपि एकवर्णं पदमेकपदा ऋक् एकर्चं सूक्तमिति । अत्रापि अर्थेन युक्तो व्यपदेशः । पदं नाम अर्थः ऋङ् नाम अर्थः सूक्तं नाम अर्थः । भा १-१-२१ वा ५ः ख १ प ७७ प १७-२०

१-७४ तत्र यन्मुख्यमेकेषां तत्रान्येषां विपर्ययः । अर्थभेदादेकश्रुतित्वेपि अनेकशब्दत्वमिति । तत्र चैकेषामौपचारिको भेदो मुख्यमेकत्वम् । अन्येषां तु पृथक्त्वं मुख्यं व्यावहारिकमेकत्वमिति । तथा ह्युक्तम् । 'एकश्च शब्दो बह्वर्थः—अक्षाः पादा माषा इति' (भा. ख. १ पृ. २२० प. २) स्वो. ग्रामशब्दोयं बह्वर्थः...तद्यः सारण्यके ससीमके सस्थण्डिलके वर्तते तमभिसमीक्ष्य एतत् प्रयुज्यते अनन्तराविमौ ग्रामाविति । भा. १-१·७ वा. ८, ख. १ पृ. ५९ प. २०-२४.

१·७५ ... वृत्तिभेदं प्रचक्षते । कालभेदात् । ये हि द्रुतायां वृत्तौ वर्णाः त्रिभागाधिकाः ते मध्यमायां, ये मध्यमायां वर्णाः त्रिभागाधिकाः ते विलम्बितायाम् । सिद्धं त्ववस्थिता वर्णाः वक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते । ... वक्ता

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

कश्चिदाश्वभिधायी भवति। आशु वर्णानभिधत्ते। कश्चिच्चिरेण कश्चिच्चिरतरेण। तद्यथा। तमेव अध्वानं कश्चिदाशु गच्छति। कश्चिच्चिरेण गच्छति। कश्चिच्चिरतरेण गच्छति। रथिक आशु गच्छति आश्विकश्चिरेण पदातिश्चिरतरेण। विषम उपन्यासः। अधिकरणमत्राध्वा व्रजतिक्रियायाः। तत्रायुक्तं यदधिकरणस्य वृद्धिह्रासौ स्याताम्। एवं तर्हि स्फोटः शब्दो ध्वनिः शब्दगुणः। कथम्। भेर्याघातवत्। तद्यथा भेर्याघातः भेरीमाहत्य कश्चिद्विंशति पदानि गच्छति कश्चित् त्रिंशत् कश्चिच्चत्वारिंशत्। स्फोटश्च तावानेव भवति। ध्वनिकृता वृद्धिः॥ ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते। अल्पो महांश्च केषांचिदुभयं तत् स्वभावतः॥ भा १।१।७० वा ४, ५; ख. १ पृ १८१ प ११–२४.

१·७६-७७ स्वभावभेदान्नित्यत्वे ह्रस्वदीर्घप्लुतादिषु। प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते। ... वृत्तिभेदं तु वैकृताः। ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते॥ इह द्विविधो ध्वनिः प्राकृतो वैकृतश्च। तत्र प्राकृतो नाम येन विना स्फोटरूपमनभिव्यक्तं न परिच्छिद्यते। वैकृतस्तु येनाभिव्यक्तं स्फोटरूपं पुनः पुनरविच्छेदेन प्रचिततरं कालमुपलभ्यते। एवं हि संग्रहकारः पठति।

"शब्दस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।
स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते॥" स्वो.

ननु च ध्वनिः शब्दगुणः। एवं ह्युक्तम्—
'स्फोटः शब्दो ध्वनिस्तस्य व्यायामादुपजायते' इति॥

उच्यते। द्रव्यादयो न भवन्ति शब्दाः। एवंपरायां चोदनायां ध्वनिशब्दयोरन्यत्वे प्रयोजनाभावात् एकत्वेन व्यपदेशः। (महाभाष्यदीपिका पृ. ४ प. २१-२४),

१·८१ स्फोटरूपाविभागेन ध्वनेर्ग्रहणमिष्यते।

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।
अल्पो महांश्च केषांचिदुभयं तत् स्वभावतः॥
भा १।१।७० पृ १८१ प २३–२४.

१·८२ यथानुवाकः श्लोको वा...।...न तु स ग्रन्थः प्रत्यावृत्ति निरूप्यते॥ न हि वर्णानां पौर्वापर्यमस्ति। किं कारणम्। एकैकवर्णवर्तित्वाद्वाचः उच्चरितप्रध्वंसित्वाच्च वर्णानाम्। एकैकवर्णवर्तिनी वाक्। न द्वौ युगपदुच्चारयति। गौरिति यावद्गकारे वाग्वर्तते न औकारे न विसर्जनीये। यावद् औकारे न गकारे न विसर्जनीये। यावद् विसर्जनीये न गकारे न औकारे। उच्चरितप्रध्वंसित्वात् च वर्णानाम्। उच्चरितप्रध्वंसिनः खल्वपि वर्णाः। उच्चरितः प्रध्वस्तः। अथापरः प्रयुज्यते। न वर्णो वर्णस्य सहायः। एवं तर्हि—

बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरस्तत्वन्नीतिः।
शब्देनार्थान्वाच्यान् दृष्ट्वा बुद्धौ कुर्यात् पौर्वापर्यम्॥

बुद्धिविषयमेव शब्दानां पौर्वापर्यम्। इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यत्यस्मिन्नर्थे अयं शब्दः प्रयोक्तव्यो अस्मिंस्तावच्छब्दे अयं

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

तावद्वर्णस्ततोयं ततोयमिति भा १-४-१०९ वा १०, ख १ पृ ३५६ प २-१३. तत्वन्नीतिशब्दस्य 'तननं तत् साऽस्ति यस्याः सा तत्वती सकलविषयव्यापिनी नीतिः बुद्धिर्यस्य स तत्त्वन्नीतिरिति। अन्ये तु तन्वन्नीतिरिति पठन्ति। तन्वती विषयान् व्याप्नुवती बुद्धिर्यस्य इति। स एवार्थः'। इति व्याख्यानं कृतं कैयटेन महाभाष्यप्रदीपे.

१.८६ भेदानुकारो ज्ञानस्य ज्ञानं ज्ञेयव्यपाश्रयम्। तेन च अन्यभेदरूपोपग्रहेण उपप्लुतं शब्दतत्त्वमेवेदं वाङ्मनसाख्यमविभागमन्यथा प्रतीयत इति। एवं ह्याह— ज्ञेयेन न विना ज्ञानं व्यवहारेवतिष्ठते। नालब्धक्रमया वाचा कश्चिदर्थोभिधीयते। स्वो.

१.८८ प्रत्येकं व्यञ्जका भिन्नाः...प्रकीर्णा इव शक्तयः॥ गोगवयजात्युपव्यञ्जनवत् भ्रमणरेचनादिकर्मसामान्यविशेषाश्रयवच्च तेषामुपव्यञ्जनानां दुर्ज्ञानो भेदः। स्वो. धर्मविशेषप्रसूतात् द्रव्यगुणकर्मसामान्याविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम् (वैशे. सूत्र १.१.३). उत्क्षेपणमपक्षेपणमाकुञ्चनं प्रसारणं गमनामिति कर्माणि (वैशे. सूत्र १-१-७). गमनग्रहणाद् भ्रमणरेचनस्यन्दनोर्ध्वज्वलनतिर्यक्पतननमनोन्नमनादयो गमनविशेषा एव न तु जात्यन्तराणि। (प्रशस्तपादभाष्य).

१.९२ भागवत्स्वपि तेष्वेव ...। तस्मिन्नपि तु शब्दे अभिव्यञ्जकध्वनिक्रमकृता भेदन प्रतिपत्तिः। दृष्टो हि मण्डूकादिवसासंबद्धप्रदीपाभिव्यक्तेषु रज्ज्वादिषु सर्पादिप्रतिपत्तिभेदः। स्वो.

१.९३ अनेकव्यक्त्यभिव्यङ्ग्या जाति. स्फोट इति स्मृता। अथवा उभयतः स्फोटमात्रं निर्दिश्यते। रश्रुतेर्लश्रुतिर्भवतीति। भा. शिवसूत्र ३,४; ख १ पृ २६ प १-२.

१.९७ ग्रहणग्राह्ययोः सिद्धा योग्यता नियता यथा ... तथैव स्फोटनादयोः॥ अथैतस्मिन्नेकार्थीभावकृते विशेषे किं स्वाभाविकं शब्दैरर्थाभिधानमाहोस्विद्वाचनिकम्। स्वाभाविकमित्याह। कुत एतत्। अर्थानादेशात्। न हि अर्था आदिश्यन्ते। कथं पुनरर्थानादिशन्नेवं ब्रूयान्नार्था आदिश्यन्त इति। यदाह भगवान् — अनेकमन्यपदार्थे (पा.२।२।२४) चार्थे द्वन्द्वः (पा.४।२।२९) अपत्ये रक्ते निवृत्त इति। नैतान्यर्थादेशनानि। स्वभावत एतेषां शब्दानामेतेष्वर्थेष्वभिनिविष्टानां निमित्तत्वेनान्वाख्यानं क्रियते। तद्यथा। कूपे हस्तदक्षिणः पन्थाः। अभ्रे चन्द्रमसं पश्य इति। भा. २।१।१ ख. १ पृ. ३६३ प. ७-१३. असंभवः खलु अपि अर्थादेशनस्य। को हि नाम समर्थो धातुप्रातिपदिकप्रत्ययनिपातानामर्थान् आदेष्टुम्। ... अप्रवृत्तिः खल्वपि अर्थादेशनस्य। बहवो हि शब्दा येषामर्थो न विज्ञायन्ते। जर्भरी तुर्फरीतू। भा. २।१।१; ख. १ प. ३६३ प. १७–२५.

१.१०३ अल्पे महति वा शब्दे स्फोटकालो न भिद्यते। तुल्यः संनिकर्षो वर्णानां द्रुतमध्यमविलम्बितासु वृत्तिषु। किंकृतस्तर्हि विशेषः। वर्णकालभूयस्त्वं तु। वर्णानां तु कालभूयस्त्वम्। तद्यथा। हस्तिमशकयोस्तुल्यः संनिकर्षः प्राणि-

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

भूयस्त्वं तु ॥ भा १।४।१०९ वा २,३; ख १ पृ. ३५४ प २०–२४. एवं तर्हि स्फोटः शब्दो ध्वनिः शब्दगुणः। कथम्। भेर्याघातवत्। तद्यथा भेर्याघातः। भेरीमाहत्य कश्चिद्विंशति पदानि गच्छति कश्चित् त्रिंशत् कश्चिच्चत्वारिंशत्। स्फोटश्च तावानेव। ध्वनिकृता वृद्धिः। भा १।१।७० वा ५; ख १ पृ १८१ प १९-२२.

१·१०७ वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते। अथवा ज्योतिर्वज्ज्ञानानि भवन्ति। भा १।४।२९, ख १ पृ ३२९ प २१–२२. अत्र कैयटः - यथा ज्वालारूपं ज्योतिरविच्छेदेन उत्पद्यमानं सादृश्यात्तत्त्वेनाध्यवसीयमानं सन्ततं तथैवोपाध्यायज्ञानानि भिन्नानि भिन्नशब्दरूपतामापद्यमानानि संतता-न्युच्यन्ते। ज्ञानस्य शब्दरूपतापत्तिरिति दर्शनमत्र भाष्यकारस्य। तथा चोक्तम् – वायोरणूनामिति।

१·११२ अथायमान्तरो ज्ञाता... शब्दत्वेन विवर्तते। "अन्तर्वर्तिना प्रयत्नेन ऊर्ध्वमुदीरितः प्राणो वायुः तेजसानुगृहीतः शब्दवहाभ्यः शुषिभ्यः सूक्ष्मांशं धूमसंतानवत् संहन्ति। स स्थानेषु शब्दघनः संहन्यमानः प्रकाशमात्रया कयाचिदन्तः-संनिवेशिनः शब्दस्य अविभक्तं बिम्बमुपगृह्णाति" इत्येवमादि सर्वमनु-गन्तव्यम् (स्वो). आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥ मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्। प्रातःसवनयोगं तं छन्दो गायत्रमाश्रितम् ॥ कण्ठे माध्यंदिनयुगं मध्यमं त्रैष्टुभानुगम्। तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ॥ सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः। वर्णाञ् जनयते तेषां विभागः पञ्चधा स्मृतः ॥ स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः। इति वर्णविदः प्राहुर्निपुणं तन्निबोधत ॥ पाणिनीयशिक्षा ६–१०. त्रिधा बद्धो वृषभो रोरवीति। (ऋ. सं. ४।५८।३) ... त्रिधा बद्धः त्रिषु स्थानेषु बद्धः उरसि कण्ठे शिरसीति। भा. पस्पशा, ख १ पृ ३ प १९–२०. सिद्धमेतत्। कथम्। समाने प्रक्रमे इति वक्तव्यम्। कः पुनः प्रक्रमः। उरः कण्ठः शिर इति। भा १।२।२९ वा २; ख १ पृ २०७ प १३–१४.

१·११७ या च बुद्धौ व्यवस्थिता।...सैषा भेदं प्रपद्यते ॥

बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरस्तत्वन्नीतिः।
शब्देनार्थान् वाच्यान् दृष्ट्वा बुद्धौ कुर्यात् पौर्वापर्यम् ॥

भा १।४।१०९ वा १०; ख १ पृ ३५६ प ९–१०

१·११८ शब्देष्वेवाश्रिता शक्तिः य एकोऽवर्णो बहुधा शक्तियोगाद् वर्णाननेकान् निहितार्थो दधाति। वि चैति चान्ते विश्वमादौ स देवः स नो बुद्ध्या शुभया संयुनक्तु ॥ ऋचोऽक्षरे परमे व्योमन् यस्मिन्देवा अधि विश्वे निषेदुः। यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥ छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति। अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया संनिरुद्धः। श्वे. उ. ४·१, ८, ९. तथा अपरेप्याहुः —

वागेवार्थं पश्यति वाग्ब्रवीति वागेवार्थं निहितं संतनोति।
वाच्येव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुङ्क्ते ॥ (स्वो).

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

१·१२० शब्दस्य परिणामोऽयम्......एतद्विश्वं व्यवर्तत ॥ आम्नाये संहृतभोग्यभोक्तृशक्ते-र्वागात्मनो बहुधा कारणत्वमाम्नातम् । 'स उ एवैष ऋङ्मयो यजुर्मयः साममयो वैराजः पुरुषः । पुरुषो वै लोकः । पुरुषो यज्ञः । तस्यैता लोकम्पृणास्तिस्र आहुतयः । ता एव त्र्यालिखिता वै त्रयो लोकाः' इति । (स्वो)· अथाध्यात्मम् । आत्मैवोखा वागषाढा...महिषी हि वाक् त्र्यालिखिता भवाति । त्रेधा विहिता हि वागृचो यजूंषि सामानि । अथो यदिदं त्रयं वाचो रूपमुपांशु व्यन्तरामुच्चैः ॥ श॰ ब्रा. ६-५-३-४. तथा पुनराह—

"वागेव विश्वा भुवनानि जज्ञे वाच इत्सर्वममृतं यच्च मर्त्यम् ।
अथेद्वाग्बुभुजे वागुवाच पुरुत्रा वाचो न परं यच्चनाह ॥"

पुराकल्पोऽप्याह—

"विभज्य बहुधात्मानं स च्छन्दस्यः प्रजापतिः ।
छन्दोमयीभिर्मात्राभिर्बहुधैव विवेश तम् ॥
साध्वी वाग्भूयसी येषु पुरुषेषु व्यवस्थिता ।
अधिकं वर्तते तेषु पुण्यं रूपं प्रजापतेः ॥
प्राजापत्यं महत्तेजः तत् पात्रैरिव संवृतम् ।
शरीरभेदे विदुषां स्वां योनिमुपधावति ॥
यदेतन्मण्डलं भास्वद् धाम चित्रस्य राधसः ।
तद्भावमभिसंभूय विद्यायां प्रविलीयते ॥" (स्वो).

१-१२४ वाग्रूपता चेदुत्क्रामेत्...न प्रकाशः प्रकाशेत । अन्धः तमः प्रविशन्ति येऽविद्या-मुपासते । ततो भूय इव ते तमो य उ विद्यायां रताः । बृ उ. ४।४।१० ईशउ. ९.

१·१२७ अर्थक्रियासु ... काष्ठकुड्यवत् ॥ श्लोकोऽयं भर्तृहरिणा स्वोपज्ञव्याख्यायामेवं ह्याहेत्यवतरणपूर्वकमुद्धृतः केनापि कृतो व्याडिनान्येन वा वाक्यपदीयहस्त-लिखितेषु प्रक्षिप्तो भाति । तथैव "भेदोद्ग्राहविवर्तेन॰" इत्यादयस्त्रयः श्लोकास्तथैव "प्रविभज्यात्मनात्मानम्॰" इत्ययं श्लोकः स्वोपज्ञव्याख्यायां समुपलभ्यन्ते । चत्वारोप्येते पाठभेदेषु दर्शिता वर्तन्ते । वा. प. पृ. १२.

१·१२९ स्वमात्रा परमात्रा वा....। अपरेषां सर्वप्रबोधरूपः सर्वप्रभेदरूपश्च एकस्य चितिक्रियातत्त्वस्यायं परिणाम इत्यादि स्वमात्रावादिनां दर्शनम् । अन्ये त्वाहुः । तद्यथा महतोऽग्नेर्विस्फुलिङ्गाः सूक्ष्माद्वायोरभ्रघनाः चन्द्रकान्ता-द्विभागिन्यस्तोयधाराः पृथिव्या वा सालादयः न्यग्रोधधानाभ्यो वा सावरोहप्रसवा न्यग्रोधा इत्येवमादि परमात्रावादिनां दर्शनम् । स्वपरमात्रा-वादिनां दर्शनं विद्याभाष्येभ्यः प्रतिपत्तव्यम् । स्वो. यथा सुदीप्तात्....। मुं. २।१।१. यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः...व्युच्चरन्ति । बृ. उ. २।१।२०.

१·१३० दृश्यतेऽलातचक्रादौ॰ अलातचक्रं प्रत्यक्षं दृश्यते अनुमानाच्च गम्यते नैतद-स्तीति । भा. ३।२।१२४ ख. २ पृ. १२५ प १७-१८.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

१.१३१ अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्। प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते ॥ चत्वारि शृङ्गा .... महो देवो मर्त्याँ आ विवेश ॥ ऋ. सं. ४।५८।३. द्वे शीर्षे द्वौ शब्दात्मानौ नित्यः कार्यश्च। ... महान् देवः शब्दः। ... महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम्। भा पस्पशा ख. १ पृ. ३ प २०-२१.

१.१३२ तस्माद्यः शब्दसंस्कारः...तद् ब्रह्मामृतमश्नुते। तदभ्यासाच्च शब्दपूर्वकं योगमधिगम्य...प्रतिभां...सत्तां...सम्यगवबुध्य नियता क्षेमप्राप्तिरिति। आह च — प्राणवृत्तिमतिक्रान्ते वाचस्तत्त्वे व्यवस्थितः। क्रमसंहारयोगेन संहृत्यात्मानमात्मनि ॥ १ ॥ वाचः संस्कारमाधाय वाचं ज्ञाने निवेश्य च। विभज्य बन्धनान्यस्याः कृत्वा तां छिन्नबन्धनाम् ॥ २ ॥ ज्योतिरान्तरमासाद्य छिन्नग्रन्थिपरिग्रहः। परेण ज्योतिषैकत्वं छित्त्वा ग्रन्थीन् प्रपद्यते ॥ ३ ॥ स्वो. यच्छेद्वाङ्मनसी प्राज्ञः...। कठ उ. ३।१३.

१.१३६ वेदशास्त्राविरोधी च तर्कश्चक्षुः...आगमस्याविरोधेन ऊहनं तर्क उच्यते। अमृत. उ. १७. विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्। जै. सू. १-३-३. नैषा तर्केण मतिरापनेया। कठ उ. २.९.

१-१३७ सतोऽविवक्षा पारार्थ्यं व्यक्तिरर्थस्य लैङ्गिकी। कथं पुनः सतो नाम अविवक्षा स्यात्। सतोप्यविवक्षा भवति। तद्यथा। अलोमिका एडका। अनुदरा कन्येति। असतश्च विवक्षा भवति। समुद्रः कुण्डिका। विन्ध्यो वर्धितकमिति। भा १-४-२४ वा ३ ख १ पृ. ३२७ प. १९–२१; भा. २।३।५०, ख. १ पृ. ४६३ प. १३-१६ कर्तुरीप्सिततमं कर्म (पा. १।४।४९), तस्यापत्यम्, (पा. ४-१-९२). कर्मणा यमभिप्रैति स संप्रदानम् (पा. १-४-३२) स्त्रियं ये चोपजीवन्ति प्राप्तास्ते मृतलक्षणम् इति लिङ्गसंख्याकालानामविवक्षा क्वचिच्च विवक्षा इति लक्षणव्यवस्थापनं तर्काधीनम्। (स्वो). पारार्थ्यम्। ननु च त्वयापि इत्त्वं वक्तव्यम्। परार्थे मम भविष्यति सन्यत इङ्गवतीति। भा. १।१।५९ वा. ८, ख. १ पृ. १५७ प. ८. ममापि तर्हि एकग्रहणं परार्थं भविष्यति। सरूपाणामेकशेष एकविभक्ताविति। भा. १।४।१ वा. २, ख. १ पृ. २९६ प. १८. व्यक्तिरर्थस्य लैङ्गिकी तथा च 'नक्षत्रं दृष्ट्वा वाचं विसृजेत्' (Cf मै. सं. ३।६।९) इति कालोपलक्षणार्थं नक्षत्रदर्शनं तत्। (स्वो). नक्षत्रेण चन्द्रमसो योगात्तद्युक्तात् काले प्रत्ययविधानम् ॥ तत्रोत्तरपदलोपः ॥ लिङ्गवचनानुपपत्तिश्च ॥ कालयोगात्सिद्धम् ॥ तथा च संप्रत्ययः ॥ भा. ४।२।३ वा १-५; ख. २ पृ. २७२ प. ३–१७. प्रधानस्यान्यथासिद्धौ परार्थत्वाद् दृश्यमानेषु ज्योतिःषु कालविशेषपरिच्छेदे सति तत् क्रियते। काकेभ्यो दधि रक्ष्यताम् इति उपघातप्रतिषेधस्य चिकीर्षिततत्वात् काकेषु असत्स्वपि श्वादिभ्यो रक्ष्यते। पात्राणि संमृज्यन्तामिति भुजिक्रियाङ्गोपसंहारपरत्वात् पात्राभावेपि अङ्गान्तराणि उपसह्रियन्ते। लैङ्गिकी खल्वपि व्यक्तिः। अक्ताः शर्करा उपदधाति इति सर्वाञ्जनद्रव्यप्रसङ्गे 'तेजो वै घृतम्' (तै. ब्रा. ३।१२।५।१२) इति लिङ्गात् विशेषप्रतिपत्तिः। (स्वो).

१.१३८ शब्दानामेव सा शक्तिः... शब्दशक्तिरूपापरिगृहीतस्तु साधर्म्यवैधर्म्यमात्रानुसारी सर्वागमोपघातहेतुत्वात् अनिबन्धनः शुष्कस्तर्क इत्युच्यते। तद्यथा।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

'यद्‌दुम्बरवर्णानां घटीनां ... नयेत्' (भा. पस्पशा ख. १ पृ. ३ प. १, २.) इति। 'शब्देन वाच्यमित्युक्ते द्रामिलकेन भवति वक्तव्यम्' इति। (स्वो).

१·१३९ शब्दास्तस्यैव दृश्यन्ते विषापहरणादिषु। शब्दानामपि केषांचिदुच्चारणे विषापहरणादि दृष्टं फलमुपलभ्यते। (स्वो.) यद्यपि च अर्थप्रतिपादने मन्त्राणामङ्गता तथापि तेऽर्थास्तैरेव शब्दैः प्रत्याय्यमाना विषं हरन्ति नान्यैः। (वृषभदेव) वचोभिरुग्रैर्नि रिणामि ते विषम्। (अथर्व. ५।१३।१) यद् ब्रह्मभिर्यदृषिभिर्यद्देवैर्विदितं पुरा। यद् भूतं यद् भव्यमासन्वत् तेना ते वारये विषम्॥ (अथर्व ६।१२।२.)

१·१४२ साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः साध्वनुशासने अस्मिन् शास्त्रे साधुत्वमनेन क्रियते। भा १।१, ख. १ पृ. ३९ प. १४; पृ १०४ प. ९.

१,१४३ वैखर्या मध्यमायाश्च..."गौरिव प्रक्षरत्येका रसम्" इत्याद्यारभ्य "गुणैर्न व्यवकीर्यते" इत्येकादश श्लोकाः स्वोपज्ञटीकायामुद्धृताः पाठभेदेषु प्रदर्शितास्ते अवलोकनीयाः—प्राणापानान्तरे देवी वाग्वै नित्यं स्म तिष्ठति। प्रेर्यमाणा महाभागे विना प्राणमपानती। प्रजापतिमुपाधावत् प्रसीद भगवन्निति॥ ततः प्राणः प्रादुरभूद्वाचमाप्याययन् पुनः। तस्मादुच्छ्वासमासाद्य न वाग्वदति कर्हिचित्॥ घोषिणी जातनिर्घोषा नित्यमेव प्रवर्तते। तयोरपि च घोषिण्योर्निर्घोषैव गरीयसी॥ गौरिव प्रस्रवत्येषा रसमुत्तमशालिनी। सततं स्यन्दते ह्येषा शाश्वतं ब्रह्मवादिनी। दिव्यादिव्यप्रभावेन भारती गौः शुचिस्मिते। एतयोरन्तरं पश्य सूक्ष्मयोः स्यन्दमानयोः॥ महाभारत १४।२१।१४–१८ सैषा त्रयी वाक् चैतन्यग्रन्थिविवर्तवत् अनाख्येयपरिमाणा तुरीयेण मनुष्येषु प्रत्यवभासते। तत्रापि चास्याः किंचिदेव व्यावहारिकम्, अन्यत्तु सामान्यव्यवहारातीतम्। आह च – चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति (ऋग्वेद १।१६४।४५) इति। तस्याश्च असंकीर्णे वाचो रूपं कार्त्स्न्येन सामान्यविशेषवति अस्मिंल्लक्षणे व्याकरणशास्त्रे निबद्धम्। स्वो.

१·१४४ तद्विभागाविभागाभ्यां क्रियमाणम्... शब्दशक्तयः॥ विभागो नाम परप्रतिपादनाय कल्पितः प्रकृतिप्रत्ययादिभेदः। तद्यथा। धातोस्तव्यदादयः (पा. ३।१।९१,९६) इति। तथा चोक्तम्। 'यत्तावदयं सामान्येन शक्नोत्युपदेष्टुं तत्तावदुपदिशति' इति। अविभागस्तु यत्र स्वरूपेण उच्चारणम्। तद्यथा। दाधर्ति दर्धर्ति दर्धर्षि बोभूतु ... आगनीगन्ति' (पा. ७।४।६५ः) इति, दाश्वान्साह्वान्मीढ्वांश्च (पा. ६।१।१२) इति। स्वो. अथवा यत्तावदयं सामान्येन शक्नोत्युपदेष्टुं तत्तावदुपदिशति प्रकृतिं ततो वलाद्यार्धधातुकं ततः पश्चादिकारम्। तेनायं विशेषेण शब्दान्तरं समुदायं प्रतिपद्यते। ... अथवैतया आनुपूर्व्या अयं शब्दान्तरमुपदिशति प्रकृतिं ततो वलाद्यार्धधातुकं ततः पश्चादिकारं यस्मिंस्तस्यागमबुद्धिर्भवति। भा. १।१।४६, ख. १ पृ ११३ प १०–१५.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

१·१४८ शब्दः संस्कारहीनो यः ...तमपभ्रंशमिच्छन्ति...'शब्दप्रकृतिरपभ्रंशः' इति संग्रहकारः। नाप्रकृतिरपभ्रंशः स्वतन्त्रः कश्चिद्विद्यते। सर्वस्यैव हि साधुरेव अपभ्रंशस्य प्रकृतिः। प्रसिद्धेस्तु रूढितामापद्यमानाः स्वातन्त्र्यमेव केचिदपभ्रंशा लभन्ते। स्वो. गौरित्यस्य गावी गोणी गोता गोपोतलिकेत्येवमादयोऽपभ्रंशाः। भा. १।१ ख. पृ. २ प. २३–२४; पृ. ५ प. २१-२२.

द्वितीयं काण्डम्

२·१-२ इह च 'पदप्रकृतिः संहिता' (ऋ. प्रा. २।१; नि. १।१७) इति प्रातिशाख्यम्। तत्र पदानां प्रकृतिः कारणं पदप्रकृतिः संहिता इति अखण्डपक्षः। पदानि प्रकृतिः यस्याः सा इति खण्डपक्षः प्रादुर्भवति। (पुण्य.) परः संनिकर्षः संहिता। पदप्रकृतिः संहिता। पदप्रकृतीनि सर्वचरणानां पार्षदानि। नि. १।१७. 'अव्यक्तः क्रमवान्' (वा. प. २।१९) इत्यादिना 'व्यावृत्तभेदो येनार्थः' (वा. प. २।२७) इत्यन्तेन च अखण्ड एव स्फोटलक्षणः शब्दो वाक्यमिति च दर्शितम्। उक्तं च 'येनोच्चारितेन सास्नालाङ्गूलखुरककुदविषाणि अर्थरूपं प्रतिपाद्यते। स शब्दः' (भा. ख. १ पृ. १ प. ६–७, १०–११) तथा 'स्फोटः शब्दो ध्वनिः शब्दगुणः (भा. १।१।७०, ख. १ पृ. १८१ प. १९-२०)......अन्यदपि वार्तिककारीयं पारिभाषिकं शास्त्रे वाक्यलक्षणमस्ति 'आख्यातं साव्ययकारकविशेषणं वाक्यम्' (पा. २।१।१ वा ९) 'एकतिङ्' (पा. २।१।१ वा १०) इति च, जरन्मीमांसकोक्तं लौकिकमप्यस्ति 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्' (जै. २।१।४६) इति अनयोः संघातपक्षेऽन्तर्भावः (पुण्य.)

२·३ निघातादिव्यवस्थार्थम् समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः। किं प्रयोजनम्। नानावाक्ये मा भूवन्निघातादय इति। अयं दण्डो हरानेन। ओदनं पच तव भविष्यति॥ भा. २।१।१ वा. ११ ख. १ पृ. ३६७ प. १९–२१.

२·४ साकाङ्क्षावयवं भेदे आख्यातं साव्ययं सकारकं सकारकविशेषणं वाक्यसंज्ञं भवतीति वक्तव्यम्। साव्ययम्। उच्चैः पठति। नीचैः पठति। सकारकम्। ओदनं पचति। सकारकविशेषणम्। ओदनं मृदुविशदं पचति। सक्रियाविशेषणं चेति वक्तव्यम्। सुष्ठु पचति। दुष्ठु पचति। अपर आह— आख्यातं सविशेषणमित्येव। सर्वाणि ह्येतानि क्रियाविशेषणानि। भा. २।१।१ वा. ९, ख. १ पृ. ३६७ प ११–१५.

२·५ संबोधनपदं यच्च तत् क्रियाया विशेषकम्। अथवा आचार्यप्रवृत्तिर्ज्ञापयति न कर्मादिविशिष्टे प्रथमा भवतीति यदयं संबोधने प्रथमां शास्ति (पा. २।३।४७) नैतदस्ति ज्ञापकम्। भा. २।३।४६ ख. १ पृ. ४६१ प. १६–१८. एकश्रुति दूरात्संबुद्धौ (पा. १।२।३३) किमिदं पारिभाषिक्याः संबुद्धेर्ग्रहणमेकवचनं

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

संबुद्धिः (पा. २।३।४९) आहोस्विदन्वर्थग्रहणं संबोधनं संबुद्धिः। यदि पारिभाषिक्याः देवा ब्रह्माणः अत्र (देवब्रह्मणोरनुदात्त इति अनुदात्तः) न प्राप्नोति। अथान्वर्थग्रहणं, न दोषः। यथा न दोषस्तथास्तु ॥ भा. १।२।३३, ख. १ पृ. २१० प. १-४.

२.६ यथानेकमपि क्त्वान्तं तिङन्तस्य विशेषकम्। समानकर्तृकयोरिति बहुषु क्त्वा न प्राप्नोति। स्नात्वा भुक्त्वा पीत्वा व्रजतीति। ...... सिद्धमेतत्। कथम्। क्रियाप्रधानत्वात्। क्रियाप्रधानोयं निर्देशः। ...... सर्वेषामत्र व्रजिक्रियां प्रति पौर्वकाल्यम्। स्नात्वा व्रजाति भुक्त्वा व्रजति पीत्वा व्रजतीति। एवं च कृत्वा प्रयोगोऽनियतो भवति। स्नात्वा भुक्त्वा पीत्वा व्रजति। पीत्वा स्नात्वा भुक्त्वा व्रजतीति। भा. ३।४।२१ वा. १।४, ख. २ पृ. १७२ प. १५–पृ. १७३ प. १०. तथा तिङन्तं ......। तिङतिङः (पा. ८।१।२८) अतिङ्वचनमनर्थकं ... समानवाक्याधिकारात्। समानवाक्य इति वर्तते न च समानवाक्ये द्वे तिङन्ते स्तः। भा. ख. ३ पृ. ३७४ प. २१–२५.

२.९ शब्दान्तरैः समाख्यानं ...... आख्यातं साव्ययकारकविशेषणं वाक्यम्।...... ब्रूहि ब्रूहि। भा. २।१।१ वा. ९, १० ख. १ पृ. ३६७. प. १०–१७.

२.११ वर्णान्तरसरूपत्वं वर्णभागेषु दृश्यते। वर्णैकदेशा वर्णग्रहणेन चेत्संध्यक्षरे समानाक्षराश्रयो विधिः प्राप्नोति स प्रतिषेध्यः। अग्ने इन्द्रम्। वायो उदकम्। अकः सवर्णे दीर्घः (पा. ६।१।१०१) इति दीर्घत्वं प्राप्नोति। दीर्घे ह्रस्वाक्षराश्रयो विधिः प्राप्नोति स प्रतिषेध्यः। ग्रामणीः। आलूय। प्रलूय। ...... नाव्यपवृक्तस्यावयवस्यावयवाश्रयो विधिर्भवति यथा द्रव्येषु। तद्यथा द्रव्येषु। सप्तदश सामिधेन्यो भवन्तीति न सप्तदशारत्निमात्रं काष्ठमग्नावभ्याधीयते। भा. शि. सू. ३, ४ वा. ७–९; ख. १ पृ. २४ प. २–६ पृ. २५ प. ४–५.

२.१२ भागैरनर्थकैर्युक्ता वृषभोदकयावकाः। वृषभो वर्षणात्। भा. पस्पशा ख. १ पृ. ३ प. २० वडवाया वृषे वाच्ये। भा. ४।१।१२०; ख. २ पृ. २५८ प. ९ उदकस्योदः संज्ञायाम्। पा. ६।३।५७. यावादिभ्यः कन्। पा. ५।४।२९.

२.१३ शब्दस्य न विभागोस्ति कुतोर्थस्य भविष्यति। विभागैः प्रक्रियाभेदमविद्वान्न प्रतिपद्यते ॥ .... कुशलस्तु प्रतिपत्ता सर्वमेव भेदं अभेदानतिक्रमेण पश्यति। प्रक्रियाभेदास्तु शास्त्रे विभागनिबन्धनम्। तथाहि। हरिद्रुर्मितद्रुः। दुर्दर्शो दुस्तरः। इत्यत्र मितद्रुरवगृह्यो हरिद्रुरनवगृह्यः। तत्र विभागे प्रक्रिया भिद्यते। हरिद्रुः हरित्ऽरवः, हरिऽद्रवः इति। तथा दुस्तर इत्यपि तरतेः स्तृणातेर्वा। अतश्च विभागे भिद्यमानायां प्रक्रियायामनवग्रहः ॥ (स्वो.) न लक्षणेन पदकारा अनुवर्त्याः। पदकारैर्नाम लक्षणमनुवर्त्यम्। यथालक्षणं पदं कर्तव्यम्। भा. ३।१।१०९ ख. २ पृ. ८५ प. ४–५अत्र "न लक्षणेनेति। संहिताया एव नित्यत्वम्। पदविच्छेदस्य तु पौरुषेयत्वम्। तथा च यत्र अर्थनिश्चयाभावः तत्रावग्रहो न क्रियते। तदुक्तम् 'हरिद्रूरनवगृह्यते' इति। हरिद्रूरित्यत्र किं हरिशब्दः इकारान्तः, अथ

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

हरिच्छब्दः तकारान्त इति संदेहात् ” इति कैयटः। अजुर्यासो हरिषाचो हरिद्रवः ” ऋ. सं. १०।९४।१२ अत्र नावग्रहः क्रियते पदपाठे। न हरिद्रोः श. ब्रा. १३।८।१।१६ परि त्मना मितद्रुरेति होता। ऋ. सं. ४।६।५ अत्रावग्रहः क्रियते मितद्रुरिति मितऽद्रुः। विप्रसंभ्यो ड्वसंज्ञायाम् पा. ३।२।१८०, डुप्रकरणे मितद्र्वादिभ्य उपसंख्यानम्। पा. ३।२।१८० वा. १. विभागैः प्रक्रियाभेदमविद्वान् प्रतिपद्यते। तथा इन्द्राणी वरुणानी पूतक्रतायी। इन्द्रादीनामानुक् (पा. ४।१।४९) पूतक्रतोरै च (पा. ४।१।३६) इति सामान्यविशेषवता लक्षणेन भेदेन अन्वाख्याने शास्त्रप्रक्रिया-भेदेनाविद्वांसः प्रतिपद्यन्ते। स्वो.

२.१४ ब्राह्मणार्थो ... ब्राह्मणकम्बले। व्यक्ताभिधानं भवति वाक्ये। ब्राह्मणस्य कम्बलस्तिष्ठतीति। समासे पुनरव्यक्तम्। ब्राह्मणकम्बलस्तिष्ठतीति। भा. २।१।१ वा. १; ख. १ पृ. ३६२ प. २१-२२.

२.२३ भिन्नकाले ... स धर्मो ह्रस्वदीर्घयोः। ऊकालोऽज् ह्रस्वदीर्घप्लुतः। पा. १।२।२७.

२.३७ केषांचिद्रूढिशब्दत्वं शास्त्र एवानुगम्यते। कार्यसशेषविधेश्च तदुक्तं नैगमरूढि-भवं हि सुसाधु। नैगमाश्च रूढिभवाश्च औणादिकाः सुसाधवः कथं स्युः। भा. ३।३।१ श्लो. वा.; ख. २ पृ. १३८ प. ७-१३. अतश्च सादृश्यकल्पनया ते रूढिशब्दा इत्यवगम्यते। येषां तु वाक्यप्रक्रमोऽन्य एवार्थः क्रियासंबन्धी वृत्तिप्रक्रमोऽन्य एव तेषां रूढिशब्दत्वम्। तेषु च 'शिल्पिनि चाकृञः' (पा ६।२।७६), 'संज्ञायां च' (पा. ६।२।७७), 'संज्ञायामनाचितादीनाम्' (पा. ६।२।१४६), 'ङ्यापोः संज्ञाछन्दसोर्बहुलम्' (पा. ६।३।६३), 'बहुलं तणि' (पा. २।४।५४ वा. ११) इत्येवमादीनि कार्याणि शास्त्र एवोपव्याख्यायन्ते। स्वो.

२.३८ उपादायापि ये हेयास्तानुपायान् प्रचक्षते। इह शब्दसंस्कारे क्वचिदर्थस्यापि समधिगममात्रायां बुद्धौ पदानि वाक्यस्योपकारायोपादीयन्ते। ... तेषां च यदर्थमुपादानं तत्सन्निधाने नियत एषां त्यागः। उपायभावात्। शास्त्रे हि आमन्त्रितस्य च पदात्परस्य तिङतिङः (पा.८।१।२८) इति निघातादयः शब्दसंस्काराः। तथा एकादेश उदात्तेनोदात्तः (पा. ८-२-५) स्वरितो वानुदात्ते पदादौ (पा. ८।२।६) 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (पा.८-२-४) इति। तथा तत्पुरुषे तुल्यार्थ०' (पा. ६।२।२) 'सप्तमीहारिणौ०' (पा. ६।२।६५) इत्येवमादयोऽर्थप्रतिपत्तिमात्रा अपि दृश्यन्ते। 'यथा मे माता तथा मे पिता, सुस्नातं भोः' भा. २।२।२४ ख.१ पृ. ४२० प. ३ इति। ... तत एते पुरुषसंबोधनोपायाः। यदि त्वन्यथापि पुरुषाः प्रतिपादयितुं शक्यन्ते तदर्थान्युपायान्तराण्यपि प्रक्रम्यन्ते। स्वो.

२.३९ अथ कथंचित् पुरुषः ...... वाक्यनिबन्धनाः। विचित्रा हि बहुधा प्रतिपत्तॄणां प्रतिपत्तिः। 'श्रोत्रियंश्छन्दोधीते' (पा. ५-२-८४) इति वाक्यार्थे पद-वचनम्। छन्दसो वा श्रोत्रभावः घंश्च प्रत्ययः। श्रोत्राभ्यां कृतकर्मेति वा। तथा इको वक्तव्यः। आखनिकः। इकवको वक्तव्यः। आखनिकवकः। पात्रेसमितादिषु वा आखनिकवक इति पठ्यते। तथा उग्रगोयुगाश्वषड्-

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

गवादिषु प्रत्ययत्वेनान्यथान्यथा चान्वाख्यानं क्रियते। स्वो. गोयुगशब्दश्च प्रत्ययो वक्तव्यः। उष्ट्रगोयुगम्। खरगोयुगम्। भा. ५।२।२९ वा. ३; ख. २. पृ ३७६-७

अन्यं तस्मै पुनर्दद्यां सौवर्णं हस्तिषड्गवम्। महाभारत ८।२७।४

२.४० सोयमित्यभिसंबन्धो बुद्ध्या प्रक्रम्यते यदा। सा (वाक्) हि सापराधेषु पुरुषेषु अन्यथैवात्मानं दर्शयति। अतश्च तामेके पश्यन्तोपि न पश्यन्ति शृण्वन्तोपि न शृण्वन्ति। तां तु वैयाकरणा वाग्योगविदः शब्दात्मानमभिसंभूता भेददर्शनमतीत्य स्वेन स्वरूपतत्त्वेन उपलभन्ते। सा च तेभ्य एवात्मानं विवृणोति। उक्तमिदम्—'अर्थं कथंचित् पुरुषः कश्चित्संप्रतिपद्यते' इति। वाप २.३९ अतः पुरुषप्रतिपत्तिभेदानां परिमाणविकल्पानां निदर्शनमात्रं क्रियते। स्वो. उत त्वः पश्यन्न ददर्श वाचं उत त्वः शृण्वन्न शृणोत्येनाम्। ऋ. सं. १०।७१।४. सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद्, दुष्यति चापशब्दैः भा. पस्पशा; ख. १ पृ. २ प. २०

२.४२ सम्बन्धे सति यत्त्वन्यदाधिक्यमुपजायते। वाक्यार्थमेव तं प्राहुः .. स चायं वाक्य-पदयोराधिक्ययोर्भेदो भाष्य एवोपव्याख्यातः। अतश्च तत्रभवानाह (कदाचिद् व्याडिमुनिरत्र तत्रभवानित्यनेनाभिप्रेतः स्यात्)—यथैकपद-गतः प्रातिपदिकेऽन्त.पदं संस्कारहेतुरर्थो वचनं प्रति...भवति तथैकपदगतः पदसंस्कारहेतुरेव विभक्तियोगं प्रत्यहेतुर्भवति। ग्रामो ग्रामो रमणीय इति। अनेकपदसंश्रयस्तु वाक्यार्थः प्रतिनिघातादिव्यवस्थार्थहेतुराख्यायते। स्वो. प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमालक्षणे पदसामानाधिकरण्य उपसंख्यानं कर्तव्यम्। वीरः पुरुषः। किं पुनः कारणं न सिध्यति। अधिकत्वात्। व्यतिरिक्तः प्रातिपदिकार्थ इति कृत्वा प्रथमा न प्राप्नोति। कथं व्यतिरिक्तः। पुरुषे वीरत्वम्॥ न वा वाक्यार्थत्वात्। (वार्तिक २)। न वा वक्तव्यम्। किं कारणम्। वाक्यार्थत्वात्। यदत्राधिक्यं वाक्यार्थः सः। भा. २-३-४६ वा. १, २; ख. १ पृ. ४६१ प. २५—पृ. ४६२ प. ५

२.४९ सन्त एव विशेषा ये ...। अर्थत्वमापद्यमानेषु यावन्तो विशेषाः संनिहिता नियतप्रसिद्धिव्यवस्थास्ते शब्दान्तरविषयेण कालवृत्त्यनुग्रहेण प्रतिबन्धा-भ्यनुज्ञाख्येन प्रतिपत्तृभिरनुगम्यन्ते, नापरं वाक्यं नाम ...। स्वो

२.५० क्रमो हि धर्मः कालस्य। क्रमो हि शब्देषु कालशक्तिरूपविशेषस्य निवेश इव। स कालात्मनो न व्यतिरिच्यते। तेन वाक्यमित्यवस्तुकमेवेदमभिलापमात्रं पदमेवार्थवदिति। स्वो.

२.५४ यथा सावयवा वर्णाः.... अर्थवन्तः समुदिताः...। संघातार्थवत्त्वाच्च मन्यामहे अर्थवन्तो वर्णा इति। येषां संघाता अर्थवन्तः अवयवा अपि तेषामर्थवन्तः। येषां पुनरवयवा अनर्थकाः समुदाया अपि तेषामनर्थकाः। ... संघात-स्यैकार्थ्यात् सुबभावो वर्णात्। भा. शिवसूत्र ५ वा. १२,१३ ख. १ पृ. ३० प. २५—पृ. ३१ प. ९.

२.५८ पदप्रकृतिभावश्च वृत्तिभेदेन वर्ण्यते। पदानां संहिता योनिः संहिता वा पदाश्रया। तत्पुरुषवृत्त्या शब्दसंस्कारमाचक्षाणा विवक्षितमर्थं प्रतिपादयन्ति। तेषां

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

तु चतुर्णामेव पदजातानां संसर्गमात्रेण पदेष्वेव प्रसिद्धसंबन्धः कश्चिदर्थात्मा प्रकाशते । ते बहुव्रीहिरीत्या शब्दसंस्कारमाचक्षाणाः तथैव विवक्षितमर्थं प्रतिपादयन्ति । तत्र केषांचित् पौरुषेयाण्याम्नायपदानि ... केषांचित्तु पदरूप एवाम्नायः, संहिता पौरुषेयी ......। केषांचित्तु नित्यावुभावप्येतौ समाम्नायौ......। केषांचिन्नित्यस्यैकस्याम्नायस्य द्वे एते विभागाविभागशक्ती प्रतिपादकप्रतिपत्तव्यरूपेण वर्तेते। स्वो. परः संनिकर्षः संहिता। पदप्रकृतिः संहिता। पदप्रकृतीनि सर्वचरणानां पार्षदानि। नि १।१७.

२-५९ पदाम्नायश्च यद्यन्यः... नित्यस्तत्र कथं कार्यं पदं लक्षणदर्शनात्। यद्यन्य एव पदाम्नायो नित्यः पुरुषप्रयत्नव्यतिरेकेण सिद्धस्तत्रायं भाष्यग्रन्थः समर्थयितव्यः न लक्षणेनेति। (स्वो.) अञ्जेश्चोपसंख्यानं संज्ञायाम्। आज्यम्। यदि क्यप्, वृद्धिर्न प्राप्नोति। तस्माण्ण्यदेषः। यदि ण्यदुपधालोपो न प्राप्नोति। तस्मात् क्यबेषः। ननु चोक्तं वृद्धिर्न प्राप्नोतीति। आङ्पूर्वस्यैष प्रयोगो भविष्यति। यद्येवमवग्रहः प्राप्नोति। न लक्षणेन पदकारा अनुवर्त्याः। पदकारैर्नाम लक्षणमनुवर्त्यम्। यथालक्षणं पदं कर्तव्यम्। भा. ३।१।१०९ वा. २; ख. २ पृ. ८५ प. १-५. भा. ६-१-२०७, ख. ३ पृ. ११७ प. १८-१९. भा. ८।२।१६ ख. ३ पृ. ३९८ प. ८-१०. वने न वायो न्यधायि चाकन्। (ऋ. १०।२९।१) वने इव वायो वेः पुत्रः, चायन् इति वा कामयमान इति वा। वा इति च यः इति च चकार शाकल्यः। उदात्तं त्वेवमाख्यातमभविष्यत् असुसमाप्तश्चार्थः। नि. ६।२८. लोकेपि अर्थेन प्रयुक्तेषु शब्देषु शास्त्रेण धर्मनियममात्रमेव क्रियते। (Cf. भा. पस्पशा ख. १ पृ. ८ प. ४) अतः शास्त्रेण नित्यस्य लक्ष्यस्यानुविधानं कर्तव्यम्। न तु नित्येन लक्ष्येण शास्त्रमनुविधेयम्। ... अपि च बहुशक्तेः समाम्नायस्य कैश्चित् पदकारैः काचिद्विभागशक्तिरनुगम्यते। वक्षस्सुरुक्म इति वक्षस्सु रुक्म इति। स्वो.

२-६५ यजेतेति .... व्रीहिश्रुत्या निवर्तेत। 'व्रीहिभिर्यजेत'। श्रुतिप्रमाणत्वात् शिष्टाभावे नागमोन्यस्याशिष्टत्वात्। जै. सू. ६।३।१२.

२-७० असंनिधौ प्रतिनिधिः ... इत्युपदिश्यते ॥ वचनाच्चान्याय्यमभावे तत्सामान्येन प्रतिनिधिरभावादितरस्य। जै. सू. ६।३।३१.

२-७२ विज्ञातार्थं पदं यच्च ...। न च वृक्षवृषभकाण्डीरादिषु प्रसिद्धभेदेषु ऋक्ष-ऋषभआण्डीराद्यर्थे निर्ज्ञाते वर्णमात्रविषयो वकारार्थे ककारार्थे वा प्रश्नो दृश्यते। तस्मादविभागधर्मात्प्रच्युतेन विभागे वाक्यार्थेन व्यवस्थितेन भवितव्यम्। स्वो. वर्णानुपलब्धौ चानर्थगतेर्मन्यामहे अर्थवन्तो वर्णा इति। वृक्षः ऋक्षः। काण्डीरः आण्डीरः। वृक्ष इति सवकारेण कश्चिदर्थो गम्यते। ऋक्ष इति वकारापाये सोर्थो न गम्यते। काण्डीर इति सककारेण कश्चिदर्थो गम्यते आण्डीर इति ककारापाये सोर्थो न गम्यते। भा. शि. सू. ५ वा. ११; ख. १ पृ. ३० प. १४-१७.

२-७३ श्रुतिरेवानुषङ्गे सा बाधिका लिङ्गवाक्ययोः। श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्। जै. सू. ३।३।१४.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

२·७५ अभिन्नमेव वाक्यं तु ... । यस्याभिन्नमविभक्तिकोद्देशमेकार्थमेकं वाक्यं सुण्डिकुट्टिसूत्रिवदविकलं श्रुतिभूतं तस्य कथं श्रुत्यर्थाव्यतिरेकेणात्मभूतैर्यत्नप्रापितसंनिधानाभिमतैरसति विरोधे बाधव्यवस्था प्रकल्पते । तत्र श्रुतिलिङ्गवाक्येत्येतदसमर्थितं स्यात् । वाक्यनिबन्धने चैकस्मिन्नर्थे परतन्त्राणां शब्दानामभावमानर्थक्यं चाभ्युपगच्छतो वाक्यस्याप्यानर्थक्यं प्राप्नोति । तत्र 'एकस्यैवार्थतामाहुर्वाक्यस्याव्यभिचारिणीम्' इत्येतत् (वा. प. २·५६) प्रतिज्ञातं हीयेत । स्वो.

२·९९ ऊ इत्यभेदमाश्रित्य यथासंख्यम्...। ऊकालोऽज्ह्रस्वदीर्घप्लुतः । यथासंख्यमनुदेशः समानाम् । पा. १।२।२७; १।३।१०. लृङ्लृटोर्ग्रहणे स्यतासी लृलुटोः । पा. ३।१।३३.

२·१०२ प्लुतस्याङ्गविवृद्धिं च समाहारमचोस्तथा । प्लुतावैच इदुतौ । किमर्थमिदमुच्यते । ...ऐचोरुभयविवृद्धिप्रसङ्गादिदुतोः प्लुत उच्यते...उभयोर्विवृद्धिरस्मिन्सोयमुभयविवृद्धिः ।.... इमावैचौ समाहारवर्णौ मात्रावर्णस्य मात्रेवर्णोवर्णयोरिति तयोः प्लुत उच्यमान उभयविवृद्धिः प्राप्नोति । तद्यथा अभिवर्धमानो गर्भः सर्वाङ्गपरिपूर्णो वर्धते ॥ .... इष्यत एव चतुर्मात्रः प्लुतः ॥ भा. ८।२।१०६; ख. ३ पृ. ४२० प. १७–पृ. ४२१ प. १४ । तथा वाक्यान्यपि द्विष्ठानि भवन्ति । श्वेतो धावति । भा. पस्पशा; ख. १ पृ. १४, प. १४; Cf. भा. ८।२।३ ख. ३ पृ. ३८८ प. ९–१०.

२·१०३ अर्धर्चादिषु ... रूपभेदः ...। अर्धर्चाः पुंसि च । पा. २।४।३१.

२·१०४ संहिताविषये वर्णाः ... शब्दान्तरत्वं यान्तीव तथा वाक्यान्यपि द्विष्ठानि भवन्ति । श्वेतो धावति । भा. पस्पशा; ख. १ पृ. १४ प. १४.

२·१०६ रूपमत्यन्तभेदेन तदेवैकं प्रकाशते । वाक्यान्यपि द्विष्ठानि भवन्ति । श्वेतो धावति । भा. पस्पशा; ख. १ पृ. १४ प. १४.

२·११०–११२ सरूपाणां च वाक्यानां ... तन्त्रेणोच्चारणादेकं रूपं साधूपलभ्यते । ... स्यादेषां पृथगर्थता । सरूपाणामेकशेष एकविभक्तौ । पा. १।२।६४ । अनेकार्थाश्रयश्च पुनरेकशेषः पा. १।२।६४ वा. १५ .... एकेनाप्यनेकस्याभिधानम् । पा. १।२।६४ वा. ३१. अभिधानं पुनः स्वाभाविकम् । पा. १।२।६४ वा. ३२.

२·१४८ मन्दादिशक्तयो दृष्टाः दधीत्युक्ते बहवोर्था गम्यन्ते । मन्दकमुत्तरकं निलीनकमिति । भा. २।१।२५ वा. ९; ख. १ पृ. ३८८ प. १.

२·१५८ संख्याप्रमाण ... सलिलादिषु । तथा चोक्तम्—'केवलं घृतमिति बिन्दौ अपि भवति खार्यामपि' इति । स्वो.

२·१५९ संस्कारादिपरिच्छिन्ने...कथं तर्हीदं भाष्यं समर्थ्यते—'समुदायेषु प्रवृत्ताः शब्दा अवयवेष्वपि वर्तन्ते तैलं भुक्तं घृतं भुक्तमित्येवमादि । तदर्थमिदमुच्यते—संस्कारादिपरिच्छिन्ने इति । Cf. भा. पस्पशा, ख. १ पृ. १२ प. १८–२०.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

२·१५९ तैलादौ ... आहैकदेशम् । तथाधिकरणमाचार्यः किं न्याय्यं मन्यते यत्र कृत्स्न आधारात्मा व्याप्तो भवति । तेन इहैव स्यात् तिलेषु तैलम् । भा. १।३।११ वा. ७, ख. १ पृ. २७३ प. १५–१६; भा. १।४।४२, ख. १ पृ. ३३२ प. १–२.

२·१६६-१६७ ये शब्दाः ... अन्वयव्यतिरेकाभ्यां ... यत्र चाव्यभिचरेण...नुट्शब्दादिषु । सिद्धं त्वन्वयव्यतिरेकाभ्याम् ॥ ..इह वृक्ष इत्युक्ते कश्चिच्छब्दः श्रूयते वृक्षशब्दोऽकारान्तः सकारश्च प्रत्ययः। अर्थोऽपि कश्चिद्गम्यते ।... वृक्षावित्युक्ते कश्चिच्छब्दो हीयते कश्चिदुपजायते कश्चिदन्वयी।...एकत्वं हीयते द्वित्वमुपजायते मूलस्कन्धफलपलाशवानन्वयी। ते मन्यामहे यः शब्दो हीयते तस्यासावर्थो योऽर्थो हीयते, यः शब्द उपजायते तस्यासावर्थो योर्थ उपजायते, यः शब्दोन्वयी तस्यासावर्थो योन्वयी। भा. १।२।४५ वा. ९; ख. १ पृ. २१९ प. १९–२७. कोऽसावन्वयो व्यतिरेको वा। इह पचतीत्युक्ते कश्चिच्छब्दः श्रूयते पच्शब्दश्चकारान्तोऽतिशब्दश्च प्रत्ययः । अर्थोऽपि कश्चिद् गम्यते विक्लित्तिः कर्तृत्वमेकत्वं च । पठतीत्युक्ते कश्चिच्छब्दो हीयते कश्चिदुपजायते कश्चिदन्वयी...भा. १-३-१ वा. ६; ख. १ पृ. २५५ प. १३–१६. अधुना इति किं निपात्यते । इदमोऽशभावो धुना च प्रत्ययः, इदमो वा लोपः अधुना च प्रत्ययः। भा. ५।३।१७; ख. २ पृ. ४०६ प. २–३. इदं विचार्यते भावकर्मकर्तारः सार्वधातुकार्था वा स्युर्विकरणार्था वेति ।... भावकर्मकर्तारः सार्वधातुकार्थाश्चेदेकद्विबहुषु नियमानुपपत्तिरतदर्थत्वात् ॥ न हि तदानीमेकत्वादय एव विभक्त्यर्थाः । किं तर्हि । भावकर्मकर्तारोऽपि ।...विकरणार्था इति चेत् कृताभिहिते विकरणाभावः ॥...धारयः पारय इति । भा. ३।१।६७ वा. १,२; ख. २ पृ. ५७ प. १८–२८.

२·१६९ न कूपसूपयूपानामन्वयोर्थस्य दृश्यते । वर्णव्यत्यये चार्थान्तरगमनात् मन्यामहे अर्थवन्तो वर्णा इति । कूपः सूपः यूप इति । ... संघातार्थवत्त्वाच्च । भा. शिवसूत्र ५; ख. १ पृ. ३० प. ८; पृ. ३० प. २४.

२·१७० अन्वाख्यानानि भिद्यन्ते ...... अनेकशक्तियुक्तेऽर्थे या काचिन्निमित्तभावेन आश्रीयमाणा शक्तिः साधुत्वान्वाख्याने अङ्गत्वं प्रतिपद्यते । तद्यथा । वृङ्लुठितनिताडिभ्यः उलच् तण्डश्च (उणादि ५·९)। शक्यो हि अन्येभ्योऽपि धातुभ्यः शब्दव्युत्पत्तिकर्माणि उलच्प्रत्ययो विधातुं तण्डादेशश्च कर्तुमिति। स्वो.

२·१७१ वैरवासिष्ठगिरिशास्तथैकागारिकादयः। वीरस्येदं वीराया वा वैरम् । वसिष्ठस्येदं वासिष्ठम् । तस्येदम् पा. ४।३।१२०. वसिष्ठेन कृतं प्रोक्तं वा वासिष्ठम्। कृते ग्रन्थे पा ४।३।११६. तेन प्रोक्तम् पा. ४।३।१०१. गिरौ शेते इति गिरिशः। गिरौ डश्छन्दसि । पा. ३।२।१५ वा. ४। ऐकागारिकट् चौरे । पा. ५।१।११३.

२·१७२ यथा पथः समाख्यानं... । स्वभावत एतेषां शब्दानामेतेष्वर्थेष्वभिनिविष्टानां निमित्तत्वेनान्वाख्यानं क्रियते । तद्यथा । कूपे हस्तदक्षिणः पन्थाः । अभ्रे चन्द्रमसं पश्येति । भा. २।१।१ ख. १ पृ. ३६३ प. ११–१३.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

२·१७४ केश्चिन्निर्वचनं भिन्नं गिरतेर्गर्जतेर्गमेः। गुवतेर्गदतेर्वापि गौरित्यत्रानुदर्शितम्। गौरिति पृथिव्या नामधेयम्। यद् दूरं गता भवति। यच्चास्यां भूतानि गच्छन्ति। गातेर्वा ओकारो नामकरणः। नि २।५. यथा हि आदित्य इत्येकास्मिन्नेवाम्नायवाक्ये तद्धितार्थेनापत्येन संबन्धो दृश्यते। वाक्यान्तरसंबन्धिनि तु तस्मिन्नादित्यशब्दे निर्वचनान्तराणि क्रियन्ते। स्वो.

२-१७८ भिन्नाविजियजी धातू। वचिस्वपियजादीनां किति (संप्रसारणम्) पा. ६।१।१५. आङः स्थः प्रतिज्ञान इति वक्तव्यम्। अस्ति सकारमातिष्ठते। आगमौ गुणवृद्धी आतिष्ठते। विकारौ गुणवृद्धी आतिष्ठते। भा. १।३।२२; ख. १ पृ. २८० प. २३–२४. आस्ताम् आसन् इत्यादावाडागमः स्यात् इत्यापिशलिना मन्यते। (पदमञ्जरी). तद्यथा। आगनीगन्तीति प्रकृत्यन्तरं गत्यर्थेषु निरुक्ते पठ्यते। तथा आहिधातुं पञ्चपदविषयमन्ये वचनार्थे पठन्ति। तथा-गौरिवासितपक्षस्य समुदे चारुहासिनि। आहेः पञ्च पदानीव त्वमेव शरणं मम इति। इजेरकृत्स्वादेर्यशब्दमेके कुर्वन्ति। चित्रा हि प्रतिपादनोपायाः। स्वो. न ह्ययं आहिरिव पञ्चपदविषयः। महाभाष्यदीपिका पृ. ११४. ब्रुवः पञ्चानामादित आहो ब्रुवः॥ पा. ३।४।८४.

२-१७९ वालवायादि जित्वरीवदुपाचरेत्। विदूराञ्ञ्यः (पा. ४।३।८४) अयुक्तोयं निर्देशो न ह्यसौ विदूरात् प्रभवति। किं तर्हि। वालवायात् प्रभवति। विदूरे संस्क्रियते। एवं तर्हि वालवायो विदूरशब्दमापद्यते ञ्यश्चास्मात् प्रत्ययो वक्तव्यः। अथवा प्रकृत्यन्तरं विदूरशब्दो वालवायस्य। न वै तत्र वालवायं विदूर इत्युपाचरन्ति। न वै तत्रेति चेद् ब्रूयाज्जित्वरीवदुपाचरेत्। तद्यथा वणिजो वाराणसीं जित्वरीत्युपाचरन्ति, एवं वैयाकरणा वालवायं विदूर इत्युपाचरन्ति।

वालवायो विदूरं च प्रकृत्यन्तरमेव वा।

न वै तत्रेति चेद् ब्रूयाज्जित्वरीवदुपाचरेत्॥ भा. ४।३।८४; ख. २ पृ. ३१३ प १-१३.

२-१८० क्षडादीनां व्यवस्थार्थं ... । लुङ्लङ्लृङ्क्ष्वडुदात्तः। आडजादीनाम्। पा. ६।४।७१-७२. सोपसर्गादिति चेदटि दोषो भवति। स्वमनायतेति। अत्यल्पमिदमुच्यते अटि दोषो भवतीति। अड्ल्यव्द्विर्वचनेष्विति वक्तव्यम् ... अवश्यं संग्रामयतेः सोपसर्गात् उत्पत्तिर्वक्तव्या असंग्रामयत शूर इत्येवमर्थम्। ... भा. ३।१।१२ वा. ६; ख. २ पृ. २३ प. ४-८। सङ्ग्राम युद्धे अनुदात्तेत् (धातुपाठः १९२३) चुरादिगणे पठितः।

२-१८२-१८३ कार्याणामन्तरङ्गत्वमेवं धातूपसर्गयोः। ...प्राक् च साधनसंबन्धात् क्रिया नैवोपजायते। धातूपसर्गयोर्यत् कार्यं तदन्तरङ्गम्। कुत एतत्। पूर्वमुपसर्गस्य हि धातुना योगो भवति नाद्यशब्देन (अद्योढा इत्यत्र)। भा. ६।१।१०८ वा. ९; ख. ३ पृ. ८३ प. २७—पृ. ८४ प. १. धातूपसर्गयोः कार्यं यत्तदन्तरङ्गम्। कुत एतत्। पूर्वं हि धातुरुपसर्गेण युज्यते पश्चात्साधनेनेति। नैतत्सारम्। पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण। साधनं हि क्रियां निर्वर्तयति, तामुपसर्गो विशिनष्टि, अभिनिर्वृत्तस्य चार्थस्य उपसर्गेण विशेषः शक्यो

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

वक्तुम् । सत्यमेवमेतत् । यस्त्वसौ धातूपसर्गयोरभिसंबन्धस्तमभ्यन्तरं कृत्वा धातुः साधनेन युज्यते । अवश्यं चैतदेवं विज्ञेयम् । यो हि मन्यते पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति तस्य 'आस्यते गुरुणा' इत्यकर्मकः उपास्यते गुरुरिति केन सकर्मकः स्यात् । भा. ६।१।१३५ वा. ९, ख. ३ पृ. ९३ पं. २२–पृ. ९४ प. १. साधनैर्याति संबन्धं...कारकाणां प्रवृत्तिविशेषः क्रिया । अन्यथा च कारकाणि शुष्कौदने प्रवर्तन्ते अन्यथा च मांसौदने । भा. १।३।१ वा. ११; ख. १ पृ. २५८ प. ११-१२.

२-१८७ क्वचित्संभविनो भेदा ... शब्दान्तरोपग्रहमन्तरेण संभवी सन् अलब्धनियमः योर्थः तद्द्योतको नियमयन् वाचकतामतिक्रामतीति संग्रहकार आह । स्वो. उपसर्गेण संबन्धे व्यज्यन्ते प्रपरादिना । न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः । नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति । ...उच्चावचाः पदार्था भवन्तीति गार्ग्यः । तद्य एषु पदार्थः प्राहुरिमे तं नामाख्यातयोरर्थ-विकरणम् । आ इत्यर्वागर्थे । प्र परा इत्येतस्य प्रातिलोम्यम् । एवमुच्चा-वचानर्थान् प्राहुस्त उपेक्षितव्याः । (नि. १।३) प्रादय उपसर्गाः क्रियायोगे (पा. १।४।५८–५९) ॥ प्रादय इति योगविभागः कर्तव्यः । प्रादयोऽ-सत्त्ववचना निपातसंज्ञा भवन्ति । तत उपसर्गाः क्रियायोग इति । भा. १।४।५८–५९; ख. १ पृ. ३४१ प. १०–१३.

२-१८९ तत्रानुमानाद् द्विविधात्... । क्वचिद् दृष्टेनानुमानेन व्यवस्था क्रियते । क्वचि-त्सामान्यतोदृष्टानुमानेन । तत्र प्रतिष्ठते इति प्रशब्दोन्यत्र आदिकर्मद्योतने दृष्टसामर्थ्यः स इहापि तदर्थ एवावसीयते । स्वो. अथ तत्पूर्वकं त्रिविध-मनुमानम् । पूर्ववत् शेषवत् सामान्यतोदृष्टं च । न्यायसूत्र १।१।५.

२-१९० अप्रयोगेधिपर्योश्च । अधिपरी अनर्थकौ । पा. १।४।९३. अथवा नैवेमावनर्थकौ । किं तर्हि अनर्थकावित्युच्यते । अनर्थान्तरवाचिनावनर्थकौ धातुनोक्तां क्रियामाहतुः । तदविशिष्टं भवति यथा शङ्खे पयः । भा. १।४।९३; ख. १ पृ. ३४८ प. १६–१८. सहाभिधायित्वमधिपर्योरवस्थाप्यते । अनर्थान्तर-वाचिनावनर्थकाविति । स्वो.

२-१९१ तथैव स्वार्थिकाः केचित् ... प्रकृत्यर्थानुवादिनः । प्रशंसायां रूपप् ॥ नायं प्रत्ययार्थः । किं तर्हि प्रकृत्यर्थविशेषणमेतत् । प्रशंसायां यत्प्रातिपदिकं वर्तते तस्माद्रूपप् भवति । कस्मिन्नर्थे । स्वार्थ इति । स्वार्थिकाश्च प्रकृतितो लिङ्गवचनान्यनुवर्तन्ते । भा. ५।३।६६; ख. २ पृ. ४१८ प. ७–१०. प्रकृत्यर्थ-विशेषणत्वासिद्धम् ॥ सिद्धमेतत् । कथम् । नायं प्रत्ययार्थः । किं तर्हि । प्रकृत्यर्थविशेषणमेतत् । ईषदसमाप्तौ यत् प्रातिपदिकं वर्तते तस्मात् कल्पबादयो भवन्ति । कस्मिन्नर्थे । स्वार्थ इति । स्वार्थिकाश्च प्रकृतितो लिङ्गवचनान्यनुवर्तन्ते । भा. ५।३।६७ वा. २, ख. २ पृ. ४१९ प ११–१४.

२-१९२ निपाता द्योतकाः...। अथ निपाताः । उच्चावचेषु अर्थेषु निपतन्ति । अप्युपमार्थेपि कर्मोपसंग्रहार्थेपि पदपूरणाः । नि. १।४. निपाता एकवर्णा अर्थवन्तः । अ अपेहि । भा. शि. सू. ५ वा. ९; ख. १ पृ. ३० पं. ५ निपातस्यानर्थकस्य

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

प्रातिपदिकसंज्ञा वक्तव्या ... स्वाद्युत्पत्तिः ... पदसंज्ञा ... निघातो यथा स्यात् । ... अथवा आचार्यप्रवृत्तिर्ज्ञापयाति अनर्थकानामप्येतेषां भवत्यर्थवत्कृतामिति यदयमधिपरी अनर्थकौ इत्यनर्थकयोर्गत्युपसर्गसंज्ञाबाधिकां कर्मप्रवचनीयसंज्ञां शास्ति । भा. १।२।४५ वा. १२; ख १ पृ. २२० प २५—पृ. २२१ प १०. आगमा इव ... संभूयार्थस्य वाचकाः । न वा अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते यथान्यत्र ॥ ... क्वान्यत्र । लविता चिकीर्षितेति ॥ युक्तं पुनर्यन्नित्येषु नाम शब्देषु आगमशासनं स्यात् । ... आगमश्च नाम अपूर्वः शब्दोपजनः ।.... बाढं युक्तम् । ... सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः । एकदेशविकारे हि नित्यत्वं नोपपद्यते । भा. १।१।२० वा. ५; ख. १ पृ.७५ प. ५–१४. आगमा अविद्यमानवद्भवन्तीति वक्ष्यामि । भा. ३।१।३ वा. ७; ख. २ पृ. ८ प. १४.

तद्यथा । वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियं सखायं परिषस्वजाना ।
योषेव शिङ्क्ते विततादि धन्वन् ज्या इयं समने पारयन्ती ॥
(ऋ. ६।७५।३)

पुरूरवो मा मृथा मा प्र पप्तो मा त्वा वृकासो अशिवास उ क्षन् ।
न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येता ॥
(ऋ. १०।९५।१५)

का ईमरे पिशङ्गिला का ईं कुरुपिशङ्गिला (वा. सं. २३।५५) इति । (स्वो.)

२-१९३ उपरिष्टात्पुरस्ताद्वा... ।...नावश्यं यथाप्रयोगमेवार्थं प्रक्रम्यते । सामान्योपक्रमेष्वपि विशेषेषु प्राक् विशेष एव कदाचित्प्रयुज्यते गार्ग्यो ब्राह्मण आनीयताम्, शिंशपा वृक्षश्छिद्यताम् इति । स्वो. सामान्येनोक्तत्वाद्विशेषस्य प्रयोगो न भविष्यति । ... उक्तार्थानामप्रयोगात् । न तर्हीदानीमिदं भवति तं ब्राह्मणमानय गार्ग्यमिति । भवति यदा नियोगतस्तस्यैवानयनं भवति । भा. १।२।७२ वा. ६; ख. १ पृ. २५२ प. ६–९.

२-१९४ प्रत्ययो वाचकत्वेपि केवलो न प्रयुज्यते । ... यावता समयः कृतो न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्ययः इति । यत्र हि प्रकृतिनिमित्ता प्रत्ययानिवृत्तिस्तत्राप्रत्ययिकायाः प्रकृतेः प्रयोगो भवति । अग्निचित् सोमसुदिति यथा । यत्र च प्रत्ययनिमित्ता प्रकृतिनिवृत्तिस्तत्राप्रकृतिकस्य प्रत्ययस्य प्रयोगो भवति । अधुना इयानिति यथा । भा. १।२।६४ वा. ५; ख. १ पृ. २३४ प. १५-१९.

२-१९७ जनयित्वा क्रियां ... कर्मप्रवचनीयविषयविभागप्रदर्शनार्थं संबन्धोपन्यासः । द्विविधो हि संबन्धः संग्रहे पठ्यते । तिरोभूतक्रियापदः संनिहितक्रियापदश्च । एवं ह्याह–उपयुक्तार्थद्रव्यसंबन्धेषु क्रियान्तासु नष्टरूपासु भिन्ना (?)। धर्मतो विगुणेष्वेव संबन्धात्मा प्रकाशते । श्रूयमाणक्रियाद्रव्ययोः संबन्धो विषयभूतत्वात् क्रियाया इति । स्वो.

२-१९८ तत्र षष्ठी प्रतिपदं विहिता । अधीगर्थदयेशां कर्मणि । पा. २।३।५२; विभाषोपसर्गे । पा. २।३।५९. कृद्योगा च षष्ठी समस्यत इति वक्तव्यम् ।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

इध्मप्रव्रश्चनः पलाशशातनः। किमर्थमिदमुच्यते। प्रतिपदविधाना च षष्ठी न समस्यते इति वक्ष्यति तस्यायं पुरस्तादपकर्षः। भा. २।२।८; ख. १ पृ. ४१२ प. १९–२१.

२-१९९ स चोपजातः संबन्धो विनिवृत्ते क्रियापदे। कर्मप्रवचनीयेन तत्र तत्र नियम्यते॥ कर्मप्रवचनीयाः॥ किमर्थं महती संज्ञा क्रियते। अन्वर्थसंज्ञा यथा विज्ञायेत। कर्म प्रोक्तवन्तः कर्मप्रवचनीया इति। के पुनः कर्म प्रोक्तवन्तः। ये संप्रति क्रियां नाहुः। के च संप्रति क्रियां नाहुः। येऽप्रयुज्यमानस्य क्रियामाहुस्ते कर्मप्रवचनीयाः। भा. १।४।८३; ख. १ पृ. ३४६ प. १५–१८. तथैव केचित् पञ्च पदजातानि नामाख्यातोपसर्गनिपातकर्मप्रवचनीया इति पठन्ति ...... तेषामप्यर्थभेदेन उपसर्गनिपातेभ्य उत्कर्षः क्रियतेऽत आह—क्रियारूपनाशेन तिरोभवन्ति। यं संबन्धमुपजनयन्ति तस्यानिमित्तभूतायाः क्रियायाः सहचारी वाक्यान्तरेषु विशेषदृष्टसामर्थ्यः कर्मप्रवचनीयः क्रियाविशेषोपादानेन संबन्धमवच्छिनत्ति। निमित्तानुग्रहानुगममात्रायाः संबन्धरूपं नियमयति इति। स्वो.

२-२०० येन क्रियापदाक्षेपः ... । प्रपतितपर्णः प्रपर्णः। प्रपतितपलाशः। प्रपलाशः। भा. २।२।२४ वा. १४; ख. १ पृ. ४२४ प. ५. शाकल्यस्य संहितामनुनिशम्य प्रावर्षत् ... गतिर्गतौ (पा. ८।१।७०) इति निघातः प्रसज्येत। लिङ्गावनुपसर्गता। यद्येवं, वेरपि कर्मप्रवचनीयसंज्ञा वक्तव्या। वेरपि निघातो नेष्यते—प्रादेशं प्रादेशं विपरिलिखति। अस्त्यत्र विशेषः। नात्र वेर्लिखिं प्रति क्रियायोगः। किं तर्हि। अप्रयुज्यमानम्। प्रादेशं प्रादेशं विमाय परिलिखतीति। भा. १।४।८४; ख. १ पृ. ३४६ प. २१—पृ. ३४७ प. १.

२-२०१ तिष्ठतेरुपयोगश्च......। अप्रयोगश्चेत्यपि पाठः। अप्रत्यजयन्निति। नित्यो ह्ययमपौरुषेयो धर्मः। स्वभावतस्तु तथाभूतोऽनुगम्यते। तथाहि। "ते देवा असुरान् प्रत्यजयन् तदप्रतिरथस्य अप्रतिरथत्वम्" (मै. सं ३।३।७; तै.सं. ५।४।६।३–४; काठ. सं. २१।१०) इति आख्यातमाद्युदात्तं स्वरेण पठ्यते। अप्रति इत्यत्र केचिदाद्युदात्तं केचिदन्तोदात्तं शाखिनोऽधीयते। ...... तत्र चायमर्थो व्याख्यायते। अप्रत्येव तिष्ठमानाञ्जयतीति। अन्तोदात्ताध्यायिनस्तु वर्णयन्ति। आविद्यमानः प्रतिः अस्मिन् तदिदमप्रति। नञ्सुभ्याम् (पा. ६।२।१७२) इति अन्तोदात्तत्वम्।........ तथा भाष्ये 'सुनु आभि' इति सुख्याभिधायिनमभिशब्दं केचिद् व्याचक्षते। स्वो. यदप्युच्यते इह च अभिषावयाति परिषावयाति इति व्यतिरिक्तः सुनोत्यर्थ इति कृत्वा उपसर्गात्सुनोत्यादीनामिति षत्वं न प्राप्नोतीति। नासावेवं प्रेष्यते 'सुनु आभि' इति। कथं तर्हि। उपसर्गविशिष्टामसौ क्रियां प्रेष्यते अभिषुणु इति। भा. ३।१।२६ वा. १; ख. २ पृ. ३२ प. २०–२२.

२.२०२ कर्मप्रवचनीयत्वं क्रियायोगे विधीयते। स्वत्यादीनां संज्ञान्तरबाधनार्था कर्मप्रवचनियसंज्ञा विधीयते। तेन गत्युपसर्गसंज्ञाश्रयनिघातादि कार्यं न प्रवर्तते।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

स्वो. कर्मप्रवचनीयसंज्ञा यथा स्यात्। गत्युपसर्गसंज्ञे मा भूतामिति। नैतदस्ति प्रयोजनम्। यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवतो न च वृक्षादीन् प्रति क्रियायोगः। भा. १।४।९०; ख १ पृ. ३४८ प. ३–४ अनर्थकयोः गत्युपसर्गसंज्ञाबाधिकां कर्मप्रवचनीयसंज्ञां शास्ति। भा. १।४।९३; ख. १ पृ. ३४८ प. १४. षत्वादिविनिवृत्त्यर्थं स्वत्यादीनां ......। उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्। पा. ८।३।६५.

२-२०३ .... अनुना कृते...बाध्यते प्राप्ता तृतीया हेतुलक्षणा। अनुर्लक्षणे। (१।४।८४.)॥ ...हेत्वर्थे तु वचनम्॥ ... तदेव तर्हि प्रयोजनं द्वितीया यथा स्यात् कर्मप्रवचनीययुक्ते द्वितीयेति। एतदपि नास्ति प्रयोजनम्। सिद्धात्र द्वितीया कर्मप्रवचनीययुक्त इत्येव। न सिध्यति। परत्वाद्धेत्वाश्रया तृतीया प्राप्नोति। भा. १।४।८४; ख. १ पृ. ३४६ प. १९—पृ. ३४७ प. २१.

२-२०४ क्रियाया द्योतको नायं संबन्धस्य न वाचकः। कर्म प्रोक्तवन्तः कर्मप्रवचनीया इति। के पुनः कर्म प्रोक्तवन्तः। ये संप्रति क्रियां नाहुः। ... येऽप्रयुज्यमानस्य क्रियामाहुस्ते कर्मप्रवचनीयाः। भा. १।४।८३; ख. १ पृ. ३४६ प. १६–१८.

२-२०५ अनर्थकानां संघातः......तत्र लौकिकेनार्थेनैकवर्णानि पदानि संहिताक्रियाविशेषाणि च पदसरूपाणि एकपदानि वाक्यानि अर्थवन्ति। शास्त्रव्यवहारविषयेण तु परिकल्पितविभागेनार्थेन धातुप्रातिपदिकप्रत्ययनिपातानामर्थवत्ता प्रतिज्ञायते। तदुभयं परिगृह्य "दशधा अर्थवत्ता स्वभावभेदिका" इति संग्रहे पठितम्। स्वो.

२-२०७ सार्थकानर्थकौ...कुटीरादिनिदर्शनात्। तद्यथा काशे कुशे वंशे इति। ...द्वितीयस्य शेशब्दप्रतिपाद्यस्य संबन्धस्य च अधिष्ठानस्य चाभावात्। ... शंखपयोवत्। इतरेतरशक्त्यनुग्रहात्......। स्वो. इह कस्मान्न भवति काशे कुशे वंशे इति। शेर्थवद्ग्रहणात्। अर्थवतः शेशब्दस्य ग्रहणं न चायमर्थवान्। एवमपि हरिशे बभ्रुश इत्यत्र प्राप्नोति। एवं तर्हि लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवं न भविष्यति। अथवा पुनरस्त्वर्थवद्ग्रहणे नानर्थकस्येति। कथं हरिशे बभ्रुशे इति। एकोत्र विभक्त्यर्थेनार्थवान् अपरस्तद्धितार्थेन। समुदायोनर्थकः। भा. १।१।१३; ख. १ पृ. ७० प. ५–१०. अधिपरी अनर्थकौ॥ ... अनर्थान्तरवाचिनावनर्थकौ धातुनोक्तां क्रियामाहतुः। तदविशिष्टं भवति यथा शंखे पयः। भा. १।४।९३; ख. १ पृ. ३४८ प. १७–१८.

२-२०८ अर्थवद्भ्यो विशिष्टोर्थः......नोपजायत इत्येके समासस्वार्थिकादिषु। तथाहि संग्रहकारः पठति। त्रिविधाः समुदायाः शब्दान्वयिनोर्थान्वयिनः शब्दार्थान्वयिनश्च। शब्दान्वयिनो गौरखरोश्वकर्ण इति। अर्थान्वयिनः श्रोत्रियः वैडूर्यः पारशव इति। शब्दार्थान्वयिनो राजपुरुषो नीलोत्पलं ब्राह्मणकम्बलः

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

इति । स एवाह—निरन्वयानपि समुदायान् रूढिषु अनुगच्छन्तीति । तद्यथा । मुसलमुलूखलो वलाहक इति ।...... नोपजायत इत्येके । 'स्वार्थिकानामर्थवत्तापक्षे शेषसमुच्चयादिक्रियाकारकविशेषणविशेष्य-संबन्धाभावे स्वार्थिकानामुपचयसंबन्धः' इति ध्यानकारदर्शनम् । स्वो.

२-२१० शास्त्रार्थ एव वर्णानामर्थवत्त्वे प्रदर्शितः। संघातार्थवत्त्वाच्च। (वा. १२) संघातार्थवत्त्वाच्च मन्यामहे अर्थवन्तो वर्णा इति। येषां संघाता अर्थवन्तः अवयवा अपि तेषामर्थवन्तः येषां पुनरवयवा अनर्थकाः समुदाया अपि तेषामनर्थकाः। ... यदि तर्हि इमे वर्णा अर्थवन्तोऽर्थवत्कृतानि प्राप्नुवन्ति। कानि। अर्थवत् प्रातिपदिकम् (१।२।४५) इति प्रातिपदिकसंज्ञा। प्रातिपदिकात् (४।१।१) इति स्वाद्युत्पत्तिः। सुबन्तं पदम् (१।४।१४) इति पदसंज्ञा। ...संघातस्यैकार्थ्यात् सुबभावो वर्णात्। (वा. १३)। अनर्थकास्तु ...... प्रतिवर्णमर्थानुपलब्धेः (वा. १४)। ...... भा. शि. सू. ५ वा. १२, १३, १४. ख. १. पृ. ३० प. २४--पृ. ३१ प. १३.

२-२११ कृत्तद्धितानामर्थश्च केवलानामलौकिकः। तथा ह्युक्तम्--'धातोश्चार्थाभेदात्प्रत्ययान्तरेषु।' स्वो. धातोश्चार्थाभिदात् प्रत्ययान्तरेषु मन्यामहे धातुरेव क्रियामाहेति। पक्ता पचनम् पाक इति। प्रत्ययार्थोन्यश्चान्यश्च भवति प्रकृत्यर्थः स एव। कथं पुनर्ज्ञायते अयं प्रकृत्यर्थः अयं प्रत्ययार्थ इति। सिद्धं त्वन्वयव्यतिरेकाभ्याम्। भा. १।३।१ वा. ५, ६; ख. १ पृ. २५५ प. ८-१२.

२-२१४ वर्णेन केनचिन्न्यूनः ... । तत्र वर्णव्यत्ययापायोपजनाः साध्वसाधुषु दृश्यन्ते। साधुषु तावत्। येषु वर्णानामपाये नैव शब्दान्तराण्येतानि। तद्यथा। तुभ्येदमग्ने। आम्बानां चरुः। आव्याधिनीरुगणाः। जघ्नतुः। गुरुतल्पगः इति। स्वो. अथवा छान्दसो वर्णलोपो भविष्यति यथेष्कर्तारमध्वरे। तद्यथा। तुभ्येदमग्ने। तुभ्यमिदमग्ने इति प्राप्ते। आम्बानां चरुः। नाम्बानां चरुरिति प्राप्ते। आव्याधिनीरुगणाः। आव्याधिनीः सुगणा इति प्राप्ते। इष्कर्तारमध्वरस्य। निष्कर्तारमिति प्राप्ते। शिवा उद्रस्य भेषजी। शिवा रुद्रस्य भेषजीति प्राप्ते। भा. ८।२।२५; ख. ३ पृ. ४०३ प. १०-१४. उपधालोपस्यावकाशः। श्लेष्मघ्नं मधु। पित्तघ्नं घृतम्। द्विर्वचनस्य स एव। इहोभयं प्राप्नोति। जग्मतुः जग्मुः। जघ्नतुः जघ्नुः। भा. ६।१।१२ वा ९; ख. ३ पृ. १७ प. १९-२०. अपर आह —डप्रकरणे अन्येष्वपि दृश्यते। अन्येष्वपि डो भवतीति वक्तव्यम्। ततःस्त्र्यगारगः। अश्नुते यावदन्नाय ग्रामगः। ध्वंसते गुरुतल्पगः। भा. ३।२।४८ वा. ४; ख. २ पृ. १०३ प. १४-१५.

२-२१६ पदवाच्यो यथा नार्थः कश्चिद् गौरखरादिषु। कथं गौरखरवदरण्यम्।... ... अस्त्यत्र विशेषः। जात्यात्राभिसंबन्धः क्रियते। कृष्णसर्पो नाम सर्पजातिः। ...... भा. २।१।६९ वा. ५; ख. १ पृ. ४०४ प. १७-१९.

२-२१९ अप्रयुक्तपदश्चार्थो बहुव्रीहौ कथं भवेत्।। यदि तर्हि विभक्त्यर्थोऽभिधीयते कृत्स्नः पदार्थः कथमभिहितो भवति सद्रव्यः सलिङ्गः ससंख्यश्च। अर्थग्रहण-

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

सामर्थ्यात् । इहानेकमन्यपदे इतीयता सिद्धम् । कथं पुनः पदे नाम वृत्तिः स्यात् । शब्दो ह्येष शब्देऽसंभवादर्थे कार्यं विज्ञास्यते । सोयमेवं सिद्धे साति यदर्थग्रहणं करोति तस्यैतत् प्रयोजनं कृत्स्नः पदार्थो यथाभिधीयेत सद्रव्यः सलिङ्गः ससंख्यश्चेति । भा. २।२।२४ वा. ८; ख. १ पृ. ४२२ प. २३–२७.

२-२२० प्रज्ञुसंज्ञ्वाद्यवयवैः ...... । प्रसंभ्यां जानुनोर्ज्ञुः । (पा. ५।४।१२९) प्रगते जानुनी अस्य प्रज्ञुः, संगते जानुनी अस्य संज्ञुः इति शास्त्रसंदृष्टमन्तरेण लोके रूपावधारणाभावादवयवार्थासंप्रत्ययः । समुदायस्तु विशिष्टार्थः । स लोकेपि प्रतीयते । तस्मादनर्थका अवयवाः सर्वत्र संघात एवार्थवान् । स्वो.

२-२२१ गर्गा इत्येक एवायम् ... द्वन्द्वसंज्ञोपि संघातो बहूनामभिधायकः । गर्गादिभ्यो यञ् । यञञोश्च (२।४।६४) । सरूपाणामेकशेष एकविभक्तौ (पा. १।२।६४) । चार्थे द्वन्द्वः । (पा २।२।२९) ...... चेन कृतोर्थश्चार्थः । कः पुनश्चेन कृतोऽर्थः । समुच्चयोन्वाचय इतरेतरयोगः समाहार इति । भा. २।२।२९ वा. १५; ख. १ पृ. ४३४ प. ८–१०.

२-२२२ यथैकदेशे भुज्यादिः ... । प्रत्यवयवं च वाक्यपरिसमाप्तिर्दृश्यते । तद्यथा । देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामिति । न चोच्यते प्रत्येकमिति । प्रत्येकं च भुजिः परिसमाप्यते । भा. १।१।१ वा. १२; ख. १ पृ. ४१ प. ११–१२.

२-२२३ यच्च द्वन्द्वपदार्थस्य...... जनपदतदवध्योश्च (पा. ४।२।१२४) । तत्र सर्वनाम्ना जनपदस्य संबन्धो न प्रकल्पते इति दोषप्रसङ्गे प्रतिविधीयते । ...... प्रातिपदिकं तु समासरूपस्य शास्त्रदृष्टयनुगमेन यथाकथंचित् क्रियते । स्वो.

२-२२६ प्रतिपादयता वृत्तिं ... । तत्तत्प्रतिपत्तिभावनानुरोधेन चाचार्यस्तथा व्यवहरति । तथा चाह— एवं तर्हि भवति वै किंचिदाचार्याः कार्यवद् बुद्धिं कृत्वा पठन्ति कार्याः शब्दा इति । तद्वदिदं पठितं समानाधिकरणसमासाद्बहुव्रीहिः कर्तव्यः कदाचित्कर्मधारयः सर्वधनाद्यर्थ इति (भा- २।१।६९ वा. ५ पृ. ४०४ प. ३-५) स्वो. वृत्तौ पदार्थभेदेन प्राधान्यं ... इह कश्चित्समासः पूर्वपदार्थप्रधानः कश्चिदुत्तरपदार्थप्रधानः कश्चिदन्यपदार्थप्रधानः कश्चिदुभयपदार्थप्रधानः । पूर्वपदार्थप्रधानोव्ययीभावः । उत्तरपदार्थप्रधानस्तत्पुरुषः । अन्यपदार्थप्रधानो बहुव्रीहिः । उभयपदार्थप्रधानो द्वन्द्वः । भा. २।१।६; ख. १ पृ. ३७८ प. २४–पृ. ३७९ प. ३.

२-२२७ ...नञ्समासे विकल्पितम् । .प्राधान्यं बहुधा भाष्ये...नञ् (पा. २।२।६) । किंप्रधानोयं समासः । उत्तरपदार्थप्रधानः । यद्युत्तरपदार्थप्रधानः अब्राह्मणमानयेत्युक्ते ब्राह्मणमात्रस्यानयनं प्राप्नोति । अन्यपदार्थप्रधानस्तर्हि भविष्यति । यद्यन्यपदार्थप्रधानः 'अवर्षा हेमन्तः' इति हेमन्तस्य यल्लिङ्गं वचनं च तत् समासस्यापि प्राप्नोति । पूर्वपदार्थप्रधानस्तर्हि भविष्यति । यदि पूर्वपदार्थप्रधानः अव्ययसंज्ञा प्राप्नोति । अव्ययं ह्यस्य पूर्वपदमिति ।...अथवा आश्रयतो लिङ्गवचनानि भविष्यन्ति । गुणवचनानां हि शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति । तद्यथा । शुक्लं वस्त्रम् । शुक्ला शाटी । शुक्लः कम्बलः ।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

भा. २।२।६; ख. १ पृ. ४१० प. ७—पृ. ४११ प. ३. इदं खल्वपि भूय उत्तर-पदार्थप्राधान्ये सति संगृहीतं भवति। किम्। अनेकमिति। किमत्र संगृहीतम्। एकवचनम्। भा. २।२।६; ख. १ पृ. ४१२ प. १–३.

२-२२८ जहत्स्वार्थविकल्पे च...। अथ ये वृत्तिं वर्तयन्ति किं त आहुः। परार्थाभिधानं वृत्तिरित्याहुः। अथ तेषामेवं ब्रुवतां किं जहत्स्वार्था वृत्तिर्भवत्याहोस्विद-जहत्स्वार्था। किं चातः। यदि जहत्स्वार्था वृत्ती राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति। औपगवमानयेत्युक्ते अपत्यमात्रस्य। अथाजहत्स्वार्था वृत्तिरुभयोर्विद्यमानस्वार्थयोर्द्वयोर्द्विवचनमिति द्विवचनं प्राप्नोति। भा. २।१।१ वा. २; ख. १ पृ. ३६४ प. ६—१०. समासोपि गुणवचनः। कथम्। जहत्स्वार्था वृत्तिरिति। अथ जहत्स्वार्थायां तु दोष एव। जहत्स्वार्थायां च न दोषः। भवति बहुव्रीहौ तद्गुणसंविज्ञानमपि। तद्यथा। शुक्लवाससमानय, लोहितोष्णीषा ऋत्विजः प्रचरन्तीति तद्गुण आनीयते तद्गुणाश्च प्रचरन्ति। भा. २।१।६९ वा. ६; ख. १ पृ. ४०५ प. २१–२५.

२-२२९ शास्त्रे क्वचित्प्रकृत्यर्थः प्रत्ययेनाभिधीयते। प्रकृतौ...धातुभिः। यत्र हि प्रकृतिनिमित्ता प्रत्ययनिवृत्तिस्तत्राप्रत्ययिकायाः प्रकृतेः प्रयोगो भवति। अग्निचित् सोमसुदिति यथा। यत्र च प्रत्ययनिमित्ता प्रकृतिनिवृत्तिस्तत्राप्रकृतिकस्य प्रत्ययस्य प्रयोगो भवति। अधुना इयानिति यथा। भा. १।२।६४ वा. ५; ख. १ पृ. २३४ प. १६–१९. प्रकृतिरूपमन्तरेण प्रकृत्यर्थानुगमः प्रत्यय-मात्रेण विशिष्टार्थ उच्यते। ... अस्य अपत्यम् इः। ... विकरणप्रत्ययाभ्यां च विना केवलमपि धातुरूपं ... वचनपुरुषोपग्रहविशेषाभिधायि दृश्यते। 'प्रत्यञ्चमत्साः' (ऋ. सं. १०।२८।४) 'सुरुचो वेन आवः' (मै. सं. २।७।१५) इति। स्वो.

२-२३६ उत्प्रेक्षते सावयवं ......। सावयवार्थदर्शनाभ्यासात् अबुधाः परमाणुशब्द-वाच्यमर्थं कलावन्तमेव प्रतिपद्यन्ते। तथाहि वक्तारो भवन्ति 'परमाणु-रेकदेशेन वा संबध्येत सर्वात्मना वा' इति। स्वो.

२-२४१ वृक्षो नास्तीति वाक्यं च ......। यथैव तिष्ठतीति क्रियाविशेषो गमन-निवृत्तिफललक्षितः (ष्ठा गतिनिवृत्तौ। धातुपाठ) न गतेरभावमात्रं तथा वृक्षो नास्तीति सत्ताविशेषः आत्मभरणाभावलक्षितः। स्वो. अस्तीति उत्पन्नस्य सत्त्वस्यावधारणम्। नि. १।३.

२-२४६ विरुद्धं चाभिसंबन्धमुदहार्यादिभिः कृतम्। आनुपूर्व्येण संनिविष्टानां यथेष्ट-मभिसंबन्धः शक्यते कर्तुं न चैतान्यानुपूर्व्येण संनिविष्टानि। अनानु-पूर्व्येणापि संनिविष्टानां यथेष्टमभिसंबन्धो भवति। तद्यथा। अनड्वाहमुद-हारि या त्वं हरसि शिरसा कुम्भं भगिनि साचीनमभिधावन्तमद्राक्षीरिति। तस्य यथेष्टमभिसंबन्धो भवति। उदहारि भगिनि या त्वं कुम्भं हरसि

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

शिरसानङ्वाहं साचीनमभिधावन्तमद्राक्षीरिति। भा. १।१।५८ वा. १; ख. १ पृ. १५२ प. २४—पृ. १५३ प. ३.

२-२५० एकमाहुरनेकार्थं......। व्यर्थेषु च मुक्तसंशयं भवति। आकृतावपि पदार्थे एकशेषो वक्तव्यः। अक्षाः पादाः माषा इति। भा. १।२।६४ वा. ५२. ख; १ पृ. २४५ प. ४—५. यथैव शब्दभेदेऽपि हस्तः करः पाणिः इत्यर्थस्यैकत्वं न निवर्तते तथैव अर्थभेदेऽपि अक्षाः पादा माषा इत्येकत्वं शब्दस्य न निवर्तते। स्वो. बहवो हि शब्दा एकार्था भवन्ति। तद्यथा। इन्द्रः शक्रः पुरुहूतः पुरन्दरः। कन्दु कोष्ठः कुशूल इति। एकश्च शब्दो बह्वर्थः। तद्यथा। अक्षाः पादा माषा इति। भा १।२।४५ वा. ९; ख. १ पृ. २१९. प. २७—पृ. २२० प. २.

२-२५१ यौगपद्यमतिक्रम्य.......। शब्दस्तु कदाचिद्यौगपद्येन अनेकमपि प्रत्याययति। श्वेतो धावति अलंबुसानां याता इति। स्वो. इह इङ्गितेन चेष्टितेन निमिषितेन महता वा सूत्रनिबन्धेन आचार्याणामभिप्रायो लक्ष्यते। ......अथवा द्विगता अपि हेतवो भवन्ति। तद्यथा। आम्राश्च सिक्ताः पितरश्च प्रीणिता भवन्ति। तथा वाक्यान्यपि द्विगतानि दृश्यन्ते। श्वेतो धावति। अलंबुसानां यातेति॥ अथवा वृद्धकुमारीवाक्यवदिदं द्रष्टव्यम्। तद्यथा। वृद्धकुमारी इन्द्रेण उक्ता वरं वृणीष्वेति। सा वरमवृणीत पुत्रा मे बहुक्षीर-घृतमोदनं कांस्यपात्र्यां भुञ्जीरन् इति। न च तावदस्याः पतिर्भवति। कुतः पुत्राः कुतो गावः कुतो धान्यम्। तत्रानया एकेन वाक्येन पतिः पुत्राः गावः धान्यमिति सर्वं संगृहीतं भवति। भा. ८।२।३ वा १; ख. ३ पृ. ३८८ प. ६—१५

२-२५२ यथा सास्नादिमान् पिण्डो गोशब्देनाभिधीयते।......वाहीकेऽपि व्यवस्थितः। गौण-मुख्ययोर्मुख्ये कार्यसंप्रत्ययः। तद्यथा। गौरनुबन्ध्यः अजोऽग्नीषोमीयः इति न वाहीकोऽनुबध्यते। कथं तर्हि वाहीके वृद्ध्यात्त्वे भवतः। गौस्तिष्ठति गामानयेति। अर्थाश्रय एतदेवं भवति। शब्दाश्रये च वृद्ध्यात्त्वे। भा. १।१।१५ वा. १. ख. १ पृ. ७१ प. १७—२१. अथ गौरित्यत्र कः शब्दः। येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः। भाष्य पस्पशा; ख. १ पृ. १ प. १०—११; क्वचिद्गोशब्दः परिच्छिन्न एव द्रव्य-विशेषे वर्तते। तद्यथा। अस्त्यत्र कांचिद् गां पश्यसीति महति गोमण्डले आसीनं यदा गोपालकं पृच्छतीति। स्वो. जातिशब्देन हि द्रव्यमप्यभिधीयते जातिरपि...। एवं हि कश्चिन्महति गोमण्डले गोपालकमासीनं पृच्छति। अस्त्यत्र कांचिद् गां पश्यसीति। भा.१।२।५८ वा. ७; ख. १ पृ. २३० प. १७—१९.

२-२५५ ... अर्थमात्रं विपर्यस्तम् ...। रूपान्तराध्यारोपस्तु अर्थान्तरे क्रियते। यथैवैकः समभावाद्रज्जुद्रव्ये प्राप्तविपर्यासः सर्पशब्दः स्वविषयं प्रयुङ्क्ते। स्वो.

२-२५६ तथा स्वरूपं शब्दानां सर्वार्थेष्वनुषज्यते। स्वं रूपं शब्दस्याशब्दसंज्ञा (पा. १।१।६८)। किमर्थं पुनरिदमुच्यते। ... शब्देनोच्चारितेनार्थो गम्यते।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

गामानय दध्यशानेत्यर्थ आनीयते अर्थश्च भुज्यते। .... इह व्याकरणे अर्थे कार्यस्यासंभवः। अग्नेर्ढक् (४।२।३३) इति न शक्यते अङ्गारेभ्यः परो ढक्कर्तुम्। भा. १।१।६८ वा. १; ख. १ पृ. १७५ प. १९–पृ. १७६ प. १.

२.२५८ सामिधेन्यन्तरं चैवमावृत्तावनुषज्यते। एकाजनेकाज्ग्रहणेषु च आवृत्तेः संख्यानादनेकाच्त्वं भविष्यति। तद्यथा। सप्तदश सामिधेन्यो भवन्तीति त्रिः प्रथमामन्वाह त्रिरुत्तमाम् (काठ. सं. १२।७) इति आवृत्तितः सप्तदशत्वं भवति। भा. शि. सू. १ वा. १०; पृ. १७. प. २३-२५. ऊहवत्। ऊहः खल्वपि। न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः। ते चावश्यं यज्ञगतेन यथायथं विपरिणमयितव्याः। तान्नावैयाकरणः शक्नोति यथायथं विपरिणमयितुम्। तस्मादध्येयं व्याकरणम्। भा. पस्पशा; ख. १. पृ. १ प. १४-१८; ऊहविषये विस्तरस्तु अस्मत्संपादित–'महाभाष्यदीपिकायां' (दीपिका पृ. ५ प. १८–पृ. ८ प. १७) द्रष्टव्यः।

२.२६१ अन्या संस्कारसावित्री कर्मण्यन्या प्रयुज्यते। 'तत्सवितुर्वरेण्यम्......' (ऋ. ३।६२।१०) इत्येषा उपनयने बटोरुपदेशे विनियुक्ता।...... तथानुप्रवचनीयहोमेप्येषा। ......ब्रह्मयज्ञेप्येषा। उपाकरणोत्सर्जनयोरप्येषा। ...... सायंप्रातःसंध्योपासनेप्येषा। सायणभाष्य–पादटिपणी. ओं भूः तत्सवितुर्वरेण्यं भूः स्वाहेति प्रथमम्। भर्गो देवस्य धीमहि भुवः स्वाहेति द्वितीयम्। धियो यो नः प्रचोदयात् स्वः स्वाहेति तृतीयम्। ... तस्य भूयोमात्रभिव भुक्त्वा ब्राह्मणाय श्रोत्रियाय प्रयच्छेत्। श्रोत्रियालाभे वृषलाय प्रयच्छेत्। ...... कौशिकसूत्र ९१।६–८, १८, १९. गायत्र्याः प्रत्यहं जपः। याज्ञ. स्मृ. १।२२. गायत्रीं जपेद् व्याहृतिपूर्विकाम्। याज्ञ. स्मृ. १।२३.

२.२६२ अर्थस्वरूपे शब्दानां स्वरूपाद् वृत्तिरिष्यते। अभिधानं पुनः स्वाभाविकम्। पा. १।२।६४ वा. ३३. इह द्वौ पक्षौ वृत्तिपक्षश्चावृत्तिपक्षश्च। स्वभावतश्चैतद्भवति वाक्यं च समासश्च। भा. २।१।१ वा. २; ख. १ पृ. ३६४ प. २-३

२.२६५,२६६,२६७ शुद्धस्योच्चारणे स्वार्थः ...। यस्त्वन्यस्य प्रयोगेण यत्नादिव ...। स्वार्थे प्रवर्तमानस्य ...। संग्रहकारः पठति — "शुद्धस्योच्चारणस्यार्थः ... निबन्धनः॥ यस्त्वन्यस्य ...। गौणार्थाभिनिवेशिनम्॥ स्वार्थे प्रवर्तमानोपि यस्यार्थे ... निमित्ती गौण इष्यते" इति। स्वो.

२.२६८ पुराराददिति भिन्नेर्थे...। यावत्पुरानिपातयोर्लट्। पा. ३।३।४. अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते। पा. २।३।२९. विरुद्धार्थाभिधायिनामितरेतरानपेक्षत्वात् गौणमुख्यभावो नाभ्युपगम्यते। तद्यथा। आराद्वीयो अपसेध शत्रून् (मै. सं. ३।१६।३) आराच्छत्रुमप बाधस्व दूरम् (ऋ. १०।४२।७; मै. सं. ४।४।१५)। स्वो.

२.२७२ नैवाधिकत्वं धर्माणां......यो हि शब्दो येनार्थेन प्रसिद्धोर्थान्तरं नीयते तदुपचरितमपि अर्थरूपं तं शब्दं प्रति न्यूनमेव। तथाहि–केषांचित् गवयो गौरिति गवयशब्दस्य आधिक्यादन्यस्य अर्थे गौणत्वमेव। स्वो. यत्र किंचित्सामान्यं कश्चिच्च विशेषः तत्रोपमानोपमेये भवतः। ...... मानं हि

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

नाम्नानिर्ज्ञातार्थमुपादीयते अनिर्ज्ञातमर्थं ज्ञास्यामीति । तत्समीपे यन्नात्यन्ताय मिमीते तदुपमानम् । गौरिव गवय इति । गौर्निर्ज्ञातः गवयोऽनिर्ज्ञातः । कामं तर्हि अनेनैव हेतुना गवयो निर्ज्ञातः स्यात्, गौरनिर्ज्ञातः । तेन कर्तव्यं स्याद् गवय इव गौरिति । बाढं कर्तव्यम् । भा. २।१।५५; ख. १ पृ. ३९७ प. ८-१२. तथा अनूपः । समुद्रः । पाटलिपुत्रं स्वर्गः । स्वो. कथं पुनः सतो नामाविवक्षा स्यात् । सतोऽपि अविवक्षा भवति । तद्यथा । अलोमिका एडका । अनुदरा कन्येति । असतश्च विवक्षा भवति । समुद्रः कुण्डिका, विन्ध्यो वर्धितकमिति । भा. १।४।२४ वा. ३; ख. १ पृ. ३२७ प. १९–२१.

२-२७४ विपर्यासादिवार्थस्य .... । एवं च केचिद्गौणार्थत्वाद् बदर्यादिषु वनस्पतिव्यपदेशं नेच्छन्ति । स्वो. लुपोऽन्यत्रापि जातेर्युक्तवद्भावो न भवति । क्वान्यत्र । बदरी सूक्ष्मकण्टका मधुरा वृक्षः इति । (भा. १।२।५२; ख १ पृ. २२८ प. १७-१८) तथा काश्यपप्रकृतयः काश्यपाः (भा. १।२।६४ वा. २०; पृ. २३८ प. २५–२७) इति । स्वो.

२-२७९ गोयुध्मन्महतां च्व्यर्थे...मुख्येऽपि दृश्यते । ओतश्च्विप्रतिषेधः (१।१।१५ वा. १)। ओदन्तो निपात इत्यत्र च्व्यन्तस्य प्रतिषेधो वक्तव्यः । अनदः अदः अभवत् अदोऽभवत् । न वक्तव्यः । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवं न भविष्यति । एवमप्यगौगौः समपद्यत गोऽभवत् अत्र प्राप्नोति । एवं तर्हि गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय इति । तद्यथा गौरनुबन्ध्यः ... इति न वाहीकोऽनुबध्यते । कथं तर्हि वाहीके वृद्ध्यात्त्वे भवतः । गौस्तिष्ठति गामानयेति । अर्थाश्रय एतदेवं भवति । यद्धि शब्दाश्रयं शब्दमात्रे तद्भवति । शब्दाश्रये च वृद्ध्यात्त्वे । भा. १।१।१५ वा. १; ख ३ पृ. ७१ प. १४-।२१. अथेह कथं भवितव्यम् । अत्वं त्वं संपद्यते त्वद्भवति मद्भवतीति । आहोस्वित् त्वद्भवसि मद्भवामीति । त्वद्भवति मद्भवतीत्येवं भवितव्यम् । मध्यमोत्तमौ कस्मान्न भवतः । गौणमुख्ययोर्मुख्ये संप्रत्ययो भवति । भा. १।४।१०७, १०८; ख. १ पृ. ३५४ प. १०-१३ आन्महतः समानाधिकरणजातीययोः (६।३।४६)। इह कस्मान्न भवति । अमहान् महान् संपन्नो महद्भूतश्चन्द्रमा इति । अन्यो महान्, अन्योऽमहान् भूतप्रकृतौ वर्तते । महान् महत्येव । तस्मादात्त्वं न भविष्यति । ... भा. ६।३।४६; ख. १ पृ. १६० प. १–६ अगौर्गौरभवत् गोऽभवत् इति प्रगृह्यसंज्ञा न भवति । अत्वं त्वं संपद्यते त्वद्भवति इति मध्यमो न भवति । अमहान्महान्संपन्नः महद्भूतश्चन्द्रमाः इत्यात्त्वं न भवति । ... पूर्वस्यामवस्थायां प्रच्युतस्य उत्तरामवस्थामप्राप्तस्य पूर्वोत्तरयोरवस्थयोः आश्रितयोः सव्यापारत्वात् । स्वो.

२-२८० महत्त्वं शुक्लभावं च प्रकृतिः प्रतिपद्यते । अन्यप्रकृतिस्त्वमहान् भूतप्रकृतौ महान् महत्येव । तस्मादात्त्वं न स्यात् । ... पा. ६।३।४६ श्लोकवार्तिक.

२-२८१ अग्निसोमादयः शब्दाः...गौणता ॥ अग्नेर्दीर्घात्सोमस्य (षत्वम्)। इतरथा ह्यनिष्टप्रसङ्गः ... अग्निसोमौ माणवकाविति । भा. ८।३।८२ वा. १, २; ख. ३

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

पृ. ४४५ प. १५–१९ येऽपि स्वरूपमात्रमेवोपादाय संज्ञिषु प्रवृत्तिनिमित्त-निरपेक्षाः कैश्चित् प्रयुज्यन्ते अग्निसोमौ माणवकाविति तत्रापि प्रसिद्धि-रपहरति । अग्निसोमादिषु हि त्रिधा प्रवृत्तिमाहुः । स्वो.

२-२८३-२८४ हरिश्चन्द्रादिषु सुटो भावाभावौ ... । ऋष्यादौ प्राप्तसंस्कारो ... । प्रस्कण्व-हरिश्चन्द्रावृषी । पा. ६।१।१५३.

२-२८७ दर्शनं सलिले तुल्यं मृगतृष्णादिदर्शनैः । असत्तु मृगतृष्णावत्...कथं पुनरसन्नाम लिङ्गं शक्यं द्रष्टुम् । मृगतृष्णावत् । तद्यथा । मृगास्तृषिता अपां धाराः पश्यन्ति, न च ताः सन्ति । भा. ४।१।३; ख. २ पृ. १९६ प. २१–२३.

२-२९१ न तथालातचक्रस्य । भवति वै प्रत्यक्षादपि अनुमानबलीयस्त्वम् । तद्यथा । अलातचक्रं प्रत्यक्षं दृश्यते । अनुमानाच्च गम्यते नैतदस्तीति । भा. ३।२। १२४ वा. २; ख. २ पृ. १२५ प. १७–१८.

२-२९२ वप्रप्राकारकल्पैश्च ...... गन्धर्वनगरेष्वपि गन्धर्वनगरं यथा । यथा गन्धर्व-नगराणि दूरतो दृश्यन्ते । उपसृत्य च नोपलभ्यन्ते...... । भा. ४।१।३; ख. २ पृ. १९६ प. २४–२५.

२-२९३ मृगपश्वादिभिर्यावान् ... । इह मुख्या मृगपश्वादयः ...... विरुद्धभक्षणप्रोक्षण-विशसनादिषु यथा साधनत्वेन व्यवतिष्ठन्ते न तथा मृन्मया दारुमया वा । स्वो. आकृतौ चोदितायां द्रव्ये आरम्भणालम्भनप्रोक्षणविशसनादीनि क्रियन्ते । भा. १।२।६४ वा. ४७; ख. १ पृ. २४४ प. १५–१६.

२-२९८–२९९ घटादिषु यथा दीपः ...संसर्गिषु तथार्थेषु.... । नात्र निर्देशस्तन्त्रम् । कथं पुनस्ते-नैव नाम निर्देशः क्रियते । तच्चातन्त्रं स्यात् । तत्कारी च भवांस्तद्द्वेषी च । नान्तरीयकत्वादत्र बहुवचनेन निर्देशः क्रियते । अवश्यं कयाचिद् विभक्त्या केनचिद्वचनेन निर्देशः कर्तव्य इति । भा. १।२।३९; ख. १ पृ. २११–२१२.

२-३०६ आख्यातं तद्धितार्थस्य ... । तदधीते तद्वेद (पा. ४।२।५९) श्रोत्रियंश्छन्दोधीते (पा. ५।२।८४) इत्येवमादिषु शब्देषु भूतस्य निमित्तस्योपलक्षणत्वेनो-पादानान्यथानुपपत्त्या शब्दार्थसंबन्धो व्यवस्थितो लोके । ...... यथाभूतः सोर्थोभिधीयते समुदायेन तथाभूतमेवोपलक्षयति । 'योश्वे यः पीठे' इति आरूढः समीपवर्ती वा स उपलक्ष्यते । स्वो. निमित्तानि हि निमित्ति-कार्यार्थानि भवन्ति । ...... अन्यत्रापि चैष न्यायो दृष्टः । क्वान्यत्र । लोके । तद्यथा । बहुष्वासीनेषु कश्चित् कंचित्पृच्छति । कतमो देवदत्तः । कतरो यज्ञदत्तः इति । स तस्मा आचष्टे । योश्वे यः पीठे इति । भा. ३।१।१; ख. २ पृ. १ प. ११–१४.

२-३०७–३०८ प्रमाणमर्धह्रस्वादौ ... । तस्यादित उदात्तमर्धह्रस्वम् (पा. १।२।३२) । अर्ध-ह्रस्वमित्युच्यते तत्र दीर्घप्लुतयोर्न प्राप्नोति । कन्या । शक्तिके ३ शक्तिके नैष दोषः । मात्रचोत्र लोपो द्रष्टव्यः । अर्धह्रस्वमात्रमर्धह्रस्वमिति । भा। १।२।३२; ख. १ पृ. २०८ प. १०–१२. इह व्याकरणे यः सर्वालपीयान् स्वर-

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

व्यवहारः स मात्रया भवति नार्धमात्रया व्यवहारोस्ति । भा. ८।१।१ वा. ३; ख. ३ पृ. ३६२ प. ५–६.

२-३११ विध्यत्यधनुषेत्यत्र ...। विध्यत्यधनुषा । (पा. ४।४।८३)। विध्यत्यकरणेनेति वक्तव्यम् । इतरथा ह्यतिप्रसङ्गः । अधनुषेति ह्युच्यमाने अतिप्रसङ्गो भवति । भा. ४।४।८३ वा. २; ख. २ पृ. ३३४ प. ७–११.

२-३१४–३१६ वाक्यात् प्रकरणादर्थात् न रूपादेव केवलात् ॥ संसर्गो विप्रयोगश्च......विशेषस्मृतिहेतवः। येषां तु धेनुरित्येष गवि रूढ इत्यागमस्तेषां तावतो धर्ममात्रस्य विवक्षा विज्ञायते । 'तदस्य परिमाणम्'। 'संख्यायाः'.... (पा. ५।१।५७,५८) इति यथा । शास्त्रेपि 'अवाद् ग्रः' (पा. १।३।५) इति यस्यानेनोपसर्गेण संबन्धः संभवति स गृह्यते । गौरिति गिरतीति । गृणातेस्तु स्वभावादर्थविरोधादनेनोपसर्गेण संबन्धो न विद्यते । स्वो. 'अवाद् ग्रः' इत्यत्र गिरतेरिति वक्तव्यम् । गृणातेर्मा भूत् । ... प्रयोगाभावात् । अवाद् ग्रः इत्युच्यते न च अवपूर्वस्य गृणातेः प्रयोगोस्ति । भा. ... १।३।५; ख. १ पृ. २८३ प.१४–१५. संयोगवच्च वियोगो व्यवच्छेदहेतुः । निर्ज्ञातसंबन्धस्य वियोगेन व्यपदेशात् । अकिशोरा धेनुः; अवत्सा, अकरभा, अबर्करा ...... इति । 'भुजोनवने' (पा. १।३।६६) इति यस्य भुजेरवनं चाशनं चार्थः तस्य ग्रहणं विज्ञायते । न कौटिल्यार्थस्य ...... विभुजत्योष्ठौ । विभुजाति जानुशिरसी इति । स्वो. अनवनकौटिल्ययोरिति वक्तव्यम् । इहापि यथा स्यात्—प्रभुजति वाससी । निभुजाति जानुशिरसी इति । तर्त्तर्हि वक्तव्यम् । न वक्तव्यम् । यस्य भुजेः अवनमशनं चार्थः तस्य ग्रहणम् । न चास्य भुजेरवनमशनं चार्थः । भा. १।३।६६; ख. १ पृ. २९० प. १५–१७. साहचर्यादवच्छेदो दृश्यते । ...... तद्यथा शास्त्रे विपराभ्यां जेः (पा. १।३।१९) अन्तरान्तरेण युक्ते (पा. २।३।४) इति । यद्यप्येको दृष्टव्यभिचारस्तथापि साहचर्याद् दृष्टव्यभिचारस्य तुल्यधर्मतां प्रतिपादयति । भाष्येप्युक्तम् । तथाहि । अस्य गोर्द्वितीयेनार्थः इति गौरेवानीयते नाश्वो न गर्दभ इति । स्वो. यद्यपि तावदयं पराशब्दो दृष्टापचारः उपसर्गश्चानुपसर्गश्च, अयं तु खलु विशब्दोऽदृष्टापचार उपसर्ग एव । तस्यास्य कोन्यो द्वितीयः सहायो भवितुमर्हति अन्यदतः उपसर्गात् । तद्यथा । अस्य गोर्द्वितीयेनार्थः इति गौरेवोपादीयते नाश्वो न गर्दभः इति । भा. १।३।१९; ख. १ पृ. २७९ प. ९–१३. प्रकरणादर्थात् तथा तत्रतत्रोक्तम्—अर्थात् प्रकरणाद्वा लोके विशेषगतिरिति । स्वो. अर्थात्प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययो भवति । भा. १।१।२३ वा. ४; ख. १ पृ. ८१ प. २–३. सामान्यशब्दाश्च नान्तरेण विशेषं प्रकरणं वा विशेषेष्ववतिष्ठन्ते । भा. १।२।४५ वा ९; ख. १ पृ. २२० प. ५–६.

२-३१९–३२० या प्रवृत्तिनिवृत्त्यर्था......विधीयमानं यत्कर्म......तथा नावाक्शिराःश्येनचितिं चिन्वीत प्रमायुकोस्य यजमानो भवति इति नेयं प्रतिषेधार्था प्रवृत्तिः । स्वो. नावाक्शिराः......भवतीति । नेयमवाक्शिरसो निन्दा । किं तर्हि । अनेन द्वारेण उच्चाशिरसः स्तुतिः क्रियते । महाभाष्यदीपिका पृ. ३७ प. २१–२२. अन्यस्तु प्रकार उपस्तूयमानो विधीयते । तथा "इमौ स्वित् पलितौ बाहू

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

क्स्वित् ब्राह्मणस्य वचो वभूव" । इदमपि नेतरस्य प्रकारस्य व्यर्थतान्वाख्यानपरं प्रवृत्तम्। अपितु प्रकारान्तरस्याप्यनेनाभ्युदयहेतुत्वमाख्यायते। स्वो. एवं च कृत्वा इदं वचनं याज्ञवल्क्यस्य एवं वक्ष्यते — 'इमौ पलितौ बाहू, क्वस्वित् ब्राह्मणस्य वचो वभूवेति । यदि ह्यर्वाक्शिरा यजमानं घातयेत्, अहमेव ज्ञात्वा नाभविष्यम्' इति । तस्मादिदमपि कर्म दृष्टमिति । अन्येषां दर्शनम् । निन्दैवैषा अवाक्शिरस इति । महाभाष्यदीपिका पृ. ३७ प. २३–२५. "हुत्वा वपामेवाग्रेभिघारयति । अथ पृषदाज्यम् । तदु ह चरकाध्वर्यवः पृषदाज्यमेवाग्रेभिघारयन्ति 'प्राणः पृषदाज्यम्' इति वदन्तः । तदु ह याज्ञवल्क्यं चरकाध्वर्युरनुव्याजहारैवं कुर्वन्तं 'प्राणं वा अयमन्तरगादध्वर्युः प्राण एनं हास्यति' इति ॥ स ह स्म बाहू अन्ववेक्ष्याह "इमौ पलितौ बाहू क्वस्विद् ब्राह्मणस्य वचो वभूव" इति । न तदाद्रियेत । ...... शतपथब्राह्मण ३।८।२।२४–२५. तथाहि — "ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति । प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते" अनेनाभिवादनोपदेशमात्रमभ्युदयाय । स्वो. तथा पूर्ववया ब्राह्मणः प्रत्युत्थेय इति पूर्ववयसोऽप्रत्युत्थाने दोष उक्तः प्रत्युत्थाने च गुणः। कथम्। ऊर्ध्वं प्राणाः ...... प्रतिपद्यत इति । स च पूर्ववयोमात्रे प्रसक्तः । अतोत्राप्यनवयवेन शास्त्रार्थः संप्रतीयते। भा. ६।१।८४ वा. ५; ख. ३ पृ. ५८ प. ५–१०. गुरुरनुगन्तव्योभिवादयितव्यश्च । वृद्धवयाः प्रत्युत्थेयः संमन्तव्यश्च । जै. सू. शाबरभाष्य ६।२।२१.

२-३२३ सर्पेषु संविद्ययापि.......न दतो गमयेदिति ॥ अङ्गुल्या प्राश्नाति यदत्त्वाय न दतो गमयेत् । यद्दतो गमयेत् सर्पा एनं घातुकाः स्युः । सर्पानेव शमयति अहिंसायै । मै. सं. १।८।५.

२-३३० क्रियार्थोपपदेष्वेवं स्थानिनां गम्यते क्रिया । क्रियार्थोपपदस्य च कर्मणि स्थानिनः। पा. २।३।१४. । वृत्तौ निरादिभिश्चैव क्रान्ताद्यर्थोवगम्यते । निरादयः क्रान्ताद्यर्थे पञ्चम्या । निरादयः क्रान्ताद्यर्थे पञ्चम्या समस्यन्त इति वक्तव्यम्। निष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः। निर्वाराणसिः। भा. २।२।१८ वा. ४; ख. १ पृ. ४१६ प. २५ पृ. ४१७ प. २.

२-३४० अर्धं पशोरिव यथा ...... ॥ भवति हि किंचिद्वाक्ये अव्यक्तम् । तच्च समासे व्यक्तम् । वाक्ये तावदव्यक्तम् । अर्धं पशोर्देवदत्तस्येति । संदेहो भवति पशुगुणस्य वा देवदत्तस्य यदर्धम् । अथवा योऽसौ संज्ञीभूतः पशुर्नाम तस्य यदर्धमिति । तच्च समासे व्यक्तं भवति। अर्धपशुर्देवदत्तस्येति। भा. २।१।१; ख. १ पृ. ३६२ प. २३–२६.

२-३४२ क्रियाप्रधानमाख्यातं नाम्नां सत्त्वप्रधानता । चत्वारि पदजातानि ...... तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति । तत्रैतन्नामाख्यातयोर्लक्षणं प्रदिशन्ति—भावप्रधानमाख्यातम् । सत्त्वप्रधानानि नामानि । नि. १।१. चत्वारि शृङ्गाणि । चत्वारि पदजातानि

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

नामाख्यातोपसर्गनिपाताश्च। ...... महान् देवः। शब्दः। भा. पस्पशा; ख. १ पृ. ३ प. १७.

२-३४३ ... चतुष्ट्वं नास्तीति वार्ताक्षौदुम्बरायणौ। इन्द्रियनित्यं वचनमौदुम्बरायणः। तत्र चतुष्ट्वं नोपपद्यते। नि. १।१-२. अयुगपदुत्पन्नानां वा शब्दानामितरेतरोपदेशः शास्त्रकृतो योगश्च। व्याप्तिमत्वात्तु शब्दस्य अणीयस्त्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके। तेषां मनुष्यवद् देवताभिधानम्। पुरुषविद्यानित्यत्वात्कर्मसंपत्तिर्मन्त्रो वेदे। नि. १।१-२. वर्ताक्षशब्दः शिवादिगणे (पा. ४।१।११२) पठ्यते.

२-३४७ उत्सर्गवाक्ये यत्त्यक्त......। आकारान्तवर्जितेभ्यो धातुभ्यः कर्मण्यण् भवति इत्येवंभूतमेव तदुत्सर्गवाक्यम्। तत्र तु कविधानानुरोधादाकारान्ता धातवः प्रकृतयोन्यत्र श्रूयमाणा विधिवाक्य एवोपसर्गस्य अप्राप्त्यनुमानं भवन्ति। एवंप्रकारेषु तावदकल्पितावकाशान्तरेषु शास्त्रेषु विकल्पा दृश्यन्ते। प्रतिषेधो विकल्पार्थस्तुल्यं चेत् प्राप्तिकारणम्। स्वो. तत्र या तावदप्राप्ते विभाषा तत्रोभयमुपस्थितं भवति नेति च वेति च। तत्र नेत्यनेन प्रतिषिद्धे वेत्यनेन विकल्पो भविष्यति। भा. १।१।४४; ख. १ पृ. १०३ प. २०-२३.

२-३४८ ब्राह्मणानां श्रुतिर्दध्नि प्रक्रान्ता माठरं विना। तद्यथा। ब्राह्मणवदस्मिन्क्षत्रिये वर्तितव्यमिति सामान्यं यद् ब्राह्मणकार्यं तत् क्षत्रियेतिदिश्यते यद्विशिष्टं माठरे कौण्डिन्ये वा न तदतिदिश्यते। भा. ६।३।६८; ख. ३ पृ. १६६ प. १८-२०. नैवेश्वर आज्ञापयति नापि धर्मसूत्रकाराः पठन्ति अपवादैरुत्सर्गा बाध्यन्तामिति। किं तर्हि। लौकिकोयं दृष्टान्तः। लोके हि सत्यपि संभवे बाधनं भवति। तद्यथा। दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति सत्यपि संभवे दधिदानस्य तक्रदानं निवर्तकं भवति। भा. १।१।४७; ख. १ पृ. ११५ प. १-४.

२-३४९ ... वाक्यं न्यायापवादयोः। 'न्यायैर्मिश्रानपवादान् प्रतीयात्'। न्याया उत्सर्गा महाविषया विधयः। अपवादा अल्पविषया विधयः। तानुत्सर्गैण मिश्रान् एकीकृतान् जानीयात्। अपवादविषयं मुक्त्वा उत्सर्गाः प्रवर्तन्ते इत्यर्थः। उवटभाष्य ऋ. प्रा. १।२३. प्रकल्प्य वापवादविषयं तत उत्सर्गोभिनिविशते। भा. २।३।४६ वा. ८; ख. १ पृ. ४६३ प. २. एकत्र प्राप्तानां बाधाभ्यासाच्च ये विकल्पभेदाः स्युः नानात्वे वाक्यानां...अङ्गाङ्गिभावः स्यात्। तथा चोक्तम्—"यद्येकं वाक्यं तच्चेदं च...ततोयं तच्छेषः। अथ नाना वाक्यं .... ततोयं तदपवादः" (भा. १।१।३ वा. २; ख. १ .पृ. ४४ प. १५-१८)। स्वो.

२-३५० द्वितीये यो लुगाख्यातस्तच्छेपमलुकं विदुः॥ ण्यक्षत्रियार्षञितो यूनि लुगणिञोः। पैलादिभ्यश्च।...अव्ययादाप्सुपः पा. २।४।५८,५९-२।४।८२ अलुगुत्तरपदे। पञ्चम्याः स्तोकादिभ्यः।...विभाषा स्वसृपत्योः। ६।३।१,२-६।३।२४.

२-३५४ संज्ञिनं देवदत्ताख्यं दत्तशब्दः कथं वदेत्॥ अथवा पूर्वपदलोपोत्र द्रष्टव्यः। अत्यन्तासिद्धः सिद्ध इति। तद्यथा। देवदत्तो दत्तः, सत्यभामा भामेति। भा.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

पस्पशा; ख. १ पृ. ६ प २४–२५. अथवा दृश्यन्ते हि वाक्येषु वाक्यैकदेशान् प्रयुञ्जानाः पदेषु च पदैकदेशान्। ... देवदत्तो दत्तः सत्यभामा भामेति। भा. १।१।४५; ख. १ पृ. १११ प. २२-२४ चतुर्थादनजादौ च लोपः पूर्वपदस्य च। अप्रत्यये तथैवेष्टः ...। देवदत्तः दत्तः। यज्ञदत्तः दत्तः। भा. ५।३।८३ श्लो. वा; ख. २ पृ. ४२५ प. २-१०.

२-३५९ एकदेशात् स्मृतिर्भिन्ने ...। उक्तं चेदम्। 'प्रतीयमानस्य अप्रत्यायकत्वात्' इति। ह्रस्वसंप्रत्ययादिति चेदुच्चार्यमाणः शब्दः संप्रत्यायको भवति, न संप्रतीयमानः। तद्यथा। ऋगित्युक्ते संपाठमात्रं गम्यते नास्यार्थो गम्यते। स्वो.

२-३६० एकदेशस्वरूपास्तु....अनुनिष्पादिनः शब्दाः...। केषांचित्तु समुदायस्वरूपे संज्ञात्वेन प्रकल्प्यमाने संज्ञान्तराण्येव परिकल्पितैकदेशस्वरूपाणि एकसाधनानि अनुनिष्पद्यन्ते। तद्यथा। आमिक्षार्थिनः क्षीरमुपाददानस्य एकसाधनत्वान्नान्तरीयकाणि वाजिनादीनि अनुनिष्पत्तिं लभन्ते। स्वो. नामकरणकाले अनुनिष्पादिनः नान्तरीयकत्वाद् वाजिनवत् सह निष्पद्यंते। तद्यथा। आमिक्षार्थिनः क्षीरमुपाददानस्य एकसाधनसाध्यमामिक्षया एककालं वाजिनमपि निष्पद्यते। एवं सत्यभामाशब्देन सह सत्यशब्दो भामाशब्दश्च अनुनिष्पाद्यते। तच्च पाणिनिर्लोपद्वारेण एवंभूतानामनुनिष्पादिनां साधुत्वमाचष्टे। न तु ज्ये इत्येवमादीनां ज्येष्ठा ज्ये इत्युच्यते विशाखा च खा इति। महाभाष्यदीपिका पृ. २४ प. २०-२५. 'एकनिष्पत्तेः सर्वं समं स्यात्, संसर्गरसनिष्पत्तेरामिक्षा वा प्रधानं स्यात्, मुख्यशब्दाभिसंस्तवाच्च' जै. सू. ४।१।९।२२-२४.

२-३६२ न ... दत्तादिवत् स्मृतिः॥ भा. ५।३।८३ श्लो. वा. ख. २ पृ. ४२५ प. २-१०.

२-३६३ कृतणत्वाश्च ...खरणसादयः। अञ् नासिकायाः संज्ञायां नसं चास्थूलात्॥ खरखुराभ्यां च नस् वक्तव्यः। खरणाः। खुरणाः। भा. ५।४।११८; ख. २ पृ. ४४३ प. १-२. पूर्वपदात् संज्ञायामगः। द्रुणसा। खरणसः। काशिका पा. ८।४।३. इह केचिदाहुः "यदि संज्ञाभिसंबन्धात् प्राङ् णत्वं तदलक्षणम्। अथोर्ध्वमभिसंबन्धात् अनित्यत्वं प्रसज्यते" स्वो.

२-३६५ नित्य एव तु संबन्धः...। सिद्धे शब्दार्थसंबन्धे। भा. पस्पशा वा. १; ख. १ पृ. ६ प. १६.

२-३६६ वृद्ध्यादीनां...अकृत्रिमोभिसंबन्धः...। सतो वृद्ध्यादिषु संज्ञाभावात् तदाश्रय इतरेतराश्रयत्वादप्रसिद्धिः। ... सिद्धं तु नित्यशब्दत्वात्। ... नित्येषु शब्देषु सतामादैचां संज्ञा क्रियते न संज्ञया आदैचो भाव्यन्ते। भा. १।१।१ वा. ८, ९; ख. १ पृ. ४० प. १८–२८.

२-३६८ शास्त्रे तु महती संज्ञा ...। अथवा महतीयं संज्ञा क्रियते। ... तत्र महत्याः संज्ञायाः करणे एतत् प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत। भा. १।१।२३ वा. ४; ख. १ पृ. ८१ प. २६–२८.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

२·३७० संख्यायामेकविषयं व्यवस्थानं द्वयोरपि ॥ यथैव तर्हि अर्थात् प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययो भवति एवमिहापि प्राप्नोति। ... उभयगतिः पुनरिह भवति।...अथवा महतीयं संज्ञा क्रियते। ....अन्वर्थसंज्ञा यथा विज्ञायेत। संख्यायतेनया संख्येति। एकादिकया चापि संख्यायते। भा. १।१।२३ वा. ४; ख. १ पृ. ८१ प. ६–२९.

२·३७१ विषयं कृत्रिमस्यापि...व्याप्नोति दूरात्संबुद्धौ...।एकवचनं संबुद्धिः। पा. २।३।४९। एकश्रुति दूरात्संबुद्धौ। १।२।३३ किमिदं पारिभाषिक्याः संबुद्धेर्ग्रहणमेकवचनं संबुद्धिराहोस्वित् अन्वर्थग्रहणं संबोधनं संबुद्धिरिति। किं चातः। यदि पारिभाषिक्याः देवाः ब्रह्माणः (पा. १।२।३८) अत्र न प्राप्नोति। अथान्वर्थग्रहणं, न दोषः। यथा न दोषस्तथास्तु। भा. १।२।३३; ख. १ पृ. २१० प. २–४. दूरात्संबुद्धौ इत्यत्र लौकिक एव प्रक्रियाशब्दः। कृत्रिमाया अपि विषयसंनिधानात् शक्नोति। कृत्रिमा तु न सर्वक्रियाविषया। तस्माद् व्याप्तिमत्त्वात् लौकिक एव क्रियाशब्द उपादीयते। क्वचित्तु न्यायावस्था क्रियते। तद्यथा। कर्तरि कर्मव्यतिहारे (पा. १।३।१४)। क्रियां हि लोके कर्म इत्युपचरन्ति। स्वो.

२·३७२ सर्वैकशेषद्वन्द्वेषु......प्रत्याश्रयमवस्थानं क्रियाणां प्रतिजानते। कथं कृत्वा एकैकस्य संयोगसंज्ञा प्राप्नोति। प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति। ... वृद्धिगुणसंज्ञे प्रत्येकं भवतः। भा. १।१।७ वा. १; ख. १ पृ. ५७ प. २०–२२. षट्प्रभृतिष्वेकशेषः परिसमाप्यते। प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति द्व्येकयोरपि भविष्याति। भा. १।२।२९ वा. ३. ख. १ पृ. २१२ प.१६–१७; पृ. ३६९ प. १५–१६.

२·३७३–३७५ भोजनं फलरूपाभ्यामेकैकस्मिन् समाप्यते.. तृप्तिफलां भुजिम्। प्रत्येकं प्रतिपद्यन्ते..। न तन्त्रेण। प्रत्ययवयं च वाक्यपरिसमाप्तिर्दृश्यते। तद्यथा। देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामिति। न चोच्यते प्रत्येकमिति। प्रत्येकं च भुजिः परिसमाप्यते। भा. १।१।१ वा. १२; ख. १ पृ. ४१ प. १०–१२. यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयति। भा. २।१।१; ख. १ पृ. ३५९ प. ६–७.

२·३७७ कर्तॄणां दर्शनं भिन्नं संभूयार्थस्य साधकम् ॥ ननु चायमप्यस्ति दृष्टान्तः समुदाये वाक्यपरिसमाप्तिरिति। तद्यथा। गर्गाः शतं दण्ड्यन्तामिति। अर्थिनश्च राजानो हिरण्येन भवन्ति न च प्रत्येकं दण्डयन्ति। भा. २।१।४ वा. १; ख १ पृ. ३७८ प. ३–५. सिद्धं तु प्रतिकारकं क्रियाभेदात् पचादीनां करणाधिकरणयोः कर्तृभावः। ... पचादीनां हि प्रतिकारकं क्रिया भिद्यते। पा. १।४।२३ वा. ७; ख. १ पृ. ३२४ प. १३–१५. उद्यमननिपातनानि कुर्वन् देवदत्तश्छिनत्तीत्युच्यते। तत्र तदा छिदिर्वर्तते। एष प्रधानकर्तुश्छेदः। एतत्प्रधानकर्तुः कर्तृत्वम्। भा. १।४।२३ वा. ११; ख. १ पृ. ३२५ प. ५–६.

२·३७८ ...शास्त्रे लिङ्गस्य दर्शनात्। अर्थित्वादेषु भेदेन वृद्धिसंज्ञा...। प्रस्थेऽवृद्धमकर्क्यादीनाम्। मालादीनां च। पा. ६।२।८७, ८८. प्रत्येकं वृद्धिगुणसंज्ञे भवत इति

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

वक्तव्यम् । किं प्रयोजनम् । समुदाये मा भूतामिति ।...प्रत्यवयवं च वाक्यपरिसमाप्तेः ॥ भा. १।१।१ वा. १०, ११, १२; ख. १ पृ. ४१ प. ५–१०.

२-३७९ शतादाने प्रधानत्वात् दण्डने शतकर्मके ...... संख्येयोर्थो न भिद्यते । समुदाये वाक्यपरिसमाप्तिः । तद्यथा । गर्गाः शतं दण्ड्यन्तामिति । अर्थिनश्च राजानो हिरण्येन भवन्ति न च प्रत्येकं दण्डयन्ति । भा. १।१।१ वा. १२; ख. १ पृ. ४१ प. १०–१४; पृ. ५७ प. २२–२४; पृ. ३७८ प. ४–५; पृ. ४६१ प. ९–१०; ख. ३ पृ. १० प. २७–२८, पृ. ११ प. १; पृ. ४३९ प. ४–५.

२-३८० ...तन्त्रेण संबन्धः समासाभ्यस्तसंज्ञयोः ॥ सहवचनं पृथगसमासार्थम् । सहग्रहणं क्रियते सहभूतयोः समाससंज्ञा यथा स्यात् । एकैकस्य मा भूदिति । कथं कृत्वा एकैकस्याभ्यस्तसंज्ञा प्राप्नोति । प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति । ... वृद्धिगुणसंज्ञे भवतः । भा. ६।१।५ वा. २; ख. ३ पृ. १० प. २६–२७.

२-३८२ वृषलैर्न प्रवेष्टव्यम्... । उभयथापि वाक्यपरिसमाप्तिर्दृश्यते । तद्यथा । गर्गैः सह न भोक्तव्यमिति प्रत्येकं च न संभुज्यते समुदितैश्च । भा. ८।४।२ वा. ३, ख. ३ पृ. ४५३ प. १६–१७.

२-३८४ व्यवायलक्षणार्थत्वादट्कुप्वाङादिभिस्तथा । अट्कुप्वाङ्नुम्व्यवायेपि (पा. ८।४।२) । तत्समुदाये व्यवायसमुदाये णत्वस्याप्रसिद्धिः । अर्केण । अर्घेण । .... किं पुनः कारणमन्यत्रापि व्यवायसमुदाये कार्यं न भवति । प्रत्येकं वाक्य-परिसमाप्तिर्दृष्टेति । ...... यद्येवमेकेन व्यवाये न प्राप्नोति । किरिणा गिरिणेति । उभयथापि वाक्यपरिसमाप्तिर्दृश्यते । तद्यथा । गर्गैः सह न भोक्तव्यमिति प्रत्येकं च न संभुज्यते समुदितैश्च । भा. ८।४।२ वा. ३; ख. ३ पृ. ४५३ प. १०–१७.

२-३८७–३९८ संहत्यापि च कुर्वाणाः भेदेन प्रतिपादिताः । उपरि द्रष्टव्यम् २-३७३–३७५.

२-३९९ अभ्यासात्प्रक्रमोन्यस्तु । पदप्रकृतीनि सर्वचरणानां पार्षदानि । नि. १।१७. पार्षदकृतिरेषा तत्रभवताम् । भा. शिवसूत्र ३,४ वा. ४; ख. १ पृ. २२ प. २३.

२-४०२ क्रियाव्यपेतः संबन्धो दृष्टः ...... । इह कारकाणां निश्रयणीपर्वणामिव साक्षात्संबन्धो नास्ति । क्रियायां त्वेकस्यां संनिपतितानि तन्निबन्धनानि क्रियाऽव्यवहितं संबन्धमनुभवन्ति । स्वो. कारकाणां क्रियया सामर्थ्यं भवति न तेषामन्योन्येन । निश्रयण्या द्वाभ्यां काष्ठाभ्यां सामर्थ्यं, न तेषामन्योन्येन । भा. २।१।३५ वा. २; ख. १ पृ. ३८६ प. २२, पृ. ३८७ प. १,

२-४०६–४०८ ...अक्षादीनामिव प्राहुः...अर्थप्रकरणादिभिः । एकश्च शब्दो बह्वर्थः । तद्यथा । अक्षाः पादाः माषाः इति । ...... सामान्यशब्दा एत एवं स्युः । सामान्यशब्दाश्च नान्तरेण विशेषं प्रकरणं वा विशेषेष्ववतिष्ठन्ते । भा. १।२।४५ वा. ९; ख. १ पृ. २२० प. २–६.

२-४१० यथैवानर्थकैर्वर्णैर्विशिष्टार्थोऽभिधीयते । संघातस्यैकार्थ्यात् सुबभावो वर्णात् । अनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेः । शिवसूत्र ५ वा. १३,१४; ख. १ पृ. ३१ प. ९–११.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

२-४३७ लक्षणाद् व्यवतिष्ठन्ते पदार्था न तु वस्तुतः। तदेव हि वस्तु लक्षणमपोद्धृत्य अध्यारोप्य वा तथाभिधीयते। आश्रीयमाणोपकारविशेषः स एव वस्त्वात्मा क्रियादिद्रव्यादिसरूपतामिव प्रतिपद्यते। तद्यथा। एका स्त्री दुहिता भगिनी भार्या माता इत्यपेक्षाविशेषैः प्रविभज्यते। स्वो. यथैका रेखा शतस्थाने शतं, दशस्थाने दश, एका चैकस्थाने। यथा चैकत्वेपि स्त्री माता चोच्यते दुहिता च स्वसा चेति। योगसूत्र व्यासभाष्य ३।१३. एवमेकस्य स्त्रीप्रत्ययस्य अविद्या मूढत्वे, द्वेषो दुःखत्वे, रागः सुखत्वे, तत्त्वज्ञानं माध्यस्थ्ये। योगसूत्र व्यासभाष्य २-२८.

२-४४४-४४५ बहुष्वपि तिङन्तेषु...निघातस्य पर्युदासः...॥ एकतिङ् यस्य वाक्यं तु...न विद्यते॥ समानवाक्ये ... निघातयुष्मदस्मदादेशा वक्तव्याः। किं प्रयोजनम्। नानावाक्ये मा भूवन् इति। अयं दण्डो हरानेन। भा. ८।१।१८ वा. ५; ख. ३ पृ. ३७३ प. ११-१२ अतिङ्वचनमनर्थकम्। किं कारणम्। समानवाक्याधिकारात्। समानवाक्य इति वर्तते, न च समानवाक्ये द्वे तिङन्ते स्तः। भा. ८।१।२८ वा. १; ख. ३ पृ. ३७४ प. २४-२५ आख्यातं साव्ययकारकविशेषणं वाक्यम्॥ ...अपर आह। आख्यातं सविशेषणमित्येव। सर्वाणि ह्येतानि क्रियाविशेषणानि। एकतिङ्॥ एकतिङ् वाक्यसंज्ञं भवतीति वक्तव्यम्। ब्रूहि ब्रूहि॥ समानवाक्ये ... हरानेन। भा. २।१।१ वा. ९, १०; ख. १ पृ. ३६७ प. १०-२०. इह पदविधौ समर्थपरिभाषोपस्थाने सति समानाधिकारे वा सूत्रकारः तिङतिङः (पा. ८।१।२८) इत्याह। वाक्यकारस्तत्प्रत्याचष्टे — अतिङ्ग्रहणमनर्थकम्। समानवाक्याधिकारात् (पा. ८।१।२८ वा.) इति। स्वो.

२-४५२ ...सप्तदशस्वनावृत्त्यापि या क्रिया। प्राजापत्येषु...। सप्तदश सामिधेन्यो भवन्तीति न सप्तदशारत्निमात्रं काष्ठमग्नावभ्याधीयते। ... प्रत्यृचं चैव हि तत्कर्म चोद्यते असंभवश्चाग्नौ वेद्यां च॥ भा. शिवसूत्र ३।४ वा. ९; ख. १ पृ. २५ प. ५-६. अभ्यासेन तु संख्यापूरणं सामिधेनीष्वभ्यासप्रकृतित्वात्। जै. सू. १०।५।२७.

२-४५४ देवदत्तादिषु भुजिः प्रत्येकं...। प्रत्यवयवं च वाक्यपरिसमाप्तिर्दृश्यते। तद्यथा। देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामिति। न चोच्यते प्रत्येकमिति। प्रत्येकं च भुजिः परिसमाप्यते। भा. १।१।१ वा. १२; ख. १ पृ. ४१ प. ११-१२.

२-४५६ एकं ग्रहणकं वाक्यं...कर्तरीति...पश्वादिषु विभज्यते। कर्तरि कृत्। पा. ३।४।६७. समुदोरजः पशुषु। पा. ३।३।६९. हरतेर्दृतिनाथयोः पशौ। पा. ३।२।२५. तत्र कर्तरि कृतो भवन्ति इति उपाध्यभावे कर्तृमात्रे साधुत्वं विज्ञायते उपाधीनां तूपादाने पशौ हस्तिसूचकयोरिति तद्विषयाणि वाक्यान्तराणि व्यवतिष्ठन्ते। स्वो. कर्तरि कृतो भवन्तीत्युच्यते अनादेशे स्वार्थविज्ञानात्। अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति। भा. ३-४-६७; ख. २ पृ. १७७ प. ९-१०.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

२.४६० कालभिन्नाश्च ... ये चाप्युष्ट्रासिकादिषु। यदि तावत् पाकविशेषानभिसमीक्ष्य यश्चौदनस्य पाको यश्च गुडस्य यश्च तिलानां बहवस्ते शब्दाः सरूपाश्च तत्र युक्तं बहुवचनमेकशेषश्च। तिङभिहिते चापि तदा भावे बहुवचनं श्रूयते। उष्ट्रासिका आस्यन्ते। हतशायिकाः शय्यन्त इति। अथ कालविशेषानभिसमीक्ष्य यश्चाद्यतनः पाको यश्च ह्यस्तनो यश्च श्वस्तनस्तेपि बहवः शब्दाः सरूपाश्च। तत्र युक्तं बहुवचनमेकशेषश्च। भा.३।१।६७; ख. २ पृ. ५७ प. १-६. भूतभविष्यद्वर्तमानोपाधियोगाद् ये भेदा लक्ष्यन्ते ये चापि कर्तृकर्म ...... आश्रया विशेषास्ते ......आस्यते आसिका इति वा भिन्नसंख्यालस्यानावृत्तेः शब्दप्रयोजका न भवन्ति। स्वो.

२.४६२-४६४ अक्षादिषु यथा भिन्नाः भञ्जिभक्षिदिविक्रियाः। एकश्च शब्दो बह्वर्थः। तद्यथा। अक्षाः पादाः माषाः इति। भा. १।२।४५ वा. ९; ख. १ पृ. २२० प. २; भा. १।३।१ वा. ६; ख. १ पृ. २५५ प. २१–२२. कथमक्षाः पादा माषा इति। नानार्थानामपि सरूपाणामेकशेषो वक्तव्यः। भा. १।२।६४ वा. २२; ख. १ पृ. २३९ प. ३–५. अक्षा भज्यन्ताम्, भक्ष्यन्ताम्, दीव्यन्ताम् इति। यथा एकः शकटाक्षः एको बिभीतकाक्षः एको देवनाक्षः ...। स्वो. उपायद्वयं च लोके शब्दप्रयोगे क्रमो वा यौगपद्यं वा। कदाचित्क्रमवतः शब्दान् प्रयुङ्क्ते। स कथम्।

अक्षो भज्यताम् अक्षो भक्ष्यताम्, अक्षो दीव्यतामिति। कदाचिदुपसंहृत्य क्रमं यौगपद्येनोच्चारयति—अक्षा भज्यन्तां भक्ष्यन्तां दीव्यन्तामिति। ... द्वावभ्युपायौ शब्दानां...... यौ लोको नातिवर्तते। महाभाष्यदीपिका पृ. ४५–४६. यदप्युच्यते क्रियापृथक्त्वे च द्रव्यपृथक्त्वदर्शनमनुमानमुत्तरत्रानेकशेषभावस्येति क्रियापृथक्त्वे खल्वपि द्रव्यैकशेषो भवतीति दृश्यते। तद्यथा। अक्षा भज्यन्तां भक्ष्यन्तां दीव्यन्तामिति। भा. १।२।१०५-१०८ वा. ७; ख. १ पृ. ३५३ प. ८–१०.

स्थिरौ गावौ भवतं वीळुरक्षो मा ईषा वि वर्हि मा युगं वि शारि। ऋ. सं. ३।५७।१७.

यथा वै द्वे वाऽऽमलके द्वे वा कोले द्वौ वाऽक्षौ मुष्टिरनुभवति। छां. उ. ७।३।१

छिन्ननास्ये भग्नयुगे तिर्यक्प्रतिमुखागते।
अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च॥
छेदने चैव यन्त्राणां योक्त्ररश्म्योस्तथैव च।
आक्रन्दे चाप्यपैहीति न दण्डं मनुरब्रवीत्॥ मनु ८।२९२–२९३.

२.४६८ भेदनिर्वचने त्वस्य प्रत्येकं वा समाप्यते। श्रुतिः...। प्रत्यवयवं च वाक्यपरिसमाप्तिर्दृश्यते। भा. १।१।१ वा. १२; ख. १ पृ ४१ प. ११; पृ. ५७ प. २१, पृ. २१२ प. १७.

२.४७० द्विष्ठानि यानि वाक्यानि....। तथा वाक्यान्यपि द्विष्ठानि भवन्ति। श्वेतो धावति। अलम्बुसानां यातेति। भा. पस्पशा वा. १८; ख. १ पृ. १४ प. १४.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

२·४७६ संप्रसारणसंज्ञायां लिङ्गाभ्यां वर्णवाक्ययोः। प्रविभागः....॥ इग्यणः संप्रसारणम्। किमियं वाक्यस्य संप्रसारणसंज्ञा क्रियते। इग्यण इत्येतद्वाक्यं संप्रसारणसंज्ञं भवतीति। आहोस्विद्वर्णस्य। इग्यो यणः स्थाने वर्णः स संप्रसारणसंज्ञो भवतीति।...विभक्तिविशेषनिर्देशस्तु ज्ञापक उभयसंज्ञात्वस्य। भा. १।१।४५ वा. १, २, ३; ख. १ पृ. १११ प. १-१४.

२·४७७ तथा द्विर्वचनेचीति...। अज्ग्रहणं तु ज्ञापकं रूपस्थानिवद्भावस्य॥...अज्ग्रहणस्यैतत् प्रयोजनमिह मा भूत्। जेघ्रीयते। देध्मीयते इति। यदि रूपं स्थानिवद्भवति ततोऽज्ग्रहणमर्थवद्भवति। अथ हि कार्यं नार्थोऽज्ग्रहणेन। भवत्येवात्र द्विर्वचनम्।......एवं तर्हि द्विर्वचननिमित्ते अचि अजादेशः स्थानिवदिति वक्ष्यामि। स तर्हि निमित्तशब्द उपादेयो न ह्यन्तरेण निमित्तशब्दं निमित्तार्थो गम्यते।......एवं तर्ह्युभयमनेन क्रियते प्रत्ययश्च विशेष्यते द्विर्वचनं च। कथं पुनरेकेन यत्नेनोभयं लभ्यम्। लभ्यमित्याह। कथम्। एकशेषनिर्देशात्। एकशेषनिर्देशोयम्। द्विर्वचनं च द्विर्वचनं च द्विर्वचनम्। द्विर्वचने च कर्तव्ये द्विर्वचनेचि प्रत्यय इति द्विर्वचननिमित्तेऽचि स्थानिवद्भवति· भा. १।१।५९ वा. ३-६; ख. १ पृ. १५५ प. १४— पृ. १५६ प. १९.

२·४७८...संग्रहेस्तमुपागते। संग्रहे एतत् प्राधान्येन परीक्षितम्। भा. पस्पशा· ख. १ पृ. ६ प. १२. शोभना खलु दाक्षायणस्य संग्रहस्य कृतिः। भा. २।३।६६ वा. १ ख. १ पृ. ४६८ प. ११.

इति द्वितीयं काण्डम् ॥

तृतीयकाण्डटिप्पणीलेखनकर्मणि पर्याप्तसमयालाभादत्रैव विरम्यते ॥

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

Additions and Corrections

A. ADDITIONS

P 21 Add at the end of f. n. 12 :

हेलाराज on वाप ३-१-२ (p. 10 Deccan College edition) quotes वाप 2·70 and has असम्भवे for असंनिधौ and अपदिश्यते for उपदिश्यते.

P 59 कारिका 3-1-24. Add f. n. 5 हेलाराज says क्वचित् पाठः। तथा सम्बन्धिसम्बन्धसंसर्गोऽपि प्रतीयते ॥

P 67 कारिका 3-2-7. वृषभदेव quoting this कारिका has पूर्वेभ्यः instead of वृद्धेभ्यः (see D. C. edition, p. 4, l. 23)

P 70 कारिका 3·3-25 सर्वं मिथ्या ब्रवीमीति नैतद्वाक्यं विवक्ष्यते cf कुमारिल (मीमांसाश्लोकवार्त्तिक–अनुमानम् 62)

'यावज्जीवमहं मौनीत्युक्तिमात्रेण बाध्यते ।'

cf the famous सुभाषितः—

"यावज्जीवमहं मौनी ब्रह्मचारी च मे पिता ।"
माता च मम वन्ध्यासीत् स्मराभोऽनुपमो भवान् ॥
(vl. of d is अपुत्रश्च पितामहः)

cf W. Ruben: Z 11 (pp 147–227): 'Indische und Griechische Metaphysik' says about this thus :—
'Ein typisch sophisticher Gedanke, (p. 149)

P 94 Add to f. n. 1

"हेलाराज is quite right because this is one of the श्लोक s quoted by पतञ्जलि in his भाष्य on पा. 3-2-123 (Vol. II 124, ll 8-9) on वर्तमाने लट्. भर्तृहरि reads अनपेक्ष्य for तत्समीक्ष्य and अवधारयन् for अविचारयन् (See reference to this in Z 11 8 W. Ruben p. 193 "...so ist im महाभाष्य Zu पाणिनि 3-2-123 वा 5 das Fragment eines (Vedantischen) skeptikers erhalten, der Bewegung für etwas un mögliches erklärt ......")

P 221 Add at the end of कारिका 2-119 : further भर्तृहरि himself in his महाभाष्यदीपिका (ABORI p. 33, l 24— p. 34, ll 1-2) observes :—

वा. ५९

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

"तत्र यथैव स्वर्गापूर्वदेवताशब्दा उपलभ्यमाना अत्यन्तापरिदृष्टाना-मर्थानामस्तित्वानुमानमेवं किं न गृह्यतेऽर्थ उपलभ्यमानः शब्दास्तित्व-स्यानुमानमिति ॥"

P 254 Add after कारिका 3-7-47 at the end :

Quoted in अस्वभाव's महायानसूत्रालङ्कारटीका.

P 260 Add at 3-7-105–107 the following :

गोकुलनाथमिश्र in his पद्वाक्यरत्नाकर (p. 519) says :—

यदाह हरिरेव—

"उत्पत्तेः प्रागसद्भावो बुद्ध्यवस्थानिबन्धनः ।
अवशिष्टः सताऽन्येन कर्ता भवति जन्मनः ॥

कारणं कार्यभावेन यदा वा व्यवतिष्ठते ।
कार्यशब्दं तदा लब्ध्वा कार्यत्वेनोपजायते ॥

यथाऽहेः कुण्डलीभावो व्यग्राणां वा समग्रता ।
तथैव जन्मरूपत्वं सतामेके प्रचक्षते ॥"

P 262 Add at 3-7-126 the following :—

भोजराज in his शृङ्गारप्रकाश (Vol. I p. 155). quotes this कारिका with the following introductory remarks thus:—

'ननु च निमित्तहेतोः कारकत्वात् कारकस्य च प्रयोजकपरतन्त्रत्वात् इह (चर्मणि द्वीपिनं हन्ति......) कथं कारकत्वमिति । उच्यते । द्विविधः कारकहेतुः । प्रवृत्तप्रेरकः अप्रवृत्तप्रेरकश्च । तत्राद्यो णिज्विषयः । इतरस्तु विध्याद्यात्मको निमित्तात्मकश्च । तयोश्च प्रथमो लिङ्लोट्तव्यादिवाच्यः । तदुक्तम्—

"द्रव्यमात्रस्य तु प्रेषप्रच्छादेर्लोड् विधीयते ।
सक्रियस्य प्रयोगस्तु यदा स विषयो णिचः ॥"

निमित्तात्मकस्तु क्रियाशल्यत्वात सप्तमीवाच्यो नैमित्तिकमधिकरणमिति विभक्तमधिकरणम् ॥

P 297 Add to कारिका 3·14. 564. हेलाराज with regard to नारब्धं सूत्रं व्याकरणान्तरे says :—

'आपिशलाश्च काशकृत्स्नाश्च सूत्रमेतन्नाधीयते ॥'

Add after कारिका 3·14·580 the following :—

3·14·593 ऊहस्तथोपमानानां अङ्गवन्नोपलभ्यते ॥ हेलाराज quotes :-

"तथा चोहविदामाम्नायः 'अङ्गानि ज्ञातिनामानि' which is itself a quotation in महाभाष्यदीपिका of भर्तृहरि (A B O R I p. 7, ll 10-11).

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

P 303 Add at the end of कारिका 1·8.

"यथा बुद्धेन भाषितम् :—
रूपं बुद्बुदोपमं
वेदना फेनोपमा
संज्ञा मरीचिकोपमा
संस्काराः पर्णोपमाः
विज्ञानं मायोपममिति ॥
(See अभिधर्मसमुच्चय p. 15.)

P 309 Add :—

1-77 and 1-84 quoted by अभिनवगुप्त in his लोचन on ध्वन्यालोक of आनन्दवर्धन (pp 134 and 133) of काशीसंस्कृतग्रन्थमाला, १९४०.

P 328 Add at the end of कारिका 2-312.

"See स्वोपज्ञ on वाप 1-137 'सतो विवक्षा पारार्थ्यम्' (p. 122 of चारुदेवशास्त्री's edition)

'प्रधानस्यान्यथासिद्धौ परार्थत्वात् दृश्यमानेषु
ज्योतिष्षु कालविशेषपरिच्छेदे सति तत् क्रियते।
काकेभ्यो दधि रक्ष्यतामिति उपघातप्रतिषेधस्य
चिकीर्षितत्वात् काकेषु असत्स्वपि श्वादिभ्यो रक्ष्यते।
पात्राणि संमृज्यन्तामिति भुजिक्रियाङ्गोपसंहारत्वात्
पात्राभावेऽपि अङ्गान्तराण्युपसंह्रियन्ते।

P 365 Add to 21 :—

नागेश in his स्फोटवाद (p. 75) quotes the following कारिका as from हरि; but it is found in स्फोटतत्त्वनिर्णय of शेषकृष्ण as verse 11 :—

"ननु वर्णसत्त्वे मानाभावः। वक्ष्यमाणरीत्याऽनुभवेन च वर्णस्थले ध्वनिनामावश्यकत्वेन तैरेव स्फोटाभिव्यक्तिसम्भवे ध्वनिस्फोटयोर्मध्ये वर्णाङ्गीकारे गौरवादिति चेत् भवन्तु त एव वर्णाः। दूरगतकोलाहलश्रवणे घत्वादीनां श्रूयमाणध्वनिगतानां दूरत्वदोषेण अनभिव्यक्ति सम्भवात्। त एव च तद्व्यञ्जकाः। तदेवमेकस्मात् वाक्यात् पदाद्वा अयमर्थो बुद्ध इत्यनुभवात् अखण्डः स्फोटो वाचकः। स च तत्तत्पदवाक्यभेदेन अनन्त इत्येके। परे तु स लाघवात् सर्वत्रैकः। प्रतीतिवैलक्षण्यं च व्यञ्जकवैलक्षण्यकृतम्। उक्तं च हरिणा—

'यथा मणिकृपाणादौ रूपमेकमनेकधा।
तथैव ध्वनिषु स्फोट एक एव विभिद्यते'॥ इति॥

न च स्फोटस्यैकत्वात् भेदनिबन्धनसादृश्यव्यवहारानापत्तिः व्यञ्जकभेदेनैव भेदोपपत्तेरित्याहुः।

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

P 368 Add at the end of 28 as 29, the following:—

यद्यपि भर्तृहरिणोक्तं—कल्पना हि ज्ञानम् । प्रत्यक्षमपि ज्ञानम् । प्रत्यक्षज्ञाने कल्पनाज्ञानं प्रतिषेधतान्यस्मिन् ज्ञाने ज्ञानान्तरमस्तीति प्रतिपादितम् । प्राप्तिपूर्वका हि प्रतिषेधा भवन्तीति न्यायात् (Cf शबर on जैसू 10-8-11-22) तत् सर्वमपास्तम् । (तर्कसोपान of विद्याकरशान्ति, a minor Buddhist text edited by G. Tucci, p. 277, where in f. n. 3 he remarks—'I could not find this sentence in वाक्यपदीय.) Obviously it cannot be found in वाप, metrical as it is, the passage being in prose. It can be, however, found in भर्तृहरि's स्वोपज्ञ on वाप or in his दीपिका on महाभाष्य. If even there it is not traced, it may be in some lost prose work of भर्तृहरि; or else it is a misquotation, fathered upon भर्तृहरि, as we find often in some commentaries.

P 371 Add under अनुवादः—

A good definition of अनुवाद by काशिका on पा. 2-4-3 अनुवादे चरणानाम् :—

प्रमाणान्तरावगतस्य अर्थस्य शब्देन संकीर्तनमात्रमनुवादः

P 372 Add at the end of the word अपोद्धार & its meaning, the following from लोचन on ध्वन्यालोक (p. 21):—"कोयं ध्वनिर्नाम । अखण्डबुद्धिसमास्वाद्यमपि काव्यमपोद्धारबुद्ध्या यदि विभज्यते तथापि ध्वनिशब्दवाच्यः कश्चिदतिरिक्तार्थो लभ्यत इति नामशब्देनाह ।

P 376 Add under आविर्भाव

II Attribute of masculinity; संग्रह quoted by हेलाराज on वाप 3·13·1 "...... आविर्भाव इति पुंस्त्वम्......"

P 391 Add under प्रणव :—

'The extract is originally from स्वोपज्ञ of भर्तृहरि. This प्रकृतिसर्वनामत्वात् is the same as यास्क's प्रकृतिसार्वनाम्न्याच्च (निरुक्त 7·4)

P 423 Add at the end of 1·1
for आदि and निधन
cf गीता 2·28

'अव्यक्तादीनि भूतानि......
अव्यक्तनिधनान्येव......॥'

* * *

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

CORRECTIONS

Page and Context		Incorrect	Correct
p. 14	कारिका 145	० मव्यवच्छिन्नां	० मप्यविच्छिन्नां

p 38 The three कारिकाs 2·265-267 are quotations from संग्रह of व्याडि according to स्वोपज्ञ (Madras MS) where the reading is उच्चारण स्यार्थे for उच्चारणे स्वार्थः of our text.

Page and Context		Incorrect	Correct
p 54	कारिका 2·453	सकृच्छ्रुता	सकृच्छ्रुता
p. 59	कारिका 3·1·12	शिवेषो	विशेषो
p. 70	कारिका 3·3·31	योग्यता संवित्	योग्यतासंवित्
p. 76	कारिका 3·5·9	गुणस्याविश्यते	गुणस्यापीष्यते
p. 83	कारिका 3·7·64	प्रतिक्रिये	प्रति क्रिये
p. 103	कारिका 3·9·59	तिस्रोभावस्य	तिस्रो भावस्य
p. 107	कारिका 3·9·112	सत्तामिन्द्रिय०	सतामिन्द्रिय०
p. 113	कारिका 3·13·1	स्तन०...॥२॥	स्तन०...॥१॥
p. 114	कारिका 3·13-17	० प्रवृत्या	० प्रवृत्त्या
p. 116	कारिका 3·14·4	कुत्सितत्त्वेन	कुत्सितत्वेन
p. 118	कारिका 3·14·31	विप्णुमित्रा	विष्णुमित्रा
p. 121	कारिका 3·14-71	विनैषिपुत्राभ्यां	विनेषिपुत्राभ्यां
p. 123	कारिका 3·14·84	प्रयुज्येरन्नपत्ये	प्रयुज्येरन्नापत्ये
	(See हेलाराज-नियमेन अपत्यादीनां अभिधानं न प्रतीयेत।)		
p. 124	कारिका 3·14·99	अवुध०	अबुध०
p. 125	कारिका 3·14·116	दास्याः पतिरिति	दास्याःपतिरिति
p. 174		क्रियाविशेषचने	क्रियाविशेषवचने
p. 176		तस्माद्य	तस्माद्यः
p. 179·	Read न्यायप्रस्थान ० before न्यूनेषु च		
p. 183		भधुरायामिवं	मधुरायामिव
p. 192		हातव्याादषु	हातव्यादिषु
p. 206	कारिका 1-84	वायूरूपो	वायुरूपो
p. 213	write the कारिका number 1-131 before अपि प्रयोक्तुरातमानम्		
p. 228	कारिका 2-237	भावनां	भावानां

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

p. 310	कारिका 1- 84	नादेनाहित बीजायां	नादेनाहितबीजायां
p. 326		यथा याऽर्थौ	यथा योऽर्थौ
pp. 366–367		२४ शब्दतत्त्वविदः and सदपीच्छाक्यचः (wanted small type)	
p. 444		तथा अहिधातुं	तथा आहिधातुं
p. 448	Under 205	० वणाान	० वर्णानि

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

॥ भर्तृहरिकृतव्याकरणप्रशस्तिः ॥

आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।
प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः॥

तद् द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते॥

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः॥

यदेकं प्रक्रियाभेदैर्बहुधा प्रविभज्यते।
तद् व्याकरणमागम्य परं ब्रह्माधिगम्यते॥

वा. प. १·११, १४, १६, २२.

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

Vidya Niwas Mishra Collection, Varanasi. Courtesy, Dayanidhi Mishra ji

CC.0 Digitized by Arya Samaj Foundation, Chennai and eGangotri

Vidya Niwas Mishra Collection, Varanasi. Courtesy. Dayanidhi Mishra ji